118

B. D. HOME LIBRARY.
DAYALBAGH.
NO. II 118 / B50
DATE
PRICE 4/-

Indira Gandhi National
Centre for the Arts

118

B. D. HOME LIBRARY.
DAYALBAGH.
NO.
DATE
PRICE

DATA ENTERED
Date 01/07/08

SANS
491.25
V4A

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-408
Date: 21.2.08

Indira Gandhi National Centre for the Arts

B. D. HOME LIBRARY.
DAYALBAGH.
NO. ....
DATE..........
PRICE..........

श्रीगणेशाय नमः ।

अथ प्रदीपसहिते व्याकरणमहाभाष्ये चतुर्थोऽध्यायः ।

ङ्याप्प्रातिपदिकात् ॥ १ ॥ ङ्याप्प्रातिपदिकग्रहणं किमर्थम् । ङ्याप्प्रातिपदिकात्स्वादयो यथा स्युः । धातोर्मा भूवन्निति । नैतदस्ति प्रयोजनम् । धातोस्तव्यदादयो विधीयन्ते ते ऽपवादत्वाद्बाधका भविष्यन्ति । तिङन्तात्तर्हि मा भूवन्निति । एकत्वादिष्वर्थेषु स्वादयो विधीयन्ते । ते चात्र तिङा उक्ता एकत्वादय इति कृत्वा उक्तार्थत्वान्न भविष्यन्ति ॥ टाबादयस्तर्हि तिङन्तान्मा भूवन्निति । स्त्रियां टाबादयो विधीयन्ते । न च तिङन्तस्य स्त्रीत्वेन

श्रीगणेशाय नमः ॥ ङ्याप्प्रातिपदिकात् ॥ ङ्याप्प्रातिपदिकग्रहणं किमर्थमिति । परश्चेति वचनात्परे भवन्तो वक्ष्यमाणाः प्रत्ययाः प्रत्ययार्थसंबन्धयोग्यार्थाभिधायिनीं ङ्याप्प्रातिपदिकलक्षणामेव प्रकृतिमाक्षेप्स्यन्ति सति च पञ्चमीनिर्देशे परश्चेति प्रत्याख्यातमसति त्विह पञ्चमीनिर्देशे वक्ष्यमाणप्रत्ययपरत्वप्रतिपादनपरत्वान्नास्ति प्रत्याख्यानम् । सति वा प्रत्याख्याने प्रत्ययद्योत्यवाच्यार्थसंबन्धयर्थाभिधायिप्रकृत्याक्षेपः सिद्ध इति प्रश्नः । धातोर्मा भूवन्निति । असतीह प्रकृतिनिर्देशे धात्वधिकाराद्धातोरेव स्युः । वासरूपविधिश्च स्यात् । अथ वा प्रत्ययपरत्वेन प्रकृतिमात्राक्षेपे धातोरपि स्युः । तत्र यथा कर्तृकर्मणोर्लकार उत्पद्यते साधनाश्रयसंख्यायां च तिङामुत्पत्तिः कर्त्रादिषु तृच्तव्यादीनां च तथा स्वादयोपि स्युरिति भावः । धातोरिति । धातुग्रहणं निवृत्तम् । तत्र प्रकृतिमात्राद्विधीयमानाः स्वादय उत्सर्गास्तव्यदादयस्तु प्रकृतिविशेषाश्रयेण विधानादपवादा इति भावः । तिङन्तादिति । कर्मादयः स्वादीनामर्थाः । तत्र यथा पुत्रीयशब्दादन्तर्भूतकर्मक्रियावाचिनः कर्तरि लकार उत्पद्यते तथा पचतिशब्दात्कर्तृविशिष्टक्रियावाचिन. कर्मादिषु द्वितीयादयः स्युः यद्वैकत्वादिष्वपि विभक्त्यर्थेषु यथैको द्वौ बहव इति प्रकृत्यभिहितेष्वपि भवन्त्येवं तिङाभिहितेष्वपि स्युरिति भावः । एकत्वादिष्विति । संख्या विभक्त्यर्थः सा च तिङैवाभिहितेत्युक्तार्थत्वात् स्वादयो न भवन्त्येकादिभ्यस्तु वचनग्रहणाद्यत्नात्संख्यावाचिभ्योपि प्रथमा भवति न च पचतिशब्दात्कर्त्रभिधायिनः कर्मादिषु द्वितीयादीनामुत्पत्तिर्युक्ता । न ह्येकक्रियापेक्षोभिन्नसाधनाभिधायिनोरेकस्मिन् पदेऽनुसहायभावो युक्तः । पुत्रीययशब्दस्तु जीवत्यादिधातुवद्विशिष्टक्रियावाचीति ततः कर्तरि लकारोत्पत्तिरविरुद्धा । अनभिहिताधिकाराच्च तिङभिहिते साधने स्वाद्यनुत्पत्तिः । टाबादय इति । यथा साधनाश्रयसंख्याभिधायित्वं तिङां तथा तद्गतलिङ्गाभिधायित्वमपि स्यादिति भावः । न च तिङन्तस्येति । क्रियाप्रधानत्वादाख्यातस्य क्रियायाश्चासत्वभूतत्वात्स-

योगोस्ति। अणादयस्तर्हि तिङन्तान्मा भूवन्निति। अपत्यादिष्वर्थेष्वणादयो विधीयन्ते। न च तिङन्तस्यापत्यादिभिर्योगोस्ति। अथापि कथं चिद्योगः स्यात्। एवमपि न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न तिङन्तादणादयो भवन्तीति। यदयं क्व चित्तद्धितविधौ तिङ्ग्रहणं करोति। अतिशायने तमबिष्ठनौ, तिङश्चेति। अत उत्तरं पठति ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसंज्ञार्थम् *। ङ्याप्प्रातिपदिकग्रहणं क्रियते। अङ्गभपदसंज्ञार्थम्। अङ्गभपदसंज्ञा ङ्याप्प्रातिपदिकस्य यथा स्युरिति। क्व पुनरिहाङ्गभपदसंज्ञार्थेन ङ्याप्प्रातिपदिकग्रहणेनार्थः। टाबादिषु। नैतदस्ति प्रयोजनम्। ग्रहणवद्भ्यष्टाबादयो विधीयन्ते उगितो ङीब्भवति। अतष्टाब्भवतीति। यत्तच्छब्दरूपं गृह्यते। तस्मादुत्पत्तिस्तस्यैताः संज्ञा भविष्यन्ति। अथापि कश्चिदग्रहणः। एवमपि न दोषः। स्त्रियां

स्वधर्मेण लिङ्गेनायोगः। न च द्रव्यधर्मलिङ्गग्रहणयोग्यत्वनियतत्वाच्छब्दशक्तीनामिति भावः। तदुक्तं हरिणा। एकत्वेपि क्रियाख्याते साधनाश्रयसंख्यया। भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रयः॥ तस्मादवस्थितेप्यर्थे कस्य चित्प्रतिबध्यते। शब्दस्य शक्तिर्नत्वेष शास्त्रेणाख्यायते विधिरिति॥ शोभनं पचतीत्यादावुक्तक्रियाविशेषणस्य नपुंसकत्वं न तु क्रियायाः। पचतिरूपमित्यादौ तु रूपबाद्यन्तार्थस्य क्रियायाः शब्दशक्तिस्वाभाव्यादेव नपुंसकत्वम्। नानारूपा हि शब्दानां शक्तयो न सामान्यतो दृष्टेनानुमानेन व्यवस्थापयितुं शक्यन्ते। अनेनैव न्यायेन धातोष्टाबाद्यनुत्पत्तिर्व्याख्येया। अणादय इति। यथैव गर्गस्यापत्यमित्यपत्यवत्संबन्धादिसंभवः। एवं पचति यस्तस्यापत्यमिति सर्वनामप्रत्यवमृष्टतिङन्तार्थाधारसबंन्धसंभव इति भावः। ननु षष्ठ्यन्तादपत्ये प्रत्ययो विधीयते सर्वनाम्नश्चात्र षष्ठ्यन्तत्वं न तिङन्तस्य। नैष दोषः। गर्गस्यायमित्यत्रापि वाक्यगोचरैव षष्ठी संबन्धप्रदर्शनायोपादीयते। प्रत्ययस्तु प्रातिपदिकादेवोत्पद्यते। लुग्विधानद्वारेण ह्याचार्यः स्वाभाविकीं प्रत्ययस्यानुत्पत्तिमाचष्टे। तस्येति तु षष्ठीनिर्देशः सति संबन्धे प्रत्ययविधानार्थो न तु षष्ठ्यन्तात्प्रत्ययोत्पत्त्यर्थः। न चेति। क्रियाप्रधानत्वादाख्यातस्य तस्याश्चासत्त्वभूतत्वादपत्यादिभिर्योगाभावः। साधनस्यापि क्रियां प्रति गुणभावादपत्यादिभिर्योगो नास्ति शब्दान्तरपरामृष्टस्य साधनस्यापत्यादियोगसंभवेपि तिङन्तप्रतिपाद्यस्य साधनस्यापत्यादिभिर्योगाभावः। नहि यथा पाचकस्यापत्यमिति संबन्धप्रतिपत्तिरेवं पचत्यपत्यमिति। अथापीति। सर्वनामप्रत्यवमृष्टस्यार्थस्यापत्यादियोगसंभवादिति भावः। धातोरप्यणाद्युत्पत्तिर्धात्वर्थस्यापत्यादियोगाभावादेव प्रतिक्षिप्ता वाक्यार्थस्याप्यसत्त्वभूतत्वाच्छक्तिलिङ्गापत्यादियोगाभावाद्वक्ष्यमाणप्रत्ययानुत्पत्तिरभिधानीया। भाष्यकारेण तु न्यायस्योक्तत्वात् पृथगुपन्यासो न कृतः। अङ्गभपदसंज्ञार्थमिति। यस्मात्प्रत्ययविधिरित्यत्र विधिग्रहणाद्यस्य प्रत्ययविधौ शब्देनाश्रयणं तस्याङ्गसंज्ञा। भपदसंज्ञे अप्युत्तरत्र यस्मात्प्रत्ययविधिरित्यस्यानुवर्तनात्तस्यैवेति भावः। भाष्यकार एतत्प्रयोजनं निराकर्तुमाह क्व पुनरिति। ग्रहणवद्भ्य इति। ग्रहणमुपादानं तच्च क्वचित्साक्षात् यथाजाद्यतष्टाबित्यजादीनां क्वचित् संज्ञाद्वारेण यथात्रैवाकारेणादन्तानाम्। क्वचिदनुबन्धनि-

टाबादयो विधीयन्ते । यत्तच्छब्दरूपं स्त्रियां वर्तते । तस्मादुत्पत्तिस्तस्यैताः संज्ञा भविष्यन्ति । अणादिषु तर्हि । अणादयोपि ग्रहणवद्भ्यो विधीयन्ते गर्गादिभ्यो यञ्, नडादिभ्यः फगिति । यत्तच्छब्दरूपं गृह्यते तस्मादुत्पत्तिस्तस्यैताः संज्ञा भविष्यन्ति । अथापि कश्चिदग्रहणः । एवमपि न दोषः । अपत्यादिष्वर्थेष्वणादयो विधीयन्ते । यत्तच्छब्दरूपमपत्यादिष्वर्थेषु वर्तते तस्मादुत्पत्तिस्तस्यैताः संज्ञा भविष्यन्ति । स्वार्थिकेषु तर्हि । स्वार्थिका अपि ग्रहणवद्भ्यो विधीयन्ते । यावादिभ्यः कन्, प्रज्ञादिभ्योऽणिति । यत्तच्छब्दरूपं गृह्यते तस्मादुत्पत्तिस्तस्यैताः संज्ञा भविष्यन्ति । यस्तर्ह्यग्रहणः । शुक्लतमः शुक्लतरः कृष्णतमः कृष्णतर इति । अत्रापि न यावच्छुक्लः तावच्छुक्लतरः प्रकृष्टः शुक्लः शुक्लतरः । यत्तच्छब्दरूपं प्रकृष्टे वर्तते तस्मादुत्पत्तिस्तस्यैताः संज्ञा भविष्यन्ति । स्वादिषु तर्हि । एकत्वादिष्वर्थेषु स्वादयो विधीयन्ते । यत्तच्छब्दरूपमेकत्वादिष्वर्थेषु वर्तते तस्मादुत्पत्तिस्तस्यैताः संज्ञा भविष्यन्ति । कथं पुनरिहोच्यमानाः स्वादयएकत्वादिष्वर्थेषु शक्या विज्ञातु, मेकवाक्यत्वात् । एकं वाक्यं तच्चेदं च । यद्येकं वाक्यं तच्चेदं च किमर्थं नानादेशस्थं क्रियते । कौशलमात्रमेतदाचार्यो दर्शयति । यदेकं वाक्यं सन्नानादेशस्थं करोति । अन्यदपि किंचित्संग्रहीष्यामीति । यञ्छयोश्च लुगर्थम् * । यञ्छयोस्तर्हि लुगर्थं ङ्याप्प्रातिपदिकग्रहणं क्रियते । कंसीयपरशव्यशब्दयोर्यञञौ लुक्चेति ङ्याप्प्रातिपदिकात्परस्य

देशोपलक्षितसंज्ञानिर्देशेन, यथोगितश्चेति । अत्र स्वत्रयर्थाभिधायिशब्द आक्षिप्तोऽकारेणोगिता च विशेष्यते । अथापीति । सामर्थ्याक्षिप्तस्याप्युपादानमस्त्येव । अभ्युपगम्यवादेन तु दर्शयति । वयसि प्रथम इत्यादौ सामर्थ्याक्षिप्ता प्रकृतिरथ त्वत्राप्यत इत्यनुवर्तनाद्वर्णग्रहणे च सर्वत्र तदन्तविधिसंभवादकारान्तस्य ग्रहणं तदा नास्ति कश्चिदग्रहणष्टाबादिः । यत्तच्छब्दरूपमपत्यादिष्विति । परार्थाभिधानं वृत्तिरिति प्रकृतिरप्यपत्यादिषु वर्तते । शुक्लतर इति । न ह्यत्र शब्देन प्रकृतिरुपात्तेति भावः । न यावादिति । यावत्तावच्छब्दौ निपातौ पर्यायतां द्योतयतः । स्वादिषु तर्हीति । प्रकरणोत्कर्षाद्बहुषु बहुवचनमित्यादेः स्वादिविधिवाक्यस्य च भिन्नवाक्यतां मन्यते । एकत्वादिष्विति । आकाङ्क्षायोग्यतावशाद्भिन्नप्रकरणपठितानामप्येकवाक्यत्वमिति भावः । तत्र त्रिके प्रातिपदिकार्थे चतुष्केपि पक्षे स्वादय एकत्वादीनां वाचका पञ्चके तु पक्षे चतुष्के च द्योतकाः । तत्रैकत्वादिषु द्योतका वाचका वा विधीयन्त इत्यर्थः । यत्तदिति । द्योतकपक्षे ऽयमर्थः । एकत्वादिषु यद्वर्तते तस्मात् स्वादय एकत्वादीनां द्योतका उत्पद्यन्ते । वाचकपक्षे त्वयमर्थः । एकत्वादिषु स्वादिवाच्येष्वाधेयेषु यच्छब्दरूपं तदाधारार्थवाचि तस्मात् स्वादय एकत्वादीनां वाचका उत्पद्यन्ते । अन्यदपीति । तिङ्विधिवाक्येनापि सहैकवाक्यत्वं यथा स्यादित्येवमर्थमित्यर्थः । अङ्गानां हि प्रधानसंनिधावुपदेशार्हाणां प्रकरणोत्कर्षेणोपदेशः सर्वप्रधानसंबन्धार्थं । यञ्छ-

Indira Gandhi National Centre for the Arts

लुग्यथा स्यात् । आक्रियमाणे हि ङ्याप्प्रातिपदिकग्रहणे प्रकृतेरपि लुक् प्रसज्येत । एतदपि नास्ति प्रयोजनम् । यथापरिभाषितं प्रत्ययस्य लुक्श्लुलुपो भवन्तीति प्रत्ययस्य भविष्यति । एवमप्युकारसकारयोः प्रसज्येत । कमेः सः कंसः । परान् शृणातीति परशुरिति उणादयोऽव्युत्पन्नानि प्रातिपदिकानि । वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे च प्रत्ययविधौ तत्सम्प्रत्ययार्थम् * । वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे तर्हि प्रत्ययविधौ तत्सम्प्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं क्रियते । वृद्धात्, अवृद्धात्, अवर्णान्तात्, अनुदात्तादेः, द्व्यच इति, एतानि ङ्याप्प्रातिपदिकविशेषणानि यथा स्युरिति । अथाक्रियमाणे ङ्याप्प्रातिपदिकग्रहणे कस्यैतानि विशेषणानि स्युः । समर्थविशेषणानि । तत्र को दोषः । उदीचां वृद्धादगोत्रात् । इह च प्रसज्येत । ग्लानां ब्राह्मणानामपत्यमिति । एतद्धि समर्थं वृद्धम् । इह च न स्यात् । ग्लयोर्ब्राह्मण्योरपत्यमिति । एतद्धि समर्थमवृद्धम् । वृद्ध । अवृद्ध, प्राचामवृद्धात्फिन्बहुलम् । इह च प्रसज्येत । ग्लयोर्ब्राह्मण्योरपत्यमिति । एतद्धि समर्थमवृद्धम् । इह च न स्यात् । ग्लानां ब्राह्मणानामपत्यमिति । एतद्धि समर्थं वृद्धम् । अवृद्ध । अवर्ण, अत इञ्भवति । इहैव स्यात् । दक्षस्यापत्यं दाक्षिरिति । एतद्धि समर्थमकारान्तम् । इह न स्यात् । दक्षयोरपत्यं दक्षाणामपत्यमिति । एतद्धि समर्थमनवर्णान्तम् । अवर्ण । स्वर, अनुदात्तादेरञ्भवति । इह च प्रसज्येत । वाचो विकारस्त्वचो

योश्चेति । वार्तिककारस्य समुच्चयार्थश्चशब्दो भाष्यकारेण तु पूर्वप्रयोजनस्य दूषितत्वात्तर्ह्यर्थे चशब्दो व्याख्यातः । प्रकृतेरपीति । यच्छयोर्या प्रकृतिः कंसशब्दः परशुशब्दश्च तदवयवस्यापि प्रत्ययस्येत्यर्थः । इतरश्च प्रकृतेरिति स्थानषष्ठीं मत्वाह एतदपीति । इतरः पूर्वमेवार्थं स्पष्टीकरोति एवमपीति । उणादय इति । अतः कृकमिकंसेति कमिग्रहणेनैव कंसग्रहणे सिद्धे कंसशब्दोपादानं ज्ञापकं क्व चिदेषां व्युत्पत्तिकार्यं न भवतीति । यञञोस्तु विधानसामर्थ्याल्लुङ् भवतीति यच्छयोरेव भविष्यतीत्यर्थः । वृद्धावृद्धेति । अत्रापि वार्तिककारस्य चशब्दः समुच्चये भाष्यकारस्य तु तर्ह्यर्थः । वृद्धादयो लक्षणं निमित्तं यस्य प्रत्ययविधेस्तस्मिन् वृद्धादीनि ङ्याप्प्रातिपदिकविशेषणानि यथा स्युरित्यर्थः । अथेति । प्रत्ययार्थसंबन्धयोग्यार्थाभिधायित्वाद् ङ्याप्प्रातिपदिकस्यैव विशेषणानि भविष्यन्तीति प्रश्नः । समर्थविशेषणानीति । समर्थानां प्रथमादित्यधिकाराद्विभक्तिमन्तरेण सामर्थ्यानवगमाद्विभक्त्यन्तस्यैव विशेषणानि स्युरित्यर्थः । ङ्याप्प्रातिपदिकग्रहणे तु सति तदुपादानसामर्थ्यात्तद्विशेषणानि वृद्धादीनि भवन्ति । ग्लानामिति । ननु वृत्तावभेदैकत्वसंख्योपजननान्नास्ति द्विवचनबहुवचनान्तात्प्रत्ययः । नैष दोषः । क्व चिदादेशादिवशात्संख्याविशेषोऽपि प्रतीयते । यथा तावको मामक इति । एवमिहापि फिञ् विधीयमानो बहुवचनमन्तरेण वृद्धत्वाभावाद्बहुत्वं गमयेत् । प्रकरणादिवशाद्वा । तदुक्तम् । भेदः संख्याविशेषो वा व्याख्या-

विकार इति। एतद्धि समर्थमनुदात्तादि। इह च न स्यात्। सर्वेषां विकार इति। एतद्धि समर्थमुदात्तादि। स्वर। अज्लक्षण, अचष्टन्निति। इह च प्रसज्येत। वाचा तरति त्वचा तरतीति। एतद्धि समर्थं अच्। इह च न स्यात् घटेन तरतीति। एतद्धि समर्थमनच्। अस्ति पुनः समर्थविशेषणे सति किं चिदिष्टं संगृहीतं भवति। आहो स्विद्दोषान्तमेव। अस्तीत्याह। किम्। साम्ना तरति वेम्ना तरतीति। एतद्धि समर्थमपि अच् ङ्याप्प्रातिपदिकमपि। अथ ङ्याब्ग्रहणं किमर्थम्। न प्रातिपदिकादित्येव सिद्धम्। न सिध्यति। अप्रत्यय इति प्रातिपदिकसंज्ञायाः प्रतिषेधः प्राप्नोति। यद्येष ङ्याब्ग्रहणे हेतुः। त्यूङ्ग्रहणमपि कर्तव्यम्। तावपि हि प्रत्ययौ। तिग्रहणे तावद्वार्तम्। तद्धितः प्रातिपदिकमिति प्रातिपदिकसंज्ञा भविष्यति। ऊङ्ग्रहणे चापि वार्तम्। उवर्णान्ताद्दूङ्विधीयते तत्रैकादेशः। एकादेशे कृते ऽन्तादिवद्भावात्प्रातिपदिकसंज्ञा भविष्यति। यद्येष ऊङोऽग्रहणे हेतुः। आब्ग्रहणमपि न कर्तव्यम्। आबपि ह्यकारान्ताद्विधीयते। तत्रैकादेशः। एकादेशे कृतेऽन्तादिवद्भावात्प्रातिपदिकसंज्ञा भविष्यति। यस्तर्ह्यनकारान्तात् क्रुञ्चा उष्णिहा देवविशेति। अत्राप्यकारान्ताद् वृत्तिर्लक्ष्यते। क्रुञ्चानालभेत। उष्णिहककुभौ देवविशं च मनुष्यविशं चेति। इह तावदुष्णिहककुभाविति। आप एवौत्तरपदिकं ह्रस्वत्वम्। इह खल्वपि देवविशं च मनुष्यविशं चेति। नास्ति विशेषः। अकारान्तादप उत्पत्तौ सत्यां व्यञ्जनान्ताद्वेति। यत्तावदुच्यते। इह तावदुष्णिहककुभाविस्याप एवैतदौत्तरपदिकं ह्रस्वत्वमिति। संज्ञाछन्दसोरित्येवं तत्। नैषा संज्ञा, नापीदं छन्दः। यदप्युच्यते इह खल्वपि देवविशं च मनुष्यविशं च मनुष्यविशं चेति। नास्ति विशेषः। अकारान्तादप उत्पत्तौ सत्यां व्यञ्जनान्ताद्वेति। स्वरे विशेषः। यद्यत्र व्यञ्जनान्तादुत्पत्तिः स्याद् देवविशमित्येवं स्वरः प्रसज्येत। देवविशमिति चेष्यते। त-

---

तो वृत्तिवाक्ययोः। सर्वत्रैव विशेषस्तु नावश्यं तादृशो भवेदिति। आचो विकार इति। सावेकाच इति। विभक्तेरुदात्तत्वात्पदमेतदनुदात्तादि। एतच्चोदाहरणादिक्प्रदर्शनार्थमस्य वृद्धत्वान्मयटा भाव्यम्। इदं तूदाहरणं पञ्चानां विकार इति। षट्त्रिचतुर्भ्यो हलादिरिति विभक्तेरुदात्तादिसमर्थमेतत्। प्रातिपदिकं तु न्रः संख्याया इत्याद्युदात्तम्। सर्वेषामिति। सर्वस्य सुपीत्याद्युदात्तं पदम्। प्रातिपदिकं तु सर्वशब्दोऽन्तोदात्ततो निपातित इत्यनुदात्तादि। अथेति। लिङ्गविशिष्टपरिभाषया सिद्धं मन्यते। इतरोऽगृहीताभिप्राय आह न सिध्यतीति। तिग्रहणइति वार्तं प्रातिपदिकत्वमित्यर्थः। क्रुञ्चानिति। अजादिषु तु पाठो जातिलक्षणङीष्बाधनार्थः। अवगृहणाद्याह इह तावदिति। आप इति। ङ्यापोरिति ह्रस्वत्वं हलन्तादेव विहितस्याप इत्यर्थः। इहेति। ततश्च देवविट्शब्दादेवाबिति भावः। आब्ग्रहणप्रत्याख्यानबाधाह

Indira Gandhi National Centre for the Arts

लुग्यथा स्यात् । आक्रियमाणे हि ङ्याप्प्रातिपदिकग्रहणे प्रकृतेरपि लुक् प्रसज्येत । एतदपि नास्ति प्रयोजनम् । यथापरिभाषितं प्रत्ययस्य लुक्श्लुलुपो भवन्तीति प्रत्ययस्य भविष्यति । एवमप्युकारसकारयोः प्रसज्येत । कमेः सः कंसः । परान् शृणातीति परशुरिति उणादयोऽव्युत्पन्नानि प्रातिपदिकानि । वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे च प्रत्ययविधौ तत्सम्प्रत्ययार्थम् * । वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे तर्हि प्रत्ययविधौ तत्सम्प्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं क्रियते । वृद्धात्, अवृद्धात्, अवर्णान्तात्, अनुदात्तादेः, द्व्यच इति, एतानि ङ्याप्प्रातिपदिकविशेषणानि यथा स्युरिति । अथाक्रियमाणे ङ्याप्प्रातिपदिकग्रहणे कस्यैतानि विशेषणानि स्युः । समर्थविशेषणानि । तत्र को दोषः । उदीचां वृद्धादगोत्रात् । इह च प्रसज्येत । ज्ञानां ब्राह्मणानामपत्यमिति । एतद्धि समर्थं वृद्धम् । इह च न स्यात् । ज्ञयोर्ब्राह्मण्योरपत्यमिति । एतद्धि समर्थमवृद्धम् । वृद्ध । अवृद्ध, प्राचामवृद्धात्फिन्बहुलम् । इह च प्रसज्येत । ज्ञयोर्ब्राह्मण्योरपत्यमिति । एतद्धि समर्थमवृद्धम् । इह च न स्यात् । ज्ञानां ब्राह्मणानामपत्यमिति । एतद्धि समर्थं वृद्धम् । अवृद्ध । अवर्ण, अत इञ्भवति । इहैव स्यात् । दक्षस्यापत्यं दाक्षिरिति । एतद्धि समर्थमकारान्तम् । इह न स्यात् । दक्षयोरपत्यं दक्षाणामपत्यमिति । एतद्धि समर्थमनवर्णान्तम् । अवर्ण । स्वर, अनुदात्तादेरञ्भवति । इह च प्रसज्येत । वाचो विकारस्त्वचो

योश्चेति । वार्तिककारस्य समुच्चयार्थश्चशब्दो भाष्यकारेण तु पूर्वप्रयोजनस्य दूषितत्वात्तदर्थे चशब्दो व्याख्यातः । प्रकृतेरपीति । यच्छयोर्या प्रकृतिः कंसशब्दः परशुशब्दश्च तदवयवस्यापि प्रत्ययस्येत्यर्थः । इतरश्च प्रकृतेरिति स्थानषष्ठीं मत्वाह एतदपीति । इतरः पूर्वमेवार्थं स्पष्टीकरोति एवमपीति । उणादय इति । अतः कृकमिकंसेति कमिग्रहणेनैव कंसग्रहणे सिद्धे कंसशब्दोपादानं ज्ञापकं क्व चिदेषां व्युत्पत्तिकार्यं न भवतीति । यञञोस्तु विधानसामर्थ्याल्लुङ्न भवतीति यच्छयोरेव भविष्यतीत्यर्थः । वृद्धावृद्धेति । अत्रापि वार्तिककारस्य चशब्दः समुच्चये भाष्यकारस्य तु तदर्थः । वृद्धादयो लक्षणं निमित्तं यस्य प्रत्ययविधेस्तस्मिन् वृद्धादीनि ङ्याप्प्रातिपदिकविशेषणानि यथा स्युरित्यर्थः । अथेति । प्रत्ययार्थसंबन्धयोग्यार्थाभिधायित्वाद् ङ्याप्प्रातिपदिकस्यैव विशेषणानि भविष्यन्तीति प्रश्नः । समर्थविशेषणानीति । समर्थानां प्रथमादित्यधिकाराद्विभक्तिमन्तरेण सामर्थ्यानवगमाद्विभक्त्यन्तस्यैव विशेषणानि स्युरित्यर्थः । ङ्याप्प्रातिपदिकग्रहणे तु सति तदुपादानसामर्थ्यात्तद्विशेषणानि वृद्धादीनि भवन्ति । ज्ञानामिति । ननु वृत्तावभेदैकत्वसंख्योपजननान्नास्ति द्विवचनबहुवचनान्तात्प्रत्ययः । नैष दोषः । क्व चिदादेशादिवशात्संख्याविशेषोऽपि प्रतीयते । यथा तावको मामक इति । एवमिहापि फिञ् विधीयमानो बहुवचनमन्तरेण वृद्धत्वाभावाद्बहुत्वं गमयेत् । प्रकरणादिवशाद्वा । तदुक्तम् । भेदः संख्याविशेषो वा व्याख्या-

Indira Gandhi National Centre for the Arts

विकार इति । एतद्धि समर्थमनुदात्तादि । इह च न स्यात् । सर्वेषां विकार इति । एतद्धि समर्थमुदात्तादि । स्वर । अज्लक्षण, अचष्ठन्निति । इह च प्रसज्येत । वाचा तरति त्वचा तरतीति । एतद्धि समर्थं अच् । इह च न स्यात् घटेन तरतीति । एतद्धि समर्थमजच् । अस्ति पुनः समर्थविशेषणे क्वचित् किं चिदिष्टं संगृहीतं भवति । आहो स्विद्दोषान्तमेव । अस्तीत्याह । किम् । साम्ना तरति वेम्ना तरतीति । एतद्धि समर्थमपि अच् ङ्याप्प्रातिपदिकमपि । अथ ङ्याब्ग्रहणं किमर्थम् । न प्रातिपदिकादित्येव सिद्धम् । न सिध्यति । अप्रत्यय इति प्रातिपदिकसंज्ञायाः प्रतिषेधः प्राप्नोति । यद्येष ङ्याब्ग्रहणे हेतुः । त्यूङ्ग्रहणमपि कर्तव्यम् । तावपि हि प्रत्ययौ । तिग्रहणे तावद्वार्तम् । तद्धितः प्रातिपदिकमिति प्रातिपदिकसंज्ञा भविष्यति । ऊङ्ग्रहणे चापि वार्तम् । उवर्णान्तादूङ्विधीयते तत्रैकादेशः । एकादेशे कृते ऽन्तादिवद्भावात्प्रातिपदिकसंज्ञा भविष्यति । यद्येष ऊङोऽग्रहणे हेतुः । आब्ग्रहणमपि न कर्तव्यम् । आबपि ह्यकारान्ताद्विधीयते । तत्रैकादेशः । एकादेशे कृतेऽन्तादिवद्भावात्प्रातिपदिकसंज्ञा भविष्यति । यस्तर्ह्यनकारान्तात् क्रुञ्चा उष्णिहा देवविशेति । अत्राप्यकारान्ताद् वृत्तिर्लक्ष्यते । क्रुञ्चानालभेत । उष्णिहककुभौ देवविशं च मनुष्याविशं चेति । इह तावदुष्णिहककुभाविति । आप एवौत्तरपदिकं ह्रस्वत्वम् । इह खल्वपि देवविशं च मनुष्यविशं चेति । नास्ति विशेषः । अकारान्तादम उत्पत्तौ सत्यां व्यञ्जनान्ताद्वेति । यत्तावदुच्यते । इह तावदुष्णिहककुभाविस्याप एवैतदौत्तरपदिकं ह्रस्वत्वमिति । संज्ञाछन्दसोरित्येवं तत् । नैषा संज्ञा, नापीदं छन्दः । यदप्युच्यते इह खल्वपि देवविशं च मनुष्यविशं च मनुष्याविशं चेति । नास्ति विशेषः । अकारान्तादम उत्पत्तौ सत्यां व्यञ्जनान्ताद्वेति । स्वरे विशेषः । यद्यत्र व्यञ्जनान्तादुत्पत्तिः स्याद् देवविशमित्येवं स्वरः प्रसज्येत । देवविशमिति चेष्यते । त-

---

तो वृत्तिवाक्ययोः । सर्वत्रैव विशेषस्तु नावश्यं तादृशो भवेदिति । आचो विकार इति । सावेकाच इति । विभक्तेरुदात्तत्वात्पदमेतदनुदात्तादि । एतच्चोदाहरणादिकप्रदर्शनार्थमस्य वृद्धत्वान्मयटा भाव्यम् । इदं तूदाहरणं पञ्चानां विकार इति । षट्त्रिचतुर्भ्यो हलादिरिति विभक्तेरुदात्तादिसमर्थमेतत् । प्रातिपदिकं तु न्रः संख्याया इत्याद्युदात्तम् । सर्वेषामिति । सर्वस्य सुपीत्याद्युदात्तं पदम् । प्रातिपदिकं तु सर्वशब्दो ऽन्तोदात्ततो निपातित इत्यनुदात्तादि । अथेति । लिङ्गविशिष्टपरिभाषया सिद्धं मन्यते । इतरोऽगृहीताभिप्राय आह न सिध्यतीति । तिग्रहणइति वार्तं प्रातिपदिकत्वमित्यर्थः । क्रुञ्चानिति । अजादिषु तु पाठो जातिलक्षणङीष्बाधनार्थः । अवग्रहणवाद्याह इह तावदिति । आप इति । ङ्यापोरिति ह्रस्वत्वं हलन्तादेव विहितस्याप इत्यर्थ. । इहेति । ततश्च देवविट्शब्दादेवाबिति भावः । आब्ग्रहणप्रत्याख्यानवाद्याह

Indira Gandhi National Centre for the Arts

स्मात्क एष एवंविषयः । इदं तर्हि पादोन्यतरस्यां टाबृचीति । ऋचीत्युच्यते । तत्र च्छान्दसत्वाद्भविष्यति । ऋचीति नेदं छन्दो विवक्षितम् । काठकं कालापकं मौदकं पैप्पलकं च । किं तर्हि प्रत्ययार्थविशेषणमेतत् । ऋक्चेत्प्रत्ययार्थो भवतीति । एतदपि नास्ति प्रयोजनम् । पदशब्दः पादशब्दसमानार्थः अकारान्तः छन्दसि दृश्यते । तस्याः सप्ताक्षरमेकं पदम् । एकः पाद इत्यर्थः । तस्मादुत्पत्तिर्भविष्यति । इदं तर्हि डाबुभाभ्यामन्यतरस्यामिति । बहुराजा बहुराजे बहुराजा इति । ङ्याब्ग्रहणमनर्थकं प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् । ङ्याब्ग्रहणमनर्थकम् । किं कारणम् । प्रातिपदिकगृहणे लिङ्गविशिष्टस्यापि गृहणात् । प्रातिपदिकगृहणे लिङ्गविशिष्टस्यापि गृहणं भवतीत्येषा परिभाषा कर्तव्या । कः पुनरत्र विशेषः । एषा वा परिभाषा क्रियेत ङ्याब्ग्रहणं वा । अवश्यमेषा परिभाषा कर्त्तव्या । बहून्येतस्याः परिभाषायाः प्रयोजनानि । कानि । प्रयोजनं सर्वनामस्वरसमासतद्धितविधिलुगलुगर्थम् * । सर्वनामविधिः प्रयोजनम् । सर्वनाम्नः सुट् । इहैव स्यात् । एषाम् । तेषाम् । यासाम् । तासामित्यत्र न स्यात् । नैतदस्ति प्रयोजनम् । अवर्णान्ताट्टाब्विधीयते । तत्रैकादेशे कृते ऽन्तादिवद्भावात्सुड् भविष्यति । इदं तर्हि प्रयोजनम् । सर्वनाम्नस्तृतीया च । इहैव स्यात् । भवता हेतुना । भवतो हेतोरिति । भवत्या हेतुना भवत्या हेतोरित्यत्र न स्यात् । सर्वनाम । स्वर, कुसूलकूपकुम्भशालं बिले । इहैव स्यात् । कुसूलबिलम् । कुसूलीबिलमित्यत्र च न स्यात् । स्वर । समास, द्वितीया श्रितादिभिः सह समस्यते । इहैव स्यात् । कष्टं श्रितः कष्टश्रितः । कष्टं श्रिता कष्टश्रिता इत्यत्र न स्यात् । एतदपि नास्ति प्रयोजनम् । श्रितशब्दोऽकारान्तस्तत्रैकादेशे कृतेन्तादिवद्भावाद्भविष्यति । इदं तर्हि पूर्वसदृशेति । इहैव स्यात् । पित्रा सदृशः पितृसदृशः । पित्रा सदृशी पितृसदृशीत्यत्र न स्यात् । समास । तद्धितविधि, अचित्तहस्तिधेनोष्ठक् । इहैव स्यात् । हस्तिनां समुहो हास्तिकम् । हस्तिनीनां समूहो हास्तिकमित्यत्र न स्यात् । एतदपि नास्ति प्रयोजनम् । पुंवद्भावेनैतत्सिद्धम् । इदं तर्हि । प्रमाणे द्वयसच् । यथेह भवति । हस्तिद्वयसं हस्तिमात्रम् । एवं हस्तिनीद्वयसमित्यपि यथा स्यात् । तद्धितविधि । लुक्, नेन्सिद्धबध्नातिषु च ।

यत्नतावदिति । स्वरे विशेष इति । क्विबन्तस्य कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वाद्विभक्तेः सुप्त्वादनुदात्तत्वं भवति । यदा तु मूलविभुजादित्वादूदेव विशब्दः कप्रत्ययान्तस्तदा याथादिस्वरेणान्तोदात्तत्वाद्विभक्त्या च सहैकादेश उदात्तो भवति । तत्र च्छान्दसत्वादिति । अप्रातिपदिकत्वेऽपि प्रत्ययोत्पत्तिरिति शेष । लिङ्गविशिष्टस्येति । यथा कथञ्चित् प्रातिपदिकग्रहणे एषा परिभाषोपतिष्ठते न तु प्रातिपदिकस्य स्व-

इहैव स्यात्। स्थण्डिलशायी, स्थण्डिलशायिनीत्यत्र न स्यात्। लुगलुक्। शयवासवासिष्वकालात्। इहैव स्यात्। ग्रामेवासी। ग्रामेवासिनीत्यत्र न स्यात्। मानिनि च विधिप्रतिषेधार्थम् *। मानिनि च विधिप्रतिषेधार्थं प्रयोजनम्। विध्यर्थं तावत्, क्यङ्मानिनोश्च। इहैव स्यात्। दर्शनीयमानी। दर्शनीयमानिनीत्यत्र च प्रत्ययग्रहणोपचारेषु न स्यात्। प्रतिषेधार्थमपि। वक्ष्यति स्वाङ्गाच्चेतो मानिनि। तस्मिन् क्रियमाणे इहैव स्यात्। दीर्घमुखमानी। दीर्घमुखमानिनीत्यत्र न स्यात्। प्रत्ययग्रहणोपचारेषु च प्रयोजनम्। तृजकाभ्यां कर्तरि। इहैव स्यात्। अपां स्रष्टा। अपां स्रष्ट्रीत्यत्र न स्यात्। प्रत्यय। उपचार, अतः कृकमिकंसकुम्भ इहैव स्यात्। अयस्कुम्भः। अयस्कुम्भीत्यत्र न स्यात्। एतान्येतस्याः परिभाषायाः प्रयोजनानि। यदर्थमेषा परिभाषा कर्त्तव्या। एतस्यां च सत्यां नार्थो ङ्याब्ग्रहणेन। अतिप्रसङ्ग उपपदविधौ *। उपपदविधावतिप्रसङ्गो भवति। द्विषत्परयोस्तापेः। यथेह भवति द्विषन्तप इति। एवं द्विषतीताप इत्यत्रापि स्यात्। यञिञोः फकि अतिप्रसङ्गो भवति। यथेह भवति गार्ग्यायणः। दाक्षायणः। एवं गार्गेयो दाक्षेय इत्यत्रापि स्यात्। नैष दोषः। ढगत्र बाधको भविष्यति। समासान्तेषु चातिप्रसङ्गो भवति। राजाहःसखिभ्यष्टच्। यथेह भवति। मद्रराजः। कश्मीरराजः। एवं मद्रराज्ञी कश्मीरराज्ञीत्यत्रापि स्यात्। न वा भवति मद्रराजीति। भवति यदा समासान्तादीकारः। लिङ्गविशिष्टग्रहणे तु इकारान्तात्समासान्तः प्रसज्येत। तत्र को दोषः। पुंवद्भावष्टिलोपश्च। यत्र मद्रराजीत्येवं रूपं स्यात्। मद्रराज्ञीति चेष्यते। महदात्वे प्रियादिषु अतिप्रसङ्गो भवति। आन्महतः समानाधिकरणजातीययोरिति यथेह भवति, महान् प्रियोऽस्य महाप्रियः एवं महती प्रियाऽस्य महतीप्रिय इत्यत्रापि स्यात्। किमुच्यते, प्रियादिष्विति। यत्र पुंवद्भावः प्रतिषिध्यते। यत्र तु न प्रतिषिध्यते भवितव्यमेव तत्रात्वेनेति। ञ्नित्स्वरे। ञ्नित्स्वरे अतिप्रसङ्गो भवति ञ्नित्यादिरुदात्तो भवतीति। यथेह भवति। दाक्षिः। अहिचुम्बकायनिः। एवं दाक्षी अहिचुम्बकायनीत्यत्रापि स्यात्। राज्ञः स्वरे ब्राह्मणकुमारयोः। कर्मधारये समासे राज्ञः स्वरे

रूपग्रहण एवेति भावः। कः पुनरिति। ङ्याब्ग्रहणं लघु न तु परिभाषेति भावः। स्थण्डिलशायिनीति। गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति वचनादनुत्पन्न एव ङीपि समासे सति इन्नन्तमेवोत्तरपदमित्यप्रयोजनमेतत्। एवं ग्रामेवासिनी दर्शनीयमानिनी दीर्घमुखमानिनीत्यपि द्रष्टव्यम्। ढगत्रेति। परत्वादिति भावः। समासान्तादीकार इति। मद्रराजस्य भार्या मद्रराजीति पुंयोगादाख्यायामिति ङीष्। तत्र को दोष इति। टचि कृते यस्य चेतीकारे लुप्ते टित्वाद् ङीपि कृते मद्रराज्ञीति सिध्यतीति प्रश्नः। यत्र पुंवद्भाव इति। तत्रापूरणीप्रियादिष्विति।

ब्राह्मणकुमारयोः । कर्मधारये समासे राज्ञः स्वरे अतिप्रसङ्गो भवति । राजा च ब्राह्मणकुमारयोरिति । यथेह भवति । राजब्राह्मणः । राजकुमारः । एवं राजब्राह्मणी राजकुमारीत्यत्रापि स्यात् । समाससंघातग्रहणेषु च । समाससंघातग्रहणेषु चातिप्रसङ्गो भवति । बहोर्नञ्वदुत्तरपदभूम्नि । यथेह भवति बहुगोमान् बहुयवमान् । एवं बहुगोमती बहुयवमतीत्यत्रापि स्यात् । किमुच्यते समाससंघातग्रहणेष्विति । यदवयवग्रहणं प्रयोजनमेवैतस्याः परिभाषायाः । कुसूलकूपकुम्भशालं बिले । कुसूलीबिलमिति यथा । विभक्तौ चोक्तम् । न वा विभक्तौ लिङ्गविशिष्टाग्रहणादिति । एते ऽस्याः परिभाषाया दोषाः । एतानि च प्रयोजनानि । एते दोषाः समा भूयांसो वा । तस्मान्नार्थोऽनया परिभाषया । न हि दोषाः सन्तीति परिभाषा न कर्तव्या । लक्षणं वा न परिणेयम् । न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते । न च मृगाः सन्तीति यवा नोप्यन्ते । दोषाः खल्वपि साकल्येन परिगणिताः । प्रयोजनानामुदाहरणमात्रम् । कुत एतत् । न हि दोषाणां लक्षणमस्तीति । तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्या । प्रतिविधेयं च दोषेषु । तद्धितविधानार्थं तु * तद्धितविधानार्थं तु ङ्याब्ग्रहणं कर्तव्यं ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यात् । कालितरा । हरिणितरा । खट्वातरा । मालातरा । किं पुनः कारणं न सिध्यति । विप्रतिषेधाद्धि तद्धितबलीयस्त्वम् * । विप्रतिषेधाद्धि तद्धितोत्पत्तिः प्राप्नोति । तत्र समासान्तेषु दोषः । तत्र समासान्तेषु

यत्र त्विति । महाजङ्ग इत्यादौ । दाक्षीति । इतो मनुष्यजातेरिति ङीष् प्रत्ययस्वरेणान्तोदात्तमिष्यते । बहोर्नञ्वदिति । बहुशब्दादुत्तरपदबहुत्वे वर्तमानाद्यत्परं पदं तदन्तस्य समासस्य नञ इव स्वरो भवतीत्यतिदेशार्थः । तेन बहवो गोमन्तोऽस्य बहुगोमानित्यत्र नञ्सुभ्यामिति समासान्तोदात्तत्वं भवति । बहुगोमतीति । बहवो गोमन्तोऽस्या इति बहुव्रीहिः उगितश्चेति ङीप् । समासोऽत्र संघातरूपः कार्यीति लिङ्गविशिष्टसमासाग्रहणात्समासान्तोदात्तत्वाभावादीकारः पित्त्वादनुदात्तो भवति ईकारस्तु पूर्व उदात्तो भवति । कुसूलीबिलमिति । पूर्वपदस्यात्र कार्यित्वं न तु संघातस्येति पूर्वपदान्तोदात्तत्वं भवत्येव । विभक्तौ चोक्तमिति । उगिदचामित्यत्रोक्तम् । यथा गोमानित्यत्र नुम्भवति एवं गोमतीत्यत्रापि प्राप्नोति । तत्र परिहार उक्तो वा विभक्तौ लिङ्गविशिष्टाग्रहणादिति । विभक्त्याश्रयकार्ये क्रियमाणे लिङ्गविशिष्टपरिभाषा नेष्यत इत्यर्थः । प्रतिविधेयमिति । अच्प्रकरणे शक्तिलाङ्गुलाङ्कुशेत्यत्र वार्तिके घटग्रहणेनैव घटीग्रहणे सिद्धे घटीग्रहणमस्याः परिभाषाया अनित्यत्वज्ञापनार्थं तेनानिष्टविषये नोपतिष्ठते । तद्धितविधानार्था त्विति । सतिङ्याब्ग्रहणे तद्धितविधौ प्रकृतित्रयाधिकारसामर्थ्यात् पूर्वं ङ्यापौ भवतस्तदन्तात्तद्धित इत्यर्थः । विप्रतिषेधाद्धीति । स्त्रीप्रत्ययस्यावकाशो यत्र प्रकर्षो न विवक्ष्य-

Indira Gandhi National Centre for the Arts

दोषो भवति बहुगोमत्का । बहुयवमत्का । समासान्ता अपि ङ्याबन्तास्स्युः । त्यूङोश्चापि ग्रहणं कर्तव्यं भवति । युवतिका । ब्रह्मबन्धुकेति । ऊङ्ग्रहणेन तावन्नार्थः । नास्त्यत्र विशेषः । उकारान्तादुत्पत्तौ सत्यामूङन्ताद्वा । इदं तर्हि । युवतितरा । ब्रह्मबन्धुतरा । ब्रह्मबन्धूतरेति । तदन्तस्य च प्रत्ययार्थेनायोगात्तद्धितानुत्पत्तिः ॥ । तदन्तस्य च ङ्याबन्तस्य प्रत्ययार्थेनायोगात्तद्धितोत्पत्तिर्न प्राप्नोति । कालितरा । हरिणितरा । खट्वातरा । मालातरेति । किं कारणम् । ङ्याबन्तमेतत् स्त्रीप्रधानम् । न च स्त्रीत्वस्य प्रकर्षाप्रकर्षौ स्तः । नैष दोषः । न हि किं चिदुच्यते । एवंजातीयकादुत्पत्तव्यमेवंजातीयकान्नेति । एतावदुच्यते । अतिशायने तमबिष्ठनौ तिङश्चेति । यस्य च प्रकर्षोऽस्ति तस्य च प्रकर्षे प्रत्ययो भविष्यति । अस्ति चाप्रधानस्य गुणस्य प्रकर्षः । इह खल्वपि शुक्लतरः कृष्णतर इति । द्रव्यं प्रधानम् । गुणस्य च प्रकर्षे प्रत्यय उत्पद्यते । उक्तं वा । किमुक्तम् । सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टाबादय इति । यदि प्रातिपदिकविशेषणं स्त्रीग्रहणं स्वार्थिकाष्टाबादयः । नैवं विज्ञायते स्त्रियामभिधेयायामिति । नापि स्त्रीसमानाधिकरणात्प्रातिपदिकादिति । कथं तर्हि, यत्प्रातिपदिकं स्त्रियां वर्तते तस्माट्टाबादयो भवन्ति । कस्मिन्नर्थे, स्वार्थे इति । ननु चोक्तं तत्र समासान्तेषु दोष इति । समासान्ता अपि स्वा-

---

ते कालीति । प्रकर्षप्रत्ययस्यात्रकाशो यत्र स्त्रीत्वाविवक्षा कालतर इति । स्त्रीत्वप्रकर्षयोस्तु युगपद्विवक्षायां परत्वात्प्रकर्षप्रत्ययः स्यादित्यर्थः । ननु स्त्रीत्वस्यान्तरङ्गत्वात्तन्निमित्तः प्रत्ययोऽन्तरङ्गः प्रकर्षस्तु बाह्यप्रतियोग्यपेक्षत्वाद् बहिरङ्गः ततस्तन्निमित्तस्य प्रत्ययस्यापि बहिरङ्गत्वम् । अन्तरङ्गबहिरङ्गयोश्चायुक्तो विप्रतिषेधः । तथा च वक्ष्यते। स्वार्थमभिप्रायशब्दो निरपेक्षो द्रव्यमाह । समवेतं समवेतस्य वचने लिङ्गं संख्यां विभक्तिं चाभिधाय तान्विशेषानपेक्षमाणश्च कृत्स्नमात्मानं प्रियकुत्सनादिषु ततः प्रवर्ततेऽसौ विभक्त्यन्त इति । एवं तर्ह्येतत्क्रमानाश्रयेण लौकिके प्रयोगे पदादुच्चरिताद्युगपदर्थाः प्रतीयन्त इति लौकिकार्थव्यवस्थाङ्गीकरणेन प्रातिपदिकार्थगतस्त्रीत्वप्रकर्षविवक्षाश्रयेण विप्रतिषेध उक्तः। समासान्ता अपीति । तत्र बहवो गोमन्तोऽस्या इति बहुव्रीहौ कृते ङीपि च कबुत्पत्तौ बहुगोमतीकेति प्राप्नोति । ब्रह्मबन्धुकेति । अज्ञाताद्यर्थविवक्षायामूङन्तात्कप्रत्यय इष्यते । नास्त्यत्रेति । केण इति ह्रस्वविधानादिति भावः । युवतितरेति । जातेश्चेति पुंवद्भावप्रतिषेधं मन्यते । यौवनस्य जातिरूपत्वात् । ब्रह्मबन्धुतरेति । अत्र नद्याः शेषस्यान्यतरस्यामिति विकल्पेन ह्रस्वः । न च स्त्रीत्वस्येति । तस्य सर्वत्रैकरूपत्वात् प्रकर्षाप्रकर्षाभाव इत्यर्थः । इह खल्वपीति सर्वत्र प्रधानस्य प्रकर्षाभावः । तदुक्तं हरिणा । सर्वस्यैव प्रधानस्य न विना भेदहेतुना । प्रकर्षो विद्यते नापि शब्दस्यापैति वाच्यतामिति ॥ ततश्च कालितरेत्यत्रापि कालगुणप्रकर्षाश्रयस्तरप्प्रत्ययः । उक्तं वेति । नात्र स्त्रीत्वं प्राधान्येन प्रत्ययाभिधेयम् ।

Indira Gandhi National Centre for the Arts

र्थिकाः। उभयोः स्वार्थिकयोः परत्वात्समासान्ता भविष्यन्ति। कथं कालिकेति। प्रत्ययस्थात्कात्पूर्वस्येतीत्वं भविष्यति। कथं हरिणिकेति। हरिणशब्दः प्रकृत्यन्तरमस्ति। कथं लोहिनिकेति। वक्ष्यत्येतल्लोहितालिङ्गबाधनं वेति॥

स्त्रियाम्॥ ३॥ स्त्रियामित्युच्यते। का स्त्री नाम। लोकत एते शब्दाः प्रसिद्धाः। स्त्री पुमान्नपुंसकमिति। यल्लोके दृष्ट्वा एतदवसीयते इयं स्त्री अयं पुमानिदं नपुंसकमिति। सा स्त्री स पुमान् तन्नपुंसकमिति। किं पुनर्लोके दृष्ट्वा एतदवसीयते। इयं स्त्री अयं पुमानिदं नपुसकमिति। लिङ्गम्। किं पुनस्तत्।

किं तर्हि, स्त्रीत्ववति द्रव्ये वर्तमानात् प्रातिपदिकात् स्वार्थे टाबादयः। ततश्च द्रव्यमेव प्राधान्येनाभिधीयते तस्य च व्यपदेशहेतुगुणप्रकर्षाश्रयातिशयविवक्षायां प्रकर्षप्रत्यय इत्यर्थः। समासान्ताश्चपीति। ङ्याब्ग्रहणप्रत्याख्यानेन समासान्तेषु परिहारः। स्त्रियामन्यपदार्थे बहुव्रीहिविधानात् स्त्रीप्रत्ययस्य च समासान्तस्य च विप्रतिषेधोपपत्तिः। कालितरेत्यादौ तु पूर्वोक्तेन न्यायेनान्तरङ्गत्वात् स्त्रीप्रत्यये कृते प्रकर्षप्रत्यय उत्पद्यते। कथं कालिकेति। वर्णे चानित्ये रक्ते इति वर्तमाने कालाच्चेति स्वार्थे कन्प्रत्ययस्तदपेक्षश्च स्त्रीप्रत्ययस्यान्तरङ्गत्वं नास्तीति परत्वात्कन् स्यादिति प्रश्नः। कथं हरिणिकेति। स्वार्थे हरितशब्दात्परत्वात्कन् स्यादितिप्रश्नः। अज्ञातादिकनस्तु बहिरङ्गत्वात् प्रागेव स्त्रीप्रत्ययः सिध्यति। हरिणशब्द इति। हरितशब्दसमानार्थ इति भावः। तत्र हरितशब्दस्य हरितिकेति भवति। हरिणशब्दस्य हरिणिकेति भावः। लोहिनिकेति। न हि लोहिनशब्दः प्रातिपदिकमस्तीति प्रश्नः। वक्ष्यत्येतदिति। अवश्यवक्तव्यतां दर्शयति। क्रियमाणे ऽपि ङ्याब्ग्रहणे लोहितान्मणौ वर्णे चानित्ये रक्ते इति प्रतिपदविधानाद्बलीयस्त्वात् स्त्रीप्रत्ययं बाधित्वा कन्नेव स्यात्॥१॥

स्त्रियाम्॥ का स्त्री नामेति। प्रसिद्धस्यार्थस्य कार्यान्तरविधानायानुवादसम्भवादिह च शास्त्रे स्त्रिया अपरिभाषितत्वाल्लोके च खट्वादिषु स्त्रीव्यवहाराभावाल्लौकिकस्त्रीग्रहणे ऽव्याप्त्यतिव्याप्तिदर्शनात्प्रश्नः। न च गोत्वादिवत्संस्थानविशेषव्यङ्ग्यत्वं स्त्रीत्वस्य यतः सामान्यविशेषरूपत्वं तस्य स्यात्। खट्वाशिंशपानगर्यादिषु भिन्नत्वात्संस्थानस्य। न च सकृदाख्यातं स्त्रीत्वं गोत्वादिवत् सर्वेषु स्त्रीलिङ्गेषु व्यक्त्यन्तरेषु ग्रहीतुं शक्यते। यत्र वस्तुस्वरूपजिज्ञासा तत्र प्रथमान्तेन प्रश्नो युक्त इति का स्त्री नामेत्युक्तम्। कस्यां स्त्रियामित्युच्यमाने विशेषविषयः प्रश्नः स्यात्। लोकत इति। पञ्चम्यन्तात्सप्तम्यन्ताद्वा तसिः। शब्दाः प्रसिद्धा इति। विशिष्टार्थाभिधायित्वेनेति भावः। पुंनपुंसकयोरुपादानं प्रसङ्गेन तद्विषयस्याप्यज्ञानस्य निराकरणार्थम्। यल्लोक इति। यन्निमित्तमुपलभ्य निमित्तवत्यर्थे प्रत्यय उपजायते ततस्त्र्यादिशब्दावाच्यमित्यर्थः। तद्योगाच्च निमित्तवानप्यर्थः स्त्र्यादिशब्दवाच्यो भवति। किं पुनरिति। द्रव्ये सत्तादेरनेकार्थस्य सम्भवात्प्रश्नः। लिङ्गमिति। स्तनकेशादिकमिति भावः। स्तनकेशवतीति। भूमादौ मतुप्। तथैव लोमश इति शः। लिङ्गे पृष्टे लिङ्गिकथनं लिङ्गप्रतिपत्तिपरमिति प्रश्नप्रतिवचनयोर्नास्त्यसंगतिः। स्तनकेशश्च प्रसिद्धत्वादन्यस्यापि स्त्रीप्रतिपत्तिनिमित्तस्य कुमार्यादिगतस्य उपलक्षणम्। तदनेन स्त्रीत्वादीनां स्तनाद्युपव्यञ्जनानां गोत्वादिवत्सामान्यविशेषत्वं दर्शितम्। यथोक्तं हरिणा। हस्तिन्यां वडवायां च

Indira Gandhi National Centre for the Arts

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः । उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥ लिङ्गात्स्त्रीपुंसयोर्ज्ञाने भ्रूकुंसे टाप्प्रसज्यते । लिङ्गात्स्त्रीपुंसयोर्ज्ञाने सति भ्रूकुंसे टाप्प्राप्नोति । यद्धि लोके दृष्ट्वा एतदवसीयते इयं स्त्री । अस्ति तद् भ्रूकुंसे । नत्वं खरकुटीः पश्य ॥ इह चञ्चाः पश्य । वध्रिकाः पश्य । खरकुटीः पश्येति । तस्माच्छसो नः पुंसीति नत्वं प्राप्नोति । यद्धि लोके दृष्ट्वा एतदवसीयते । अयं पुमानिति । अस्ति तद्वध्रिकादिषु । खट्वावृक्षौ न सिध्यति ॥ खट्वावृक्षयोश्च लिङ्गं न सिध्यति । यद्धि लोके दृष्ट्वा एतदवसीयते इयं स्त्री अयं पुमानिति । न तत्खट्वावृक्षयोरस्ति । किं तर्हि तयोर्लिङ्गं न्याय्यम् । नापुंसकं भवेत्तस्मिन् । नापुंसकं खट्वावृक्षयोर्लिङ्गं न्याय्यम् । किमिदं नपुंसकमिति । नपुंसके भवं नापुंसकम् । तदभावे नपुंसकम् । तदभावे स्त्रीपुंसलिङ्गाभावे नपुंसकं लिङ्गं न्याय्यम् । असत्तु मृगतृष्णावत् । असत्तु खट्वावृक्षयोर्लिङ्गं द्रष्टव्यम् । कथं पुनरसन्नाम लिङ्गं शक्यं द्रष्टुम् । मृगतृष्णावत् । तद्यथा । मृगास्तृषिता अपां धाराः पश्यन्ति । न च ताः सन्ति । गन्धर्वनगरं यथा । यथा गन्धर्वन-

---

स्त्रीति बुद्धेः समन्वयः । अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीमिति ॥ उभयोरन्तरमिति । लिङ्गवत्त्वेन सदृशमित्यर्थः । तेनाव्याख्यातार्थस्य नपुंसकत्वाभावः । तदभाव इत्यनेन मयूरीकुक्कुटादीनां स्त्रीपुंससमुदायानां नपुंसत्वं निराकृतम् । भवति हि समुदायः समुदायिनोः सदृश इति स्यान्नपुंसकत्वम् । अथ तु परवल्लिङ्गमित्यनेन समुदायस्य परवल्लिङ्गातिदेशादप्रसङ्गो नपुंसकत्वस्य । ततो वस्तुस्वरूपनिरूपणपरमेतदित्यवगन्तव्यम् । इदानीमेतद् दूषयितुमाह लिङ्गादिति । भ्रकुंसः स्त्रीवेषधारी नटस्तस्य स्तनकेशसंबन्धात् स्त्रीत्वे सति टाप्स्यात् । ननु नित्ययोगे स्तनकेशवतीति मतुब्विज्ञानाद् भ्रूकुंसशब्दस्य स्त्रीत्वाभावः । नैतदस्ति । प्रतिपत्तृणां नित्यलिङ्गदर्शनात्तत्रापि स्त्रीत्वप्रसङ्गात् । केशवपने च स्त्रियाः स्त्रीत्वन्न स्यात् तदानीं केशसंबन्धाभावात् । स्तनातिशयसम्बन्धस्य चोत्तरकालभावित्वादतिशयेपि मतुपि विज्ञायमाने प्राक् स्त्रीत्वं न स्यात् । अव्याप्तिसद्भावाद्वा हेयत्वादस्य दर्शनस्य न सुष्ठु निर्बन्धोत्र कर्तव्यः । नत्वमिति । खरकुटी नापितगृहमुच्यते इति केचिदाहुः । तत्र इवार्थे संज्ञायामिति कन्प्रत्ययः तस्य लुम्मनुष्य इति लुप् । तत्र मनुष्यस्य वाच्यत्वात्तस्य च लोमशत्वात् पुंस्त्वात् खरकुटीः पश्येत्यादौ नत्वप्रसङ्गः । नापुंसकमिति । नपुंसके वस्तुनि भवं लिङ्गं नापुंसकत्वं तत्प्राप्तं स्त्रीत्वपुंस्त्वयोरभावात् स्त्रीपुंससदृशत्वाच्च लिङ्गवत्त्वेन । सत्वरूपत्वाच्च लिङ्गसंख्यारहितस्यासत्वभूतस्यार्थस्याभावादिति भावः । असत्त्विति । मृगतृष्णाविषया मरुमरीचिका यथाऽसत्येन जलरूपेण प्रतिभासते । तथा खट्वावृक्षावसता स्त्रीपुंसत्वेनेत्यर्थः । अथोच्यते मरीचिदर्शनात्सादृश्याज्जलं पूर्वानुभूतं स्मर्यते न तु तत्रासज्जलं चकास्तीति तत्राह गन्धर्वनगरं यथेति । नहि गन्धर्वनगरमन्तरिक्षे कदाचिदुपलब्धम् । न च तत्र तत्सदृशवस्त्वन्तरग्रहणं येन गन्धर्वनगरं स्मर्येत । तस्मादसतामपि भावानामचिन्त्यान्निमित्तसामर्थ्याद्यथोपलम्भः तथा

Indira Gandhi National Centre for the Arts

गराणि दूरतो दृश्यन्ते उपसृत्य च नोपलभ्यन्ते तद्वत्खट्वावृक्षयोः सल्लिङ्गं द्रष्टव्यम्। आदित्यगतिवत्सन्न। अथ वा यथा आदित्यगतिः सती नोपलभ्यते। तद्वत्खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यते। वस्त्रान्तर्हितवच्च तत्। यथा वस्त्रान्तर्हितानि द्रव्याणि नोपलभ्यन्ते। तद्वत्खट्वावृक्षयोः सद् लिङ्गं नोपलभ्यन्त विषम उपन्यासः। वस्त्रान्तर्हितानि द्रव्याणि वस्त्रापाये उपलभ्यन्ते। खट्वावृक्षयोः पुनः येप्येते रथकारा वाशीवृक्षादनहस्ता मूलात्प्रभृति आअग्राद्वृक्षांस्तक्ष्णुवन्ति तेपि तयोर्लिङ्गं नोपलभन्ते। केनैतदवसीयते। खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यते इति। षड्भिः प्रकारैः सतां भावानामनुपलब्धिर्भवति। अतिसन्निकर्षादतिविप्रकर्षान् मूर्त्यन्तरव्यवधानात् तमसावृतत्वाद् इन्द्रियदौर्बल्यादतिप्रमादादिति। अतोत्र कश्चिद्धेतुर्द्रष्टव्यः। येन खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यते। केनैतदवसीयते खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यते इति। तयोस्तु तत्कृतं दृष्ट्वा। स्त्रीकृतं शब्दं दृष्ट्वा स्त्रीत्यवसीयते। पुंस्कृतं शब्दं दृष्ट्वा पुमानिति। यथाकाशेन ज्योतिषः। तद्यथा। आकाशं दृष्ट्वा ज्योतिरत्रेति गम्यते। ज्योतिर्निमित्तं ह्याकाशम्।

खट्वादावपि स्त्रीत्वादेरित्यर्थः। तदुक्तं हरिणा। यथा सलिलनिर्भासो मृगतृष्णासु जायते। जलोपलब्ध्यनुगुणाद् बीजाद् बुद्धिर्जलेऽसति ॥ तथैवाव्यपदेश्येभ्यो हेतुभ्यस्तारकादिषु। मुख्येभ्य इव लिङ्गेभ्यो भेदो लोके व्यवस्थित इति इदानीमसत्त्वं निराकरोति आदित्यगतिवत्सन्नेति। यथा आदित्यगतिः सती प्रत्यक्षेण नोपलभ्यते देशान्तरप्राप्त्यानुमीयते तथा खट्वावृक्षयोः सदपि लिङ्गं सूक्ष्मत्वात्प्रत्यक्षेणाशक्यं ग्रहीतुं तत्कृतकार्यदर्शनादनुमीयते। किञ्चिद्धि स्थूलमुपलभ्य व्यञ्जनं किञ्चित्सूक्ष्मत्वाद् दुरवधारणमिति भावः। विषम इति। यस्य कदाचिदुपलब्धिर्भवति यस्यानुपलब्धिकारणं व्यवधानादिकमभिधयिताम्। अत्यन्तानुपलब्धस्य तु शशविषाणादिवत् खट्वादौ लिङ्गस्यासत्त्वमेवेत्यर्थः। येप्येतइति। अनेन दृश्यानुपलब्धिमभावसंव्यवहारहेतुमुपन्यस्यति। रथकारास्तक्षाणः। वृक्षादनं शस्त्रकम्। इतरो विद्यमानस्यापि लिङ्गस्य सौक्ष्ममनुपलब्धिकारणं दर्शयितुमाह षड्भिरिति। अतिसन्निकर्षादिति। यथा स्वचक्षुर्गतस्याञ्जनादेः। अतिविप्रकर्षादिति। यथोड्डीनस्य शकुनेः। मूर्त्यन्तरव्यवधानादिति। कुड्यादिव्यवहितस्य सुवर्णादेः। तमसावृतत्वादिति। अन्धकाराक्रान्तस्य श्वभ्रादेः। इन्द्रियदौर्बल्यादिति। तिमिराद्यवृतस्य नयनादेः। अतिप्रमादादिति। विषयान्तरासक्तचित्तत्वादित्यर्थः। सौक्ष्म्यस्येन्द्रियदौर्बल्ये ऽन्तर्भावान्न पृथगुपन्यासः। दिव्यचक्षुःश्रोत्रा हि सूक्ष्ममप्यर्थमुपलभन्ते न तु दुर्बलेन्द्रियाः। अतोत्रेति। इन्द्रियदौर्बल्यमिति भावः। केनैतदिति। सतामसतां चानुपलम्भात् खट्वादिषु सर्वदा लिङ्गानुपलम्भात् सदसत्त्वविषयः संदेह इति प्रश्नः। इतरस्तत्सद्भावे ऽनुमानमाह तयोस्त्विति। स्त्रीपुंसकार्यं दाम्नत्वादिकं दृष्ट्वा कारणभूतलिङ्गानुमानं क्रियते इत्यर्थः। आकाशेनेति। आकाशत इत्याकाशं प्रकाश आलोकस्तेन यथा मेघान्तरितं ज्योतिरनुमीयते तथा लिङ्गमित्यर्थः। अन्योन्यसंश्रयमिति। ज्योतिःप्रकाशयोः प्रत्यक्षेण कार्यकारण-

Indira Gandhi National Centre for the Arts

अन्योन्यसंश्रयं त्वेतत् । अन्योन्यसंश्रयं त्वेतद्भवति । स्त्रीकृतः शब्दः । शब्दकृतं च स्त्रीत्वम् । एतदितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते । प्रत्यक्षेण विरुध्यते । प्रत्यक्षेण खल्वपि स विरुध्यते । य आह खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यते इति । तत्र स्वेन्द्रियविरोधः कृतो भवति । न च नाम स्वेन्द्रियविरोधिना भवितव्यम् । तटे च सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति । तटे च खल्वपि सर्वाणि लिङ्गानि दृष्ट्वा तटः तटी तटमिति कस्तदध्यवसातुमर्हति । इयं स्त्री । अयं पुमान् । इदं नपुंसकमिति । तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम् । अवश्यं च कश्चित्स्वकृतान्त आस्थेयः । कोऽसौ स्वकृतान्तः ॥ संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः ॥ संस्त्यानप्रसवौ लिङ्गमस्थेयौ । किमिदं संस्त्यानप्रसवाविति । संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमानिति । ननु च लोकेऽपि स्त्यायतेरेव स्त्री सूतेश्च पुमानिति । अधिकरणसाधना लोके स्त्री स्त्यायत्यस्याङ्गर्भ इति । कर्तृसाधनश्च पुमान् । सूते पुमानिति । इह पुनरुभयं भावसाधनम् । संस्त्यानं स्त्री प्रवृत्तिश्च पुमान् । कस्य पुनः संस्त्यानं स्त्री प्रवृत्तिर्वा पुमान् । गुणानाम् । केषाम् । शब्दस्पर्शरूपरसगन्धानाम् । सर्वश्च पुनर्मूर्त्तय एवमात्मिकाः । संस्त्यानप्रसवगुणाः

भावावगमात् । भवतु कार्येण करणानुमानम् । खट्वादिषु तु लिङ्गस्य कदाचिदप्यग्रहणान्न तेन कस्यचित्कार्यकारणभावग्रहणम् । तत्र हि लिङ्गावगमात् शब्दप्रयोगः शब्दप्रयोगाल्लिङ्गावगतिरितीतरेतराश्रयमेतदित्यर्थः । यदुक्तमादित्यगतिवत्सन्नेति । तद्दूषयति प्रत्यक्षेणेति । लिङ्गस्वरूपविविक्तखट्वादिवस्तुविषयेण प्रत्यक्षेण लिङ्गाभावनिश्चयकारिणा विरुध्यत एतदित्यर्थः । इन्द्रियदौर्बल्यमनुपलब्धिकारणं प्रमाणान्तरावासितवस्तुविषयमेवाभिधातुं शक्यते । तटे चेति । लिङ्गशब्देन तत्कार्याण्यभिधीयन्ते । एकस्मिन् द्रव्ये विरोधात्सर्वलिङ्गासम्भवः । स्त्रीपुंससद्भावे च नपुंसकत्वं न स्यात् । तदभावे नपुंसकमिति वचनात् । स्वकृतान्त इति । स्वसिद्धान्तः । स्त्रीपुमानिति । रूढिपरिहारेण क्रियाशब्दत्वमाश्रयणीयमित्यर्थः । संस्त्यान इति । भावसाधनत्वं दर्शयति सूतेरिति । सूइत्येतस्य धातोः सप्प्रत्ययो भवति सकारस्य पकारो भवतीत्यर्थः । औणादिको मसुन्प्रत्ययः ह्रस्वश्च बाहुलकात् । स्त्यायत्यस्यामिति । संघातरूपं प्राप्नोतीत्यर्थः । कर्तृसाधन इति । सूते ऽपत्यं जनयति पुमानित्यर्थः । संस्त्यानमिति । तिरोभावः । प्रवृत्तिराविर्भावः । साम्यावस्था स्थितिः । एताश्चावस्थाः शब्दगोचरा एवेत्यवसेयम् । गुणानामिति । सत्त्वरजस्तमांसि गुणास्तत्परिणामरूपाश्च तदात्मका एव शब्दादयः पञ्च गुणाः । तत्संघातरूपं च घटादि न तु तद्व्यतिरिक्तमवयविद्रव्यमस्तीति सांख्यानां सिद्धान्तः । केषामिति । सत्त्वादीनामनारब्धकार्याणां सूक्ष्मावस्थायिनामप्रत्यक्षत्वाच्छब्दव्यवहारागोचरत्वात्प्रश्नः । तथा चोक्तम् । गुणानां परमं रूपं न दृष्टिपथमृच्छतीति । इतरस्तत्परिणामरूपान् लोकप्रसिद्धानाह शब्दस्प-

Indira Gandhi National Centre for the Arts

शब्दस्पर्शरूपरसगन्धवत्यः यत्राल्पीयांसो गुणास्तत्रावरतस्त्रयः शब्दः स्पर्शो रूपमिति। रसगन्धौ न सर्वत्र प्रवृत्तिः खल्वपि नित्या। नहीह कश्चिदपि स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते वर्द्धते वा। यावदनेन वर्द्धितव्यमपायेन वा युज्यते। तच्चोभयं सर्वत्र। यद्युभयं सर्वत्र कुतो व्यवस्था। विवक्षातः। संस्त्यानविवक्षायां स्त्री। प्रसवविवक्षायां पुमान्। उभयविवक्षायां नपुंसकम्। तस्योक्तौ लोकतो नाम। तस्योक्तौ वचने लोकतो नामैतद्भवति स्त्रीपुमान्नपुंसकमिति। गुणो वा लुपि युक्तवत्। वध्रिकादिषु भूयान् परिहारः लुपि युक्तवद्व्यक्तिवचने इति। एवमक्षगुणो भवति। न चैतन्मन्तव्यं स्वमनीषिकयोच्यत इति पठिष्यत्याचार्यः लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति पुनः पठिष्यति। एकार्थे शब्दान्यत्वात् दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्चेति। संस्त्याने स्त्यायतेर्ड्रट् स्त्री

शैति। अवरत इति। अन्तत इत्यर्थः। ननु आकाशं शब्दात्मेकमेव स्पर्शात्मकश्च वायुः। नैष दोषः। संपिण्डितस्वभावाश्चक्षुर्गोचरा मूर्तिशब्देनात्र विवक्षिताः। रसगन्धाविति वाय्वाकाशयोरभावात्। सर्वपदार्थव्यापित्वं पुंस्त्वादीनामाह प्रवृत्तिरिति। न हीति। सत्त्वादीनामाविर्भावादिरूपः प्रवृत्तिशब्दवाच्यो नित्यः परिणाम इत्यर्थः। पुरुषो यद्यप्यपरिणामी तथापि भोक्तृत्वात्तद्धर्मापन्न इव भवति। तदुक्तं हरिणा। प्रवृत्तिरिति सामान्यं लक्षणं तस्य कथ्यते। आविर्भावस्तिरोभावः स्थितिश्चेत्यथ भिद्यते॥ प्रवृत्तिमन्तः सर्वे ऽर्थास्तिसृभिश्च प्रवृत्तिभिः। सततं न वियुज्यन्ते वाचश्चैवात्र सम्भवः॥ यश्चाप्रवृत्तिधर्मार्थश्चितिरूपेण गृह्यते। अनुयातीव सोऽन्येषां प्रवृत्तीर्विष्वगाश्रयः॥ तेनास्य चितिरूपं च चितिकालश्च भिद्यते। तस्य स्वरूपभेदस्तु न कश्चिदपि विद्यते अचेतनेषु संक्रान्तं चैतन्यमिव दृश्यते। प्रतिबिम्बकधर्मेण यत्तद्वाचो निबन्धनमिति। सामान्यमपि गोत्वादिकं व्यक्तेरव्यतिरिक्तत्वात्प्रवृत्तिधर्मः। शशविषाणादावपि उत्तरपदार्थस्य सद्भावात्तद्द्वारको लिङ्गयोग इति सर्वपदार्थव्यापित्वं प्रवृत्तेः। आविर्भावतिरोभावान्तरालावस्था स्थितिरुच्यते। सा च नपुंसकत्वेन व्यवस्थाप्यते। स्त्रीत्वं स्त्रीता पुंस्त्वमित्यादौ संस्त्यानादेरपि प्रवृत्तिलक्षणलिङ्गयोगः। विवक्षात इति। लोकव्यवहारानुवादिनी विवक्षाश्रीयते न तु प्रायोक्त्री। तदुक्तं हरिणा। संनिधाने निमित्तानां किंचिदेव प्रवर्तकम्। यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा। भावतत्त्वविदः शिष्टाःशब्दार्थेषु व्यवस्थिताः। यद्यद्धर्मेऽङ्गतामेति लिङ्गं तत्तत्प्रचक्षत इति॥ तस्योक्ताविति। लोकतः शिष्टलोकात्तस्य लिङ्गस्य प्रतिपादने व्यवस्थानुगन्तव्येत्यर्थः। भूयानिति। भ्रुकुंसादिषु स्तनकेशादिमत्त्वलक्षणलिङ्गाभ्युपगमत्यागः परिहारः। चञ्चादिषु तु तदपरित्यागे ऽपि शास्त्राल्लिङ्गसिद्धिरिति भावः। लिङ्गमशिष्यमिति। लिङ्गव्यवस्थायां लोकः प्रमाणमित्यर्थः। एकार्थ इति। अनेन लिङ्गस्वरूपमपि लोकादेव ज्ञायते इत्युक्तं भवति तत्रैकस्मिन्नेवार्थे संस्त्यानादिसद्भावात्पुष्यस्तारका नक्षत्रमिति शब्दान्यत्वाल्लिङ्गान्यत्वम्। स्तनकेशादिसम्बन्धे तु लिङ्गे ऽभ्युपगम्यमाने एतन्न युक्तम्। अवयवान्यत्वाच्चेति। कुटी कुटीर इति रेफस्यावयवस्योपजने लिङ्गभेदो दृष्ट इत्यर्थः। यद्यपि अविचारितरमणीयं लिङ्गमाश्रित्य वक्तारः शब्द मुच्चारयन्ति श्रोतारश्च प्रति-

Indira Gandhi National Centre for the Arts

सूतेः सप् प्रसवे पुमान् । तस्योक्तौ लोकतो नाम गुणो वा लुपि युक्तवत् ॥ कथं पुनरिदं विज्ञायते स्त्रियामभिधेयायां टाबादयो भवन्तीति । आहो स्वित् स्त्रीसमानाधिकरणात्प्रातिपदिकादिति । कश्चात्र विशेषः । स्त्रियामिति स्त्र्यर्थाभिधाने चेट्टाबादयो द्विवचनबहुवचनानेकप्रत्ययानुपपत्तिः * । स्त्रियामिति स्त्र्यर्थाभिधाने चेट्टाबादयो भवन्ति । द्विवचनबहुवचनयोरनुपपत्तिः कुमार्यौ कुमार्यः । किशोर्यौ । किशोर्यः । किं कारणम् । एकत्वात् स्त्रीत्वस्य । एको ऽयमर्थः स्त्रीत्वं नाम । तस्यैकत्वादेकवचनमेव प्राप्नोति । अनेकप्रत्ययानुपपत्तिश्च । अनेकश्च प्रत्ययो नोपपद्यते । गार्ग्यायणी । कारीषगन्ध्या । कालितरा । किं कारणम् । एकत्वात् स्त्रीत्वस्य । एकोयमर्थः स्त्रीत्वं नाम तस्यैकेनोक्तत्वाद् द्वितीयस्य प्रयोगेण न भवितव्यम् । किं कारणम् । उक्तार्थानामप्रयोग इति । स्त्र्यर्थस्य च प्रातिपदिकार्थत्वात् स्त्रियामिति लिङ्गानुपपत्तिः स्त्र्यर्थस्य च प्रातिपदिकार्थत्वात् स्त्रियामिति ईकारो न प्राप्नोति । अस्तु तर्हि स्त्रीसमानाधिकरणात्प्रातिपदिकादिति । स्त्रीसमानाधिकरणादिति चेद् भूतादिष्वतिप्रसङ्गः* । स्त्रीसमानाधिकरणादिति चेद् भूतादिष्वतिप्रसङ्गो भवति । भूतमियं ब्राह्मणी । कारणीभियं ब्राह्मणी । आवपनमियमुष्ट्रिकेति । स्त्र्यर्थाभिधाने पुनष्टाबादिषु सत्सु इह तावद्

पद्यन्ते तथापि वस्तुतत्त्वनिर्णयो भाष्यकारेण कृत इति यदन्यैरभ्यध्यायि संस्त्यानादि लक्षणमलौकिकं लिङ्गमिति तदपाकृतं भवति । कथमिति । स्त्रीशब्दः शुक्लादिशब्दवद् गुणमात्रे गुणिनि च वर्तते । तत्र यदा गुणमात्रमिह स्त्रीत्वं स्त्रीशब्देनोच्यते तदा द्रव्यवाचिनः प्रातिपदिकात् स्त्रीत्वे वाच्ये टाबादय इति स्त्रीत्वं प्रत्ययार्थ इति पक्षः संपद्यते । यदा तु स्त्रीत्वयुक्तं द्रव्यं स्त्रीशब्देनोच्यते तदा परं पक्षद्वयं संभवति स्त्रीत्वोपलक्षितद्रव्यवाचिनः प्रातिपदिकाट्टाबादय इति स्त्रीसमानाधिकरणपक्षसंभवः । अथ स्त्रीत्वयुक्तद्रव्यवाचिनोङ्गीकृतस्त्रीत्वात्प्रातिपदिकादिति प्रकृत्यर्थविशेषणपक्षसंभवः । एकोयमर्थ इति । प्रकृत्यर्थोपसर्जनस्य स्त्रीत्वस्य प्रत्ययेनाभिधानादिति भावः । यद्यपि शब्दादीनामवस्थाविशेषो लिङ्गमवस्थाश्चावस्थातुरभिन्नास्तथापि यथाशब्दादीनां संनिवेशमात्रे घटे शब्दादीनां बहुत्वेऽपि संनिवेशस्याभेदविवक्षायां घटइत्येकवचनं भवति । एवमवस्थाविशेषस्य लिङ्गस्याप्येकत्वमेव संस्त्यानादेरिति मन्यते । अनेकश्चेति । पक्षद्वये ऽपि द्योतकः प्रत्ययो ऽनेकस्यापि च प्रदीपादेरिष्टं द्योतकत्वमित्यनेकप्रत्ययोत्पत्तिरविरुद्धा वाचके तु प्रत्यये ऽप्रयुक्तत्वाच्छब्दस्यैकेनैवाभिहिते ऽर्थे द्वितीयस्यानुत्पत्तिप्रसङ्गः । गार्ग्यायणीति । गर्गस्यापत्यं गोत्रं स्त्री । गर्गादिभ्यो यञ् । तदन्तात्प्राचां ष्फः तद्धित इति ष्फः तदन्तान्ङीष् । करीषगन्धेरपत्यं स्त्रीत्यण् । तस्याणिञोरिति ष्यङ् । ततो यङश्चाबिति चाप् । कालशब्दाज्जानपदादिसूत्रेण ङीष् । ततस्तरप् । ततष्टाब्न प्राप्नोति । ङीषा स्त्रीत्वस्योक्तत्वात् । स्त्र्यर्थस्येति । संस्त्यानवाचिड्ट्प्रत्ययान्तेन स्त्रशब्देन स्त्रीत्वस्याभिधानान्ङीन्न प्राप्नोति ।

Indira Gandhi National Centre for the Arts

भूतमियं ब्राह्मणीति नात्र स्त्रीत्वं विवक्षितम्। किं तर्हि। पौतन्यम्। कारणमियं ब्राह्मणीति। नात्र स्त्रीत्वं विवक्षितम्। किं तर्हि। प्राधान्यम्। आवपनमियमुष्ट्रिकेति। नात्र स्त्रीत्वं विवक्षितम्। किं तर्हि। संभवनम्। षट्संज्ञकेभ्यश्च प्रतिषेधः *। षट्संज्ञकेभ्यश्च प्रतिषेधो वक्तव्यः। पञ्च ब्राह्मण्यः। दश ब्राह्मण्यः। स्त्र्यर्थाभिधाने पुनष्टावादिषु सत्सु नात्र स्त्रीत्वं विवक्षितम्। किं तर्हि। भेदो विवक्षितः संख्या। इह च स्त्रीति ईकारो न प्राप्नोति। न हि तेनैव तस्य सामानाधिकरण्यमस्ति। सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात् स्वार्थे टाबादयः*। सिद्धमेतत्। कथम्। स्त्रियाः प्रातिपदिकविशेषणत्वात्। प्रातिपदिकविशेषणं स्त्रीग्रहणम्। स्वार्थिकाष्टाबादयः। नैवं विज्ञायते स्त्रियामभिधेयायामिति। नापि स्त्रीसमानाधिकरणादिति। कथं तर्हि। स्त्रियां यत् प्रातिपदिकं वर्तते तस्माट्टाबादयो भवन्ति। कस्मिन्नर्थे। स्वार्थ इति। अथ वा पुनरस्तु स्त्रियामभिधेयायामिति। ननु चोक्तं स्त्रियामिति स्त्र्यर्थाभिधाने चेट्टाबादयो द्विवचनबहुवचनानेकप्रत्ययानुपपत्तिः। स्त्र्यर्थस्य च प्रातिपदिकार्थत्वात् स्त्रियामिति लिङ्गानुपपत्तिरिति। नैष दोषः। यत्तावदुच्यते द्विवचनबहुवचनयोरनुपपत्तिरिति। गुणवचनस्य चाश्रयतो लिङ्गवचनभावात्*। गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति। तद्यथा। शुक्लं वस्त्रम्। शुक्ला शाटी। शुक्लः कम्बलः। शुक्लौ कम्बलौ शुक्लाः कम्बला इति। यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद् गुणस्यापि भवति। एवमिहापि यददो द्रव्यं श्रितं भवति स्त्रीत्वं गुणः तस्य यल्लिङ्गं वचनं च तत् स्त्रीत्वस्यापि भविष्यति। यदप्युच्यते अनेकप्रत्ययानुपपत्तिरिति।

भूतमियमिति। स्त्रीत्वोपलक्षितब्राह्मणीवृत्तित्वाद्भूतशब्दस्य तत्सामानाधिकरण्यात् स्त्रीप्रत्ययप्रसङ्गः। स्त्र्यर्थाभिधान इति। प्रत्ययार्थपक्षे दोषोऽयं नावतरतीत्यर्थः। भूतादयः पौतन्याद्यर्थवृत्तय इति तदर्थस्य स्त्रीत्वेन संबन्धाभावात् प्रत्ययोत्पत्तिप्रसङ्गाभावः। न हि तेनैवेति। स्त्रीशब्दसामानाधिकरण्याद् ब्राह्मण्यादिषु स्त्रीप्रत्ययः सिध्यति। स्त्रीशब्दे तु पदान्तरप्रयोगाभावाद् ब्राह्मण्यादिपदापेक्षाभावाच्च प्रत्ययो न प्राप्नोतीत्यर्थः। अथ ब्राह्मण्याद्यपेक्षया स्त्रीशब्दात्प्रत्ययः क्रियते तदितरेतराश्रयदोषापत्तिः। प्रत्ययोत्पत्तौ परस्परापेक्षणात्। इदानीं तृतीयं पक्षमाश्रित्याह सिद्धं त्विति। स्त्रीत्वयुक्तेऽर्थेऽङ्गीकृतसंस्त्याने वर्तमानात् स्वार्थे टाबादय इत्यर्थः। एवमिहापीति। यद्यपि गुणमात्रे प्रत्ययः क्रियते तथापि गुणगुणिनोरभेदविवक्षायां स्वाभाविकत्वाद्वा गुणप्रधानभावव्यवस्थायाः कुमारीशब्देन द्रव्यस्यैवाभिधानात्तद्गतसंख्यानिमित्तावचनोत्पत्तिर्द्रव्यवाचिना च नित्यं सामानाधिकरण्यमिति भावः। तदुक्तं हरिणा। सोयमित्याभिसंबन्धादाश्रयं प्रतिपद्यते। स्त्रीत्वं स्वभावसिद्धो वा गुणभावविपर्यय इति॥ भावस्येति। स्त्रीत्वस्य स्त्रीत्वेन योग इत्यर्थः। इर्विरिति

Indira Gandhi National Centre for the Arts

भावस्य च भावयुक्तत्वाद्भावो भावेन युज्यते । तद्यथा । इषिरिषिणा । निमन्त्रिश्च निमन्त्रिणा । विषम उपन्यासः । युक्तं तत्रान्यत्वं साधनभेदात् कालभेदाच्च । उक्तं तत्रैकस्य बाह्यं साधनं सर्वकालश्च प्रत्ययः । अपरस्याभ्यन्तरं साधनं वर्तमानकालश्च प्रत्यय इति । इह पुनरेकं स्त्रीत्वम् । अथैकमप्युपलभ्यतें । किं चातः । यद्येकमुपलभ्यते द्वितीयमप्युपलभ्यताम् । अथैकमप्यनुमानगम्यं द्वितीयमप्यनुमानाद्गम्यताम् । कस्य तावद्भवानेकं गुणं न्याय्यं मन्यते स्त्रीत्वं नाम । द्रव्यस्य । द्रव्ये च भवतः कः संप्रत्ययः । यदि तावद् गुणसमुदायो द्रव्यम् । का गतिर्य एते भावाः कृदभिहितास्तद्धिताभिहिताश्च । चिकीर्षा गोतेति । अथ मतमेतत् कृदभिहितो भावो द्रव्यवद्भवतीति । स्त्रीत्वमपि स्त्रीत्वेनाभिहितं द्रव्यवद्भविष्यति । क्व च तावद् दोषः स्यात् । दृष्टस्य हि दोषस्य सुसुखः परिहारः । गार्ग्यायणी । कारीषगन्ध्या । कालितरेति । इह तावद् गार्ग्यायणीति । षित्करणसामर्थ्यान्ङीष् भविष्यति । कारीषगन्ध्येति वचनाच्चाब्भविष्यति । कालितरेति न यावत्काली तावत्कालितरेति । किं तर्हि । प्रकृष्टा काली कालितरा । यत्तच्छब्दरूपं प्रकर्षे वर्तते तस्यानुक्तं स्त्रीत्वमिति कृत्वा टाब्भविष्यति । यदप्युच्यते । इह च स्त्री इति ईकारो न प्राप्नोतीति । निपातनादेतत् सिद्धम् । किं निपातनम् । स्त्रियामवन्तिकुन्तिकुरुभ्यश्चेति । स्त्रीविषये ङ्यापोरप्रसिद्धिरकारान्तादर्शनात् * । स्त्री-

---

पषितुमिच्छतीत्यत्रेत्यर्थः । निमन्त्रिश्चेति । निमन्त्रयेत इत्यत्र निमन्त्रणे लिङ्विधावित्यर्थः । पकस्येति । पषितुमित्यस्येषेरित्यर्थः । बाह्यमिति । भोजनादिकमित्यर्थ । सर्वकाल इति । तुमुन्नित्यर्थः । स हि समानकर्तृकेषु तुमुन्निति कालमात्रे विधीयते । अपरस्येति । इच्छतीत्यस्य । आभ्यन्तरमिति । इषेरेव कर्मेत्यर्थः । स चैषिषतीत्यत्र प्रकृत्यर्थत्वादाभ्यन्तरः । इह पुनरिति । भेदहेत्वभावादेकमेव स्त्रीत्वम् । इच्छायास्त्वभिन्नरूपाया अपि कालसाधनभेदाद् भवतु भेदग्रहणमित्यर्थः । इतरे इह पुनरेकमिति ब्रुवता स्त्रीत्वमनेन प्रतिपन्नं भेदस्तु सुसाध इति मत्वाह अथैकमपीति । यद्येकमुपलभ्यत इति । खट्वादिष्वसदपि मृगतृष्णावद्यद्युपलभ्यते लिङ्गम् । अविचारितरमणीयेन च तेन प्रसिद्धो व्यवहारस्तदा स्त्रीतेत्यादौ द्वितीयस्याप्युपलम्भोऽस्त्विति भावः । अथैकमिति । सुखदुःखमोहान्वयात्सर्वव्यक्तीनां तत्परिणाम एवेदं विश्वं गुणानाञ्च प्रवृत्तिर्लिङ्गम् । तत्र प्रवृत्तिसद्भावाल्लिङ्गयोगोऽस्त्वितीत्यर्थः । कस्य तावदिति । आश्रये निर्ज्ञाते सुवचः समाधिरिति भावः । गुणसमुदाय इति । रूपादिसंनिवेशमात्रमित्यर्थः । गोतेति । भावे तल् । अथ मतमिति । इदं तदिति सर्वनामप्रत्यवमर्शयोग्यं वस्तु द्रव्यमित्यर्थः । ततश्च स्त्रीत्वस्यापि द्रव्यरूपत्वादपरेण स्त्रीत्वेनाविरुद्धो योगः । षित्करणसामर्थ्यादिति । एकमपि स्त्रीत्वं प्रत्ययद्वयेनाभिधीयत इत्यर्थः । वचनादिति । यङश्चाबित्यस्मात् । तथाहि । अत्र सामान्यग्रहणाय तदविघाताय च ष्यङोऽनुबन्धद्वयं कृतमिति भावः । यावत्कालीति । अन्योऽत्र प्रकर्षयुक्तो-

Indira Gandhi National Centre for the Arts

विषये ङ्याबोरप्रसिद्धिः। खट्वा। माला। किं कारणम्। अकारान्तादर्शनात्। न ह्यकारान्तता दृश्यते। ननु चेयं दृश्यते। अतिखट्वः। अतिमाल इति। नैषा अकारान्तता। आप एवैतद् ह्रस्वत्वम्। सर्वेषां तु स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः। सर्वेषामेव तु प्रातिपदिकानां स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्तव्यः शशः षष इति मा भूत्। पलाशः पलाष इति मा भूत्। मञ्चकः मञ्जक इति मा भूत्। तस्मात्सिद्धम् *। तस्मात्सिद्धमेतद्भवति। अथ वा इयमकारान्तता दृश्यते। पञ्चभिः खट्वाभिः क्रीतः पटः पञ्चखट्वः। दशखट्वः॥

अजाद्यतष्टाप्॥ ४॥ शूद्रा चामहत्पूर्वा *। शूद्रा चामहत्पूर्वेति वक्तव्यम्। शूद्रा। अमहत्पूर्वेति किमर्थम्। महाशूद्री। जातिः *। जातिरिति वक्तव्यम्। याहि महती शूद्रा महाशूद्रा सा हि भवति। शूद्रशब्दोऽजादिषु पठ्यते। तत्र कः प्रसङ्गो यन्महत्पूर्वात्स्यात्। नैव प्राप्नोति नार्थः प्रतिषेधेन। तदन्तविधिना प्राप्नोति। ग्रहणवता प्रातिपदिकेन तदन्त विधिः प्रतिषिध्यते। एवं तर्हि ज्ञापयत्याचार्यः भवतीह तदन्तविधिरिति। किमेतस्य ज्ञापने प्रयोजनम्। भवती

र्थोऽन्यश्चाप्रकर्षयुक्तः, अवस्थाभेदाद्वाचनिकशब्दभेदाच्चैक एवार्थो भिद्यत इति भावः। स्त्रीविषय इति। ये नित्यमेव स्त्रियां वर्तन्ते खट्वामालादयस्तेषामकारान्तप्रकृतित्वमवधारयितुं न शक्यते। अकारान्तस्य प्रयोगाभावात्। अनेकलिङ्गेषु तु कुक्कुटादिषु शक्यते ऽकारान्तत्वं निश्चेतुमिति भावः। सर्वेषामिति। शाकटायनदर्शनेन सर्वशब्दानां व्युत्पाद्यत्वाच्छास्त्रद्वारेणाकारान्तता निर्श्चीयते इत्यर्थः। पञ्चभिरिति। ताद्धितार्थे द्विगुः। आर्हादिति ठक्। तस्याध्यर्धेतिलुक्। लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुकि कृते प्रयोग एवाकारान्तता दृश्यते एवेत्यर्थः॥ ३॥

अजाद्यतष्टाप्॥ शूद्रा चेति। जातिलक्षणो ङीष् अनेन टापा बाध्यते न तु पुंयोगलक्षणः गौणमुख्ययोर्मुख्ये संप्रत्यय इति न्यायान्मुख्यार्थवृत्तेरिह शूद्रशब्दस्य ग्रहणात् तेन शूद्रस्य भार्या शूद्रीत्येव भवति। अमहत्पूर्वेत्यत्र महच्छब्दस्यानुकरणशब्दत्वाल्लौकिकार्थाभिधायित्वाभावादात्वाभावः।अमहत्पूर्वेति किमर्थमिति।अन्तरङ्गत्वात् पूर्वं टापि कृते सुप्युत्पन्ने समासेन भाव्यम्। महती शूद्रा महाशूद्रेति। ततश्च निर्वृत्तत्वाट्टापः प्रतिषेधोऽनर्थक इति प्रश्नः। महाशूद्रीति। महाशूद्रशब्दः समुदाय एवाभीरजातिवचनो न त्वत्रावयवार्थोऽस्ति यथा गौरखर इति। तत्र समुदायव्युत्पादने ऽवयवार्थस्य स्त्रीत्वाभावात्तदविवक्षित्वैव समासः क्रियते। ततष्टापि प्रतिषिद्धे जातिलक्षणो ङीषेव भवति। जातिरिति।महाशूद्रशब्दः समुदायो यदा जातिवाची तदा टापः प्रतिषेधो यदा तु महत्त्वविशिष्टा शूद्रा प्रतिपिपादयिषिता तदा महाशूद्रेत्येव भवति। असति तु जातिग्रहणे अमहत्पूर्वेति प्रतिषेधसामर्थ्यादन्तरङ्गोऽपि टाब्बाध्येत। ततश्चात्रापि ङीष् प्रसज्यते।अतिभवतीति।भवन्तमतिक्रान्ता महान्तमतिक्रान्तेति प्रादिसमासः।तत उगितश्चेत्यनेनोगिदन्तादपि ङीप् सिद्धो भवति। गौरादिषु बृहन्महच्छब्दौ न पठितव्यौ। तथा च शतुरनुम इत्यत्र नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानमित्युक्तम्। अन्यथा ङीष एवोदात्तत्वेन सिद्धत्वात्

अतिभवती । महती अतिमहती, अत्र तदन्तविधिः सिद्धो भवति । जातिरिति च वक्ष्यामीति । यद्येतज्ज्ञाप्यते । पञ्चाजी । दशाजी । अत्रापि प्राप्नोति । नैष दोषः । अजादिभिरत्र स्त्रियं विशेषयिष्यामः । अजादीनां या स्त्रीति ॥

उगितश्च ॥ ६ ॥ कथमिदं विज्ञायते । उगितः प्रातिपदिकादिति आहो स्विदुगिदन्तात्प्रातिपदिकादिति । किं चातः । यदि विज्ञायते उगितः प्रातिपदिकादिति । सिद्धम् । भवती, महतीति । अतिभवती अतिमहतीति न सिध्यति । तदन्तविधिना भविष्यति । ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते । अथ विज्ञायते उगिदन्तात्प्रातिपदिकादिति । सिद्धम्, अतिभवती अतिमहतीति । भवती महतीति न सिध्यति । व्यपदेशिवद्भावेनेह भविष्यति । व्यपदेशिवद्भावोऽप्रातिपदिकेन । उभयथा च निर्गोमती निर्यवमतीति न सिध्यति । किं कारणम् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवतीति । यथेच्छसि तथास्तु । अस्तु तावदुगितः प्रातिपदिकादिति । कथम्, अतिभवती अतिमहतीति ।

किं ङीपउदात्तविधानेन । विभक्त्युदात्तार्थं तद्वचनमिति चेत् किं गौरादिषु पाठेन प्रयोजनम् । अनुपसर्जनाधिकाराच्चातिमहतीत्यत्र गौरादिङीषभावादुगिल्लक्षणो ङीप् कर्तव्यस्तस्य चोदात्तत्वमुपसंख्यानेन कर्तव्यम् । जातिरिति च वक्ष्यामीति । अन्यथा महत्पूर्वेत्यसति प्रतिषेधे महाशूद्रीमहाशूद्राशब्दयोर्विषयविभागेन कथं साधुत्वं प्रतीयेतेति भावः । पञ्चाजीति । पञ्चानामजानां समाहार इति द्विगुः । ततो द्विगोरिति ङीब्न प्राप्नोति । टापा बाध्यमानत्वात् । अजादीनामिति । अजाद्यत इति षष्ठी । तेनाजादिप्रातिपदिकाभिधेयसमवेतं स्त्रीत्वमिह गृह्यते । पञ्चाजीत्यत्र तु समासाभिधेयसमाहारगतं स्त्रीत्वं न त्वजादिशब्दगतमिति । टापोऽप्रसङ्गः । प्रत्यासत्त्या च स्त्रीत्वविशेषणोपक्षीणानामप्यजादीनामेव प्रकृतित्वं विज्ञायते । सामर्थ्याद्वा । एवं तु सत्यमहत्पूर्वेति न प्रतिषेधो वक्तव्यः । न हि महाशूद्रीत्यत्र शूद्रार्थगतं स्त्रीत्वमिति टापः प्रसङ्गाभावः ॥ ४ ॥

उगितश्च ॥ कथमिति । प्रातिपदिकादिति वर्तते । तत्र विशेषणविशेष्यभावे कामचाराद्यदि प्रातिपदिकेनोगिद्विशेष्यते तदोगितः प्राधान्यात्तेन तदन्तविधिर्नास्ति । न च प्रातिपदिकान्तमुगित्संभवतीति प्रातिपदिकादुगित इति पक्षसम्भवः । यदा तूगिता प्रातिपदिकं विशेष्यते । तदा तदन्तविधौ सत्युगिदन्तात्प्रातिपदिकादित्येष पक्षो भवति । पक्षद्वयं प्यव्याप्तिरिति मत्वा प्रश्नः ॥ भवतीति । सर्वादिषु भवतुशब्द उगित्पठ्यते महच्छब्दोपि शतृवद्भावादुगिद्व्यपदेश्यः । तदन्तविधिनेति । उगिता प्रातिपदिकस्य विशेषणादिति भावः । ग्रहणवतीति । ग्रहणमनुपादानमात्रम् । न तु प्रातिपदिकस्य स्वरूपेणोच्चारणम् । अथेति । अमहत्पूर्वेति प्रतिषेधेनेह प्रकरणे तदन्तविधेर्ज्ञापितत्वादिति भावः । निर्गोमतीति । आद्ये पक्षे गोमतीत्यत्रापि न सिध्यति । उगित्त्वं मतुपो गोमानित्यादौ नुमर्थं स्यात् । द्वितीये तु गोमतीति सिध्यति । मतुप उगित्वात्तदन्तत्वाच्च गोमच्छब्दस्य । गोमतो निष्क्रान्तेति समासे तु कृते निरादेः समुदायात् मतुपो विधाना-

"Indira Gandhi National
Centre for the Arts

तदन्तविधिना भविष्यति । ननु चोक्तं ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यतइति । नैतत्प्रातिपदिकग्रहणम् । प्रातिपदिकाप्रातिपदिकयोरेतद् ग्रहणम् । अथ वा पुनरस्तु उगिदन्तात्प्रातिपदिकादिति । कथं, भवती महतीति । व्यपदेशिवद्भावेन भविष्यति । ननु चोक्तं व्यपदेशिवद्भावोऽप्रातिपदिकेनेति । नतत्प्रातिपदिकग्रहणम् । प्रातिपदिकाप्रातिपदिकयोरेतद् ग्रहणम् । यदप्युच्येत उभयथा निर्गोमती निर्यवमतीति न सिध्यतीति । किं कारणम् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवतीति । नैतत्प्रत्ययग्रहणम् । प्रत्ययाप्रत्यययोरेतद् ग्रहणम् । कथम् । वर्णोऽप्युगित् प्रत्ययोऽप्युगित् प्रातिपदिकमप्युगित् । धातोरुगितः प्रतिषेधः * । धातोरुगितः प्रतिषेधो वक्तव्यः । उखास्रद् ब्राह्मणी । पर्णध्वद् ब्राह्मणी । अञ्चतेश्चोपसंख्यानम् * । अञ्चतेश्चोपसंख्यानं कर्तव्यम् । प्राची । प्रतीची । उगित्यञ्चतिग्रहणात्सिद्धमधातोः । उगितिअञ्चतिग्रहणात् । अधातोः सिद्धम् । अञ्चतिग्रहणं नियमार्थं भविष्यति । अञ्चतेरेवोगितो धातोर्नान्यस्योगितो धातोरिति ॥

वनो र च ॥ ७ ॥ इह कस्मान्न भवति । निःशुनी । अतियूनीति । अर्थ-

भावात् ङीब्न स्यादित्यर्थः । तदन्ताविधिनेति । ननु च प्रातिपदिकेनोगितो विशेषणाद्विशेष्येण कथं तदन्ताविधिः । एवं तर्हि तन्त्रेण योगद्वयमुच्चार्यते तत्रैकस्मिन् योगे प्रातिपदिकेनोगिद्विशेष्यते । द्वितीये तूगिता प्रातिपदिकमिति दोषाभावः । नैतदिति । उगिद्यस्य तदुगिदिति शब्दरूपमात्रमन्यपदार्थ आश्रीयते न तु प्रातिपदिकमेवेत्यर्थः । व्यपदेशिवद्भावेनेति । प्रयोगभेदेन भवान् भवतीति यच्छब्दरूपं प्रयुज्यते तस्याय भवच्छब्दोऽन्ते इति कल्पनेयत्यर्थः । एतेन येन विधिस्तदन्तस्येत्यत्र स्वं रूपमिति निवृत्तमिति दर्शितं भवति । तेन गोक्षीरमित्यादौ गोस्त्रियोरिति ह्रस्वो न भवति । वर्णोऽप्युगिदिति । अर्वणस्त्रसावनञ इति अर्वन्शब्दस्य तृशब्द आदेशः तत्रार्वतीति ङीब् भवति अश्वपर्यायोऽर्वन् शब्दः । नन्वङ्गस्य तृशब्द आदेशो विधीयते तत्र ऋन्नेभ्य इति ङीपि कृते आदेशेन भवितव्यम् । एवं तर्हि सम्भवमात्रेणैतदुक्तमित्यदोषः । उगित्यञ्चतिग्रहणादिति उगिदचामित्यत्रोगिद्ग्रहणादञ्चतेरपि ग्रहणे सिद्धे ऽञ्चतिग्रहणं नियमार्थम् । इह शास्त्रे यत्कार्यमुगितो विधीयते तदञ्चतेरेव धातोर्भवति नान्यस्य धातोरिति कार्यमात्रं नियम्यते न तु नुमागम एव । अधातुग्रहणं तु तत्राधातुभूतपूर्वस्यापि नुमागमार्थम् । तेन गोमन्तमिच्छतीति क्यचि क्विपि च कृते गोमानित्यत्रापि नुम्भवति । अन्यथा धातुत्वादञ्चतिग्रहणात् नियमार्थान्न स्यात् । अन्ये त्वाहुः । उगितश्चेति यश्चशब्दः सोऽञ्चतेर्लुप्ताकारनकारस्यानुकरणम् । विभक्तेश्च सुपां सुलुगिति लुक् । भावितं चाकारलोपमाश्रित्य चेति निर्देशः कृतः ततश्चाञ्चतिग्रहणमिहैव नियमार्थम् । अकारनकारलोपयोश्चातन्त्रत्वात् । नाञ्चेः पूजायामिति यदा नलोपः प्रतिषिध्यते तदापि ङीब् भवति ॥ ६ ॥

वनो र च ॥ निः शुनीति । शुनो निष्क्रान्ता युवानमतिक्रान्तेति प्रादिसमासस्ततो

National Centre for the Arts

वदूग्रहणे नानर्थकस्येति । एवमपि मघोनी । अत्र प्राप्नोति । मघवन्शब्दो ऽव्युत्पन्नं प्रातिपदिकम् । वनो न हशः * । वनो र चेत्यत्र हशन्तान्न भवतीति वक्तव्यम् । इह मा भूत् । सहयुध्वा ब्राह्मणीति । यदि न हश इत्युच्यते शर्वरीति न सिध्यति । विहितविशेषणं हशूग्रणम् । हशन्ताद्यो विहित इति । एवमपि प्रेत्वरीति न सिध्यति । कथं चात्र तुगागमः । छान्दसत्वात् । ङीब्रावपि तर्हि छान्दसत्वादेव भविष्यतः । बहुलं छन्दसि * । बहुलं छन्दसि ङीब्रौ वक्तव्यौ यज्वरीरिषः । यज्वनीपिषः । रविधाने बहुव्रीहेरुपसंख्यानं प्रतिषिद्धत्वात् * । रविधाने बहुव्रीहेरुपसंख्यानं कर्तव्यम् । बहुधीवरी । बहुपीवरी । किं पुनः कारणं न सिध्यति । प्रतिषिद्धत्वात् । अनो बहुव्रीहेरिति प्रतिषेधः प्राप्नोति । अनो बहुव्रीहेः प्रतिषेधे वोपधालोपिनो वावचनम् । अथ वा अनो बहुव्रीहिप्रतिषेधे उपधालोपिनो वेति वक्तव्यम् । अन्यथा कृत्वा चोदितमन्यथा कृत्वा परिहारः । यथोपसंख्यानं चोदितं तथा नित्याभ्यां ङीब्राभ्यां भवितव्यम् । यथा परिहारः तथा विभाषया भवितव्यम् । यथोपसंख्यानं चोदितमेवमपि विभाषया भवितव्यम् । न ह्यत्र ङीब् दुर्लभः । सिद्धोऽत्र ङीप् । अन उपधालोपिनोऽन्यतरस्या-

---

ङीप् । स्वन्शब्दस्य गौरादिपाठेऽप्युपसर्जनत्वादत्र ङीष् न भवति । मघोनीति । मघमस्यास्तीति च्छन्दसीवनिपौ वक्तव्याविति वनिप् । स चार्थवानिति प्रश्नः । अव्युत्पन्नमिति । श्वन्नुक्षन्नित्यौणादिको मघवन्छब्दः । उणादिषु च नावश्यं व्युत्पत्तिनिमित्तं कार्यं भवतीति प्रागेवोक्तम् । वनो न हश इति द्वयोरपि ङीब्रेफयोर्निषेधः । सहयुध्वेति । सह चेति क्वनिप् । शर्वरीति । शृ हिंसायामित्येतस्मादन्येभ्योपि दृश्यन्त इति वनिप् । तत्र गुणे रपरत्वे कृते हशन्तो भवतीति पूर्वः पक्षः । प्रेत्वरीति । इण् गतावित्यस्मात्प्रपूर्वादन्येभ्योऽपि दृश्यन्त इति क्वनिब्वनिपोरन्यतरः स हसन्ताद्विहित इति ङीब्रौ न स्यातामिति प्रश्नः । छान्दसत्वादिति । प्रईरिसद्योस्तुट् चेत्युणादिसूत्रमनपेक्ष्यैतदुक्तम् । यज्वरीति । सुयजोर्ङ्वनिप् । वा छन्दसीति पूर्वसवर्णदीर्घः । बहुधीवरीति । बहवो धीवानोऽस्यामिति बहुव्रीहिस्तत्रानो बहुव्रीहेरिति ङीपः प्रतिषेधः प्राप्नोति । रेफस्य ङीप्सन्नियोगेन विधानात्तदभावादेवाभावप्रसङ्गः । यदि वा स्त्रियां यदुक्तं तस्य सर्वस्यानो बहुव्रीहेरिति प्रतिषेधविधानादत्र ङीब्रौ न प्राप्नुतः । तस्माद्वनो र च बहुव्रीहेश्चेति वक्तव्यमित्यर्थः । तत्र बहुव्रीहेश्चेत्यनेन लक्षणान्तरेणान उपधालोपिन इत्यनेन विहिते ङीपि रेफमात्रं विधेयम् । यदि तु द्वावपि ङीब्रौ विधीयेयातां तदा सुपर्वादेरनुपधालोपिनोऽपि स्याताम् । अन इति । अनो बहुव्रीहेरित्यस्यानन्तरमुपधालोपिनो वेति वक्तव्यम् । तेनान उपधालोपिनोऽन्यतरस्यामित्येतच्च वक्तव्यं भवति तत्रानुपधालोपिनो नित्यो ङीप्प्रतिषेधो भवति । सुपर्वेति । उपधालोपिनस्तु ङीब्विकल्पस्तेन बहुराज्ञी बहुराजानौ बहुराजेति रूपत्रयं सिध्यति । एवं बहुधीवरी बहुधीवानौ बहुधीवेति वन्नन्तस्याप्युपधालोपिनो रूपत्रयं भवति इतरः पूर्वोक्तमभिप्रायमप्रतिपद्याह अन्यथा कृत्वेति । अन्येन सतीति । प्रकरणान्तरविहितत्वात्तः

Indira Gandhi National Centre for the Arts

मिति। ङीप्संनियोगेन र उच्यमानो ऽन्येन सति न स्यादित्येवमर्थमुपसंख्यानं चोद्यते। किं पुनः कारणं ङीप्संनियोगेन र उच्यते। इह मा भूत्। सुपर्वा चारुपर्वेति। तत्तर्ह्युपसंख्यानं कर्तव्यम्। न कर्तव्यम्। वक्ष्यति। डाबुभाभ्यामन्यतरस्यामित्यत्रान्यतरस्यांग्रहणस्य प्रयोजनं डाप्प्रतिषेधाभ्यां मुक्ते ङीब्रावपि यथा स्यातामिति॥

न षट्स्वस्रादिभ्यः ॥ १० ॥ कस्यायं प्रतिषेधः। ङीबनन्तरस्य प्रतिषेधः। अथेदानीं ङीपि प्रतिषिद्धे षट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न स्यात्। अत इति प्राप्नोति। असिद्धो नलोपस्तस्यासिद्धत्वान्न भविष्यति। परिगणितेषु कार्येषु नलोपोऽसिद्धः। न चेदं तत्र परिगण्यते। इदमपि तत्र परिगण्यते। कथं। प्रत्याहाराच्चापा सिद्धम् *। सुबिति नेदं प्रत्ययग्रहणम्। किं तर्हि प्रत्याहारग्रहणम्। क्व संनिविष्टानां प्रत्याहारः। प्रथमैकवचनात्प्रभृत्याचापः पकारात्। यदि प्रत्याहारग्रहणम्। दोषस्त्वित्वे *। इत्वे दोषो भवति। बहुचर्मिका। बहुवर्मिका। प्रत्ययस्थात्कात्पूर्वस्यात इति इत्वं न प्राप्नोति। तस्मान्नोभौ*। तस्मात् षट्संज्ञकेभ्य उभौ न भवत इति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। स्त्रियामिति वर्तते स्त्रियां यत्प्राप्नोति तस्य प्रतिषेधः। षट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न स्यात्। प्रत्याहाराच्चापा सिद्धं दोषस्त्वित्वे तस्मान्नोभौ॥

स्य ङीप इति भावः। बहुव्रीहेश्चेति वचनेन प्रकरणान्तरविहिते पाक्षिके ङीपि रेफो विधीयतइति तदेव रूपत्रयं भवतीत्यर्थः। किं पुनरिति। ङीप्संनियोगमनपेक्ष्य रेफमात्रं वन्नन्तस्य स्त्रियां विधीयताम्। ततश्च बहुधीवरीत्यत्रापि रेफो भविष्यति अन उपधालोपिन इत्यनेन च ङीबिति प्रश्नः। डाबिति। एतत्तत्रैव व्याख्यास्यते। केचिच्चोदयन्ति। वन्निति प्रत्ययग्रहणं कृद्ग्रहणं वा ततश्च प्रत्ययग्रहणे यस्मात्स विहित इति कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति वा बहुधीवरी अतिधीवरीति रेफो न प्राप्नोति। नैष दोषः। अमहत्पूर्वेति प्रतिषेधेन तदन्तविधेर्ज्ञापितत्वात्॥ ७॥

न षट्॥ कस्यायमिति। यदि ङीपः प्रतिषेधस्तदा पञ्च ब्राह्मण्य इत्यत्र नलोपे सति अदन्तत्वाट्टाप् प्राप्नोतीति मत्वा प्रश्नः। आचार्यः शिष्यबुद्धिपरीक्षार्थं परिहाराभासमाह ङीबनन्तर इति। यस्तु टाबृचीति पादन्ताट्टाब्विहितस्तस्यात्र प्रसङ्गाभावात् ङीबनन्तर इत्युक्तम्। परिगणितेष्विति। नलोपः सुप्स्वरेति सूत्रं नियमार्थं सुबादिविधिष्वेव नलोपोऽसिद्धो नान्यत्रेत्यर्थः। आचाप इति। यङश्चाबित्यस्यात्र प्रत्याहारे टापोन्तर्भावाट्टाब्विधिः सुब्विधिः तत्र नलोपस्यासिद्धत्वमस्त्येवेत्यर्थः। दोषस्त्वित्वे इति। तत्र हि सुब्विधिरिति सर्वविभक्त्यन्तावयवः समास आश्रितः। ततश्च टापि सुपि विधिरित्वं सुब्विधिर्भवतीति इत्वे कर्तव्ये नलोपस्यासिद्धत्वात्कात्पूर्वोऽकारो न भवतीतीत्वं न स्यादित्यर्थः। स्त्रियां यत्प्राप्नोतीति। अर्थाश्रयप्राप्तिमात्रापेक्षोयं प्रतिषेध इत्यर्थः॥ १०॥

Indira Gandhi National Centre for the Arts

डाबुभाभ्यामन्यतरस्याम् ॥ १३ ॥ किमर्थमुभाभ्यामित्युच्यते उभाभ्यां डाब्यथा स्यात्। मन्नन्तादन्नन्ताच्च। नैतदस्ति प्रयोजनम्। प्रकृतमुभयमनुवर्तते। अथान्यतरस्यांग्रहणं किमर्थम्। अन्यतरस्यां डाब्यथा स्यात्। डापामुक्ते विप्रतिषेधो यथा स्यादिति। नैतदस्ति प्रयोजनम्। इह डाबुच्यते प्रतिषेधोपि तावुभावपि वचनाद्भविष्यतः। इदं तर्हि प्रयोजनम्। डाप्प्रतिषेधाभ्यांमुक्ते ङीबपि यथा स्यात्। सिद्धोत्र ङीप्। अन उपधालोपिनोन्यतरस्यामिति। अथ तदन्यतरस्यांग्रहणं शक्यमकर्तुम्। बाढं शक्यम्। कथम्। इह डाबप्युच्यते प्रतिषेधोपि ङीबपि। तत्सर्वं वचनाद्भविष्यति। नैवं शक्यं विज्ञातुम्। अक्रियमाणे हि तत्रान्यतरस्यांग्रहणे ऽनवकाशो ङीब् डाप्प्रतिषेधौ बाधेत। डाप्प्रतिषेधावप्यनवकाशौ तौ वचनाद्भविष्यतः। सावकाशौ डाप्प्रतिषेधौ। कोवकाशः। सुपर्वा चारुपर्वेति। तस्मादन्यतरस्यां ग्रहणं कर्तव्यम्। इदं तु खल्वन्यतरस्यांग्रहणं शक्यमकर्तुम्। इदमप्यवश्यं कर्तव्यम्। किं प्रयोजनम्। डाप्प्रतिषेधाभ्यामुक्ते ङीब्रावपि यथा स्यातामिति। रविधाने बहुव्रीहेरुपसङ्ख्यानं चोदितं तन्न वक्तव्यं भवति।

डाबु॥ योगाभ्यामिति। योगस्था प्रकृतिर्योगशब्देनोच्यते। प्रकृतमिति। द्वयोरपि स्वरितत्वप्रतिज्ञानादपेक्षणाद्वेति भावः। एवमुभाभ्यामिति प्रत्याख्यातम्। तावुभाविति। यदि यत्रैव ङीप्प्रतिषेधस्तत्रैव डाप् स्यात्तदा प्रतिषेधमविधायैव मनो डाबित्युच्येत ततो ऽनो बहुव्रीहेरित्यनेनापि डाबेव विधीयेत स एव हि ङीपं बाधिष्यते किं प्रतिषेधेन। तस्मादुभयविधानसामर्थ्यादुभयं भविष्यतीत्यर्थः। सिद्धोत्रेति। ननु यत्र तेन सिध्यति सुपर्वेत्यादौ तदर्थमन्यतरस्यांग्रहणं स्यात्। नैतदस्ति। यदानेनान्यतरस्यांग्रहणेन पक्षे ङीबनुज्ञायते तदान उपधालोपिन इति नियमार्थं भवति। उपधालोपिन एवान्नन्ताद् ङीब् भवति नान्यस्मादिति। ततश्च सुपर्वेत्यादेरनउपधालोपिनो ङीपा न भाव्यमेव। अथ तदिति। अन्तराले विचारः क्रियते। इदमेवान्यतरस्यांग्रहणं भवतु तत्रत्यं न कर्तव्य भवतीति मन्यते। इतरो ऽकरणं समन्यते। बाढमिति। ङीबपीति। अन्यतरस्याङ्ग्रहणेनात्रत्येन प्रापित इति भावः। इदं त्विति। अस्मिन्नन्यतरस्यांग्रहणे क्रियमाणे ऽन उपधालोपिनोन्यतरस्यामिति नियमार्थं कर्तव्यम्। तदेवेहाकृतेन्यतरस्यांग्रहणे विध्यर्थं भविष्यतीति भावः। इदमपीति। असतीहान्यतरस्यांग्रहणेन उपधालोपिनोन्तरस्यामिति सूत्रं विध्यर्थं स्यात्ततश्च प्रकरणान्तरेण ङीपो विधानाद्वनो रचेत्यनेन ऋन्नेभ्यो ङीबित्येतत्सूत्रविधीयमानङीप्सन्नियोगेन विधीयमानो रेफो बहुधीवरीत्यत्र न स्याद् बहुधीव्नीति स्यात्। सति त्विहान्यतरस्यांग्रहणे ऽन उपधालोपिन इति सूत्रं नियमार्थं भवति न तु विध्यर्थमिति बहुधीवरीत्यत्र ऋन्नेभ्यो ङीबित्यनेनैव ङीब् भवति। ततश्च वनोरचेति रेफादेशः सिध्यति। यदि तर्ह्यन्यतरस्यांग्रहणेन पक्षे ङीबनुज्ञायते तदा मन्नन्तादपि प्राप्नोति। तदा व्यवस्थितविभाषाविज्ञानान्न भविष्यति। अथवा डाबुभ्यामित्येको योगः क्रियते ततोन्यतरस्यामिति द्वितीयस्तत्रानो बहुव्रीहेरिति वर्तते न तु मन इति। अथेहेति। यदि

Indira Gandhi National Centre for the Arts

अथेह कथं भवितव्यं बहवः श्वानोऽस्यां रथ्यायां बहवो युवानोऽस्यां शालायामिति। बहुशूका बहुयूका इति भवितव्यम्। का रूपसिद्धिः। डाप् टिलोपः संप्रसारणम्। संप्रसारणपरपूर्वत्वम्। नद्यृतश्चेति कप्। कपा तावन्न भवितव्यम्। किं कारणम्। नद्यन्तानां यो बहुव्रीहिरित्येवं तद्विज्ञायते। न चैष नद्यन्तानां बहुव्रीहिः। संप्रसारणेनापि न भवितव्यम्। वक्ष्यत्येतत्। श्वादीनां संप्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थमिति। परपूर्वत्वेन चापि च न भवितव्यम्। वक्ष्यत्येतत् संप्रसारणपूर्वत्वे समानाङ्गग्रहणमसमानाङ्गप्रतिषेधार्थमिति। तस्माद्बहुश्वा बहुयुवेति भवितव्यमिति॥

अनुपसर्जनात् ॥१४॥ अनुपसर्जनादिति किमर्थम्। बहुकुरुचरा मथुरा। नैतदस्ति प्रयोजनम्। कुरुचरशब्दात्प्रत्ययो विधीयते। तत्र कः प्रसङ्गो यद्बहुकुरुचरशब्दात्स्यात्। नैव प्राप्नोति। नार्थः प्रतिषेधेन। तदन्तविधिना प्राप्नोति। अत उत्तरं पठति। अनुपसर्जनग्रहणमनर्थकं प्रातिपदिकेन तदन्तविधिप्रतिषेधात् *। अनुपसर्जनग्रहणमनर्थकम्। किं कारणम्। प्रातिपदिकेन तदन्तविधिप्रतिषेधात्। ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते। ज्ञापकं तु पूर्वत्र तदन्ताप्रतिषेधस्य *। एवं तर्हि ज्ञापयत्याचार्यः पूर्वत्र तदन्तविधिप्रतिषेधो न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। भवती अतिभवती

नद्यृतश्चेत्यनेन नद्यन्ताद् बहुव्रीहेः कब्विधीयते तदात्रापि कपा भाव्यम्। अथ नद्यन्तानां वर्तिपदानां यो बहुव्रीहिस्ततः कबिति तदा तत्र कपो न भाव्यमिति संशय्य पृच्छति। आचार्यदेशीय आह बहुशूकेति। सम्प्रसारणं परपूर्वत्वमिति। सम्प्रसारणस्य डापश्चेत्यर्थः। ततो हल इति सम्प्रसारणान्तस्य दीर्घत्वमङ्गप्रत्यययोरेकादेशस्य पूर्वं प्रत्यन्तवद्भावात्ततो नदीसंज्ञायामुपजातायां नद्यृतश्चेति कप्। इदानीमाचार्य आह। कपा तावदिति। वक्ष्यतीति। डापि परतः पूर्वमङ्गं डाबन्तन्तु प्रत्ययान्तरे इति संप्रसारणस्य डापश्च समानाङ्गत्वं नास्तीत्युकाराकारयोरेकादेशाभावो यथा शकह्वाविति॥ १३॥

अनुपसर्जनात्॥ उपसर्जनमिह शास्त्रीयं गृह्यते। समासावयवभूतम्। तत्रावयवाश्रयकार्यं समुदायस्य न प्राप्नोति। तदवयवे कार्यमकृतार्थं तत्समुदायस्य भवति। यथा जुगुप्सत इत्यात्मनेपदम्। न तु यदवयवे कृतार्थम्। यथा पलायतीति न भवति आत्मनेपदम्। तदन्तविधिश्च ग्रहणवतेति प्रतिषिद्धः। तत्रानर्थकोऽयं प्रतिषेध इति मत्वाह अनुपसर्जनादिति। किमर्थमिति। इतरोऽमहत्पूर्वेति प्रतिषेधेन तदन्तविधिर्ज्ञापित इति मत्वाह बहुकुरुचरेति। बहवः कुरुचरा अस्यामिति बहुव्रीहिः। कुरुचरशब्द उपसर्जनमिति ङीब्न भवति। कुरुचरशब्दादिति। विड्ढाणञित्यत्र टित्प्रातिपदिकं गृह्यते। तच्च किञ्चित्साक्षाट्टिद्भवति यथा नदट्चोराडिति। किञ्चित्त्वयववाटित्त्वद्वारेण। अवयवे हि यत्र टित्त्वमकिञ्चित्करं तत्र समुदायार्थं तद्विज्ञायते स चावयवः

Indira Gandhi National Centre for the Arts

महती अतिमहतीत्यत्र तदन्तविधिः सिद्धो भवति । नैतदस्ति प्रयोजनम् । उक्तमेतत् । वर्णोऽप्युगित् । प्रत्ययोऽप्युगित् । प्रातिपदिकमप्युगिदिति । इदं तर्हि । बहुधीवरी । बहुपीवरीति । एतदपि नास्ति प्रयोजनम् । अत्राप्युक्तं रविधाने बहुव्रीहेरुपसंख्यानं प्रतिषिद्धत्वादिति । इदं तर्हि । अतिधीवरी । अतिपीवरी । पूर्वसूत्रनिर्देशो वापिशलमधीतइति * । पूर्वसूत्रनिर्देशो वा पुनरयं द्रष्टव्यः । पूर्वसूत्रेऽप्रधानस्योपसर्जनमिति संज्ञा क्रियते यावद् ब्रूयात्प्रधानादुत्पत्तव्यमप्रधानान्नेति तावदनुपसर्जनादिति । किं प्रयोजनम् । आपिशलमधीते ब्राह्मणी आपिशला ब्राह्मणी । अणन्तादीकारो मा भूदिति । अथानुपसर्जनादित्युच्यमाने कस्मादेवात्र न भवति अणन्तं ह्येतदनुपसर्जनम् । नानुपसर्जग्रहणेनाणन्तं विशेष्यते । अणन्तादनुपसर्जनादिति । किं तर्हि । अणेव विशेष्यते । अणयः अनुपसर्जनमिति । जातिशब्देभ्यस्त्वतिप्रसङ्गः * । जातिशब्देभ्यस्त्वतिप्रसङ्गो भवति । अवन्ती । कुन्ती । गान्धारी । सिद्धं तु जातेरनुपसर्जनत्वात् * । सिद्धमेतत् । कथम् । अनुपसर्जनादित्युच्यते । न च जातिरुपसर्जनम् । एतदपि नास्ति प्रयोजनम् । स्त्रियामिति वर्तते । तेनाणं विशेषयिष्यामः । स्त्रियां योऽणिवहित इति । एवमपि का-

---

काचिन्नानुपद्यिन्नवति । यथा स्तनन्धयीति । क्वचित्तद्धितः टयुट्युलादिः । क्वचित् कृद् लुडादिः । तत्रायं समुदायं येऽवयवो न व्यभिचरति तदर्थमवयवस्य ङित्वमित्यनेनाभिप्रायेणोक्तं कुरुचरशब्दादिति । न तु कृद्ग्रहणपरिभाषाश्रयणेन नहि विदिति कृत एव ग्रहणम् । बहुधीवरीति । वनो रचेत्यत्र वन्नन्तस्य प्रातिपदिकस्य ग्रहणादेव तदन्तविधिर्न स्यादिति भावः । उपसंख्यानादत्र सिद्धिं मत्वाह एतदपीति । अतिधीवरीति । धीवानमतिक्रान्तेति तत्पुरुषः । नन्वमहत्पूर्वेत्यनेनैव ज्ञापितस्तदन्तविधिः । ततश्च नार्थोऽनेन ज्ञापकेनेत्याह पूर्वसूत्रनिर्देश इति । वाशब्दस्तर्ह्यर्थे । अथवा पूर्वं तदन्तविधेर्ज्ञापितत्वादुपसर्जनेनापि तदन्तविधिः स्यादिति प्रयोजनसमुच्चयार्थो वाशब्दः । पूर्वसूत्रशब्देन पूर्वाचार्यकृतं व्याकरणमुच्यते । आपिशलिना प्रोक्तमितीञश्चेत्यण् । ततोऽध्येत्र्यां तदधीतइत्यण् । तस्य प्रोक्ताल्लुगिति लुक् । प्रोक्तप्रत्ययस्याणोऽत्रोपसर्जनत्वाद् ङीन्न भवति । अणन्तामिति । प्रत्यये लुप्ते प्रकृतेरेव तदर्थाभिधानादिति भावः । अणेवेति । अत्र प्रोक्तार्थस्योपसर्जनत्वाद्र्थद्वारेणाणप्रत्य उपसर्जनमिति भावः । यस्त्वध्येत्र्यां प्रत्यय उत्पन्नस्तस्य लुप्तत्वात्तदाश्रयो ङीन्न भवति । प्रत्ययलक्षणेनापि न भवत्यण्योऽकार इति विज्ञानात् । अतिप्रसङ्ग इति । तेन तेभ्योऽपि प्रतिषेधः प्राप्नोतीत्यर्थः । अवन्तीति । अवन्तेरपत्यं स्त्री । वृद्धेत्कोसलाजादाञ्ञ्यङ् । तस्य स्त्रियामवन्तिकुन्तिकुरुभ्यश्चेति लुक् । गन्धारीति । गन्धारेरपत्यंस्त्री । शाल्वेयगान्धारिभ्याश्चेत्यञ् । तस्यातश्चेति लुग् । अत्र प्रत्ययार्थं प्रति प्रकृत्यर्थस्योपसर्जनत्वादितोमनुष्यजातेरिति ङीष् न प्राप्नोति तस्य तु दाक्षत्यादिरवकाशः । सिद्धं त्विति । प्रत्यये लुप्ते प्रकृतिरेवापत्यलक्षणां जातिमाह साचानुपसर्जनमित्यर्थः । एतदपीति । यदुक्तं पूर्वसूत्रनिर्देशो वेति तद्भाष्यकारः प्रत्याचष्टे । स्त्रियां योऽणिति । आपिशलिशब्दात्तु यः प्रो-

IGNCA RAR
ACC No. R-408

शकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी काशकृत्स्नीमधीते काशकृत्स्ना ब्राह्मणी, अत्र प्राप्नोति। नैष दोषः। अध्येत्र्यामभिधेयायामण् ईकारेण भवितव्यम्। यश्चात्राध्येत्र्यामभिधेयायामण्। लुप्तः सः। यश्च श्रूयते। उत्पन्नस्तस्मादीकार इति कृत्वा पुनर्न भविष्यति। इदं तर्हि प्रयोजनम्। प्रधानेन तदन्तविधिर्यथा स्यात्। कुम्भकारी। नगरकारी। अत्र हि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति। अवयवाद्रुत्पत्तिः प्राप्नोति। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति संघातादुत्पत्तिर्भविष्यति। कृद्ग्रहण इत्युच्यते। न चैतत्कृद्ग्रहणम्। कृदकृद्ग्रहणमेतत्। कृदप्ययमण्। तद्धितोपि। एवं तर्हि इकारान्तेन समासो भविष्यति। यद्येवं लभ्येत कृतं स्यात् तत्तु न लभ्यते। किं कारणम्। अत्र हि गतिकारकोपपदानां कृद्भिः सह समासो भवतीति समास एव तावद्भवति। समासे च कृते। अवयवादुत्पत्तिः प्राप्नोति। अवयवादुत्पत्तौ सत्यां को दोषः। कौम्भकारेयो न सिद्ध्यति। अवयवस्य वृद्धिस्वरौ स्याताम्। तस्मादनुपसर्जनाधिकारः। अनुपसर्जनाधिकारे जातेर्ङीष्विधाने सुपर्ण्या उपसंख्यानम् *। अनुपसर्जनाधिकारे जातेर्ङीष्विधाने सुपर्ण्या उपसंख्यानं कर्त-

---

कार्येणाप्रत्ययः स स्त्रियां न विहितः। उत्पन्न इति। सोपि लुक्तद्धितलुकीति लुप्तः। पुनर्नेति। सकृत्प्रवृत्तौ शास्त्रस्य चरितार्थत्वात् पुनः प्रवृत्त्यभावः। अकारान्तस्य चाध्येत्र्यां स्त्रियां वृत्या टाब् भवति। इदं तर्हीति। प्रधानेन तदन्तविधेर्ज्ञापनार्थमित्यर्थः। नन्वमहत्पूर्वेति ज्ञापितोसौ। एवं तर्हि ज्ञापकाद्यथा प्रधानेन भवति एवमुपसर्जनेनापि स्यादिति सर्वथायं योगः कर्तव्यः। भाष्यकारेण तु सूत्रमेवेदं ज्ञापनायाश्रितं गणपठितप्रतिषेधानपेक्षया। तदपेक्षया सर्वादिवार्तिके तु भाष्यमनुपसर्जनादित्ययं योगः प्रत्याख्यायत इत्यादि। एवं तर्हीति। कुम्भस्य कारीशब्देनोपपदलक्षणः समासः करिष्यते। स्त्रीभ्यो ढगित्यत्र च ङ्याप्प्रातिपदिकादिति त्रितयाधिकारात् स्त्रीप्रत्ययान्तात्समासप्रातिपदिकाड्ढग्विधास्यते। समासमन्तरेण स्त्रीप्रत्ययान्तस्य प्रातिपदिकस्यासंभवात्समासः स्त्रीप्रत्ययान्तो गृह्यते। ङ्याबन्तेभ्यस्तु सुपर्ण्यादिभ्यो ङ्याब्ग्रहणानुवृत्त्या भविष्यतीति भावः। अवयवादिति। अत्र चोदयन्ति। कृत्तद्धितसमासाश्चेत्यत्र कृद्ग्रहणपरिभाषया कुम्भकारशब्दस्य प्रातिपदिकत्वात्तत एव ङीब् भविष्यतीति। तदयुक्तम्। अत्रास्याः परिभाषाया अनुपस्थानस्य पुंयोगसूत्रे प्रतिपादनात्। नन्वेमपि कारशब्दाद् ङीपि विहिते कुम्भकारीशब्दादेव ढक् भविष्यति। स्त्रीप्रत्ययग्रहणे तदादिनियमाभावात्। तथा च परमकारीषगन्धीपुत्र इत्यत्र संप्रसारणं भवति। एवं तर्हि तदादिनियमाभावादनियमः प्रसज्येत। तथा च कदाचित्कारीशब्दात्प्रत्ययः स्यात्। कदाचित् कुम्भकारीशब्दात्। यदा तु कुम्भकाराशब्दाद् ङीब्विधीयते तदा कुम्भकारीशब्द एव स्त्रीप्रत्ययान्तो भवति न तु कारीशब्द इति ततः प्रत्ययो न भवति। ननु कदाचिन्नियमाभावात्कारीशब्दोपि स्त्रीप्रत्ययान्तो भवतीति। ततोपि ढक्प्रसङ्गः। नैष दोषः। नियमप्रतिषेधेनाधिकस्य तदन्तस्य कार्यं विधीयते न तु न्यूनस्य। अथवा

व्यम् । सुपर्णी । न वा समासस्यानुपसर्जनत्वाज्जातिवाचकत्वाच्च शब्दस्य सामान्येन ङीष्विधानम् * । न वा एष दोषः । किं कारणम् । समासस्यानुपसर्जनत्वात् । समासोऽत्रानुपसर्जनम् । स च जातिवाचकः समासस्यानुपसर्जनत्वात्तस्य जातिवाचकत्वाच्छब्दस्य सामान्येन ङीष् भविष्यति जातेरस्त्रीविषयादयोपधादिति । कथं कृत्वा चोदितम् । कथं कृत्वा परिहारः । बहुव्रीहिरिति कृत्वा चोदितम् । तत्पुरुष इति कृत्वा परिहारः ॥ इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थाध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ॥ १५ ॥ ढग्रहणे सानुबन्धकस्योपसंख्यानम् * । ढग्रहणे सानुबन्धकस्योपसंख्यानं कर्तव्यम् । कारिकेयी हारिकेयी । किं पुनः कारणं न सिद्ध्यति । अननुबन्धकग्रहणे हि न सानुबन्धकस्य * । अननुबन्धकग्रहणे हि न सानुबन्धकस्य ग्रहणं भवतीति एषा परिभाषा कर्तव्या । कान्येतस्याः परिभाषायाः प्रयोजनानि । तव्यग्रहणे तव्यद्ग्रहणं मा भूत् । दिव्ग्रहणे दिवुग्रहणं मा भूत् । ननु चेयमपि कर्त्तव्या तदनुबन्धकग्रहणे ऽतदनुबन्धकग्रहणं नेति । कान्येतस्याः परिभाषायाः प्रयोजनानि । यद्ग्रहणे ण्यद्ग्रहणं मा भूत् । अङ्ग्रहणे चङ्ग्रहणं मा भूत् । अञ्ग्रहणेणञ्ग्रहणं मा भूत् । ते द्वे एते परिभाषे कर्तव्ये । न कर्तव्ये । आचार्यप्रवृत्ति-

---

स्त्रीप्रत्यये तदादिनियमाभावमनाश्रित्य कुम्भकारीति प्रयोजनम् । सुपर्णीति । शोभनानि पर्णान्यस्या इति बहुव्रीहिः । तत्र पर्णशब्दस्योपसर्जनत्वाद् ङीष् न प्राप्नोति । न वेति । सुपर्णशब्दो जातिवाचि प्रातिपदिकं तच्चानुपसर्जनम् । बहुकुक्कुटा नगरीत्यत्र तु जातिवाचिनः कुक्कुटशब्दस्योपसर्जनत्वात्समासस्याजातिवाचित्वाद् ङीषोऽभावः । जातेरिति । जातेरित्यनुवर्तमाने पाककर्णपर्णेत्यनेनेत्यर्थः । बहुव्रीहिरिति । नास्त्युपसर्जनमस्मिन्नित्यनुपसर्जनानित्याश्रीयमाणे पर्णशब्दस्योपसर्जनत्वाद् ङीष्न स्यात् । तत्पुरुषे तु दोषाभावः । समासस्योपसर्जनत्वाभावात् ॥१४॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे चतुर्थाध्यायस्य प्रथमपादे प्रथमाह्निम् ॥

टिड्ढाणञ् ॥ तव्यग्रहण इति पूरणगुणेति तव्येन समासप्रतिषेध उच्यमानस्तव्यता न भवतीति ब्राह्मणकर्तव्यमिति समासो भवत्येव तत्र कृत्स्वरेणान्तस्वरितं भवति । तव्येन तु समासे कृत्स्वरेण तशब्दाकार उदात्तः स्यात् । दिवग्रहणे इति । तेनाक्षद्यूरिति दिव औदिति न भवति । अक्षद्यूभ्यामिति दिव उदिति न भवति । अन्यथा ऊठि कृते एकदेशविकृतस्यानन्यत्वादौत्वोत्वे स्याताम् । परिभाषायान्तु सत्यां प्रातिपादिकस्य स्वर्गान्तरिक्षवाचिनो दिव्शब्दस्य ग्रहणम् । प्रसङ्गेन परिभाषान्तरप्रतिपादनायाह ननु चेयमिति । स एवानुबन्धो यस्येत्यर्थः । उपात्तानुबन्धव्यतिरिक्तानुबन्धयुक्तस्त्वतदनुबन्धकः । यद्ग्रहण इति । यतो नाव इत्यादावित्यर्थः । अङ्ग्रहण इति । ऋदृशोऽङि गुण इत्यत्र चङो ग्रहणाभावादङि विधीयमानं श्वयतेर

Indira Gandhi National Centre for the Arts

ज्ञापयति भवत एते परिभाषे इति। यदयं वामदेवाद् ड्यड्ड्याविति ययतौ डितौ करोति। तत्तर्ह्युपसंख्यानं कर्तव्यम्। न कर्तव्यम्। अननुबन्धको ढशब्दः स्त्रियां नास्तीति कृत्वा सानुबन्धकस्य ग्रहणं विज्ञास्यते। ननु चायमस्ति शिलाया ढ इति। नैषस्त्रियां वर्तते। अयं तर्हि सभाया यः ढश्छन्दसीति। एषोऽपि न स्त्रियां वर्तते। किं कारणम्। तत्र साधुरिति वर्तते। कथं च स्त्री नाम सभायां साध्वी स्यात्। अञ्ग्रहणमनर्थकं तदन्ताद्धि ङीन्विधानम् *। अञ्ग्रहणमनर्थकम्। किं कारणम्। तदन्ताद्धि ङीन्विधानम्। तदन्ताद्ध्यञन्ताद् ङीन् विधीयते। शार्ङ्गरवाद्यञो ङीनिति। न चास्ति विशेषः। अञन्ताद् ङीपो वा ङीनो वा तदेव रूपं स एव स्वरः। न वा जात्यधिकारात् *। न वानर्थकम्। किं कारणम्। जात्यधिकारात्। जातेरिति तत्रानुवर्तते। अजात्यर्थोऽयमारम्भः। औदपानी। औत्सीति। तच्चावश्यं जातिग्रहणमनुवर्त्यम्। अनधिकारे हि पुंयोगादाख्यायां ङीन्प्रसङ्गः *। अननुवर्तमाने हि जातिग्रहणे पुंयोगादाख्यायां ङीन्प्रसज्येत। बैदस्य स्त्री बैदीति। यदि तर्ह्यस्य निबन्धनमस्ति। इदमेव वक्तव्यम्। तन्न वक्तव्यम्। तदप्यवश्यं वक्तव्यम्। अनुच्यमाने हि तस्मिन् बैदस्य भगिनी बैदीति। परत्वाज्जातिलक्षणो ङीष् ङीपं बाधेत। ङीनि पुनः सति परत्वाद् ङीन् ङीषं बाधते। ख्युन उपसंख्यानम् *। ख्युन उपसंख्यानं कर्तव्यम्। आढ्यङ्करणी सुभगङ्करणी। असल्पामिदमुच्यते ख्युन इति। नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्। नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानं कर्तव्यम्। नञ्। स्त्रैणी। स्नञ्। पौंस्नी। ईकक्। शाक्तीकी। याष्टिकी। ख्युन्। आढ्यङ्करणी। सुभगङ्करणी। तरुण। तलुन। तरुणी। तलुनी॥

इत्यत्वं चाङि न भवत्याशिश्वियदिति। ड्यड्याविति। यस्येति लोपेन वामदेव्यमिति रूपे सिद्धे डित्करणं ययतोश्चातदर्थेइत्यत्र ड्यड्यतोर्ग्रहणनिवारणार्थम्। एवं चैतद् डित्वस्य प्रयोजनं भवति यद्येते परिभाषे भवतस्तेनावामदेव्यमित्यत्रान्तोदात्तत्वं न भवति अपि त्वव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वम्। नैष स्त्रियामिति। शिलेव शिलेयमिति नपुंसकलिङ्ग एव शिलेयशब्दः स्वभावात्। कथं स्त्रीनामेति। यज्ञसभायां विदुषामेव पुरुषाणां सभ्युत्वाधिकारादिति भावः। ननु सभायां साधुरियं ब्राह्मणपङ्क्तिः परिषद्वेति संभवति स्त्रियाः सभायां साधुत्वमेवं तर्हि च्छन्दसि सभेयशब्दस्यैवं विधायां स्त्रियां प्रयोगाभावः। अञ्ग्रहणमिति। शार्ङ्गरवाद्यञो ङीनित्यनेनाञन्तान्ङीन्विधानादत्राञन्तान् ङीब्विधानमनर्थकम्। स्वरे विशेषाभावाद् अञन्तस्याद्युदात्तत्वाद् ङीपि ङीनि वाद्युदात्तस्यैवावस्थानात्। औत्सीति। उत्से भवेति भवादावर्थे उत्सादिभ्योऽञित्यञ्विधाने जातिवाचित्वाभावः। बैदस्य भगिनीति। अनेन जातिवाचित्वं दर्शयति, या हि बैदस्य भगिनी सा बिदस्यापत्यमिति तस्यां जातिनिमित्त एव बैदशब्दः प्रवर्तते न पुंयोगनिमित्तः। परत्वादिति। परत्वग्रहणेन बाधकत्वं लक्ष्यत इत्यपवाद-

Indira Gandhi National Centre for the Arts

यञश्च ॥१६॥ अपत्यग्रहणं द्वीपाद्यञः प्रतिषेधार्थम् * । आपत्यग्रहणं कर्तव्यम्। द्वीपाद्यञः प्रतिषेधार्थम्। इह मा भूत्। द्वैप्येति। तत्तर्हि वक्तव्यम्। न वक्तव्यम् । नैवं विज्ञायते । कञ्ङ्करपो यञश्चेति । कथं तर्हि । कञ्ङ्करपो ऽयञश्चेति ॥

प्राचां ष्फ तद्धितः ॥ १७ ॥ तद्धितवचनं किमर्थम्। तद्धितवचनं षितः प्रातिपदिकादीकारार्थम् * । तद्धितवचनं क्रियते । षितः प्रातिपदिकादीकारो यथा स्यात् । नैतदस्ति प्रयोजनम्। षित्करणसामर्थ्यादेवात्र ईकारो भविष्यति। यथैव तर्हि षित्करणसामर्थ्यादप्रातिपदिकादीकारो भवति । एवं प्रातिपदिकादिसस्यानुवर्तनसामर्थ्यादषितोपि प्रातिपदिकादीकारः स्यात् । अस्त्वन्यत् । प्रातिपदिकादिग्नुवृत्तौ प्रयोजनम्। किम्। उत्तरार्थम्। अत इञ्। दाक्षिः।प्लाक्षिः॥

सर्वत्र लोहितादिकतन्तेभ्यः ॥ १८ ॥ सर्वत्रग्रहणं किमर्थम्। प्राचामेव हि स्यात्। नैतदस्ति प्रयोजनम्। सिद्धं प्राचां पूर्वेण। इदं तर्हि प्रयोजनम्। सर्वेषामेव यथा स्यात्। आवट्यायनी। चापं बाधित्वा ष्फो यथा स्यात्। लोहितादिषु शाकल्यस्योपसंख्यानम् * । लोहितादिषु शाकल्यस्योपसंख्यानं कर्तव्यम्। शाकल्यायनी। यदि पुनरयं शकलशब्दो लोहितादिषु पठ्यते। नैवं

त्वादिदमुक्तं भवति ' ल्युन इति सूत्रे ल्युन: पाठोऽनार्षः । नञ्स्नञीति ' तरुणतलुनशब्दयोरवयोर्थे ग्रहणं तरुणी सुरेति । प्राणिधर्मो हि वयः । गौरादिषु तरुणतलुनशब्दयोः पाठात् ङीषपि भवति । स्वरे विशेषः । अथ वा वयोवाचिभ्यामपि गौरादिपाठात्परत्वात् ङीषेव स्यादिति वयोवचनावपि तरुणतलुनशब्दावुपसंख्यानं प्रयोजयतः तत्र सामर्थ्यात्ङीब्ङीषो विकल्पः ॥ १५ ॥

यञश्च ॥ आपत्यग्रहणमिति । अपत्ये भव आपत्यः । द्वैप्येति । द्वीपे भवेति भवादावर्थे द्वीपादनुसमुद्रं यञिति यञ् । कञ्क्वरपोऽयञश्चेति । अयं संहितापाठ आर्षः । तत्र गर्गादिभ्यो यञित्यत्राकारप्रश्लेषादञ्ञिश्रीयते स एव चेहानुक्रियते । तत्राऽकारोनुनासिक इत्संज्ञक इह विशेषणार्थ इति ञो ग्रहणाभावाद् द्वैप्येति टाबेव भवति । यस्कादिभ्यो गोत्रे यञञोश्चेत्यत्राप्यकारप्रश्लेषः । अथ वा गोत्रग्रहणानुवृत्त्या गर्गादिभ्यो यञित्यस्यैव लुप्ताकारस्य निर्देशः ॥ १६ ॥

प्राचां ष्फ ॥ षित्करणसामर्थ्यादिति । धातोस्त्वपादेः षित्त्वमङ्भ्यां चरितार्थमिति त्रपाक्षमेत्यादौ ङीष्न भवति । यथैव तर्हीति । यदि षिद्गौरादिभ्यश्चेत्यत्र षित्प्रातिपदिकशब्दयोर्विशेषणविशेष्यभावो नास्ति। तदा समुच्चयेन भाव्यमिति भावः । उत्तरार्थमिति। अत्र त्वनुवर्तनं नान्तरीयकम् । एतच्च गौरादिग्रहणाद्विज्ञायते। समुच्चये गौरादिभ्यो ङीषः सिद्धत्वात् । अत इञिति। अन्यथाऽत इति समर्थविशेषणं स्यादिति भावः ॥ १७ ॥

सर्वत्र ॥ सिद्धमिति । आरम्भसामर्थ्यात् प्राचामिति न संभन्त्स्यत इति भावः । सर्वेषामिति । अपवादविषयाणामपीत्यर्थः । इहानुपयोगात्पूर्वसूत्रेणसर्वत्रग्रहणं संबध्यते। तनाविट्यायनीति प्राचां ष्फः सिद्धो भवति। अन्यथा ह्यावट्याच्चेति चाबुदीचां

Indira Gandhi National Centre for the Arts

शक्यम् । इह हि शाकल्यस्य च्छात्राः शाकला इति । कण्वादिभ्यो गोत्र इत्यण्न स्यात् । एवं तर्हि, कण्वात्तु शकलः पूर्वः । कण्वशब्दात् शकलशब्दः पूर्वः पठितव्यः । कतादुत्तर इष्यते । कतशब्दात् शकलशब्द उत्तरः पठितव्यः । पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम् । पूर्वोत्तरौ गणौ तदन्तादी द्रष्टव्यौ । ये कण्वादयस्ते शकलादयः । ये कतपर्यन्तास्ते शकलपर्यन्ताः । किं प्रयोजनम् । ष्फाणौ तत्र प्रयोजनम् । ष्फाणौ तत्र प्रयोजयतः । कण्वात्तु शकलः पूर्वः कतादुत्तर इष्यते । पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम् ॥

कौरव्यमाण्डूकाभ्यां च ॥ १९ ॥ कौरव्यमाण्डूकयोरासुरेरुपसंख्यानम् * । कौरव्यमाण्डूकयोरासुरेरुपसंख्यानं कर्तव्यम् । आसुरायणी । छश्च* । छश्चेति वक्तव्यम् । आसुरीयः कल्पः ॥

वयसि प्रथमे ॥ २० ॥ वयसि अचरम इति वक्तव्यम् । इहापि यथा स्यात् । वधूटी । चिरण्टीति । इह कस्मान्न भवति । उत्तानशया लोहितपादिका । द्विवर्षा । त्रिवर्षेति । नैतानि वयोवाचीनि । कथं तर्हि वयो गम्यते । संबन्धाद् वयो गम्यते । यदि तर्हि यत्र सम्बन्धाद्वयो गम्यते । तत्र न प्राप्नोति । इहा-

---

सावकाशः परत्वात्प्राचां ष्फं बाधेत । कण्वात्त्विति । गर्गादिषु कपि कत, कुरुकत, अनडुह, कण्व, शकल, इत्येवं गणसन्निवेशः । तत्रानडुत्कुरुकतशब्दावतः स्थानादपकृष्यान्यत्र पठितव्यौ । शकलशब्दस्तु कतकण्वशब्दयोर्मध्ये पठितव्यः । कतशकलकण्वेति । तत्र कतस्यान्तः कतन्त इति तत्पुरुषेण शकलशब्दउच्यते । शकन्ध्वादित्वान्निपातनाद्वा पररूपत्वम् । तथा कतोऽन्तो येषां तानि कतन्तानि । तत्र बहुव्रीहितत्पुरुषयोर्बहुव्रीहिः शिष्यते । स्वराभिन्नानां यस्योत्तरस्वरविधिः स शिष्यतइति वचनात् , एवं कण्वादिभ्यो गोत्रे इत्यत्राप्येकशेषः । ष्फाणाविति । शाकल्यायनीति । स्त्रियामनेन ष्फः । शाकल्यस्य छात्रा इति । छापवादः कण्वादिभ्यो गोत्रइति शैषिकोऽण् भवति ॥ १७ ॥

कौरव्य ॥ आसुरायणीति । प्राचां ष्फ तद्धित इत्यत्र सूत्रपाठापेक्षया तद्धितग्रहणं प्रत्याख्यातम् । आसुरिशब्दात्तु ष्फस्य तद्धितसंज्ञाप्रयोजनमिकारलोपः, अकारान्तात्तु ष्फे सवर्णदीर्घत्वेनापि रूपं सिध्यति । आसुरीय इति । आसुरिणा प्रोक्त इति शेषे यौ छापवादे इञश्चेत्याणि प्राप्ते छस्य प्रतिप्रसव इहैव लाघवार्थं क्रियते । अन्यथा द्विरासुरिग्रहणं कर्तव्यं स्यात् ॥ १८ ॥

वयसि ॥ वयस्यचरम इति ॥ ये त्रीणि वयांसीच्छन्ति कौमारयौवनस्थाविराणि तन्मतेनेदं वक्तव्यम् । वधूटचिरण्टशब्दयोर्द्वितीयवयोवचनत्वात् यदा तु द्वे एव वयसीउपचयापचयलक्षणे इति दर्शनं तदैतन्न वक्तव्यम् । यौवनस्यापि प्रथमवयोरूपत्वात् उत्तानशयेति । एते हि शब्दाः प्रथमवयोविषयाः प्रयुज्यन्तइति भावः । नैतानीति । नैतेषां वयः प्रवृत्तिनिमित्तमित्यर्थः । सम्बन्धादिति । विशेषणविशेष्यभावलक्षणादि

पि न प्राप्नोति। कुमारीति। अत्रापि सम्बन्धाद्वयो गम्यते। कोऽसौ सम्बन्धः। योसौ पुंसा सहासंप्रयोगः। सम्बन्धादेवात्र वयो गम्यते। इह पुनः सम्बन्धसम्बन्धात्। इह तावत्। उत्तानशयेति। यदा कर्तृत्वं विशेषितं भवति तत उत्तरकालं वयो गम्यते। लोहितपादिकेति। यदा बहुव्रीह्यर्थो विशेषितस्तत उत्तरकालं वयो गम्यते। द्विवर्षा त्रिवर्षेति। यदा द्विग्वर्थो विशेषितः। तत उत्तरकालं वयो गम्यते। यदि तर्हि यत्र सम्बन्धादेव वयो गम्यते तत्र भवितव्यम्। इहापि प्राप्नोति। कन्येति। निपातनादेतत्सिद्धम्। किं निपातनम्। कन्यायाः कनीन चेति॥

अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि॥ २२॥ इमौ द्वौ प्रतिषेधावुच्येते। तत्रैकः शक्योऽवक्तुम्। कथम्। एवं वक्ष्यामि। परिमाणान्तात्तद्धितलुकि ङीब्भवतीति। तन्नियमार्थं भविष्यति। परिमाणान्तादेव तद्धितलुकि ङीब् नान्यत इति। ततो बिस्ताचितकम्बल्येभ्यो नेति। तद्धितलुकीत्येव॥

बहुव्रीहेरूधसो ङीष्॥ २५॥ ऊधसो नकारो लिङ्गाधिकारे *। ऊधसो नकारो लिङ्गाधिकारे वक्तव्यः। इह मा भूत्। महोधाः पर्जन्य इति। न वा समासान्ताधिकारे स्त्रीग्रहणात् *। न वा लिङ्गाधिकारे नकारः कर्तव्यः। किं

त्यर्थः। ततश्च बहिरङ्गत्वाद्वयः प्रतीतेर्ङीम्न भवति। कुमारीति। पुंसा सहासंप्रयोगोस्य प्रवृत्तिनिमित्तम्। न तु प्रथमं वयः। तथा वृद्धकुमारीति प्रयोगः पाणिगृहीतीति तु प्रथमवया अपि कुमारीशब्देन नोच्यतइति भावः। सम्बन्धादेवेति। औत्पत्तिकाद्वाच्यवाचकभावलक्षणात्संबन्धादित्यर्थः। कुमारशब्दस्य हि प्रथमं वयः प्रवृत्तिनिमित्तम्' साहचर्यात्तु पुंसा सहासंप्रयोगमुपादाय वृद्धायां गौणः कुमारीशब्द प्रयुज्यते। सम्बन्धादिति। कर्तृमात्रादेरभिधेयस्य शब्दसंबन्धस्य प्रमाणान्तरावगतेन विशेषणेन सबन्धादित्यर्थः। कर्तृत्वमिति। उत्तानशयेति। शेतिक्रियायाः कर्त्री शब्दार्थः। यदा तु प्रकरणादिवशात्प्रथमवयोविशिष्टा कर्त्री प्रतीयते तदा प्रथमवयोविषयत्वं बहिरङ्गमित्यर्थः। लोहितपादिकेति। अत्राप्यन्यपदार्थमात्रं शब्दार्थः। विशेषप्रतिपत्तिः प्रकरणायत्ता। द्विवर्षेति। द्वे वर्षे भूतेति ठञो वर्षाल्लुक् चितवति नित्यमिति लुक्। अत्रापि परिमाणमात्रं शब्दार्थः शालाद्वावपि प्रयोगाद्। वयः प्रतिपत्तिस्तु प्रमाणान्तरनिबन्धना॥ २०॥

अपरिमाण॥ परिमाणान्तादेवेति। तद्धितलुक्येवेति तु विपरीतनियमो न भवति। लक्ष्यानुसारित्वाल्लक्षणस्य। तेन तद्धितलुकि समाहारे च द्व्याढकीति ङीब् भवति। पञ्चाश्वेत्यादौ न भवति। बिस्तादीनां परिमाणवाचित्वात्प्रतिषेधो विधेयः॥२२॥

बहुव्रीहेः॥ ऊधस इति। ऊधसोनङिति समासान्तप्रकरणे सूत्रमकृत्वा बहुव्रीहेरूधसो ङीष् नश्चेति वक्तव्यम्। तत्रालोन्त्यस्येत्यन्त्यस्य नकारो ङीप्प्रत्ययश्च स्त्रियां भवतीत्यर्थो भवति। धनुषो नङिति समासान्तेषु पठितव्यमेवं च महोधाःपर्जन्य

कारणम्। समासान्ताधिकारे स्त्रीग्रहणात्। समासान्ताधिकार एव स्त्रीग्रहणं कर्तव्यम्। इतरथा हि कब्विधिप्रसङ्गः *। इतरथा हि कब्विधिः प्रसज्येत। कस्यां पुनरवस्थायां कप्प्राप्नोति। प्राग् ङीषुत्पत्तेः। प्राक्तावत्र प्राप्नोति। किं कारणम्। न हि ङीष्विभाषा, उत्पन्ने तर्हि ङीषिं प्राप्नोति। उत्पन्ने चापि न भवितव्यम्। किं कारणम्। नद्यन्तानां यो बहुव्रीहिरित्येवं सः। न चैष नद्यन्तानां बहुव्रीहिः। प्रागेव तर्हि प्राप्नोति। ननु चोक्तं न हि ङीष्विभाषेति। यद्यपि न ङीष्विभाषा। कप्तु विभाषा। कपोऽवकाशः। अन्यो बहुव्रीहिः। अयवकः अव्रीहिकः। ङीषोवकाशः। विभाषा कब् यदा न कप् सोऽवकाशः। कुण्डोध्नी। घटोध्नी। कप्प्रसङ्गे उभयं प्राप्नोति। परत्वात्कप्स्यात्। तस्मात्सुष्ठूच्यते न वा समासान्ताधिकारे स्त्रीग्रहणादितरथा हि कब्विधिप्रसङ्ग इति॥

दामहायनान्ताच्च ॥ २७ ॥ दामहायनान्तात्संख्यादेः *। दामहायनान्तात्संख्यादेरिति वक्तव्यम्। इह मा भूत्। उद्दामा वडवेति। तत्पुरुषविज्ञानाद्वा सिद्धम् *। बहुव्रीहेरिति वर्तते। तत्पुरुषश्चायमुत्क्रान्ता दाम्न उद्दामेति। भवेत्सिद्धं यदा तत्पुरुषः। यदा तु खलु बहुव्रीहिस्तदा न सिध्यति। उत्क्रान्तं दाम अस्या इति। ननु चेतनावत एतद्भवति उत्क्रमणं वा ऽपक्रमणं वा। दाम चाचेतनम्। अचेतनेष्वापि चेतनवदुपचारो दृश्यते। तद्यथा। स्रस्तान्यस्या बन्धनानि। स्रस्यन्ते चास्या बन्धनानीति। तत्र हि संख्यादेरिति वक्तव्यम्। न वक्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतम्। संख्याव्ययादेर्ङीबिति। यदि तदनुवर्तते। अव्ययादेरपि प्राप्नोति। नैष दोषः। संख्यादेरित्यनुवर्तते। अव्ययादेरिति निवृत्तम्। कथं पुनरेकयोगनिर्दिष्टयोरेकदेशोनुवर्तते एकदेशो न। एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिर्भवति। तद्यथा। तस्य पाकमूले पील्वादिकर्णा-

---

कुण्डोध्नी धेनुकामित्यनङ् न भवति। न वेति। समासान्तप्रकरण एव ऊधसोनङ् स्त्रियामिति वक्तव्यम्। तत्रैवावश्यं कर्तव्यं कप्समासान्तनिवृत्त्यर्थमित्यर्थः। कस्यां पुनरिति। द्वावप्यत्र कपौ नदीलक्षणो नित्यः शेषलक्षणो विकल्पितश्च तत्र कस्य प्रसङ्ग इति प्रश्नः। प्रागिति। शेषलक्षण इत्यर्थः। नहि ङीषिति। यद्यत्र कप्स्याद् ङीष्विधानमनर्थकं स्यादिति भावः। द्वयोस्तु विकल्पे सति परस्परपरिहारेण प्रवर्तनान्नास्ति ङीषोवकाशत्वम्। उत्पन्न इति। नदीलक्षण इत्यर्थः॥ २५॥

दामहाय॥ संख्यादेरिति। संख्याव्ययर्योर्द्वन्द्वनिर्देशादनुवृत्तिरलभ्येति भावः। चेतनावत इति। लोकव्यवहारे उत्क्रमणादौ चेतनस्यैव कर्तृत्वेन प्रसिद्धत्वान्नहि घट उत्क्रामतीति प्रसिद्धिरिति भावः। अचेतनेष्वपीति। देशान्तरप्राप्तिरचेतनानामपि दृश्यतइत्यर्थः। एकयोगेति। शब्दानुमानपक्षे यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञायते स

Indira Gandhi National
Centre for the Arts

दिभ्यः कुणब्जाहचौ पक्षात्तिरित्यत्र मूल इत्यनुवर्तते । पाक इति निवृत्तम् । अथेह कथं भवितव्यम् । द्वौ हायनावस्याः शालाया द्विहायना त्रिहायनेति । हायनो वयसि स्मृताः ॥ वयोवाचिनो हायनशब्दस्य ग्रहणम् । न चैष वयोवाची । अथ णत्वं कस्मान्न भवति । णत्वमपि वयोवाचिन एव ॥

केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ॥ ३० ॥ मामकग्रहणं किमर्थम् । नाणन्तादित्येवं सिद्धम् । नियमार्थोयमारम्भः । मामकशब्दात्संज्ञाछन्दसोरेव । क्व मा भूत् । मामिका बुद्धिरिति ॥

रात्रेश्चाजसौ ॥ ३१ ॥ अजसादिष्विति वक्तव्यम् । इहापि यथा स्यात् । रात्रिं रात्रिं स्मरिष्यन्तो रात्रिं रात्रिमजानन्तः । सर्वां रात्रिं सहोषित्वा पक्षा एकान्तरात्रिकाम् ॥

अन्तर्वत्पतिवतोर्नुक् ॥ ३२ ॥ अन्तर्वत्पतिवदिति गर्भभर्तृसंयोगे * । अन्तर्वत्पतिवदिति गर्भभर्तृयोग इति वक्तव्यम् । इह मा भूत् । प्रथते त्वया पतिमती पृथिवीति । अथान्तःशब्दस्यागर्भसंयोगे किं प्रत्युदाह्रियते । अन्तरस्यां शालायामस्तीति । किं पुनः कारणं वाक्यमेवोदाह्रियते । न पुनर्मतुप् । अस्ति सामानाधिकरण्ये मतुप् विधीयते । न चास्मिन् विषये ऽस्तिना सामानाधिकरण्यम् । इहापि तर्हि न प्राप्नोति । अन्तर्वत्नीति । एवं तर्ह्यन्तर्वत्पतिवतोर्नुग्मतुब्वत्वे निपातनात् ॥ अन्तर्वदिति मतुप् निपात्यते । वत्वं सिद्धम् । पीतवदिति वत्वं निपात्यते मतुप् सिद्धः । किमविशेषेण । नेत्याह । गर्भिण्यां जीवत्पत्यां च । एतस्मिन् विषये । वा च च्छन्दसि नुग्भवेत् ॥ वा च छन्दसि नुग्वक्तव्यः । सान्तर्वती देवानुपैत् । सान्तर्वत्नी देवानुपैत् । पतीवती तरुणवत्सा । पतिवत्नी तरुणवत्सा । अन्तर्वत्पतिवतोर्नुग्मतुब्वत्वे निपातनात् । गर्भिण्यां जीवपत्यां च वा च च्छन्दसि नुग्भवेत् ॥

पत्युर्नो यज्ञसंयोगे ॥ ३३ ॥ यज्ञसंयोग इत्युच्यते । तत्र नेदं सिध्यति ।

एवानुवर्तते अर्थानुमानपक्षे तु द्वन्द्वार्थस्यैकत्वादनुवृत्तिः स्यात् । हायन इति । वक्तव्यमेतदिति भावः । णत्वमपीति । द्विचतुर्भ्यां हायनस्येति विहितम् ॥ २९ ॥

केवल ॥ मामिकेति । युष्मदस्मदोरन्यतरस्यां खञ्चेत्यण् । तवकममकावेकवचने इति ममकादेशः । टाप् । मामकनरकयोरुपसंख्यानमितीत्वम् ॥ ३० ॥

अन्तर्वत् ॥ अन्तर्वदिति । अन्तर्वत्नी गर्भिणी । पतिवत्नी जीवद्भर्तृकेत्यर्थः । किं पुनरिति । अन्तर्वतीतिनुगभाव एव प्रत्युदाहार्य इति मन्यते । न चात्रेति । अन्तःशब्दस्याधिकरणप्रधानत्वादिति भावः । वाचेति । मतुब्वत्वे तु नित्यं भवतः ॥ ३२ ॥

पत्युर्नो ॥ इयमस्य पत्नीति । यज्ञसंयोगे इति पतिशब्दस्य विशेषणं मन्यते । तेन

Indira Gandhi National Centre for the Arts

इयमस्य पत्नी । क्व तर्हि स्यात् । पत्नीसंयाजा इति यत्र यज्ञसंयोगः । नैष दोषः । पतिशब्दोयमैश्वर्यवाची । सर्वेण गृहस्थेन पञ्च महायज्ञा निर्वर्त्याः । यश्चादः सायंप्रातर्होमं चरुपुरोडाशान्निर्वपति तस्यासावीष्टे । एवमपि तुषजकस्य पत्नी न सिध्यति । उपमानात्सिद्धं पत्नीव पत्नी ॥

विभाषा सपूर्वस्य॥३४॥पत्युः सपूर्वादुपसर्जनसमास उपसंख्यानम् *।पत्युः सपूर्वादुपसर्जनसमास उपसंख्यानं कर्त्तव्यम् । वृद्धपतिः वृद्धपत्नी स्थूलपतिः स्थूलपत्नी । वचनाद्भविष्यति । अस्ति वचने प्रयोजनम् । किम्, आशापतिः । आशापत्नी । सिद्धं तु पत्युः प्रातिपदिकविशेषणत्वात् * । सिद्धमेतत् । कथम्, पत्युः प्रातिपदिकविशेषणत्वात् । नैवं विज्ञायेत । अस्ति अस्मात्पतिशब्दात्पूर्वः सोयं सपूर्वः । सपूर्वात्पतिशब्दादनुपसर्जनादिति । कथं तर्हि । अस्ति अस्मिन् प्रातिपदिके पूर्वं तदिदं सपूर्वम् । सपूर्वात्प्रातिपदिकात्पत्यन्तादनुपसर्जनादिति ॥

पूतक्रतोरै च॥३६॥ पूतक्रत्वादीनां पुंयोगप्रकरणे वचनम् * । पूतक्रत्वादयः पुंयोगप्रकरणे वक्तव्यः । पूतक्रतोः स्त्री पूतक्रतायी । यया हि पूताः क्रतवः पूतक्रतुः सा भवति । लिङ्गसंनियोगेन सर्वत्रागमादेशानां वचने लिङ्गलुकि तत्कृतप्रसङ्गः * । लिङ्गसंनियोगेन सर्वत्रागमादेशानां वचने लिङ्गलुकि तत्कृतं प्राप्नोति । पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः ।

यत्र यज्ञवाचिसमवधाने पतिशब्दः प्रयुज्यते पत्नीसंयाजा इत्यादौ तत्रैव नत्वेन भाव्यमिति भावः । पतिशब्दोयमिति । पतिशब्दार्थस्य यज्ञसंयोग इति विशेषणम् । पत्न्याश्च दम्पत्योः सहाधिकाराद् यज्ञे कर्तृत्वात्तत्फलसंबन्धाद् यज्ञसंयोगः । तुषजकस्येति । त्रैवर्णिकानामेव सभार्याणां यज्ञाधिकारो न तु शूद्रस्य । उपमानादिति । अग्निसाक्षिपूर्वकपाणिग्रहणाश्रयादिति भावः ॥ ३३ ॥

विभाषा ॥ सहशब्दोत्र विद्यमानवचनो विद्यमानपूर्वं न सपुत्र आगत इत्यादिवत्तुल्ययोगे सहशब्दो न हि पूर्वस्य नकारादेश इष्यते । तत्र पतिशब्दविशेषणं सपूर्वग्रहणमिति मत्वाह पत्युरिति । उपसर्जनसमास इति । सर्वोपसर्जने बहुव्रीहावित्यर्थः । आशापतिरिति। आशायाः पतिरिति षष्ठीसमासः प्रातिपदिकविशेषणत्वादिति । प्रातिपदिकं पतिशब्देन विशेष्यते ।तदेवानुपसर्जनग्रहणेन सपूर्वग्रहणेन च पूर्वशब्दश्चावयववाची गृह्यते न तु व्यवस्थावाची । शब्दे ऽवयवस्य प्रत्यासन्नत्वात् । सामर्थ्याच्च पतिशब्देन तदन्तविधिर्भवति । ग्रहणवतेति तदन्तविधिप्रतिषेधबाधनात्॥३४॥

पूतक्र ॥ पूतक्रत्वादीनामिति । त्रय एते योगाः ङीप्सहिताः पुंयोगादाख्यायामित्यत्रानुवर्तयितव्या इत्युक्तं भवति । तेन यदा पुंयोगात् स्त्रियां पूतक्रत्वादयो वर्तन्ते तदायं विधिर्नान्यदा । लिङ्गसंनियोगेनेति । लिङ्गार्थविहितः प्रत्ययो लिङ्गशब्देनोच्यते । यद्यपि स्त्रीप्रत्ययेन सहागमादेशानां विधानं तथापि विधानोत्तरकालं स्त्रीप्रत्यये लुप्ते ऽपि तेषां श्रवणं प्रसज्येत । तन्निवृत्तौ प्रमाणाभावात् । यथायमलकयोरेकविनाशे ऽपि

Indira Gandhi National Centre for the Arts

पञ्चाग्निः । दशाग्निः । किमुच्यते सर्वत्रेति । अन्यत्रापि नावश्यमिहैव । क्वान्यत्र । पञ्चभिर्धीवरीभिः क्रीता पञ्चधीवा । दशधीवेति लिङ्गग्रहणेन नार्थः, सर्वत्रागमादेशानां लुकि तत्कृतप्रसङ्ग इत्येव । इदमपि सिद्धं भवति । पञ्चमेन गृह्णाति पञ्चकः । नैतदस्ति । मयडयं परादिः स डटो ग्रहणेन ग्रहीष्यते । इदं तर्हि प्रयोजनं षष्ठेन गृह्णाति षट्क इति । सिद्धं त्वागमादेशानामङ्गतः स्त्रीप्रकरणवचनात् * । सिद्धमेतत् । कथम् । आगमादेशा ये इह स्त्रीप्रकरणे उच्यन्ते ते ऽङ्गाधिकारे कर्तव्याः । स्त्रीप्रत्ययग्रहणेन नार्थः । सिद्धं त्वागमादेशानामङ्गतो वचनादित्येव । इदमपि सिद्धं भवति । षष्ठेन गृह्णाति षट्क इति । लिङ्गलुकि वा प्रकृतिप्रत्यापत्तिवचनम् * । अथ वा लिङ्गलुक्येव प्रकृतिप्रत्यापत्तिर्वक्तव्या । लिङ्गग्रहणेन नार्थः । लुकि वा प्रकृतिप्रत्यापत्तिवचनमित्येव । इदमपि सिद्धं भवति, षट्केन गृह्णाति षट्क इति । किं पुनरत्र ज्यायः । लुकि प्रकृतिप्रत्यापत्तिवचनमित्येव ज्यायः । इदमपि सिद्धं भवति पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुः । दशपटुरिति । तर्त्तर्हि वक्तव्यम् । न वक्तव्यम् । संनियोगशिष्टानामन्यतरापायउ-

---

नापरस्य विनाश इति भावः । पञ्चेन्द्राण्य इति । तद्धितार्थे द्विगु । सास्य देवतेत्यण् तस्य द्विगोर्लुगनपत्य इति लुक् । लुक्तद्धितलुकीति ङीपो लुक् । तत्रानुको निवृत्तिर्न प्राप्नोति । पञ्चाग्निरिति । पञ्चाग्नाय्यो देवता अस्येति पूर्ववत्सर्वम् । अत्रै कारस्य निवृत्तिर्न प्राप्नोति । पञ्चभिरिति । आर्हीयष्ठक् । तस्याध्यर्द्धपूर्वेति लुक् । ततो ङीपि लुक् अत्र रेफस्य निवृत्ते रप्रसङ्गः । पञ्चमेनेति । तावतिथग्रहणमिति लुग्वेत्यत्र तावतिथेन गृह्णातीति लुक्चेत्युपसंख्यानात्कन् प्रत्ययो डटश्च लुक् । सडट इति । एतेन मट्समाहितस्य लुगित्यर्थः । षट्क इति । डटि परतः पूर्वभक्तस्थुगागमो डटि निवृत्ते ऽपि न निवर्तेत प्रत्ययलक्षणेनापि प्रसज्येत । ननु कथं पूर्वस्य पदत्वात्संयोगान्तस्य लोप इति थुको लोपो भवति । एवं तर्हि चतुर्थेन गृह्णाति चतुष्क इत्युदाहरणम् । अत्र हि रात्सस्येति नियमात् थुकः संयोगान्तलोप इति नास्ति । सिद्धं त्विति । स्त्रीप्रकरणे य आगमादेशास्ते ऽङ्गाधिकाराधिकारे वक्तव्या इत्यर्थः । तत्र स्त्रीप्रत्यये परताङ्गस्य विधीयमाना आगमादेशास्तत्र लुप्ते न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधान्न भविष्यन्तीति भावः । पञ्चपटुरिति । यणादेशस्यानाङ्गत्वात्प्रत्ययलक्षणप्रतिषेधाभावः । यद्यपि यणादेशः प्रत्ययलक्षणो न भवति । तथापि स्त्रीप्रत्ययलुको बहिरङ्गत्वादसिद्धत्वाद्यणादेशोन्तरङ्गो न निवर्तेतेति । प्रत्यापत्तौ त्विष्टं सिध्यतीत्यर्थः । संनियोगशिष्टानामिति । लौकिकोयं न्यायः । एकैकस्मिन् प्रयोजने येषां सहाधिकारस्तत्रान्यतरनिवृत्तावितरनिवृत्तिः । लिङ्गमपि शास्त्रे ऽस्ति बिल्वकादिभ्यश्छस्य लुगित्यत्र छस्येति स्थानिनिर्देशस्तस्य हि प्रयोजनं छमात्रस्य लुग्यथा स्यात् कुको निवृत्तिर्मा भूदिति । यदि चैषा परिभाषा नाभविष्यत् तदा कुङ्न न्यवर्त्स्यदिति किं तन्निर्देशेन । कथं पञ्चपटुरिति । न हि यणादेशः संनियोगशिष्टः । एवं तर्ह्यन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधत इत्यकृत एव यणादेशे लुकि सति निमित्ताभावाद्यणा न भवति । न च

Indira Gandhi National Centre for the Arts

भयोरप्यपायः। तद्यथा। देवदत्तयज्ञदत्ताभ्यामिदं कार्यं कर्तव्यम्। देवदत्तापाये यज्ञदत्तोपि न करोति॥

वर्णादनुदात्तात्तोपधात्तो नः॥ ३९॥ असितपलितयोः प्रतिषेधः *। असितपलितयोः प्रतिषेधो वक्तव्यः। असिता। पलिता। छन्दसि क्नमेके *। छन्दसि क्नमेके इच्छन्ति। असिक्न्यस्योषधे पलिक्नीरियुवतयो भवन्ति। वर्णान्ङीब्विधाने पिशङ्गादुपसंख्यानम् *। वर्णान्ङीब्विधाने पिशङ्गादुपसंख्यानं कर्तव्यम्। पिशङ्गी॥

जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु॥ ४२॥ नीलादोषधौ *। नीलादोषधाविति वक्तव्यम्। नलीओषधिः। प्राणिनि च *। प्राणिनि चेति वक्तव्यम्। नीली गौः नीली वडवा। वा संज्ञायाम् *। वा संज्ञायामिति वक्तव्यम्। नीली नीला॥

वोतो गुणवचनात्॥ ४४॥ गुणवचनादित्युच्यते को गुणो नाम। सत्वे निविशतेऽपैति पृथग् जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः॥ अपर आह। उपैत्यन्यज्जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि। वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः॥ गुणवचनान्ङीबाद्युदात्तार्थः। गुणवच-

---

लुको बहिरङ्गत्वादसिद्धत्वम्। नाजानन्तर्य इत्यसिद्धत्वप्रतिषेधात्। इको यणचीत्यत्र हि अचोश्चानन्तर्यमाश्रितम्॥ ३६॥

वर्णा॥ छन्दसि क्नमिति। तस्य स्थान इति बोद्धव्यम्। अत्र के चित्। छन्दोग्रहणं प्रयोगदर्शनार्थमिच्छन्ति। तेन भाषायामपि क्नादेशो भवति। गतो गणस्तूर्णमासिक्निकानामिति। भाष्यकारेण त्वेतन्नोपन्यस्तमित्ययुक्तमित्याहुः। पिशङ्गादिति। उत्तरसूत्रे॥ ङीषि प्राप्ते ङीब्विधिः। स्वरे विशेषः। पिशङ्गशब्दो लघावन्ते द्वयोश्च बह्वचो गुरुरिति मध्योदात्तत्वादनुदात्तान्तः॥३९॥

जानपद॥ नीलादिति। सर्वस्मिन्ननाच्छादने प्राप्नोतीति वचनम्॥४२॥

वोतो। उत इति वचनाद्वचनग्रहणाच्चादेङीर्न ग्रहणम्। विशेषणस्यापि तु गुणस्य ग्रहणं प्राप्नोति। यथा यस्य गुणस्य हि भावादित्यत्र। ततश्च जात्यादिवचनादपि ङीष् प्राप्नोति आखुरित्यादाविति पृच्छति को गुण इति। सत्त्व इति। द्रव्यमाश्रयते तत एव च द्रव्यान्निवर्तते भिन्नजातियेषु दृश्यते यः स गुणः। एतेन जातेर्गुणत्वं निवारितम्। सा हि द्रव्ये निविशमाना द्रव्यं न कदा चिज्जहाति। न च भिन्नजातीयानि द्रव्याण्यभिनिविशते। यद्यपि गवाश्वादिषु प्राणित्वमस्ति तथापि प्राणित्वेन तेषामेकजातीयत्वमेव। क्रियायास्तु पूर्वोक्तलक्षणयोगाद् गुणत्वं प्राप्नोति। सापि हि द्रव्ये निविशते कदा चिद् द्रव्यान्निवर्तते। निष्क्रियं हि द्रव्यं कदा चिद् भवति कदा चित्सक्रियम्। भिन्नजातीयानि च द्रव्याण्याश्रयतीत्याह आधेय इति। उत्पाद्यो

नाद् ङीब्वक्तव्यः । किं प्रयोजनम् । आद्युदात्तार्थः । आद्युदात्ताः प्रयोजयन्ति वस्वी । पद्वी । खरुसंयोगोपधप्रतिषेधश्च * । खरुसंयोगोपधानां प्रतिषेधो वक्तव्यः । खरुरियं ब्राह्मणी । पाण्डुरियं ब्राह्मणी ॥

पुंयोगादाख्यायाम् ॥ ४८ ॥ गोपालिकादीनां प्रतिषेधः * । गोपालिकादीनां प्रतिषेधो वक्तव्यः । गोपालिका । पशुपालिका । किं पुनरत्रोदाहरणम् । प्रष्ठी प्रवरीति । कथं पुनरयं प्रष्ठशब्दोकारान्तः स्त्रियां वर्तते । तस्येदमित्यनेनाभिसबन्धेन । यथा ह्यसौ तत्कृतान् स्नानोद्वर्तनपरिषेकान् लभते एवं प्रष्ठशब्दमपि लभते । यद्येवं, पुंयोगादाख्यायां तद्धितलुग्वचनम् * । पुंयोगादाख्यायां तद्धि-

---

यथा घटादे पाकजो रूपादिः । अक्रियाजो ऽनुत्पाद्यो यथाऽऽकाशादेर्महत्त्वादिः । क्रियातूत्पाद्यैव न नित्येति तस्या द्वैविध्याभावात् गुणत्वाभावः । एवं तु द्रव्यस्यापि गुणत्वं प्राप्नोति । अवयविद्रव्यमवयवद्रव्येषु निविशते ऽसमवायिकारणसंयोगनिवृत्तौ च विनाशात्ततोऽपैति भिन्नजातीयेषु च हस्तपादादिषु दृश्यते । द्विविधं तन्नित्यानित्यभेदेन । निरवयवस्य द्रव्यस्यात्मपरमाण्वादेर्नित्यत्वादित्याह असत्त्वप्रकृतिरिति । अद्रव्यस्वभाव इत्यर्थः । अत्र पृथग्जातिष्वित्यसमासः । समासे हि जात्यन्ताच्छबन्धुनीति छः प्रसज्येत । तत्र व्यक्तिषु जात्याधारेषु दृश्यमानो जातिषु दृश्यत इत्युच्यते । अयमेवार्थः श्लोकान्तरेणोच्यते । उपैत्यन्यदिति । अन्यद् द्रव्यं शुक्लादिको गुण आगच्छत्यन्यत्तु परित्यजति भिन्नजातीयेषु च द्रव्येषु दृष्टः । सर्वलिङ्गाश्रयगतलिङ्गग्राहित्वाद्वाचकः सर्वलिङ्गानाम् । शब्दधर्मस्य वाचकत्वस्यार्थ आरोपाद् वाचक इत्युच्यते । द्रव्यादन्य इति । यथोक्तलक्षणयुक्तत्वेऽपि यस्य द्रव्यत्वं नास्ति स गुण इत्यर्थः । वस्वीति । धान्ये निदित्यतो निदिति वर्तमाने शृस्वृस्निहीति वसुशब्द आद्युदात्तो व्युत्पादितः । तस्मान् ङीपि सति ईकारोऽनुदात्तो भवति । ङीषि तूदात्तः स्यात् । अन्तोदात्तात्तु ङीमङीषोर्विशेषाभावः । उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वविधानात् ४४ ।

पुंयोग ॥ पुंसा योगः पुंयोगस्तस्माद्धेतोर्यत्प्रातिपदिकं स्त्रियां वर्तते ततो ङीष् भवति । आख्याग्रहणं गुणभूतेनापि पुंसा संबध्यते । अन्येन संबन्धासंभवात् । गणकादयो हि शब्दाः पुंयोगात् स्त्रियां वर्तमाना न पुंयोगस्याख्या भवन्ति स्त्रियां च पुंयोगमन्तरेण न प्रवर्तन्त इति । स्त्रिया अपि नाख्याः । पुंयोगात् स्त्रियां वर्तमानानां स्त्रीप्रत्याख्यात्वमव्यभिचारान्न विशेषणम् । पुंविशेषणस्य तु प्रयोजनं प्रजाता प्रसूतेत्यादौ ङीष्निवृत्तिः । प्रसूतादयो हि पुंयोगात् स्त्रियां प्रवर्तन्ते पुमांसं तु नाचक्षते । गोपालिकादीनामिति । सिद्धये इति वाक्यशेषः । किं पुनारिति । यदि प्रष्ठादिशब्दः पुंसि व्युत्पाद्यते ततः स्त्रीवृत्तिर्न स्यात् । अथ तत्समर्थाचरणात् प्रस्थानादिक्रियां प्रति कर्तृत्वमाश्रित्य स्त्रियां व्युत्पाद्यते तदान्तरङ्गत्वाट्टापि कृते सुबुत्पत्तौ सत्यां समासे कृते अकारान्तत्वाभावान्ङीष् न स्यादिति प्रश्नः । तस्येदमित्यनेनेति । यथा राजामात्यो राजकार्याणि राजव्यपदेशं च लभते तथा प्रष्ठभार्यापीत्यर्थः । स्नानशब्दः करणसाधन इत्यपुनरुक्तः परिषेकशब्दः । तद्धितलुग्वचनमिति । तस्येदमिति संबन्धस्य भेदनिबन्धत्वाद् भेदाश्रयतद्धितोत्पत्तौ सत्यां तस्य लुग्वक्तव्यः । लुकि च सति प्रकृ-

तस्य लुग् वक्तव्यः। तस्येदमिति प्राप्नोति। न तर्हीदानीमिदं भवति प्राष्ठ्य इमाः प्राचर्य इमा इति, भवति च। विभाषा लुग् वक्तव्यः। यदा लुक् तदा प्रष्ठी यदा न लुक्तदा प्राष्ठी। यद्येवं नार्थो लुका विभाषा तद्धितोत्पत्तिः। यदा तद्धितोत्पत्तिः तदा प्राष्ठी। यदा न तद्धितोत्पत्तिः। तदा प्रष्ठी। एवमपि लुग् वक्तव्यः। न ह्यन्तरेण तद्धितलुकं परार्थे शब्दो वर्तते। यदि पुनस्तस्यामेव प्रष्ठशब्दो वर्तते। कथं पुनस्तस्यामेवाप्रतिष्ठमानायां प्रष्ठशब्दो वर्तते। यथैव ह्यसावकुर्वती किंचित्पापं भर्तृकृतान् बन्धनादिक्लेशान् लभते। एवं प्रष्ठशब्दमपि लभते। सुबन्तसमासवचनाच्चाकारान्तानुपपत्तिः *। सुबन्तसमासवचनाच्चाकारान्तता नोपपद्यते। सुबन्तानां समासस्तत्रान्तरङ्गत्वाट्टाप्। टाप्युत्पन्ने समासः। स्थाशब्दः समस्येत। तत्र पुंयोगादाख्यायामकारान्तादितीकारो न प्राप्नोति। सिद्धं तु स्त्रियाः पुंशब्देनाभिधानात् *। सिद्धमेतत्। कथम्। स्त्रियाः पुंशब्देनाभिधानात्। स्त्री पुंशब्देनाकारान्तेनाभिधीयते। ननु चोक्तं पुंयोगादाख्यायां तद्धितलुग् वचनमिति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति। नातस्तद्धितोत्पत्तिर्भवतीति। यदयं पुंयोगादाख्यायामिति ईकारं शास्ति। नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्। ये ऽनीकारास्तद्धितास्तदर्थमेतत्स्यात्। यत्तह्याख्याग्रहणं करोति। न हि तद्धितान्तमाख्या भवति। अथ वा पुनरस्तु तस्येदमित्यनेनैवाभिसंबन्धेन।

तिरेव प्रष्ठशब्दस्तद्धितार्थे स्त्रियमभिधत्त इति प्रष्ठीति ङीष् सिद्ध्यति। न ह्यन्तरेणेति। तद्धितस्य विकल्पेनोत्पत्तावपि पक्षे वाक्यमेव भवति प्रष्ठस्येयमिति। तत्र च प्रष्ठशब्दः पुंस्येव वर्तते न तु स्त्रियाम्। तस्मात् स्त्रीवृत्तित्वमस्येच्छता तद्धितलुग्विधेय इत्यर्थः। यदि पुनरिति। यथा पञ्चभिर्हलैः कृषतीति प्रतिविधानात् कर्तृत्वमेव स्त्रिया अपि प्रस्थानादौ कर्तृत्वं स्यादेवेति भावः। कथमिति। साक्षात्तस्याः क्रियाया अकरणादकर्तृत्वं मन्यते। यथैवेति। साक्षात्पापमकुर्वत्यपि संविधात्रीत्वात्कर्तृत्वमापद्यते यथा स्वामिदासौ पचत इति स्वामिनः संविधातृत्वात् पक्तृत्वं दासस्य तु साक्षात् तथा स्त्रीपुंसयोः प्रस्थातृत्वमित्यर्थः। तत्रान्तरङ्गत्वादिति। प्रातिपदिकं पूर्वं लिङ्गमभिदधाति पश्चात्संख्यामिति तन्निमित्तस्य सुपो बहिरङ्गत्वमिति भावः। सिद्धं त्विति। तस्येदमिति संबन्धात् तच्छब्दलाभं मन्यते। यदयमिति। अणि हि ङीप् सिद्धो न चाणन्तान् ङीपि ङीषि वा विशेषः। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वात्। येनीकारा इति। यथा भानोरियं वृद्धाच्छः। भानवीया। अत्र टाब्बाधनार्थमिदं वचनं स्यात्। न हि तद्धितान्तमिति तद्धितान्तस्य शब्दस्य प्रकृत्यर्थे पुंस्यवर्तनादिति भावः। तदेवमाख्याग्रहणं तस्येदमिति भेदविवक्षायामपि तद्धितोत्पत्तिमन्तरेण प्रष्ठशब्दस्य स्त्रियां वृत्तित्वं च ज्ञापयति। तेन न केवला प्रकृतिः प्रयोक्तव्येति नियमो निवर्तत इत्युक्तम्। अस्मिंस्तु व्याख्याने तद्धितस्य निरयो बाधः प्राप्नोतीति। सिद्धं तु स्त्रिया इत्येतत्पक्षान्तराश्रयेण व्याचष्टे अथ वेति। अनेनाभिसंबन्धेनेति एतत्पु

Indira Gandhi National Centre for the Arts

ननु चोक्तं पुंयोगादाख्यायां तद्धितलुग्वचनमिति । नैष दोषः । नावश्यमयमेवाभिसंबन्धो भवति तस्येदमिति । अयमप्यभिसंबन्धो भवति सोयमिति । कथं पुनरेतस्मिन् स इत्येतद्भवति । चतुर्भिः प्रकारैरेतस्मिन् स इत्येतद्भवति । तात्स्थ्यात् ताद्धर्म्यात् तत्सामीप्यात् तत्साहचर्यादिति । तात्स्थ्यात्तावत् । मञ्चा हसन्ति गिरिर्दह्यते । ताद्धर्म्यात्. जटिनं यान्तं ब्रह्मदत्त इत्याह । ब्रह्मदत्ते यानि कार्याणि जटिन्यपि तानि क्रियन्त इति । अतो जटी ब्रह्मदत्त इत्युच्यते । तत्सामीप्याद्, गङ्गायां घोषः । कूपे गर्गकुलम् । तत्साहचर्यात्, कुन्तान् प्रवेशय यष्टीः प्रवेशयेति । अथ वा पुनरस्तु तस्यामेव प्रष्ठशब्दः । ननु चोक्तं सुबन्तसमासवचनाच्चाकारान्तानुपपत्तिरिति । नैष दोषः । गतिकारकोपपदानां कृद्भिः सह समासवचनम् । गतिकारकोपपदानां कृद्भिः सह समासो भवतीत्येषा परिभाषा कर्तव्या । कानि पुनरस्याः परिभाषायाः प्रयोजनानि । प्रयोजनं क्तादल्पाख्यायाम् । अभ्रलिप्ती सूर्यविलिप्ती । सुबन्तानां समासः । तत्रान्तरङ्गत्वाट्टाप् । टापि कृते समासः । विलिप्ताशब्दः समस्येत तत्र क्तादल्पाख्यायामकारान्तादिति ङीष् न प्राप्नोति । जातेर्ङीष्विधाने । जातेर्ङीष्विधाने प्रयोजनम् । व्याघ्री । कच्छपी । सुबन्तानां समासः । तत्रान्तरङ्गत्वाट्टापि कृते समासः । घ्राशब्दः समस्येत । तत्र जातेरस्त्रीविषयादयोपधादकारान्तादिति ङीष् प्राप्नोति । समासान्तस्य णत्वे । समासान्तस्य णत्वे प्रयोजनं वक्ष्यति । प्रातिपदिकान्तस्य णत्वे

र्वैकेण सोयमिति संबन्धेनेति भावः । इतरो भेदसंबन्ध एवाननोक्ते इति मत्वाह ननु चेति । अयमपीति । अभेदाच्च भेदस्य निवृत्तत्वात्तद्धितानुत्पत्तिः । भेदस्य तु विवक्षायां तद्विधितो न निवार्यते । कथं पुनरिति । भिन्नानामभेदाभावादिति प्रश्नः । चतुर्भिरिति । आरोप्यते ताद्रूप्यं तु मुख्यमित्यर्थः । मञ्चा हसन्तीति । अत्र बालेषु मञ्चस्थत्वारोपान्मञ्चशब्दप्रवृत्तिर्हसन्तीति पदान्तरप्रयोगाद्विज्ञायते । जटिनमिति । ब्रह्मदत्तवद् धर्मलाभात्तद्रूपारोपः । सिंहो माणवको गौर्वाहीक इत्यादावपि ताद्धर्म्यात्ताद्रूप्यारोपात्तच्छब्दप्रवृत्तिः । तदुक्तं हरिणा । गोत्वानुषङ्गो वाहीके निमित्तात्कैश्चिदिष्यते । अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थित इति ॥ इह तु साहचर्यात् स्त्रियां प्रष्ठत्वारोपः । अथ वेति । संविधात्रीत्वात् प्रस्थाने कर्तृत्वं स्त्रियाः पुरुषगताया वा प्रस्थानक्रियायास्तस्यामारोपादिति भावः । अभ्रविलिप्तीति । अभ्रशब्दस्य तृतीयान्तस्य विलिप्ताशब्देन कर्तृकरणे कृतेति समासः । ततः करणपूर्वादिति वर्तमाने क्तादल्पाख्यायामिति ङीष् न प्राप्नोति । वचनसामर्थ्याट्टाबन्तादपि भविष्यतीति चेदत इत्यधिकारो बाध्येत परिभाषा चान्यार्थावश्यं कर्तव्या । अथ वा वचनात् प्रातिपदिकाधिकारो बाध्येत ततश्च वाक्ये ङीष् प्रसज्येत । अभ्रैर्विलिप्ता द्यौरिति । व्यघ्रीति, व्याङ्पूर्वाज्जिघ्रतेर्घ्रः संज्ञायां प्रतिषेध इति शस्य प्रतिषेधादातश्चोपसर्गे इति कप्रत्ययः । तत्र घ्रशब्दमात्रं जातौ न वर्तत इति टावेव स्यात् । ङीषस्तु सूकर्यादिरवकाशः । समासान्तग्रहणमिति । समासस्य प्रातिपदिकस्य योन्त्यो नकारस्तस्य णत्वमित्यर्थः । तत्र माषान् व-

समासान्तग्रहणमसमासान्तप्रतिषेधार्थमिति । तस्मिन् क्रियमाणे माषवापिणी । व्रीहिवापिणी । सुबन्तानां समासः । तत्रान्तरङ्गत्वान्नकारान्तत्वान्ङीप् । ङीपि कृते समासः । वापिनीशब्दः समस्येत । तत्र समासान्तस्येति णत्वं न प्राप्नोति । कृदन्तात्तद्धिते वृद्धिस्वरौ च * । कृदन्तात्तद्धिते वृद्धिस्वरौ च प्रयोजनम् । सांकूटिनम् । व्यावक्रोशी । अत्रावयवादुत्पत्तिः प्रसज्येत । गतिकारकोपपदानां कृद्भिः सह समासो भवतीति न दोषो भवति । सत्यामप्येतस्यां परिभाषायामवयवादुत्पत्तिः प्राप्नोति । किं कारणम् । प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति संघातादुत्पत्तिर्भविष्यति । यदि तर्ह्येषा परिभाषास्ति । नैतदस्याः परिभाषायाः प्रयोजनं भवति एतयैव सिद्धम् । न सिध्यति । किं कारणम् । अप्रातिपदिकत्वात् । कृत्त्वात् प्रातिपदिकसंज्ञा भविष्यति । ननु चेदानीं प्रातिपदिकसंज्ञायामप्येतया परिभाषया शक्यमिहोपस्थातुम् । नेत्याह । इह हि मूलकेनोपदंशं भुङ्क्ते इति वाक्येऽपि लुक् प्रसज्येत । स्वरे च दोषः स्यात् । प्रकारकः प्रकरणम् । गतिकार-

---

पत्यभीक्ष्णमिति बहुलमाभीक्ष्ण्ये इति णिनौ कृते ऋन्नेभ्य इति ङीपि कृते सुबन्तेन यदि समासः स्यात्तदा समासस्यान्त इकारो न तु नकार इति णत्वं न स्यात् । माषवापिणइत्यादेरेव तु स्यात् । सांकूटिनमिति । अभिविधौ भाव इनुणितीनुण्प्रत्ययः । तत्र कूटिन्नित्येतस्माच्छब्दात्समर्थाद्विभक्तिश्च प्राप्नोति अणिनुण इत्यण्प्रत्ययश्च तत्र स्वार्थिकत्वादन्तरङ्गत्वादण्प्रत्ययः स्यात् । ततश्च कूटिन्नित्यस्यैवाङ्गत्वादादिवृद्धिः स्यात् । प्राक् सुबुत्पत्तेः समासेऽन्तरङ्गत्वात् पूर्वं समासः । अण्प्रत्ययो हि प्रातिपदिकविशेषापेक्षत्वाद् बहिरङ्गः । तत्र संकूटिन्नित्यस्मात्समासप्रातिपदिकादण्प्रत्यये सतीष्टं सिध्यति । व्यावक्रोशीति । कर्मव्यतिहारे णच् स्त्रियामिति णच् । णचः स्त्रियामित्यञ् । सत्यामपीति । णच इनुण इति प्रत्ययग्रहणपरिभाषोपस्थानात् कूटिनित्यादेरेवावयवात्तद्धितोत्पत्तिप्रसङ्ग इत्यर्थः । कृद्ग्रहण इति । अनया परिभाषया प्रत्ययग्रहणपरिभाषा बाध्यत इत्यर्थः । नैतदस्या इति । गतिकारकोपपदानामित्यस्याः सांकूटिनमित्यादि न प्रयोजनम् । अकृत एव समासे कृद्ग्रहणपरिभाषया संघातात्तद्धितोत्पत्तिर्भविष्यतीति भावः । अप्रातिपदिकत्वादिति णचः स्त्रियामञ् अणिनुण इत्यत्र प्रातिपदिकाधिकाराद् णजन्तादिनुणन्ताच्च प्रातिपदिकात्तद्धितो विधीयते । तत्र कृद्ग्रहणपरिभाषया णाजिनुणन्तत्वं सिध्यति न तु प्रातिपदिकत्वम् । तत्र समासग्रहणेन नियमार्थेन संघातस्य प्रातिपदिकसंज्ञानिषेधात्संघातात्तद्धितो न स्यादित्यर्थः । ननु चेति । कृतद्धितसमासाश्चेत्यत्रापि कृद्ग्रहणे कृद्ग्रहणपरिभाषया संकूटिन्नित्यस्य विनापि प्राक्सुबुत्पत्तेः समासेन प्रातिपदिकसंज्ञा भविष्यति तन्निबन्धश्च तद्धित इति भावः । मूलकेनोपदंशमिति । उपदंशस्तृतीयायामिति णमुल् । अत्र यदि सगतिकारकस्य कृदन्तस्य प्रातिपदिकसंज्ञा स्यात् । तदा प्रातिपदिकान्तर्वर्तित्वात्सुब्लुक् प्रसज्येत । यद्येवं

Indira Gandhi National Centre for the Arts

कोपपदात् कृदन्तमुत्तरपदं प्रकृतिस्वरं भवतीत्येष स्वरो न स्यात्। नैष दोषः। द्वे अत्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि। तत्रावयवस्य या प्रातिपदिकसंज्ञा तदाश्रयः स्वरो भविष्यति। इहापि तर्हि सांकूटिनं व्यावक्रोशीति द्वे अत्रापि प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि। तत्रावयवस्य या प्रातिपदिकसंज्ञा तदाश्रया अवयवादुत्पत्तिः प्राप्नोति। अवयवादुत्पत्तौ सत्यां को दोषः। कौम्भकारेयो न सिध्यति। अवयवस्य वृद्धिस्वरौ स्याताम्। तस्मात्प्रयोजनमेवैतदस्याः परिभाषायाः। उभाभ्यां तु खलु सिध्यति। अवदा-

---

तृतीयाप्रभृतीन्यन्यतरस्यामिति विकल्पेन समासविधानस्य किं प्रयोजनमिति चेत् दधि उपदंशं भुङ्क्त इत्यत्र पक्षे प्रकृतिभावः। अन्यथाऽसत्यस्मिन् विकल्पविधाने अमैवाव्ययेनेति नित्यसमासः स्यात्। ततश्च सिन्नित्यसमासयोः शाकलप्रतिषेधो वक्तव्य इति प्रकृतिभावः प्रतिषिध्येत। प्रकारक इति। अत्र समुदायस्य प्रातिपदिकसंज्ञायां सत्यां सुबुत्पत्तौ पदव्यपदेशोऽस्ति न तूत्तरपदव्यपदेशस्तत्र समुदायस्य कृदन्तव्यपदेशे तदन्तर्भावाद् गतेस्तस्मात् कृदन्तमुत्तरपदं न भवतीति कारकशब्दस्य प्रकृतिस्वरो न स्यात्। वचनं किमर्थमिति चेत् उपपदार्थममावास्येत्यादौ। गतिकारकग्रहणं तूत्तरार्थं स्यात्। अथवा वचनस्याप्रातिपदिकत्वलक्षणमप्रामाण्यं स्यात्। द्वे इति। गतिकारकपूर्वस्यापीत्यत्रापिशब्दात्कारकशब्दस्यापि प्रत्ययान्तस्य प्रातिपदिकसंज्ञाप्रकारकशब्दस्यापि समुदायस्येत्यर्थः। तदाश्रय इति। कारकशब्दस्य प्रातिपदिकसंज्ञायां सत्यां गतिकारकोपपदानामित्येतदनाश्रयणे सुप्युत्पन्ने समासे कृतेपिग्रहणात्कारकशब्दस्यापि कृदन्तत्वाद् गतेरुत्तरत्वात् स्वरो भविष्यतीत्यर्थः। कौम्भकारेय इति। एतच्चोपलक्षणम्। सांकूटिनं व्यावक्रोशीत्यपि न सिध्यति। समुदायावयवसन्निधाने द्विर्वचनवत्समुदाय एव प्रकृतित्वेनाश्रयिष्यत इति चेत्प्रकारके दोषः स्यात्। समुदायस्य कृदन्तत्वे तदन्तर्भावाद् गतेस्तदाश्रयः स्वरो न स्यात्। किञ्च समुदाये द्विरुक्ते अवयवा अपि द्विरुक्ता भवन्तीति पृथग्द्विर्वचनं न प्रयुज्यते। इह तु समुदायादुत्पत्तौ तस्यैवाङ्गसंज्ञायां तन्निबन्धनानि कार्याणि प्रवर्तन्ते नावयवनामित्यवयवादपि प्रत्ययोत्पत्तिप्रसङ्गः। तत्र कुम्भकारशब्दे यदि कारशब्दस्यापि प्रातिपदिकसंज्ञासमुदायस्यापि गतिकारकोपपदानामित्येतच्च नाश्रीयते तदा कारशब्दात्प्रातिपदिकान् ङीपि कृते कारीशब्दस्य स्त्रीप्रत्ययान्तत्वात्तत एव ढकि सति तस्यैवादिवृद्धिः स्यात्। ननु चानुपसर्जनादिति सूत्रं प्रधानेन तदन्तविध्यर्थमित्युक्तम्। तत्र कारशब्दान्तान् ङीब् भविष्यति तत्कथमुक्तं कौम्भकारेयो न सिध्यतीति। नैष दोषः। गतिकारकोपपदानामित्येतद्वचनमत्र प्रदेशे आक्षिप्तम्। अस्मिंश्चासति उपपदस्य सुबन्तेन सह समासेन भाव्यम्। तत्रान्तरङ्गत्वात्कारशब्दादेव ङीपि सति सुबुत्पत्तौ सत्यां समासः प्रसज्येत। ततश्च कारीशब्दादेव ढक् स्यात्। यद्यपि स्त्रीप्रत्यये तदादिनियमो नास्ति तथापि स्त्रीभ्यो ढगिति समुदायाड् ढकं बाधित्वाद्व्यच इति परत्वादन्तरङ्गाद्वाऽवयवाड् ढक् प्रसज्येत। तस्मात् स्थितमेतत् कृत्तद्धितसमासाश्चेत्यत्र कृद्ग्रहणपरिभाषा नोपतिष्ठते। यस्मादप्रत्यय इत्यस्य प्रतिषेधस्य बाधनार्थं तत्र कृद्-

Indira Gandhi National Centre for the Arts

तायां ङीप्प्रसङ्गः । अवदातायां ङीप् प्राप्नोति । अवदाता ब्राह्मणी । वर्णादनुदात्तात्तोपधात्तो न इति । नैष वर्णवाची । किं तर्हि विशुद्धवाची । आतश्च विशुद्धवाची । एवं ह्याह । त्रीणि यस्यावदातानि विद्या योनिश्च कर्म च । एतच्छिवं विजानीहि ब्राह्मणाग्र्यस्य लक्षणमिति ॥ सूर्याद्देवतायां चाब् वक्तव्यः । सूर्यस्य स्त्री सूर्या । देवतायामिति किमर्थम् । सूरी ॥

इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ॥ ४९ ॥ हिमारण्ययोर्महत्वे * । हिमारण्ययोर्महत्त्व इति वक्तव्यम् । महद्धिमं हिमानी । महदरण्यमरण्यानी । यवाद्दोषे * । यवाद्दोष इति वक्तव्यम् । दुष्टो यवो यवानी । यवनाल्लिप्याम् * । यवनाल्लिप्यामिति वक्तव्यम् । यवनानी लिपिः । उपाध्यायमातुलाभ्यां वा * । उपाध्यायमातुलाभ्यां वेति वक्तव्यम् । उपाध्यायी । उपाध्यायानी । मातुली । मातुलानी । मुद्गलाच्छन्दसि लिच्च *। मुद्गलाच्छन्दसि लिच्चेति वक्तव्यम् । रथीरभून्मुद्गलानी । आचार्यादणत्वं च ।

ग्रहणम् । परिभाषोपस्थाने तु सति मूलकेनोपदंशं भुङ्क्त इति वाक्यस्यापि स्यात् । तथा च समासग्रहणाद्यो नियमः स बाध्येत । मध्ये ऽपवादा इति न्यायाच्च । अप्रत्यय इत्ययं निषेधः कृद्ग्रहणेन बाध्यते । न तु समासग्रहणकृतो नियमः । तत्र परत्वात्समासग्रहणेन गतिकारकपूर्वस्यापि कृदन्तस्य वाक्यस्य प्रातिपदिकसंज्ञाया निवर्तनात् । यस्मात्कृद्विहितस्तदादेरेव कृदन्तस्य प्रातिपदिकसंज्ञाऽवतिष्ठते । तस्मादिति । गतिकारकोपपदानामित्यस्याः सांकूटिनमित्यादिप्रयोजनमित्यर्थः । उभाभ्यामिति । सांकूटिनादि परिभाषाद्वयेन सिध्यति न केवलया कृद्ग्रहणपरिभाषयेत्यर्थः । ननु च गतिकारकपूर्वस्यापीत्यपिग्रहणात् कूटिन्नित्यस्यापि इनुणन्तत्वादण् प्राप्नोति । नैष दोषः । उभयोरपीनुणन्तत्वे प्रातिपदिकत्वे चार्थविच्छेदाभावादवयवविच्छेदे प्रमाणाभावात्समुदायादेवोत्पत्तिर्भवति । असत्यां त्वेकतरस्यां परिभाषायामवयवस्यैवेनुणन्तत्वात्प्रातिपदिकत्वात्तत एव तद्धितोत्पत्तिः प्रसज्येत । गतिकारकोपपदात् कृदित्यत्र तु गतिकारकयोर्भेदेनोपादानात् निमित्तभावाद्यथासंभवं क्वचित् केवलस्य कृदन्तस्य क्वचित् गतिकारकपूर्वस्य गत्यादिभ्य उत्तरस्य स्वरो भवति । तदेव गतिकारकोपपदानामिति वचनात् प्राक् सुबुत्पत्तेः समासे प्रष्ठशब्दोऽकारान्तः । पुंयोगात् प्रस्थानासङ्गात् पुंस्कर्तृकप्रस्थानक्रियायां संविधात्रीत्वाद्वा कर्तृत्वात् स्त्रियां वर्तते पुंसो वाचकश्चेति प्रष्ठीत्युदाहरणं भवतीति । अवदातायामिति । प्राक्सुबुत्पत्तेः समास इत्येतत्प्रसङ्गेनात्रेदमुक्तं वर्णादनुदात्तादित्यत्रतु वक्तव्यम् । अवदातशब्दो गौरवाचीति मन्यते । विशुद्धवाचीति । वर्णान्तरव्यतिकीर्णेऽपि विशुद्धिमुपादाय प्रयुज्यते । सूरीति । सूर्यतिष्येति यलोपः ॥ ४८ ॥

इन्द्रवरुण ॥ महद्धिमामिति । महत्वयोगे हिमारण्योः स्त्रीत्वम् । यवानीति । जात्यन्तरमेवाभिधीयते । दोषस्तु यवत्वजातेरभावे तदाकारानुकृतिमात्रमित्याहुः । यवनानीति । तस्येदमित्यणो बाधको ङीष् । उपाध्यायेति । उपाध्यायस्याप्राप्ते मातु-

Indira Gandhi National Centre for the Arts

आचार्यादणत्वं चेति वक्तव्यम् । आचार्यानी । अर्यक्षत्रियाभ्यां वा * । अर्यक्षत्रियाभ्यां वेति वक्तव्यम् । अर्या अर्याणी । क्षत्रिया क्षत्रियाणी ॥

क्रीतात् करणपूर्वात् ॥ ५० ॥ करणपूर्वादिति किमर्थम् । गवा क्रीता । अश्वेन क्रीता । करणपूर्वादित्युच्यमाने ऽप्यत्र प्राप्नोति । एषोपि करणपूर्वः क्रीतशब्दः । विभक्त्या व्यवहितत्वान्न भविष्यति । यदि तर्हि विभक्तिरपि व्यवधायिका भविष्यति । मनसा क्रीतीति न सिध्यति । एवं तर्हि नैवं विज्ञायते करणमस्मात् क्रीतशब्दात् पूर्वं सोयं करणपूर्वस्तस्मात्करणपूर्वात् क्रीतशब्दादनुपसर्जनादिति । कथं तर्हि । करणमस्मिन् प्रातिपदिके पूर्वं तदिदं करणपूर्वं तस्मात्करणपूर्वात्प्रातिपदिकात्क्रीतान्तादनुपसर्जनादिति ॥

बहुव्रीहेश्चान्तोदात्तात्॥ ५२ ॥ अन्तोदात्ते जातप्रतिषेधः * । अन्तोदात्ताज्जातस्य प्रतिषेधो वक्तव्यः । दन्तजाता । स्तनजाता । पाणिगृहीत्यादीनां विशेषः * । पाणिगृहीत्यादीनां विशेष इति वक्तव्यम् । पाणिगृहीती भार्या चेत् । यस्या हि यथाकथंचित्पाणिर्गृह्यते पाणिगृहीता सा भवति । बहुलं तणि * । बहुलं तणीति वक्तव्यम् । किमिदं तणीति । संज्ञाच्छन्दसोर्ग्रहणम् । किं प्रयोजनम् । प्रवृद्धविलून्याद्यर्थम् । प्रवृद्धविलूनी । प्रवृद्धविलूना । अन्तोदात्ताद्बहुनञ्सुकालसुखादिपूर्वात् * । अन्तोदात्ताद्बहुनञ्सुकालसुखादिपूर्वादिति वक्तव्यम् । बहु । बहुकृता । बहु । नञ् । अकृता । नञ् । सु । सुकृता । सु । काल । मासजाता । वत्सरजाता । काल । सुखादि । सुखजाता । दुःखजाता । क्षिप्रजाता । सुखादि । जातिपूर्वा-

---

लस्य तु नित्यं प्राप्ते आनुग्विकल्पयते । मुद्गलानीति । ङीषो लित्वादानुगाकारस्य लित्स्वरः । अर्येति । केचित्तु पुंयोग एवेच्छान्ति । अन्ये तु स्वार्थ एवेच्छन्ति । पुंयोगे तु अर्यी क्षत्रियीत्येव भवितव्यम् ॥ ४९ ॥

क्रीतात् ॥ करणपूर्वादिति किमर्थमिति । क्रियमाणे ऽपि करणपूर्वग्रहणे पूर्वशब्दस्य व्यवस्थावाचित्वादनिष्टप्रसङ्ग इति पृच्छति । विभक्त्येति । कर्मादीनां द्योतिका विभक्तय इति दर्शने इदमुच्यते । अन्यथा विभक्तेः करणाभिधाने व्यवधानाभावः । मनसाक्रीतीति । मनसः संज्ञायामिति तृतीयाया अलुक् । करणमस्मिन्निति पूर्वशब्दोवयववचनः समासप्रातिपदिकं चान्यपदार्थस्तेन वाक्ये ङीष्न भविष्यतीत्यर्थः ॥ ५० ॥

बहुव्रीहेः ॥ दन्तजातेति । वा जात इत्यन्तोदात्तत्वं वा भवति । पाणिगृहीतीति । यस्या अग्निसाक्षिपूर्वकं पाणिग्रहणं कृतं साभिधीयते । प्रवृद्धविलूनीति । प्रवृद्धं विलूनं यस्या इति बहुव्रीहिः । अपरे तु कर्मधारयं कुर्वन्ति । बहुकृतेति । बहूनि कृतान्यनयेति बहुव्रीहिः । बहोर्नञ्वदुत्तरपदभूम्नीत्यन्तोदात्तत्वम् । अकृता सुकृतेत्यत्र नञ्सुभ्यामिति । मासजातेत्यादौ जातिकालसुखादिभ्य इति । सुखादयः सुखादिभ्य कर्तृवेदनायामिति क्यङर्थे गणे पठिता इह गृह्यन्ते । अथ वेति । बहुव्रीहावन्तोदात्तनिमित्तेष्वन्येषु निषिद्धेषु जातिरेवान्तोदात्तनिमित्तं क्तान्तस्यावशिष्यत इति जातिग्रह-

Indira Gandhi National Centre for the Arts

द्वा *। अथ वा जातिपूर्वादिति वक्तव्यम् ॥

स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ॥ ५४ ॥ स्वाङ्गाच्चोपसर्जनादित्युच्यते। किं स्वाङ्गं नाम। अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम्। अतत्स्थं तत्र दृष्टं च तस्य चेत्तत्तथायुतम् ॥ अप्राणिनोपि स्वाङ्गम्। अद्रवमिति किमर्थम्। बहुलोहिता। नैतदस्ति। बह्वचो नेति प्रतिषेधो भविष्यति। इदं तर्हि। बहुकफा। मूर्तिमदिति किमर्थम्। बहुबुद्धिः बहुमनाः। नैतदस्ति। अत इति वर्तते। इदं तर्हि। बहुज्ञाना। प्राणिस्थमिति किमर्थम्। श्लक्ष्णमुखा शाला। अविकारजमिति किमर्थम्। बहुगडुः बहुपिठका। नैतदस्ति। इह तावद्बहुगडुरिति। अत इत्यनुवर्तते बहुपिठकेति बह्वचो नेति प्रतिषेधो भविष्यति। इदं तर्हि। बहुशोफा। अतत्स्थं तत्र दृष्टं च। अप्राणिस्थं प्राणिनि दृष्टं च स्वाङ्गसंज्ञं भवति। दीर्घकेशी रथ्या। तस्य चेत्तत्तथायुतम्। अप्राणिनोपि स्वाङ्गसंज्ञं भवतीति। दीर्घनासिकी अर्चा। तुङ्गनासिकी अर्चेति। अथोपसर्जनग्रहणं किमर्थम्। इह मा भूत्। शिखा। उपसर्जनग्रहणमनर्थकं बहुव्रीह्यधिकारात् *। उपसर्जनग्रहणमनर्थकम्। किं कारणम्। बहुव्रीह्यधिकारात्। बहुव्रीहेरिति प्रकृतमनुवर्तते। क्व प्रकृतम्। बहुव्रीहेश्चान्तोदात्तादिति। बह्वर्थं तर्हि उपसर्जनग्रहणं कर्तव्यम्। बह्वचो नेति प्रतिषेधं वक्ष्यति तद्बह्वज्ग्रहणमुपसर्जनविशेषणं यथा विज्ञायेत। बह्वच उपसर्जनान्नेति। अथाक्रियमाणे उपसर्जनग्रहणे कस्य बह्वज्ग्रहणं विशेषणं स्यात्। बहुव्रीहेरिति वर्तते। बहुव्रीहिविशेषणं विज्ञायेत।

णमेवात्र कर्तव्यमित्यर्थः ॥ ५२ ॥

स्वाङ्गाच्चो॥ किं स्वाङ्गमिति। किं स्वमङ्गं स्वाङ्गमाहोस्विल्लक्षणान्तरप्रयुक्तमिति प्रश्नः। अद्रवमिति। द्रवतीति द्रवम्। ततोन्यदद्रवम्। मूर्तिः काठिन्यम्। अथ वा सर्वगतद्रव्यपरिमाणं सा यस्यास्ति तद् मूर्तिमत्। अविकारजमिति। विकारो वातादिवैषम्यम्। तस्माद्यन्न जातमित्यर्थः। तथा प्राणिस्थमपि यत् पूर्वं प्राणिनि दृष्टं तदपि स्वाङ्गम् यथा रथ्यापतिताः केशाः। तस्य चेदिति। अप्राणिनोपि मुखं स्वाङ्गं भवति। यदि यथा प्राणिना तत्संबद्धं तथैवाप्राणिनापि। अप्राणिनोपीति। तस्य चेत्तत्तथायुतमित्यस्य सामर्थ्यलभ्योऽयमध्याहारः। बहुलोहितेति। लोहितं रुधिरमुच्यते। नैतदस्तीति। ङीषभावार्थं लोहितस्यास्वाङ्गत्वप्रतिपादनं नोपयुज्यते। स्वाङ्गे ध्रुवे। उपसर्गात् स्वाङ्गं ध्रुवमपर्श्वित्यादिकार्याभावार्थं तूपयुज्यते एव। अस्तीदानीमिति। अनेकपदावयवत्वादबह्वच्त्वं बहुव्रीहेर्न संभवति। तत्र विधिसामर्थ्याद्बह्वज्ग्रहणमुत्तरपदविशेषणं भविष्यतीति मत्वा प्रश्नः। स्वडेति। भडो वृश्चिकावयवविशेषः। अनन्तोदात्तार्थं इति। बहुव्रीह्यधिकारात् स्वाङ्गस्योपसर्जनत्वे लब्धे पुनरुपसर्जनग्रहणमुपसर्जनमात्रपरिग्रहार्थमित्यनन्तोदात्तादपि ङीष् भविष्यतीति भावः। सहादिकृतत्वादिति। सनादीनां कृतः सहादिकृतः प्रतिषेधस्तद्भावः सहादिकृतत्वं

अस्ति चेदानीं कश्चिदबह्वज् बहुव्रीहिः । यदर्थो विधिः स्यात् । अस्तीत्याह । स्वडा स्वडीति । बह्वजर्थमिति चेत्स्वाङ्गग्रहणात्सिद्धम् * । स्वाङ्गग्रहणं क्रियते । तद्बह्वज्ग्रहणेन विशेषयिष्यामः स्वाङ्गाद् बह्वचो नेति । एवं तर्हि अन्तोदात्तादिति वर्तते । अनन्तोदात्तार्थोयमारम्भः । अनन्तोदात्तार्थमिति चेत् सहादिकृतत्वात्सिद्धम् । यदयं सहनञ्विद्यमानपूर्वाच्चेति प्रतिषेधं शास्ति तज् ज्ञापयत्याचार्यः अनन्तोदात्तादपि भवतीति । स्वाङ्गसमुदायप्रतिषेधार्थं तु * । स्वाङ्गसमुदायप्रतिषेधार्थं तर्ह्युपसर्जनग्रहणं कर्तव्यम् । स्वाङ्गाद्यथा स्यात् । स्वाङ्गसमुदायान्मा भूत् । कल्याणपाणिपादा । अथ क्रियमाणेप्युपसर्जनग्रहणे कस्मादेवात्र न भवति स्वाङ्गं ह्येतदुपसर्जनम् । न स्वाङ्गसमुदायः स्वाङ्गग्रहणेन गृह्यते । तद्यथा, न जनपदसमुदायो जनपदग्रहणेन गृह्यते । काशिकोशलीया इति । जनपदतदवध्योश्चेति वुञ् न भवति । एतदपि नास्ति प्रयोजनम् । अस्वाङ्गपूर्वादिति वर्तते । तेन स्वाङ्गं विशेषयिष्यामः । अस्वाङ्गपूर्वपदात्परं यत्स्वाङ्गं तदन्ताद् बहुव्रीहेरिति । यश्चात्रास्वाङ्गपूर्वपदात्परं स्वाङ्गं न तदन्तो बहुव्रीहिः । यदन्तश्च बहुव्रीहिर्नासौ ऽस्वाङ्गपूर्वपदात्परं स्वाङ्गम् । ननु च तत्पूर्वस्मिन् योगे बहुव्रीहिविशेषणम् । नेत्याह । पूर्वपदविशेषणं तत् । न स्वाङ्गमस्वाङ्गम् । पूर्वं पदं पूर्वपदम् । अस्वाङ्गं पूर्वपदमस्वाङ्गपूर्वपदमस्वाङ्गपूर्वपदादिति । यद्येवं पूर्वस्मिन् योगे बहुव्रीहिरविशेषितो भवति । बहुव्रीहिश्च विशेषितः । कथम् । क्तादिति वर्तते तेन बहुव्रीहिं विशेषयिष्यामः । अस्वाङ्गात् पूर्वपदात्परं यत् क्तान्तं तदन्ताद् बहुव्रीहेरिति । इदं तर्हि प्रयोजनम् । बहुव्रीहेरिति वर्तमाने उपसर्जनग्रहणमुपसर्जनमात्राद्यथा स्यात् । निष्केशी यूका । अतिकेशी मालेति ॥

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ॥ ५५ ॥ नासिकादीनां विभाषायां पुच्छाच्च * । नासिकादीनां विभाषायां पुच्छाच्चेति वक्तव्यम् ।

तस्मादित्यर्थः । सहादिपूर्वस्य हि बहुव्रीहेः पूर्वपदप्रकृतिस्वरे शेषनिघाते च नास्त्यन्तोदात्तत्वमिति प्रतिषेधं न विदध्यादिति भावः । कल्याणपाणिपादेति । पाणी च पादौ च पाणिपादं तत्कल्याणं यस्या इति बहुव्रीहिः । अत्र पाणिपादशब्द उपसर्जनम् स च स्वाङ्गसमुदायवाची । ननु स्वाङ्गवाची यस्तु स्वाङ्गवाची पादशब्दः स उपसर्जनं न भवतीति ङीष् न भवति । असति तूपसर्जनग्रहणे पादशब्देन स्वाङ्गवाचिना स्वाङ्गान्तो बहुव्रीहिर्भवतीति ङीष् स्यात् । काशिकोशलीया इति । काशयश्च कोशलाश्चेति द्वन्द्वस्तत्रभवा इत्यवृद्धादपीतिवुञ् न भवति वृद्धलक्षणः छ एव भवति । न स्वाङ्गमिति । पर्युदासाश्रयेण तत्सदृशं शब्दान्तरमर्थान्तरवाचि गृह्यत इत्यर्थः । निष्केशीति । केशेभ्यो निष्क्रान्तेति प्रादिसमासस्तत्पुरुषः ॥ ५४ ॥

नासिकोदर ॥ कबरपुच्छीति । कबरशब्देन वर्णविशेषोभिधीयते । विधिप्रतिषेध-

Indira Gandhi National Centre for the Arts

कल्याणपुच्छी। कल्याणपुच्छा। कबरमणिविषशरेभ्यो नित्यम्। कबरमणिविषशरेभ्यो नित्यमिति वक्तव्यम्। कबरपुच्छी। कबर। मणिपुच्छी। मणि। विषपुच्छी। विष। शरपुच्छी। शर। उपमानात्पक्षाच्च पुच्छाच्च *। उपमानात्पक्षात्पुच्छाच्चेति वक्तव्यम्। उलूकपक्षी शाला उलूकपुच्छी सेनेति। नासिकादिभ्यो विभाषायां सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो विप्रतिषेधेन *। नासिकादिभ्यो विभाषायां सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो भवति विप्रतिषेधेनेति वक्तव्यम्। नासिकादिभ्यो विभाषाया अवकाशः। कल्याणनासिकी कल्याणनासिका। सहनञ्विद्यमानपूर्वलक्षणस्य प्रतिषेधस्यावकाशः। समुखा अमुखा विद्यमानमुखेति। इहोभयं प्राप्नोति। सनासिका अनासिका विद्यमाननासिकेति। सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। अयं विधिः। स प्रतिषेधः। विधिप्रतिषेधयोश्चायुक्तो विप्रतिषेधः। अयमपि विधिः न मृदूनामिव कार्पासानां कृतः प्रतिषेधविषये आरभ्यते। स यथैव बह्वज्लक्षणं संयोगोपधलक्षणं च प्रतिषेधं बाधते। एवं सहनञ्विद्यमानपूर्वलक्षणमपि बाधेत। का तर्हि गतिः। इह तावन्नासिकोदर इति बह्वज्लक्षणश्च प्रतिषेधः प्राप्नोति। सहनञ्विद्यमानपूर्वलक्षणश्च। पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते न परान् इत्येवमियं विभाषा बह्वज्लक्षणं प्रतिषेधं बाधिष्यते। सहनञ्विद्यमानलक्षणं न बाधिष्यते। ओष्ठजङ्घादन्तकर्णशृङ्गाच्चेति संयोगोपधलक्षणश्च प्रतिषेधः प्राप्नोति। सहनञ्विद्यमानपूर्वलक्षणश्च मध्ये ऽपवादाः पूर्वान् विधीन् बाधन्ते इत्येवमियं विभाषा संयोगोपधलक्षणं प्रतिषेधं बाधिष्यते सहनञ्विद्यमानपूर्वलक्षणं न बाधिष्यते॥

दिक्पूर्वपदान्ङीप्॥ ६०॥ दिक्पूर्वपदाद् ङीषोनुदात्तत्वम् *। दिक्पूर्वपदान् ङीषो ऽनुदात्तत्वं वक्तव्यम्। प्राङ्मुखी प्रत्यङ्मुखी ङीब्विधाने ह्यन्यत्रापि ङीष्विषयान् ङीप्प्रसङ्गः *। ङीब्विधाने हि सति अन्यत्रापि ङीष्विषयान् ङीप् प्राप्नोति। प्राग्गुल्फा। प्रत्यग्ललाटा। ननु चैते विशेषा अनुवर्तेरन्।

योरिति। विधिरुत्सर्गः प्रतिषेधस्त्वपवाद इति तुल्यबलत्वाभावादस्या अपि प्राप्तेः सहादिलक्षणेनैव प्रतिषेधेन भाव्यमित्यर्थः। न मृदूनामिति। मृदुभिः कार्पासैः कृतः पटो मृदुरेव भवति। अयं तु विधिः प्रतिषेधापवादत्वाद्बलवानित्यर्थः। का तर्हीति। विधेरपि बलवत्त्वे विप्रतिषेधाभाव इति मन्यते। इदानीं यथा विप्रतिषेधोपपत्तिस्तथा दर्शयति। इह तावदिति॥ ५९॥

दिक्पूर्व॥ अन्यत्रापीति। यत्रापि प्रतिषिद्धो ङीषित्यर्थः। असंयोगोपधादित्यादिकस्तु प्रतिषेधानन्तरस्य विधिर्वा भवति प्रतिषेधो वेति ङीष् एव भवति नानेन विधी-

Indira Gandhi National Centre for the Arts

असंयोगोपधाद्बह्वचो नेति । यद्यप्येते विशेषा अनुवर्तेरन् । संयोगोपधाद्बह्वचो नेति । एवमपि दिक्पूर्वपदान् ङीपा मुक्ते ङीष् प्रसज्येत । नैष दोषः । उक्तमेतत् । यत्रो त्सर्गापवादौ विभाषा तत्रापवादेन मुक्ते उत्सर्गो न भवतीति । अथ वा ङीष आदेशो ङीप् करिष्यते तर्हि ङीषोत्र ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । अन्यतो ङीषिति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । दिक्पूर्वपदादिखेषा पञ्चमी ङीषिति प्रथमायाः षष्ठीमिह कल्पयिष्यति तस्मादित्युत्तरस्येति । प्रत्ययविधिरयम् । न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति । नायं प्रत्ययविधिः । विहितश्च प्रत्ययः प्रकृतश्चानुवर्तते ॥

जातेरस्त्रीविषयादयोपधात् ॥ ६३ ॥ जातेरित्युच्यते । का जातिर्नाम । आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥ अपर आह । प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद् गुणैः । असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः ॥ गोत्रं च चरणानि च । कः पुनरेतयोर्जातिलक्षणयोर्विशेषः । यथा पूर्वं जातिलक्षणं तथा कुमारीभार्य इति भवि-

---

यमानस्य ङीपो लभ्यत इति भावः । एवमपीति । वेत्यनुवर्तनाद्विकल्पेन ङीब् विधीयते पक्षे प्राङ्मुखेत्यपि यथा स्यात् । तत्र ङीपा मुक्ते पक्षे ङीष् प्राप्नोतीत्यर्थः । उक्तमिति । पारेमध्ये षष्ठ्या वेत्यादौ ततश्च ङीपा मुक्ते टाबेव भविष्यतीति वार्थः सूत्रभङ्गेनेत्यर्थः ॥ ६० ॥

जातेरस्त्री ॥ का जातिरिति । लक्षणविप्रतिपत्त्या प्रश्नः । आकृतिग्रहणेति । गृह्यतेनेनेतिग्रहणमिति करणसामान्ये पदं संस्क्रियते तत्राकृतिशब्दसंनिधाने स्त्रीत्वप्रतिपत्तिर्बहिरङ्गत्वात् स्त्रीप्रत्ययनिमित्तं न भवति । आकृतिर्ग्रहणं यस्याः साकृतिग्रहणा ऽवयवसंनिवेशविशेषव्यङ्ग्येत्यर्थः । एतेन गोत्वादिजातिर्लक्षिता । ब्राह्मणत्वादिस्तु न संगृहीता । ब्राह्मणक्षत्रियादीनां संस्थानस्य सदृशत्वादिति तत्संग्रहायाह लिङ्गानामिति । लिङ्गानि सर्वाणि भजतीति सर्वशब्दस्य लिङ्गापेक्षत्वे ऽपि गमकत्वाद्भजोण्विरिति ण्विप्रत्ययः । लिङ्गानामिति कर्मषष्ठी । अप्राप्तप्रमाणार्थं चेदं वचनमिति तदादेः सर्वलिङ्गत्वे ऽप्याकृतिग्रहणत्वाज् जातिरूपोपपत्तिः । उपदेशापेक्षं च लिङ्गानामिति । जातिलक्षणमिति ब्राह्मणत्वादिरेव लक्ष्यते । तेन देवदत्तेत्यसर्वलिङ्गत्वे ऽपि जातिलक्षण ङीपभावः । सकृदिति । अयं गौरिति सकृदुपदिष्टा जातिर्निगृहीतुं निश्चेतुं पिण्डान्तरे शक्येत्यर्थः । गोत्रमिति । अपत्यमित्यर्थः । चरणशब्देन शाखाध्यायिनो गृह्यन्ते । गोत्रस्य सर्वलिङ्गत्वात् पृथगुपादानं नाडायनं नपुंसकमिति दर्शनात् । प्रादुर्भावेति । सत्त्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यां या आविर्भावतिरोभावौ प्राप्नोति यावद् द्रव्यभाविनीत्यर्थः । गुणैर्युगपद् द्रव्येण संबध्यते यथा निर्गुणस्य द्रव्यस्योपलम्भो न भवत्येवं जातिरहितस्यापीत्यर्थः । बह्वर्थामिति । सर्वव्यक्तिव्यापिनीमित्यर्थः । अर्थशब्दोऽत्र विषयवाची । चरणानीति । चरणशब्दोध्ययनवचनः इह तूपचारादध्येतृषु वर्तते । कुमारीभार्य इति । कौमारमयावद्द्रव्यभाव्यप्याकृतिग्रहणत्वाज्जातिरिति जातेश्चेति

Indira Gandhi National
Centre for the Arts

तव्यम्। यथोत्तरं तथा कुमारभार्य इति भवितव्यम्। अथास्त्रीविषयादिति कथमिदं विज्ञायते समानायामाकृतौ यदस्त्रीविषयमिति। आहो स्वित् क्वचिदस्त्रीविषयमिति। किं चातः। यदि विज्ञायते समानायामाकृतौ यदस्त्रीविषयमिति। द्रोणी कुटी पात्रीति न सिध्यति। अथ विज्ञायते क्व चिदस्त्रीविषयमिति। माला बलाका अत्रापि प्राप्नोति। अस्तु क्व चिद्यदस्त्रीविषयमिति। कथं माला बलाकेति। अजादिषु पाठः करिष्यते। अयोपधादिति किमर्थम्। इभ्या क्षत्रिया। असल्पमिदमुच्यं अयोपधादिति। अकोपधादित्रापि च वक्तव्यम्। इहापि यथा स्यात्। चटका मूषिकेति। यद्यकोपधादित्युच्यते काकी कोकी पिकी शुकी उलूकीति न सिध्यति। अस्तु तर्ह्ययोपधादित्येव। कथं चटका मूषिकेति। अजादिषु पाठः कर्तव्यः। योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः *। योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधो भवतीति वक्तव्यम्। हय। हयी। गवय। गवयी। मुकय। मुकयी। मत्स्य। मत्सी। मनुष्य। मनुषी ॥

पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च ॥ ६४ ॥ सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात् प्रतिषेधः *। सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्प्रतिषेधो वक्तव्यः। सत्पुष्पा। प्राक्पुष्पा। प्रत्यक्पुष्पा। काण्डपुष्पा। प्रान्तपुष्पा। शतपुष्पा। एकपुष्पा। सम्भस्त्राजिनशणपिण्डेभ्यः फलात् प्रतिषेधः *। सम्भस्त्राजिनशणपिण्डेभ्यः फलात्प्रतिषेधो वक्तव्यः। सम्। सम्फला। भस्त्रा। भस्त्राफला। अजिन। अजिनफला। शण। शणफला। पिण्ड। पिण्डफला।

पुंवद्भावप्रतिषेधः उत्तरे तु लक्षणे कौमारं जातिर्न भवति अयावद्द्रव्यभावित्वात्। पूर्वोक्तमेव लक्षणं भाष्यकारस्याभिमतमपर आहेत्यभिधानादित्याहुः। तथा च युवतितरेति ङ्याप्सूत्र उदाहरणं ददौ तसिलादिष्विति प्राप्तस्य पुंवद्भावस्य जातेश्चेति निषेधात्। अथेति। यदा अस्त्रीविषयोऽस्मिन्नर्थे प्रवृत्तिनिमित्त इत्यन्यपदार्थः प्रवृत्तिनिमित्तमाश्रीयते तदा समानायामाकृतावस्त्रीविषयादित्येष पक्षो भवति। यदा तु प्रातिपदिकमन्यपदार्थत्वेनाश्रीयते तदा यत्र क्व चिदस्त्रीविषयादित्येष पक्षः संपद्यते, द्रोणीति। द्रोणशब्दः परिमाणविशेषे पुल्लिङ्गो गवादन्यां तु स्त्रीलिङ्गः। मालेति, मलनं माल इति पुल्लिङ्गः क्षेत्रविशेषे नपुंसकम्। स्रजि स्त्रीलिङ्गः। बलमाकायतीति बलाकशब्दो यौगिकः पुंसि दृश्यते। अस्त्विति। अन्य एव क्रियावाची जातिशब्दस्त्वन्य एवेति। परिहारान्तरमप्यत्र संभवति। गवयीति गौरादिष्विदानींतनैर्गवयादयः प्रक्षिप्ता इति वार्त्तिकारम्भाद्विज्ञायते ॥ ६३ ॥

पाककर्ण ॥ सदच्काण्डेति। अत्राऽञ्चतिः क्विबन्तो गृह्यते। अयमप्यजादिषु पाठ इदानींतनः। त्रिफलेति। त्रयाणां फलानां समाहार इति द्विगुः ततो द्विगुलक्ष-

Indira Gandhi National Centre for the Arts

श्वेताच्च * । श्वेताच्चेति वक्तव्यम् । श्वेतफला । त्रेश्च । त्रेश्च प्रतिषेधो वक्तव्यः । त्रिफला । मूलान्नञः * । मूलान्नञः प्रतिषेधो वक्तव्यः । अमूला ॥

इतो मनुष्यजातेः ॥ ६५ ॥ जातेरिति वर्तमाने पुनर्जातिग्रहणं किमर्थम् । अयोपधादिति वर्तते । योपधादपि यथा स्यात् । औदमेयी । इतो मनुष्यजातेरिञ उपसंख्यानम् * । इतो मनुष्यजातेरिञ उपसंख्यानं कर्तव्यम् । सौतङ्गमी मौनिचिती ॥

ऊङुतः ॥ ६६ ॥ किमर्थो ङकारः । विशेषणार्थः । क्व विशेषणार्थेनार्थः । नोङ्धात्वोरिति । नो धात्वोरितीयत्युच्यमाने यवाग्वा यवाग्वै इत्यत्रापि प्रसज्येत । अथ दीर्घोच्चारणं किमर्थम् । न उङुत इत्येवोच्येत । का रूपसिद्धिः । ब्रह्मबन्धूः । वीरबन्धूः । सवर्णदीर्घत्वेन सिद्धम् । न सिध्यति । गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं प्रसज्येत । इह च ब्रह्मबन्धूछत्रम् । ब्रह्मबन्धूच्छत्रम् । षत्वतुकोरसिद्ध इत्येकादेशस्यासिद्धत्वान्नित्यस्तुक् प्रसज्येत । इह च ब्रह्मबन्धूः, वीरबन्धूरिति । नद्यृतश्चेति कप् प्रसज्येत । नैष दोषः । यत्तावदुच्यते ब्रह्मबन्धूः वीरबन्धूरिति गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं प्रसज्येतेति । उभयत आश्रयणे नान्तादिवत् । यदप्युच्यते इह च ब्रह्मबन्धूछत्रं ब्रह्मबन्धूच्छत्रं षत्वतुकोरसिद्ध इत्येकादेशस्यासिद्धत्वान्नित्यस्तुक् प्रसज्येतेति । पदान्तपदाद्योरेकादेशोऽसिद्धः । न चैष पदान्तपदाद्योरेकादेशः । यदप्युच्येत ब्रह्मबन्धूः वीरबन्धूरिति नद्यृतश्चेति कप्प्रसज्येतेति । नद्यन्तानां यो बहुव्रीहिरित्येवं तत् । न चैष नद्यन्तानां बहुव्रीहिः । शेषलक्षणस्तर्हि कप् प्राप्नोति । तस्माद्दीर्घोच्चारणं कर्तव्यम् । ऊङ्प्रकरणेऽप्राणिजातेश्चारज्ज्वादीनाम् * । ऊङ्प्रकरणेऽप्राणिजातेश्चारज्ज्वा-

---

णान् ङीपः परत्वान् ङीष् प्राप्तो निषिध्यते । तन्निषेधसामर्थ्याच्च ङीबपि न भवति । तयोरत्र विशेषाभावात् ॥ ६४ ॥

इतो म ॥ औदमेयीति । उदमेयस्यापत्यमत इञ् । सौतंगमीति । सुतंगमेन निर्वृत्तेति वुञ्छणादिसूत्रेण इञ् ॥ ६५ ॥

ऊङुतः ॥ यवाग्वेति । वर्णग्रहणे ऽर्थवद्ग्रहणपरिभाषा नोपतिष्ठत इति भावः । गोस्त्रियोरिति । एकादेशस्यान्तवद्भावादुपसर्जनान्तं प्रातिपदिकं स्त्रीप्रत्ययान्तं भवतीति भावः । नद्यृत इति । नद्यन्तो बहुव्रीहिर्भवतीति भावः । दीर्घोच्चारणे तु तत्सामर्थ्यात्कब्ह्रस्वौ न प्रवर्तेते । उभयत इति । एकादेशस्यान्तवत्त्वेन प्रातिपदिकसंज्ञासंपाद्याऽन्यथाऽप्रत्यय इति प्रतिषेधप्रसङ्गः । आदिवत्त्वेन च स्त्रीप्रत्ययत्वं साध्यमित्येकोऽवयवो युगपद् द्वयोरित्येषा बुद्धिर्विरोधान्न प्रवर्तते । स्त्रीप्रत्ययविशेषणं चोपसर्जनम् । न चात्रस्त्रीप्रत्ययस्योपसर्जनत्वमिति ह्रस्वाऽप्रसङ्गः । पदान्तेति । अभीत्यस्यादावेवेत्यर्थः । तस्मादिति । उकारद्वयं दीर्घेण निर्दिष्टं तत्र द्वितीय उकारः परत्वा-

Indira Gandhi National Centre for the Arts

दीनामिति वक्तव्यम्। अलाबूः कर्कन्धूः। अप्राणिजातेरिति किमर्थम्। कृकवाकुः। अरज्ज्वादीनामिति किमर्थम्। रज्जुर्हनुः॥

संहितशफलक्षणवामादेश्च ॥ ७० ॥ सहितसहाभ्यां च *। सहितसहाभ्यां चेति वक्तव्यम्। सहितोरूः। सहोरूः॥

कद्रुकमण्डल्वोश्छन्दसि ॥ ७१ ॥ अस्वल्पमिदमुच्यते कद्रुकमण्डलुगुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम्। कद्रूः। कमण्डलूः। गुग्गुलूः। मधूः। जतूः। पतयालूः॥

यङश्चाप् ॥ ७४ ॥ षाच्च यञश्चाप्। षाच्च यञश्चाब्वक्तव्यः। शार्कराक्ष्या। पौतिमाष्या। तत्रायमप्यर्थः। गौकक्ष्यशब्दः क्रौड्यादिषु पठ्यते स न पठितव्यो भवति। यदि न पठ्यते। गौकक्षीपुत्र इति संप्रसारणं न प्राप्नोति। इष्टमेवैतत्संगृहीतम् गौकक्ष्यापुत्र इत्येव भवितव्यम्। एवं हि सौनागाः पठन्ति। ष्यङः संप्रसारणे गौक्ष्यकः प्रतिषेध इति॥

आवट्याच्च ॥ ७५ ॥ अन उपधालोपिन ऊधसो ङीप् पूर्वविप्रतिषिद्धम् *। अन उपधालोपिनोऽन्यतरस्यामित्येतस्मादूधसो ङीप्भवति पूर्वविप्रतिषेधेन। अनउपधालोपिन इत्यस्यावकाशः। बहुराज्ञी बहुतक्ष्णी। ऊधसो ङीष्भवतीत्यस्यावकाशः। विभाषा ङीप्। यदा न ङीप् सोवकाशः। ङीप्प्रसङ्गे उभयं प्राप्नोति। ऊधसो ङीष्भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः। अन उपधालोपिनोन्यतरस्यामित्यत्र ऊधसो ङीष्भवतीत्येतदनुवर्तिष्यते आवट्याद्यञः ष्फश्चापः *। आवट्याद्यञः ष्फश्चापो भवति पूर्वविप्रतिषेधेन। आवट्याद्यञश्चापोवकाशः। उदीचामावट्या। ष्फस्यावकाशः अन्यानि यञन्तानि। गार्ग्यायणी। वात्स्यायनी। आवट्यशब्दात्प्राचामुभयं प्राप्नोति। आवट्यायनी। ष्फो भवति पूर्वविप्रतिषेधेन। आवट्याग्रहणेन नार्थः।

द्बाधकस्य शेषलक्षणस्य कपो बाधनार्थ इति भावः। अलाबूरिति। ऊङि सति नोङ्धात्वोरिति विभक्तेरुदात्तत्वनिषेधो भवत्यलाब्वेति॥ ६६॥

संहित॥ सहितोरूरिति। नन्वेकदेशविकृतस्यानन्यत्वात्संहितशब्दग्रहणेन सहितशब्दस्य सिद्धं ग्रहणम्। एवं तर्हि विद्यमानं हितमस्य सहित इति यदा व्युत्पत्तिस्तदर्थं वार्तिकम्। सहोरूरिति। सहेते इति सहौ ऊरू इति व्युत्पत्तिः। अथवा विद्यमानावूरू यस्याः सा सहोरूरित्यूर्वतिशयप्रतिपादनार्थः प्रयोगः॥ ७०॥

कद्रु॥ गुग्गुलुमधुजतूनां छन्दसि लिङ्गव्यत्ययेन स्त्रीत्वम्। पतयालुशब्दः स्पृहिगृहीत्यालुजन्तः॥ ७१॥

यङश्चाप्॥ शार्कराक्ष्येति। गर्गादियञन्तात्पते॥ ७४॥

आव॥ अनइति। यद्यपीदमन्यत्र वक्तव्यं तथाप्यन्यार्थपूर्वविप्रतिषेधप्रतिपादनप्र-

यञः ष्फश्चापइत्येव । इदमपि सिद्धं भवति । शार्कराक्ष्यायणी पौतिमाष्यायणी । यञ्ग्रहणेनापि नार्थः । ष्फश्चाप इत्येव । गौकक्ष्यशब्दः क्रौड्यादिषु पठ्येत । इदमपि सिद्धं भवति गौकक्ष्यायणी । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । एवं वक्ष्यामि । प्राचां ष्फ तद्धितः सर्वत्र । क्व सर्वत्र । यत्र ष्फश्चान्यश्च प्राप्नोति । ष्फ एव तत्र भवतीति । ततो लोहितादिकतन्तेभ्यः । सर्वत्र । क्व सर्वत्र । प्राचां चोदीचां च ॥

अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ॥ ७८ ॥ इह कस्मान्न भवति । दाक्षीस्ताक्षीति । आतिशायिकेनायन्तमपा निर्देशः क्रियते । सच त्रिप्रभृतिषु वर्तते । त्रिप्रभृतीनामभावात् । यद्येवम्, प्रकर्षे चेत्तमं कृत्वा दाक्ष्या नोपोत्तमं गुरु । आम्विधिः केन तेन स्यात्प्रकर्षे यद्ययं तमः॥ प्रकर्षे चेत्तमं कृत्वा दाक्ष्या नोपोत्तमं गुर्वित्युच्यते । आम्विधिः केन तव न स्यात् । अव्ययघादिति प्राप्नोति । प्रकर्षे यद्ययं तमः। यद्ययंतमः प्रकर्षे वर्तते उद्गतस्य प्रकर्षोयं गतशब्दोत्र लुप्यते । उद्गतस्यायं प्रकर्षः । गतशब्दस्यात्र लोपो भवति । नाव्ययार्थप्रकर्षोस्ति धात्वर्थोत्र प्रकृष्यते । नायमव्ययार्थस्य प्रकर्षः । कस्य तर्हि । धात्वर्थस्य। उद्गतोपेक्षते किं चित् त्रयाणां द्वौ किलोद्गतौ॥ अनुद्गतमपेक्ष्योत्रउद्गतमित्येतद्भवति त्रयाणां द्वौ किलोद्गतौ । त्रयाणां किल द्वावुद्गतौ भवतः । चतुष्प्रभृतिकर्तव्योवाराह्यायां न सिध्यति । चतुष्प्रभृतिषु ष्यङ् वक्तव्यः। वाराह्यायां न सिध्यति। वी

सङ्केतात्रोक्तम् । गौकक्ष्यायणीति । गोकक्ष्यस्यापत्यं गोत्रं स्त्री गर्गादित्वाद्यञ् । ततः ष्यङ्। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणाद्यञन्तात् ष्फो विधीयमानः ष्यङन्तादपि भवतीति प्राक्रियाश्रयेणेदमुक्तम् ॥ ७५ ॥

अणिञोः ॥ दाक्षीति । दक्षस्यापत्यं गोत्रं स्त्रीत्यत इञ् । उत्तमशब्दमव्युत्पन्नमन्त्यमात्रवचनमाश्रित्य प्रश्नः । सचेति । यत्रैकोऽनुद्गतः प्रथमोच्चारितत्वात् । त्रयस्तूद्गता ऊर्ध्वोच्चारिता तत्रोत्तमशब्दः प्रयुज्यते । एवं चतुष्प्रभृतिषु प्रयुज्यते । उद्गतापेक्षया तु त्रिप्रभृतिष्वित्युक्तम् । प्रकर्षे चेति । चण् चेदर्थे वर्तते । क्व चित्तु प्रकर्षे चेदिति पाठः । यदि प्रकर्षप्रत्ययं कृत्वा दाक्ष्या गुरूपोत्तमं न भवतीत्युच्यते । तत उच्छब्दात्तमपि सति किमेत्तिङव्ययघादित्याम्प्रत्ययप्रसङ्गादुत्तमामिति प्राप्नोति । उद्गतस्येति । उच्छब्दोत्र समाधानक्रियावचनः क्रियाप्रकर्षद्वारको द्रव्यप्रकर्ष इत्यद्रव्यप्रकर्षइतिवचनादाम् न भवतीत्यर्थः । गतशब्दोत्रेति । उच्छब्देन गतार्थस्याभिधानादप्रयोग एव गतशब्दस्य लोपः । धात्वर्थोत्रेति । धातुशब्देन धात्वर्थोत्र क्रियाभिधीयते सोऽर्थो विषयः प्रयोजनं वा यस्य स धात्वर्थः । साधनाधार पदार्थः स प्रकृष्यते क्रियाप्रकर्षद्वारेणेत्यर्थः । त्रयाणामिति । यत्र त्रयो वर्णास्तत्रैकोऽनुद्गतो द्वावुद्गतौद्वयोश्चैकस्य प्रकर्षे तरपा तमपो बाधनादुत्तमशब्दो नास्तीति वाराह्योति ष्यङ् प्राप्नोति । यत्र चतुष्प्रभृतयो वर्णास्तत्रैव ष्यङ् स्यादित्यर्थः । भिद्यत इति । तमपः पि-

Indira Gandhi National Centre for the Arts

राह्वायां न प्राप्नोति । किं कारणम् । चतुष्प्रभृतीनामभावात् । भिद्यतेस्य स्वरस्तेन विधिश्चामो न लक्ष्यते । भिद्यते खल्वस्य स्वरस्तेनातिशायनिकेन तमशब्देन उत्तमस्य विधिश्चामो न क्व चिदपि लक्ष्यते । शब्दान्तरमिदं विद्याद् दृष्टमभ्यन्तरं त्रिषु । एवं तर्हि अन्योयमातिशायनिकेन समानार्थः तमस्त्रिप्रभृतिषु वर्तते । किं पुनरयमाणिञोरादेशः । आहोस्विदणिञ्भ्यां पर इति । कश्चात्र विशेषः । ष्यङ्यनादेशे यलोपवचनम् * । ष्यङि अनादेशे यलोपो वक्तव्यः । औदमेघ्यायाश्छात्रा औदमेघाः । द्विरण्विधिः । द्विश्चाण्विधेयः । औदमेघ्यायाश्छात्रा औदमेघाः । औदमेघ्यानां संघ औदमेघः । इञ इसण् न प्राप्नोति । अस्तु तर्हि आदेशः । आदेशेऽल्लोपवचनम् । यद्यादेशः अनो लोपो वक्तव्यः । औडुलोम्या शारलोम्येति । ये चाभावकर्मणोरिति प्रकृतिभावः प्रसज्येत । नवा ष्यङो लोपनिमित्तत्वात् * । न वा एष दोषः । किं कारणम् । ष्यङो लोपनिनिमित्तत्वात् । लोपनिमित्तः ष्यङ् । न चाकृते लोपे ष्यङ् प्राप्नोति । किं कारणम् । गुरूपोत्तमयोरित्युच्यते । नचाकृते लोपे गुरूपोत्तमता भवति । अथ वा पुनरस्तु परः । ननु चोक्तं ष्यङ्यनादेशे यलोपवचनं द्विरण् विधिरिति । नैष दोषः । यत्तावदुच्यते यलोपवचनमिति । अदोष एषः । किं कारणम् । पुंवद्भावात् । यञादौ तद्धिते पुंवद्भावो भविष्यति । भस्याढे तद्धिते पुंवद्भवतीति । अयं तर्हि दोषो द्विरण्विधिरिति । नैष दोषः । सिद्धश्च प्रत्ययविधौ । स च सिद्धः प्र-

---

त्वादनुदात्तत्वादुत्तमशब्द आद्युदात्तः प्राप्नोत्यन्तोदात्तश्चेष्यते । एतच्चोञ्छादिषूत्तमशश्वत्तमौ सर्वत्रेति पाठानपेक्षयोक्तम । न च क्रियाप्रकर्षे ऽपि आमन्तस्य क चित्प्रयोगो दृश्यते इत्यनभिधानादुच्छब्दात्तमबेव नास्ति । अव्युत्पन्न एवोत्तमशब्दः स्वभावात्त्रिप्रभृतीनामन्त्यमाहेत्याह शब्दान्तरमिति । दृष्टमिति । त्रिग्रहणं बहुत्वोपलक्षणार्थम् । तेन त्रिप्रभृतिषु तदभ्यन्तरमन्तर्भूतं तत्र दृष्टमित्यर्थः । आतिशायनिकेनेति । आतिशायिनिकश्चतु प्रभृतीनामन्त्यमाह । अव्युत्पन्नस्तु त्रिप्रभृतीनामित्यन्त्यत्वमात्रेण सदृशार्थत्वमिति भावः । तम इति । तमान्तोऽव्युत्पन्नशब्द इत्यर्थः । किं पुनरिति । प्रत्ययविधावपि गापोष्टग् व्रीहिशाल्योर्ढगित्यादौ षष्ठी दृश्यत इति संदेहात्प्रश्नः । औदमेघ्या इति । उदमेघस्यापत्यं गोत्रं स्त्री अत इञ् यद्यत्र इञन्तात्परः स्त्रियां ष्यङ् विधीयते तदाऽपत्ययकारो न भवतीति यलोपो न प्राप्नोति । आदेशपक्षे तु स्थानिवद्भावाद् ष्यङ् आपत्योति यलोपः सिध्यति । द्विरिति । इञश्चेत्यस्यानन्तरं ष्यङश्चेति वक्तव्यम् । तेनेञः परो यः ष्यङ् तदन्तादण् भवतीत्ययमर्थो भवति । संघाङ्केत्यत्रापि तथैव वक्तव्यम् । आदेशपक्षे तु स्थानिवद्भावात्सिध्यति । औडुलोम्येति । उडुलोम्नोऽपत्यं गोत्रं स्त्री बह्वादिषु लोमन्शब्दस्य पाठात् केवलस्यापत्येन योगाभावात् सामर्थ्यात्तदन्तग्रहणादिञ्प्रत्ययः । तत्र यदि तदादेशःष्यङ् क्रियेत तदा ये चाभावकर्मणोरिति प्रकृतिभावाट्टिलोपो न प्राप्नोति । प्रत्ययपक्षे त्विञा व्यवधानात् प्रकृति-

...onal Centre for the Arts

स्थयविधौ। उभयमिदमुक्तमादेशः पर इति च। किमत्र न्याय्यम्। आदेश इत्ये-तद् न्याय्यम्। कुत एतत्। एवं चैव हि कृत्वा आचार्येण सूत्रं पठितं षष्ठ्या च-निर्देशः कृतः। अतएवैष पक्षो निर्दोषः। ननु च परस्मिन्नपि सति ये दोषास्ते परि-हृताः। पुंवद्भावेन यलोपः परिहृतः स च पुंवद्भावोऽढे भवति। तत्र ते औदमेघेयो न सिध्यति। अनुबन्धौ त्वया कार्यौ। यस्यादेशः अनुबन्धौ तेन कर्तव्यौ। एकः सामान्यग्रहणार्थः। अपरः सामान्यग्रहणाविघातार्थः। क्व सामान्यग्रहणार्थेनार्थः यङश्चाबिति। अथ क्व सामान्यग्रहणाविघातार्थेनार्थः। अत्रैव। किं प्रयोजनम् चाबर्थम्। चाब्यथा स्यात्। तव कथं चाप्। टाब्विधिर्मम। मम टापा सिद्धम्। ननु च ममापि टापा सिद्धं स्यात्। न सिध्यति। अण इति चेञ इति चेतीकारः प्राप्नोति। नैष दोषः। नैवं विज्ञायते अणन्तादकारान्ताद् इञन्तादिकारान्तादिति। कथं तर्हि। अ-ण्योऽकार इञ्य इकार इति। स्वरार्थस्तर्हि स्वरार्थस्तर्हि त्वया चाव्वक्तव्यः। ञ्नितीत्याद्युदात्तत्वं मा भूत्। चितोन्त उदात्तो भवतीत्यन्तोदात्तत्वं यथा स्यादिति। तवापि तर्हि ष्यङा उक्तत्वात् स्त्रीत्वस्य टाब्न प्राप्नोति। नैष दोषः। उक्तेऽपि हि भवन्त्येते। उक्तेऽपि स्त्रीत्वे भवन्त्येते टाबादय इति। उक्तमेतत्। स्वार्थिकाष्टाबादय इति। सानुबन्धकस्यादेशो मम। ममापि तर्हि सानुबन्धक-स्यादेशे ञित्कार्यं नेति। तेन ञिन्न भविष्यति। अस्थानिवत्त्वे दोषस्ते वृद्धिरत्र

भावाभावः। न वेति। आनुपूर्व्याश्रयेण दोषं परिहरति सिद्धश्चेति। यद्यपि लिङ्ग-विशिष्टपरिभाषाश्रयेण इञन्तात्प्रातिपदिकादण् विधीयमानः ष्यङन्तादपि सिध्यति। तथापि पुंवद्भावस्य न्याय्यत्वात्स एवोक्तः। षष्ठ्यां चेति। चशब्दो हेतौ। अणिञो-रनार्षयोरिति षष्ठीनिर्देश आदेशार्थ एव प्रत्ययपक्षस्याभिमतत्वे ह्यसंदेहाय पञ्चम्येवो-च्चार्येत। औदमेघेय इति। ष्यङन्तात् स्त्रीभ्यो ढक्। इदानीं प्रत्ययवाद्यादेशवादिनो दोषमुद्भावयति अनुबन्धाविति। टापा ममेति। प्रत्ययवादी प्रत्यये कृते टापं करो-तीत्यर्थः। आदेशवाद्याह ममापीति। अण्य इति। अकारः प्रधानं तद्विशेषणमण्। तत्रानल्विधाविति प्रतिषेधात् स्थानिवद्भावाभावः। अणन्तादकारान्तादिति तु विज्ञा-यमाने स्वाश्रयमिकारान्तत्वं स्थानिवद्भावादणन्तत्वं चेति स्यादेव ङीप् प्रत्ययः। इञादेशस्य तु ष्यङो न स्वाश्रयमिकारान्तत्वं नापि स्थानिवद्भावप्रापितमनल्विधा-विति प्रतिषेधादिति ततः सिद्ध एव टाप्। यदा चेञ उपसंख्यानमित्यत्रेत इत्यपेक्ष्यते तदा ष्यङि कृते ऽनिकारान्तत्वान् ङीषो ऽप्रसङ्गः। प्रत्ययवाद्याह स्वरार्थ इति। इञादेशो यदि ष्यङ् क्रियते तदन्ताच्च टाप् तदा वाराह्यत्याद्युदात्तं पदं स्यात्तस्माद-न्तोदात्तार्थस्त्वया चाब् विधेयः। आदेशवाद्याह तवापीति। मम तु यङश्चाबिति वचनाच्चाब् भवतीति मन्यते। प्रत्ययवाद्याह नैष दोष इति। उक्त इति। द्योतित इत्यर्थः। एकस्य स्त्रीत्वद्योतने सामर्थ्याभावाद्द्वयोर्द्योतकत्वम्। एतच्च प्रयोगदर्शनाद-वसीयते। आदेशवाद्याह सानुबन्धकस्येति। इञ एवाकृतञकारेत्संज्ञकस्य यादेशः करिष्यते तेन ञित्स्वराभावात्प्रत्ययस्वरे टापि कृते एकादेश उदात्तेनोदात्त इति

Indira Gandhi National Centre for the Arts

न सिध्यति । अस्थानिवत्त्वे दोषः । वृद्धिस्ते न प्राप्नोति । औडुलोम्या । शारलोम्येति । न चेदानीमर्द्धजरतीयं लभ्यम् । वृद्धिर्मम भविष्यति । स्वरो नेति । तद्यथा अर्धं जरत्याः कामयन्ते अर्धं नेति । त्वयाप्यत्र विशेषार्थं कर्तव्यं स्याद् विशेषणम् । त्वयाप्यत्र विशेषणार्थोऽनुबन्धः कर्तव्यः । क्व विशेषणार्थेनार्थः । ष्यङः सम्प्रसारणमिति । अक्रियैव विशेषोत्र सानुबन्धो विशेषवान् । अक्रियैव मम विशेषः । सानुबन्धस्तु विशेषवान् । पाश्यायां ते कथं न स्यात् । पाश्यापतिरित्यत्र तव कस्मान्न भवति । एको मे स्याद्विशेषणम् । एको मम विशेषणार्थः । त्वया पुनर्द्वौ कर्तव्यौ । अथैकस्मिन् सति कः करिष्यते । किं चातः । अन्यस्मिन् सूत्रभेदः स्यात् । यद्येताभ्यामन्यः क्रियते । सूत्रभेदः कृतो भवति । षिति लिङ्गं प्रसज्यते । अथ षित् क्रियते षित इति इकारः प्राप्नोति । ङिति चेक्रियते दोषः । अथ ङित् क्रियते चेक्रियते दोषो भविष्यति । लोलूयापुत्रः । लोलूयापतिरिति । व्यवधानान्न दुष्यति । अकारेण व्यवधानान्न दोषो भविष्यति । योनन्तरो धातुः सः । यो धातुः सोनन्तरः धातोरिति वर्तते । यश्चात्रानन्तरो नासौ धातुः । यश्च धातुर्नासावनन्तरः । न चेदुभयतः साम्यमुभयत्र प्रसज्यते । नचेदुभयतः साम्यं भवति । उभयत्र प्राप्नोति । यदि पुनर्यङा

वाराह्याशब्दोन्तादात्तो भविष्यतीत्यर्थः । प्रत्ययवाद्याह अस्थानिवत्त्व इति । अर्धजरतीयमिति । समासाच्च तद्विषयांदिति छप्रत्ययः । सुखं न कामयन्ते अङ्गान्तरं तु कामयन्ते जरत्याः । आदेशवाद्याह त्वयाप्यत्रेति । प्रत्ययवाद्याह अक्रियैवेति । यस्य संप्रसारणमिति वक्ष्यते । निरनुबन्धकत्वाच्चायमेव ग्रहीष्यते । आम्बष्ठ्यापुत्र इत्यादौ तु ष्यङः सानुबन्धकत्वात्संप्रसारणं न भविष्यतीत्यर्थः । आदेशवाद्याह पाश्यायामिति । यदीह यप्रत्ययं विधाय स्यः संप्रसारणमित्युच्यते तदा पाशानां समूहः पाशादिभ्यो य इति च प्रत्ययस्य पाश्यापतिरित्यादौ संप्रसारणप्रसङ्गः । प्रत्ययवाद्याह एक इति । आदेशवाद्याह अथेति । चेक्रीयित इति धातोरेकाच इत्यनेन विहिते यङीत्यर्थः । यङः पूर्वाचार्यसंज्ञा चेक्रियितमिति । प्रत्ययवाद्याह व्यवधानादिति । लोलूयेत्यत्र यङन्तादप्रत्ययादित्यकारप्रत्यये सति अकारेण व्यवधानादित्यर्थः । पुत्रपत्योरिति । सप्तमीनिर्देशादनन्तरस्य यङः संप्रसारणेन भवितव्यम् । तत्र वाराह्याशब्दे टापा सहैकादेशस्य पूर्वं प्रत्यन्तवद्भावात् पुत्रपत्योरनन्तरो यङ् भवति । लोलूयेत्यत्र तु यङन्तादप्रत्ययादित्यकारप्रत्यये कृते ऽतोलोप इति यङोऽकारो लुप्यते तत्र टापि कृते एकादेशे च पुत्रपत्योरनन्तरो यङ् न भवत्याकारेण व्यवधानादिति संप्रसारणं न भविष्यतीत्यर्थः । आदेशवाद्याह योनन्तर इति । यङः संप्रसारणमिति भवता सूत्रं क्रियते तदा लिटि धातोरित्यतो धातुग्रहणानुवृत्तौ सत्यां धातुना यङ् विशेष्यते । तत्र पुत्रपत्योरनन्तरो यङन्तो धातुर्न संभवतीति सामर्थ्याद्यथाऽधातोरनन्तस्य वाराहीपुत्र इति संप्रसारणं भवति । एवं लोलूयापुत्र इत्यत्र व्यवहितस्यापि

Indira Gandhi National Centre for the Arts

धातुर्विशेष्येत। यङा विशेष्येत यदीह धातुर्यङ् धातुना वा यदि तुल्यमेतत् । यद्येवं यङा धातुर्विशेष्येत । अथापि धातुना यङ् । तुल्यमेतद्भवति । उभौ प्रधानं यदि नात्र दोषः । अथोभौ प्रधानं भवतः नात्र दोषो भवति । तथा प्रसार्येत तु वाक्पतिस्ते । तथा सति वाक्पतिः वाक्पुत्र इत्यत्र सम्प्रसारणं प्राप्नोति । धातुप्रकरणस्येह न स्थानमिति निश्चयः । धातुप्रकरणस्येह स्थानं नास्तीति कृत्वा एष निश्चयः क्रियते । अवश्यमात्वार्थं धातुग्रहणं कर्तव्यम् । इह मा भूत् । गोभ्यां गोभिः नौभ्यां नौभिरिति । आत्वार्थं यदि कर्तव्यं तत्रैवैतत्करिष्यते उपदेशे यदेजन्तं तस्य चेदात्वमिष्यते । उद्देशो रूढिशब्दानां तेन गोर्न भविष्यति । एवं तर्हि उपदेशे आत्वमित्युच्येत । उद्देशश्च प्रातिपदिकानां नोपदेशः ॥

गोत्रावयवात् ॥ ७९ ॥ किमर्थमिदमुच्यते । गोत्रावयवादगोत्रार्थम् । गोत्रावयवादित्युच्यते । अगोत्रार्थोऽयमारम्भः । गोत्रावयवादगोत्रार्थमिति चेत्तद-

---

धातोः स्यादित्यर्थः । धातुत्वमानन्तर्यं च विशेषणमाश्रितं तत्रैकस्योभयासंभवात्सामर्थ्यादेकतरविशेषणाश्रयणादुभयोरपि संप्रसारणप्रसङ्ग इत्यर्थः । न चेदिति । एकस्य यदा धर्मद्वयं न संभवति तदान्यतररूपाश्रयणादुभयोः साम्यात्कार्यप्राप्तिः । प्रत्ययवाद्याह यदीति । तदा किं दोषः स्यान्नवेति पृच्छति । आदेशवाद्याह यङेति । ङ्सि चेत्यादावङ्गेनेकोविशेषणेङ्गस्येका वा विशेषोऽस्तेवंच । यङा तु धातौ विशेष्यमाणे धातुनावात्रविशेष्यमाणे यङि विशेषो नास्तीत्यर्थः । प्रत्ययवाद्याह उभाविति । यङ्धात्वोः परस्परेण विशेषणविशेष्यभावो नास्ति समुच्चयेन तु कार्यं विधीयते पुत्रपत्योरनन्तरस्य यङो धातोश्चेति । तत्र वाराहीपुत्र इत्यादौ भविष्यति न तु लोलूयापतिरित्यादौ धातोर्व्यवधानात् । ततश्च सामर्थ्याद्धातुग्रहणस्योत्तरार्थैवानुवृत्तिः । आदेशवाद्याह तथेति । यदि यङ्धात्वोः समुच्चयो न तु विशेषणविशेष्यभावस्तदा वाक्पतिशब्दे पत्युरनन्तरस्य यङो धातोश्चेति वचेर्धातोः संप्रसारणप्रसङ्गः । प्रत्ययवाद्याह धातुप्रकरणस्येति । धातुग्रहणं नानुवर्तत इति नास्त्यतिप्रसङ्गः । आदेशवाद्याह अवश्यमिति । आदेच उपदेशेऽशितीत्येतदर्थमवश्यमनुवर्त्यं धातुग्रहणमित्यर्थः । प्रत्ययवाद्याह आत्वार्थमिति । एतदिति । एतत्प्रयोजनार्थं व्याख्यानमित्यर्थः । उपदेशशब्देन शास्त्रमुच्यते । तेन शास्त्रे ये पठिता एजन्तास्तेषामात्वं विधीयते । प्रातिपदिकानि तु न प्रतिपदं शास्त्रे पठितानि किं तर्हि प्रकृत्यादिविभागकल्पनाद्वारेण साधुत्वेन प्रतिपादितानि । ननु नौद्व्यचष्ठन् गोद्व्यचश्च इत्यादौ उपदेशे यानि प्रातिपदिकानि पठितानि तेषामात्वप्रसङ्गः । एवं च गोतो णिदिति णित्त्वातिदेशाज् ज्ञापकात्तेषामात्वाभावः । न ह्यात्वे गोशब्दस्य कृते णित्वस्यास्ति प्रयोजनम् । एवं प्रत्ययपक्षोऽपि निर्दोषः । अत एव क्रौड्यादिभ्यश्चेति पञ्चमीनिर्देशः । औदमेधेय इत्यादौ तु सिद्ध प्रत्ययपक्षे ऽपि यलोपः । ष्यङ आपत्याद्विहितत्वात् स्वार्थिकत्वादापत्यत्वादित्याहुः ॥७८॥

गोत्रा ॥ अवयवशब्दस्यानेकार्थत्वात् सन्देहात्प्रश्नः । किमर्थमिति । पृथग्भाववाचिनमवयवशब्दमाश्रित्याह । गोत्रावयवादिति । गोत्रावयवो गोत्रात् पृथग्भूतो गोत्रं न भवतीत्यर्थः । सप्तम्यर्थे चेयं पञ्चमी । तेन गोत्रेऽणिञोः ष्यङ् भवतीत्यर्थः । इहा-

Indira Gandhi National Centre for the Arts

निष्टम् * । गोत्रावयवादगोत्रार्थमिति चेत्तदनिष्टं प्राप्नोति । आहिच्छत्री कान्यकुब्जीति । एवं तर्हि गोत्रादेव गोत्रावयवात् गोत्रादिति चेद्वचनानर्थक्यम् । गोत्रादिति चेद्वचनमनर्थकं भवति । सिद्धं गोत्रं पूर्वेणैव । इदं तर्हि प्रयोजनम् । गुरूपोत्तमयोरित्युच्यते । अगुरूपोत्तमार्थोयमारम्भः । अगुरूपोत्तमार्थमिति चेत् सर्वेषामवयवत्वात्सर्वप्रसङ्गः । अगुरूपोत्तमार्थमिति चेत् सर्वेषामवयवत्वात्सर्वत्र प्राप्नोति । अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम् । बभूवुस्तत्रागस्त्याष्टमैर्ऋषिभिः प्रयोजनमभ्युपगतः । तत्रभवतां यदपत्यं तानि गोत्राणि अतोन्ये गोत्रावयवाः तत उत्पत्तिः प्राप्नोति । तच्चानिष्टम् । तस्मान्नार्थोनेन योगेन । कथं येभ्योऽगुरूपोत्तमेभ्य इष्यते । सिद्धं तु रौड्यादिषूपसंख्यानात् * । सिद्धमेतत् । कथम् । रौड्यादिषूपसंख्यानात् । रौड्यादिषूपसंख्यानं कर्तव्यम् । के पुना रौड्यादयः । ये क्रौड्यादयः । भारद्वाजीयाः पठन्ति सिद्धं तु कुलाख्याभ्यो लोके गोत्राभिमताभ्य इति । सिद्धमेतत् कथम् । कुलाख्या लोके गोत्राभिमताः गोत्रावयवा इत्युच्यन्ते । अथ वा गोत्रावयवः को भवितुमर्हति यो गोत्रादवयुतः। कश्च गोत्रादवयुतः योनन्तरः । दैवदत्त्या याज्ञदत्त्येति ॥ इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥

समर्थानां प्रथमाद्वा ॥ ८२ ॥ समर्थवचनं किमर्थम् । समर्थादुत्पत्ति-

---

पीति । पूर्वसूत्रे गोत्रग्रहणानर्थक्यप्रसङ्गादेषोर्थ इह नाश्रीयत इति भावः । इदानीमेकदेशवाच्याश्रयेणाह एवं तर्हीति । यथा घृतावयवो घृतमेवं गोत्रावयवोपि गोत्रमित्यर्थः । गोत्रादिति चेदिति । पौत्रप्रभृत्यपत्यसमुदायस्य गोत्रत्वे तदवयवस्यापि गोत्रत्वात् पूर्वेणैव ष्यङ् सिद्ध इत्यर्थ । सर्वप्रसङ्ग इति । यथा भार्गवगोत्रस्य साधारणस्यावान्तरगोत्राणि च्यवनादीनि तेषु ऋषिशब्देभ्य. पूर्वसूत्रे ऽनार्षयोरिति ष्यङ्प्रतिषेधादनृषिशब्देभ्यो गुरूपोत्तमेभ्य एव ष्यङिष्यते न त्वगुरूपोत्तमेभ्य इति भावः । तत्र भवतामिति । अगस्त्याष्टमानामित्यर्थः । कथं येभ्य इति । पुणिकमुखरादिभ्यः । ये क्रौड्यदय इति । पूर्वाचार्यसंज्ञयैवमभिहितमित्यर्थः । कुलाख्याभ्य इति । अप्रधानवचनोऽवयवशब्द इह गृह्यते । तत्र प्रवराध्याये पठितानां मुख्यं गोत्रत्वम् । ये त्वादिपुरुषाः श्रुतशीलसंपन्ना अपत्यसन्तानप्रसिद्धिहेतवस्तेषामप्रधानगोत्रत्वं तेभ्योऽनेन ष्यङ्विधानम् । पुणिकस्यापत्यं गोत्रं स्त्री पौणिक्या भौणिक्या मौखर्येति । योनन्तर इति । पृथग्वाच्यवयवशब्दोऽपत्यत्वेन गोत्रसादृश्ये सति पृथग्भावोन्तरङ्गत्वादाश्रीयत इति जातादौ ष्यङ् न भवति । आहिच्छत्रीति । तदेवमर्थद्वयमस्य सूत्रस्य भाष्यकारेण व्याख्यातम । अभिधानलक्षणाश्च कृत्तद्धितसमासा इति सर्वत्रानन्तरापत्ये ष्यङ् न भवति ॥ ७९ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे चतुर्थस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम ॥

समर्थनाम ॥ समर्थवचनमिति । तस्यापत्यमित्यादौ श्रूयमाणविभक्तिसम्बन्ध्य-

Indira Gandhi National Centre for the Arts

र्यथा स्यात् । उपगोरपत्यमिति । असमर्थान्मा भूदिति । कम्बल उपगोरपत्यं देवदत्तस्येति । समर्थवचनमनर्थकम् । नह्यसमर्थेनार्थाभिधानम् । समर्थवचनमनर्थकम् । किं कारणम् । नह्यसमर्थेनार्थाभिधानम् । नह्यसमर्थादुत्पद्यमानेन प्रत्ययेनार्थाभिधानं स्यात् । अनभिधानात्तत उत्पत्तिर्न भविष्यति । अथ प्रथमवचनं किमर्थम् । प्रथमवचनं प्रकृतिविशेषणार्थम् । प्रथमात्प्रत्ययोत्पत्तिर्यथा स्यात् । अप्रथमान्मा भूत् । उपगोरपत्यमिति अपत्यशब्दात् । प्रथमवचनमनर्थकं नह्यप्रथमेनार्थाभिधानम् प्रथमवचनमनर्थकम् । किं कारणम् । नह्यत्राप्रथमेनार्थाभिधानम् । नह्यप्रथमादुत्पद्यमानेन प्रत्ययेनार्थस्याभिधानं स्यात् अनभिधानात्तत उत्पत्तिर्न भविष्यति । अथवा वचनं किमर्थम् । वाक्यमपि यथा स्यात् । उपगोरपत्यमिति । वावचने चोक्तम् । किमुक्तम् । तत्र तावदुक्तं वावचनानर्थक्यं च तत्र नित्यत्वात् सन इति । इहापि वावचनमनर्थकम् । किं कारणम् । तत्र नित्यत्वात्प्रत्ययः स्यात् । इह द्वौ पक्षौ वृत्तिपक्षश्चावृत्तिपक्षश्च । स्वभावतश्चैतद्भवति । वाक्यं च वृत्तिश्च । तत्र स्वाभाविके वृत्तिविषये नित्ये प्रत्यये प्राप्ते वावचनेन किमन्यच्छक्यमभिसम्बन्धुमन्यदतः संज्ञायाः । न च संज्ञाया भावाभावाविष्येते । तस्मान्नार्थो वावचनेन । अथैतत्समर्थग्रहणं नैव कर्तव्यम् । कर्तव्यं च । किं प्रयोजनम् । समर्थादुत्पत्तिर्यथा स्यादसमर्थान्मा भूदिति । किं पुनः समर्थमर्थाभिधाने यच्छक्तम् । किं पुनस्तत् । कृतवर्णानुपूर्वीकं पदम् । सौत्थितिः वैक्षमाणिरिति । अथ तद्वावचनं नैव कर्त-

---

पेक्षायां विभक्तौ विद्यमानायामसामर्थ्ये प्रत्ययप्रसङ्ग एव नास्तीति मत्वा प्रश्न । समर्थादिति । समर्थादेवेत्यवधारणं द्रष्टव्यम् । न तस्यापत्यमित्यादौ लक्षणवाक्ये सम्बन्धप्रतिपादनाय विभक्त्युच्चारणम् । इह तस्य प्रयोजनाभावात् । किं तर्हि षष्ठ्यन्तात्प्रत्ययविध्यर्थं तस्येति निर्दिष्टम् । अपत्यमिति । प्रत्ययार्थत्वेन निर्दिष्टमिति परस्परसम्बन्धस्याप्रतिपादनादसमर्थादपि प्रत्ययः स्यादिति भावः । ऋद्धस्योपगोरपत्यमित्यादावपि प्रत्ययो न भवति सापेक्षत्वादसामर्थ्यात् । समर्थवचनमिति । प्रयुक्तानामिदमन्वाख्यानं प्रवृत्तम् । तत्र कम्बलउपगोरपत्यं देवदत्तस्येति योऽर्थः प्रतीयते नासौ कम्बल औपगवो देवदत्तस्येति प्रत्यये कृते इति प्रत्ययो न भविष्यतीत्यर्थः । प्रकृतिप्रत्ययौ च प्रत्ययार्थं सह ब्रूते । नचानन्वितयोः सहाभिधानसम्भवः । असमर्थशब्देनासमर्थादुत्पन्नः प्रत्यय उपचारादभिहितः । अपत्यशब्दादिति । अपत्यविशेषवाचिनो देवदत्तादिशब्दादित्यर्थः । तथाहि । यथेन्द्रो देवता यस्य तदैन्द्रं हविरिति प्रथमान्तात्प्रत्ययो भवति । एवं देवदत्तोऽपत्यमस्योपगोरिति प्रत्ययप्रसङ्गः । लक्षणवाक्यापेक्षञ्च प्राथम्यं नियतत्वादाश्रीयते न तु विग्रहवाक्यापेक्षनियतमन्यथा पर्यायेण सर्वस्य प्राथम्यात् प्रथमादित्यनर्थकं स्यात् । प्रथमवचनमिति । दैवदत्तिरित्युक्तेऽपत्यं प्रतीयते न त्वपत्यवानित्यर्थः । इहेति । व्यपेक्षैकार्थीभावयोरत्यन्तभेदाद्भिन्नार्थस्य वाक्यस्य वृत्त्या बाधनं न भविष्यतीत्यर्थः । कृतवर्णानुपूर्वीकमिति ।

Indira Gandhi National Centre for the Arts

ज्यम् । कर्तव्यं च । किं प्रयोजनम् । नित्याः शब्दाः नित्येषु शब्देषु वाक्यस्य साधुत्वमनेनान्वाख्यायते ॥

प्राग्दीव्यतोऽण् ॥ ८३ ॥ अयुक्तोयं निर्देशः । नहि तत्र कश्चिद् दीव्यच्छब्दः पठ्यते । कस्तर्हि । दीव्यतिशब्दः । कथं तर्हि निर्देशः कर्तव्यः । प्राग्दीव्यतेरिति । स तथा तर्हि निर्देशः कर्तव्यः । प्राग्दीव्यतेरिति । न कर्तव्यः । दीव्यतिशब्दे च दीव्यच्छब्दोस्ति तस्मादेषा पञ्चमी । किं पुनः कारणं विकृतनिर्देशः क्रियते । एतज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा एकदेशविकृतमनन्यवद्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । एकदेशविकृतेषूपसंख्यानं चोदितं तन्न वक्तव्यं भवति । अथ वा प्राक्शब्दोयं दिक्शब्दः दिक्शब्दैश्च योगे पञ्चमी भवति । तत्राप्रथमासमानाधिकरणे इति कृत्वा शता भविष्यति । अथ प्राग्वचनं किमर्थम् । प्राग्वचनं सकृद्विधानार्थम् । प्राग्वचनं क्रियते । सकृद्विधानार्थम् । सकृ

तस्यैव लोकेऽर्थप्रतिपादनाय प्रयोगात्समर्थत्वमिति भावः । सौत्थितिरिति । विभज्यान्वाख्याने सुउत्थित इत्यस्मादपि प्रत्ययः स्यात् । ततश्च सावुत्थितिरित्यनिष्टप्रसङ्गो वार्णादाङ्गं बलीय इति वृद्धिप्रसङ्गात् । नन्वन्तरङ्गत्वाद्वार्णेषु कार्येषु कृतेषु प्रत्ययो भविष्यति । एवं तर्ह्येतदनेन समर्थवचनेन ज्ञाप्यते । अस्तीयं परिभाषा अकृतव्यूहाः पाणिनीया इति । तेन पपुषः तस्थुष इत्यादि सिद्धं भवति । अन्तरङ्गत्वात्पूर्वं कृतोपीडागम एतत्परिभाषावशान्निवर्तते । तत्र पपावस् अस् इति स्थिते इट् च प्राप्नोति सम्प्रसारणं च । तत्र सम्प्रसारणं बलीयः प्रतिपदविधानादिति । तत्र कृते वलादित्वाभावादिण्नास्तीति सिद्धं पपुष इति । वाक्यस्येति । वृत्तिवाक्ययोरवान्तरार्थभेदेऽपि प्रधानार्थाभेदादैकार्थ्याद्वाक्यस्य वृत्त्या बाधः स्यात् । तथा ह्यौपगवमानयेत्युक्ते योर्थ आनीयते स एवौपगोरपत्यमानयेत्युक्तौ तत्र तथा गोशब्देन गावीशब्दो निवर्त्यते । सत्यामपि गावीशब्दादधिकस्य स्त्रीत्वस्य प्रतिपत्तौ जातिलक्षणार्थाभेदात् । एवं वाक्यस्यापि वृत्त्या निवृत्तिः स्यादिति तदभ्यनुज्ञानाय वावचनम् ॥ ८२ ॥

प्राग्दीव्यतोऽण् ॥ अयुक्त इति । प्रसिद्धन्यायकरणो युजिः । प्रसिद्धस्य च कदाचिद्विस्पष्टप्रतिपत्त्यर्थः प्रयोगो दृश्यते न्यायेनायुक्तमिति । नहीति । दीव्यतिशब्दवाच्यस्यार्थस्यैवावधिभावो विवक्षितः । अर्थानामेवावधिमत्त्वस्येष्टत्वात् । समानजातीयानामवध्यवधिमद्भावस्य सुप्रसिद्धत्वात् । समुदाये चैकदेशस्य गुणभावादवधित्वानुपपत्तिरिति भावः । दीव्यच्छब्द इति । एकदेशेन समुदायो निर्दिश्यते । स चार्थप्रधान इत्यर्थस्यावधित्वं सम्पद्यते । तत्रेति । तेन पचत्वित्यादौ पदसंज्ञा सिद्धा भवति । अथवेति । नैवेदमनुकरणं किं तर्ह्यर्थ एवावधित्वेन निर्दिश्यते । तत्र दिवेर्लटि कृतेऽर्थादित्यनेन गम्यमानार्थत्वादप्रयुक्तेनाप्रथमान्तेन सामानाधिकरण्यात् प्रथमासमानाधिकरणे निषेधाद्वा लटः शत्रादेशः कृत इत्यर्थः । अथेति । एकदेशोपपद्वारेण प्राग्दीव्यत इति समुदाय आक्षिप्तः । अणित्येवं वक्तव्यमधिकारार्थमिति

Indira Gandhi National Centre for the Arts

द्विहितः प्रत्ययो विहितो यथा स्यात् । योगे योगे तस्य ग्रहणमाकर्षामिति । नैतदस्ति प्रयोजनम् । अधिकारादप्येतत् सिद्धम् । अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते । अधिकारात्सिद्धमिति चेदपवादाविषयेऽण्प्रसङ्गः * । अधिकारात् सिद्धमिति चेदपवादविषयेऽण् प्राप्नोति । अत इञ् । अण् चेत्यणपि प्राप्नोति । तस्मात् प्राग्वचनम् * । तस्मात्प्राग्वचनं कर्तव्यम् । अथ क्रियमाणेपि प्राग्वचने कथमिदं विज्ञायते प्राग्दीव्यतो याः प्रकृतयः आहो स्वित्प्राग्दीव्यतो येर्था इति । किं चातः । यदि विज्ञायते प्राग्दीव्यतो याः प्रकृतय इति । स एव दोषः । अपवादाविषयेऽण्प्रसङ्ग इति । अथ विज्ञायते प्राग्दीव्यतो येर्था इति । न दोषो भवति । समानेर्थे प्रकृतिविशेषादुत्पद्यमान इञणं बाधते । यथा न दोषस्तथास्तु । प्राग्दीव्यतो येर्था इति विज्ञायेत । कुत एतत् । तथा ह्ययं प्राधान्येनार्थं प्रतिनिर्दिशति । इतरथा हि बह्वयस्तत्र प्रकृतयः पठ्यन्ते ततो यां कां चिदेवावधित्वेनोपाददीत । अथ वा पुनरस्तु प्राग्दीव्यतो याः प्रकृतय इति । ननु चोक्तमपवादविषयेऽण्प्रसङ्ग इति । न वा क्व चिद्वावचनात् * । न वा एष दोषः । किं कारणम् । क्व चिद्वावचनात् । यदयं क्व चिद्वावचनं करोति । पीलाया वा । उदश्विनोन्यतरस्यामिति । तज्ज्ञापयत्याचार्यः नापवादविषयेऽण्भवतीति । यद्येतज्ज्ञाप्यते नार्थः प्राग्वचनेन । अधिकारात्सिद्धम् । ननु चोक्तमधिकारात्सिद्धमिति चेदपवादविषयेऽण्प्रसङ्ग इति । नैष दोषः । परिहृतमेतत् न वा क्व चिद्वावचनादिति । किं पुनः कारणमियानवधिर्गृह्यते । न प्राक् ठक इत्येवोच्येत । एतज्ज्ञापयत्यर्थेष्वेतद्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । प्रकृतिविशेषादुत्पद्यमान इञणं बाधते ॥

मत्वा प्रश्नः । सकृद्विधानार्थमिति । प्राग्दीव्यतो येऽर्थास्तान् सर्वानपेक्ष्यानेनाण् प्रत्ययः सकृद्विधीयत इत्यर्थः । विहितो यथा स्यादिति । सर्वेष्वर्थेषु विहितो यथा स्यादित्यर्थः । अण् चेति । प्रतियोगमुपस्थाने द्वयोरेकविषयत्वाद्विकल्पः स्यान्न तु बाध्यबाधकभावः । स एव दोष इति । सर्वाश्चेत्प्रकृतय इहापेक्ष्यन्ते तदैकविषयत्वादणा इञादीनां बाध्यबाधकभावो न स्यात् । समानेर्थ इति । अर्थापेक्षणे सत्यर्थेष्वदमण्विधानमिति प्रकृत्यन्तरं सावकाशो ऽण् प्रत्ययः एकस्मिन्नर्थे प्रकृतिविशेषादुत्पद्यमाने नेञादिना तक्रकौण्डिन्यन्यायेन बाध्यत इत्यर्थः । तथाहीति । यज्जातीयो ऽवधिस्तज्जातीयो ऽवधिमानिति भावः । प्राधान्येनेति । तात्पर्येणेत्यर्थः । यां कांचिदिति । प्राक्कुलत्थादण् इति वक्तव्यं स्यादित्यर्थः । पीलाया वेति । सूत्रमप्येतदनारम्भणीयं स्यात् । द्व्यचइत्यनेनैव ढकः सिद्धत्वादनेनाप्यणः । उदश्वित इति । उदश्वित इत्यत्र ठग्विधानाय कर्तव्यं स्यादनेनाणः सिद्धत्वादित्यर्थः । न प्राक् ठक इति । यद्यपीहानेकं ठग्ग्रहणमस्ति तथापि व्याख्यानात्प्राग्वहतेष्ठगित्ययमेवावधित्वेन ग्रहीष्यते । एतदिति । एवं हि स्पष्टो बाध्यबाधकभावो भवति ज्ञापकाश्रयणमन्तरेणैवेत्यर्थः ॥ ८३ ॥

Indira Gandhi National Centre for the Arts

दित्यादित्यादित्यपत्युत्तरपदाण्ण्यः ॥ ८५ ॥ ण्यप्रकरणे वाङ्मतिपितृमतां छन्दस्युपसंख्यानम् * । ण्यप्रकरणे वाङ्मतिपितृमतां छन्दस्युपसंख्यानं कर्तव्यम् । वाक् । वाच्यः । मति । मात्यः । पितृमत् । पैतृमत्यः । पृथिव्या ञाञौ * । पृथिव्या ञाञौ वक्तव्यौ । पार्थिवा पार्थिवी । देवस्य यञञौ * देवस्य यञञौ वक्तव्यौ । दैव्यं दैवम् । बहिषष्टिलोपो यञ् च * । बहिषष्टि' लोपो यञ् च वक्तव्यः । बहिर्भवो बाह्यः । ईकक्च * । बहिषईकक्च वक्तव्यः । बाहीकः । ईकञ् छन्दसि * । ईकञ् छन्दसि वक्तव्यः । बाहीकमस्तु भद्रं वः । स्थाम्नोकारः * । स्थाम्नो ऽकारो वक्तव्यः । अश्वत्थामः । लोम्नोऽपत्येषु बहुषु * । लोम्नो ऽपत्येषु बहुषु अकारो वक्तव्यः । उडुलोमाः । शारलोमाः । बहुष्विति किमर्थम् । औडुलोमिः शारलोमिः । सर्वत्र गोरजादिप्रसङ्गे यत् * । सर्वत्र गोरजादिप्रसङ्गे यद्वक्तव्यः । गवि भवं गव्यम् । गोः स्वं गव्यम् । गौर्देवता यस्य स्थालीपाकस्य गव्यः स्थालीपाकः । ण्यादयोऽर्थविशेषलक्षणादणपवादात्पूर्वविप्रतिषिद्धम् * । ण्यादयोऽर्थविशेषलक्षणादणपवादाद्भवन्ति पूर्वविप्रतिषेधेन । ण्यादीनामवकाशः । दितिर्देवतास्य दैत्यः, अदितिर्देवतास्य आदित्यः। अर्थविशेषलक्षणस्याणपवादस्यावकाशः । दुलेरपत्यं दौलेयः । बालेयः । इहोभयं प्राप्नोति । दितेरपत्यं दैत्यः । आदितेरादित्यः । अपरस्यार्थविशेषलक्षणस्याणपवादस्यावकाशः । अचित्तहस्तिधेनोष्ठक् । आपूपिकम् । शाष्कुलिकम् । ण्यादी-

---

दित्यादित्या ॥ अणपवादो ण्यः। वाङ्मतीति। कुर्वादिषु मतिपितृमच्छब्दयोरपत्यार्थे भाषायामपि ण्यविधानार्थः पाठः । अनेन तु च्छन्दसि सर्वेषु प्राग्दीव्यतीयेषु ण्यविधिः। बहिष इति। टिलोपवचनमव्ययानां भमात्रे टिलोप इत्यस्यानित्यत्वज्ञापनार्थं तेनारातीय इत्येवमादि सिद्धं भवति। स्थाम्न इति। भाष्यकारवचनप्रामाण्यात्तदन्तस्य ग्रहणं न केवलस्य। अश्वत्थाम इति। अश्वस्येव स्थाम बलं यस्येति बहुव्रीहिः। पृषोदरादित्वात्सकारस्य तकारः। अपत्यादावर्थे ऽकारप्रत्ययः। नस्तद्धित इति टिलोपः। उडुलोमा इति। बाह्वादिषु लोमन्शब्दस्य पाठादिञि प्राप्ते ऽकारो विधीयते । केचिदाहुरिञ्यपि कृते तस्य बहुत्व इञ प्राच्यभरतेष्विति लुकि प्रत्ययलक्षणेन स्वादिष्विति पदसंज्ञायां नलोपेन सिद्धं रूपम्। भसंज्ञा तु वर्णाश्रयत्वात्प्रत्ययलक्षणेन न भविष्यति न ङिसंबुद्ध्योरिति ङौ नलोपनिषेधाद्वा तदेतदयुक्तम् । प्राच्यभरतगोत्रादन्यत्र लुगभावात्। किं चोडुलोमैरुडुलोमेभ्य इत्यादौ सुब्विधौ नलोपस्यासिद्धत्वादैसादि न स्यात्। न लुमताङ्गस्येति। प्रत्ययलक्षणनिषेधाद्वा पदसंज्ञाया अभावः। यथा काश्यपेन प्रोक्तमधीयते काश्यपिन इत्यत्राणो लुकि कृते नलोपो न भवति। एवमिहापि न स्यात्। सर्वत्रेति। नापत्य एव। यद्वा। प्राग्दीव्यतीये अन्यत्र च तेन गवा चरति गव्य इत्यपि भवतीति केचिदाहुः। अजादिप्रसङ्ग इति किम्। गोभ्यो हेतुभ्य आगतं गोरूप्यम्। ण्यादय इति। ण्यादयो येन नाप्राप्तिन्यायेनाण एवापवादाः। ठगादिभिरणपवादैस्तु सह संप्रधारणायां परत्वात्त एव स्युरिति वार्तिकारम्भः। अर्थविशेषा

नामवकाशः । बार्हस्पत्यम् । प्राजापत्यम् । इहोभयं प्राप्नोति । वनस्पतीनां समूहो वानस्पत्यम् । ण्यादयो भवन्ति पूर्वविप्रतिषेधेन । स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । इष्टवाची परशब्दः । विप्रतिषेधे परं यदिष्टं तद्भवतीति । दितिवनस्पतिभ्यामपत्यसमूहयोरिति ॥

उत्सादिभ्योऽञ् ॥ ८६ ॥ अञ्प्रकरणे ग्रीष्मादच्छन्दसि * । अञ्प्रकरणे ग्रीष्मादच्छन्दसीति वक्तव्यम् । ग्रैष्मम् । अच्छन्दसीति किमर्थम् । त्रिष्टुब् ग्रैष्मी यद्यच्छन्दसीत्युच्यते । ग्रैष्मावेतौ मासौ । अत्र न प्राप्नोति । अच्छन्दसीत्युच्यते । नेदं छन्दः समीक्षितम् । काठकं कालापकं मौदकं पैप्पलादकमिति । किं तर्हि । प्रत्ययार्थविशेषणमेतद् । न चेच्छन्दः प्रत्ययार्थो भवतीति ॥

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥ ८७ ॥ किमर्थं नञ्स्नञावुच्येते । न नञेवोच्येत । का रूपसिद्धिः । पौंस्नम् । पुन्स् इति सकारान्तः । नञ्शब्दश्च प्रत्ययः । न सिध्यति । संयोगान्तस्य लोप इति लोपः प्राप्नोति । एवं तर्हि नवार्थो नञा नापि स्नञा अञ् प्रकृतः सोनुवर्तिष्यते । नकारश्चागमो वक्तव्यः । अथ नकारे आगमे सति किं पूर्वान्तः करिष्यते आहोस्वित्परादिः । किं चातः । यदि पूर्वान्तः । स्त्रैणाः । बहुषु लोपः प्राप्नोति । स्त्रैणानां सङ्घः । सङ्घाङ्कलक्षणेष्वञ्यञिञामणिति अण् प्राप्नोति । अथ परादिः । पौंस्नम् । स एव दोषः । संयोगान्तस्य लोपः प्राप्नोतीति । अस्तु पूर्वान्तः । कथं स्त्रैणाः स्त्रैणानां सङ्घ इति । उभयत्र लौकिकस्य गोत्रस्य ग्रहणम् । न

लक्षणं निमित्तं यस्य सोर्थविशेषलक्षणः । यस्त्वर्थसामान्यलक्षणोऽणपवादस्स परत्वाद्भवति उष्टपतिर्नाम पत्रं तस्येदमौष्टपतम् । पत्राध्वर्युपरिषदश्चेत्यञ् भवति न तु ण्यः । बार्हस्पत्यमिति । बृहस्पतिर्देवता अस्येति ण्यः । दितिवनस्पतिभ्यामिति । इतश्चानिञ इति दितेर्ढ न भवति । वनस्पतेरचित्तहस्तिधेनोष्ठगिति ठग् न भवति ।

उत्सा ॥ ग्रीष्मादिति । छन्दःशब्देनेह वृत्तमुच्यते । तस्मिन्नभिधेये ऽञः प्रतिषेधादण् एव भवति । त्रिष्टुबिति । ग्रीष्मो देवता अस्या इत्यण् यदा तु ग्रीष्मे भवति शेषार्थविवक्षा तदा तु शैषिक ऋत्वण् सिद्ध एव । न चाञा शैषिकस्य बाधप्रसङ्गोऽर्थविशेषलक्षणानां तुल्यकक्ष्याणामेव प्रत्ययानां ण्यादिभिर्बाधनात् । ऋत्वण्तु कक्ष्यान्तरप्राप्तत्वादञो बाधकः । तथा हि । कालाट्ठञणोपवादष्ठञोपि ऋत्वण् । ग्रैष्मावेताविति । शेषलक्षणादर्थादन्यत्र बोद्धव्यम् । शेषे ऋत्वणा भाव्यमित्युक्तम् ॥ ८६ ॥

स्त्रीपुंसाभ्याम् ॥ लोपः प्राप्नोति । तत्र कर्तव्यं पूर्वत्रासिद्धमित्यनुस्वारस्यासिद्धत्वादनुस्वारस्यापि वा अयोगवाहस्य प्रत्याहारे दृष्टत्वात्संयोगान्तत्वादिति भावः । अञ्प्रकृत इति । तत्र भत्वात्पदत्वाभावात् संयोगान्तलोपाप्रसङ्गः । बहुषु लोप इति । यञञोश्चेत्यनेन । अथ परादिरिति । परादौ नशब्दः संपद्यत इत्यञ्कार्याभावः । ननु च तद्भक्तस्य तद्ग्रहणेन ग्रहणात्परादावपि नकारेऽञ्कृतं प्राप्नोति । एवं तर्हि अश्वासाव्रञित्याश्रयणाददोष

चैतल्लौकिकं गोत्रम् । ईकारस्तर्हि प्राप्नोति । इष्टमेवैतत्संगृहीतं स्त्रैणी पौंस्नीत्येव भवितव्यम् । एवं हि सौनागाः पठन्ति । नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानमिति । टिलोपस्तर्हि प्राप्नोति । नुग्वचनान्न भविष्यति । भवेदिह नुग्वचनान्न स्यात्स्त्रैणमिति । इह तु खलु पौंस्नमिति नुग्वचनादेव प्राप्नोति । तस्मान्नञ्स्नञौ वक्तव्यौ । अथेहेमौ नञ्स्नञौ प्राग्भवनाद् आहो स्वित्प्राग्वतेः । कश्चात्र विशेषः । नञ्स्नञौ भवनादिति चेद्वत्यर्थे प्रतिषेधः * । नञ्स्नञौ भवनादिति चेद्वत्यर्थे प्रतिषेधो वक्तव्यः । स्त्रीवत् पुंवदिति । किं पुनः कारणं न सिद्ध्यति । इमौ नञ्स्नञौ प्राग्भवनादित्युच्येते । तौ विशेषविहितौ सामान्यविहितं वतिं बाधेयाताम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । वतेः प्रागिति वक्ष्यामि । वतेः प्रागिति चेद् भाव उपसंख्यानम् * । वतेः प्रागिति चेद् भाव उपसंख्यानं कर्तव्यम् । स्त्रीभावः स्त्रैणः पुंभावः पौंस्नमिति । सूत्रं च भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं नञ्स्नञौ भवनादिति चेद्वत्यर्थे प्रतिषेध इति । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न वत्यर्थे नञ्स्नञौ भवत इति । यदयं स्त्रियाः पुंवदिति निर्देशं करोति । एवमपि स्त्रीवदिति न सिध्यति । योगापेक्षं ज्ञापकम् ॥

द्विगोर्लुगनपत्ये ॥ ८८ ॥ इह कस्मान्न भवति । त्रैविद्यः पाञ्चनदः षाट्कुल इति । इह तावत् त्रैविद्य इति । नैवं विज्ञायते तिस्रो विद्या अधीते त्रैविद्य इति । कथं तर्हि ऽयवयवा विद्या त्रिविद्या त्रिविद्यामधीते त्रैविद्य इति । इहापि पाञ्चनद इति' नैवं विज्ञायते पञ्चसु नदीषु भवः पाञ्चनद इति । कथं तर्हि

इति मन्यते । पररूपं च शकन्ध्वादित्वात्सौत्रत्वाद्वा निर्देशस्य भवति । उभयत्रेति । यञञोश्चेत्यत्र यस्कादिभ्यो गोत्र इत्यनुवर्तते । सङ्घाङ्कल्यत्रापि गोत्रचरणाद्वुञित्यतः । अपिप्रजनश्च लोके गोत्रमित्युच्यते । स्त्री च नार्षिनापि पुंशब्दवाच्यं सामान्यमिति भावः । टिलोपस्तर्हीति । प्रकृत्यैकाजित्यत्रेष्ठेमेयःस्वित्यनुवर्तनात् प्रकृतिभावो नास्ति । इह तु खल्विति । यं विधिं प्रतीति यस्य तु विधेरिति च न्यायाभ्यामित्यर्थः । ननु च स्त्रीशब्दस्यापि नुगेव लोपनिमित्तम् । अन्यथा श्रीर्देवता अस्येति श्रायमित्यादाविव यस्येति लोपात्परत्वाद् वृद्धिः स्यादितिचिन्त्यमेतत् । पौंस्ने दोषप्रसङ्गाद्वा । स्त्रैणेनाकारिसूक्ष्मेक्षा । वत्यर्थ इति । प्राग्भवनात्सर्वेष्वर्थेषु नञ्स्नञौ प्रकृतिविशेषाद्विधीयमानौ प्रकृत्यन्तरेषु सावकाशस्य वतेर्बाधकौ प्राप्नुत इति भावः । योगापेक्षमिति । अयं योगो वत्यर्थे न प्रवर्तते इति पुंवदिति निर्देशेन ज्ञाप्यत इत्यर्थः । त्वतलोस्तु नञ्स्नञ्भ्यां समावेशायाचत्वादित्यत्र यत्नः करिष्यते । तेन स्त्रीत्वं स्त्रीता । पुंस्त्वं पुंस्तेत्यपि भवति ॥ ८८ ॥

द्विगोर्लुग ॥ त्रैविद्यइति । द्विगोरत्राण् प्रत्यय इति मन्यते । अवयवेति । विद्यात्रयरूपस्य समुदायस्य विद्यात्वं विवक्षितमित्यर्थभेदो नास्ति । अव्यविकन्यायाच्च द्विगुभावः । पाञ्चनदमिति । नदीभिश्चेति समाहारेऽव्ययीभावः । कृष्णोदक् पाण्डुसंख्यापूर्वाया

पश्चानां नदीनां समाहारः पञ्चनदं पञ्चनदे भवः पाञ्चनद इति । षाट्कुल इति । नैवं विज्ञायते षट्सु कुलेषु भवः षाट्कुल इति, किं तर्हि षण्णां कुलं षट्कुलं षट्कुले भवः षाट्कुल इति । अजादिग्रहणं च कर्तव्यम् । इह मा भूत् । पञ्चगर्गरूप्यं पञ्चगर्गमयम् । द्विगोर्लुकि तन्निमित्तग्रहणम् * । द्विगोर्लुकि तन्निमित्तग्रहणं कर्तव्यम् । द्विगुनिमित्तं यस्तद्धितः तस्य लुग्भवतीति वक्तव्यम् । इह मा भूत् । पञ्चकपालस्येदं खण्डं पाञ्चकपालमिति । अर्थविशेषाऽसंप्रत्यये ऽतन्निमित्तादपि * । अर्थविशेषासंप्रत्यये ऽतन्निमित्तादपीति वक्तव्यम् । किं प्रयोजनम् । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पञ्चकपाल्यां संस्कृत इत्यपि विगृह्य पञ्चकपाल इत्येव यथा स्यात् । अथ क्रियमाणे पि तन्निमित्तग्रहणे कथमिदं विज्ञायते । तस्य निमित्तं तन्निमित्तं तन्निमित्तादिति आहो स्वित् स निमित्तमस्य सोयं तन्निमित्तस्तन्निमित्तादिति । किं चातः। यदि विज्ञायते । तस्य निमित्तं तन्निमित्तं तन्निमित्तादिति । क्रियमाणेपि तन्निमित्तग्रहणे ऽत्र प्राप्नोति । पञ्चकपालस्येदं खण्डं पाञ्चकपालमिति । अथ विज्ञायते स निमित्तमस्य सोयं तन्निमित्तस्तन्निमित्तादिति । न दोषो भवति । यथा न दोषस्तथास्तु । स निमित्तमस्य सोयं तन्निमित्तः तन्निमित्तादिति विज्ञायते । कुत एतत् । यदयमाह अर्थविशेषाऽसंप्रत्यये तन्निमित्तादपीति । तत्तर्हि निमित्तग्रहणं कर्तव्यम् । न कर्तव्यम् । द्विगोरिति नैषा पञ्चमी का तर्हि संबन्धे षष्ठी । द्विगोस्तद्धितस्य लुग्भवतीति । कश्च द्विगोस्तद्धितः । निमित्तम् । यस्मिन् द्विगुरित्येतद्भवति । कस्मिंश्चैतद्भवति । प्रत्यये । इदं तर्हि वक्तव्यम् । अर्थविशेषासंप्र-

---

इत्यच् समासान्तः । षण्णामिति।आदिपुरुषाणां कुलमिति। कुलसामान्यस्य विवक्षितत्वाद्यएवार्थ षट्सु कुलेषु भव इति स एव षण्णां कुलेभव इतीति भावः। पञ्चगर्गरूप्यमिति । पञ्चभ्यो गर्गेभ्यो हेतुभ्य आगतमिति द्विगुः। ततो रूप्यमयटौ । द्विगुनिमित्तमिति। द्विगुनिमित्तमिति षष्ठीसमासः । क्व चिद् द्विगुनिमित्त इति पाठः । तत्र द्विगोर्निमित्तं यस्मिंस्तद्धिते तदीयो योऽर्थः स द्विगुनिमित्ति इति व्याख्येयम्।पञ्चकपालस्येति। पञ्चसु कपालेषु संस्कृत इति तद्धितार्थे द्विगुः ततोण् । लुक् पुनस्तस्येदमित्यण् । तस्य द्विगुं प्रत्यनिमित्तत्वाल्लुगभावः । अर्थविशेषा ऽसंप्रत्यय इति । तद्धितहेतुकाद् द्विगोर्लुकि योर्थः प्रतीयते स एवातद्धितहेतुकादपि यदीत्यर्थः । समाहारद्विगुश्च तद्धितार्थ इति द्विगुना समानार्थ इति तदिदं लुग्विधानं तस्येति तद्धितस्य । स निमित्तमिति । स तद्धितोर्थद्वारेण निमित्तं यस्येत्यर्थः । यदयमिति । पञ्चकपाल्यां संस्कृत इत्यत्रापि तद्धितस्य निमित्तं द्विगुरिति किं द्वितीयवार्त्तिकारम्भेण । किं च तन्निमित्तग्रहणमपि व्यावर्त्याभावादनर्थकं स्यात् । निमित्तमिति । निमित्तनिमित्तिभावलक्षणस्य संबन्धस्यान्तरङ्गत्वात्स एवाश्रीयते न तु पौर्वापर्यलक्षणः । पौर्वापर्यस्य च पञ्चम्या लाभात् षष्ठ्याश्रयणमनर्थकं स्यात् । अव्यविकन्यायेनेति । अव्यविकशब्द-

Indira Gandhi National Centre for the Arts

स्येयं तन्निमित्तादपीति । एतच्च न वक्तव्यम्। इहास्माभिस्त्रैशब्द्यं साध्यं पञ्चसु कपालेषु संस्कृतः पञ्चकपाल्यां संस्कृतः पञ्चकपालो दशकपाल इति।तत्र द्वयोः समानार्थयोरेकेन विग्रहः । अपरस्मादुत्पत्तिर्भविष्यत्यव्यविकन्यायेन । तद्यथा अवेर्मांसमिति विगृह्य अविकशब्दादुत्पत्तिर्भवति आविकमिति । एवं पञ्चसु कपालेषु संस्कृत इति विगृह्य पञ्चकपाल इति भविष्यति । पञ्चकपाल्यां संस्कृत इति। विगृह्य वाक्यमेव भविष्यति । तत् त्रैशब्द्यं चेह साध्यं तच्चैवं सति सिद्धं भवति ॥

गोत्रेऽलुगचि ॥ ८९ ॥ गोत्रे ऽलुगचीति चेदितरेतराश्रयत्वादप्रसिद्धिः । केतरेतराश्रयता । अलुग्निमित्तोजादिः । अजादिनिमित्तश्चालुक् । तदेतदितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते । विप्रतिषेधाल्लुकश्छविधानम् * । विप्रतिषेधाल्लुकः छो भविष्यति । लुकोवकाशः । गर्गाः । वत्साः । बिदाः । उर्वाः । छस्यावकाशः । शालीयो मालीयः । गार्गीयो वात्सीयः । इहोभयं प्राप्नोति । गर्गाणां छात्राः गार्गीयाः वात्सीयाः । छो भवति विप्रतिषेधेन । नैष युक्तो विप्रतिषेधः । भूम्नीति च लुक् प्राप्तो बाह्ये चार्थे विधीयते ऽजादिः । बहिरङ्गमन्तरङ्गाद् विप्रतिषेधादयुक्तं स्यात् ॥ भूम्नि प्राप्तस्य लुको यदजादौ तद्धिते ऽलुकं शास्ति । एतद् ब्रवीति कुर्वन् समानकालावलुग्लुक्च ॥ यदयं भूम्नि प्राप्तस्य लुकोऽजादौ तद्धितेऽलुकं शास्ति।

योर्यो न्यायस्तेनेत्यर्थः । क्वचिदाविरविकन्यायेनेति पाठस्तत्र च दृष्टान्तत्वेनोपन्यासः । अव्यविकन्यायेन तद्द्वारेण यथा प्रत्ययमुत्पादयति न स्वयं तथायमपीत्यर्थः । अथवाऽविरित्यस्य विभक्त्यन्तस्यानुकरणमाविरिति । ततोऽनुकार्येणार्थेनार्थवत्वाद्या विभक्तिरुत्पद्यते तस्याद्वन्द्वान्तर्भावाल्लोपः न तु पूर्वस्या अनुकरणत्वात् सुप्त्वाभावात् । यथाऽस्य वामीयमिति षष्ठ्या लुगभावः । अथवा भाष्यकारवचनप्रामाण्यादस्य साधुत्वम् । एवमिति । पञ्चकपालीशब्दात्त्वनभिधानात्तद्धितानुत्पत्तिरिति भावः ॥ ८८ ॥

गोत्रे ऽलुगचि ॥ यस्कादिभ्यो गोत्र इति प्रकरणेन प्राप्तस्य लुको विषयविशेषे ऽयमपवादः । गोत्रे लुगचीति चेदिति । अस्मिन् सूत्रन्यासे दोषः । यदि तु गोत्रे लुगित्युक्त्वा हलिनेत्युच्येत तदा न स्याद्दोष इत्यर्थः । अलुङ्निमित्त इति । गर्गाऽणां छात्रा इति प्राग्दीव्यतीयार्थविवक्षायां सत्यलुकि वृद्धत्वाच्छेन भाव्यं नान्यथा छे च कृते ईयादेशे परतोऽलुगितीतरेतराश्रयत्वम् । व्यक्तिपक्षे ऽचीति परसप्तम्याश्रयणेयं दोषः । आकृतिपक्षे तु विषयसप्तम्याश्रयणे ऽस्य दोषस्यानवतारः । गार्गीया इति । गार्ग्यस्यायं छात्र इति यदा एकवचनान्ता प्रकृतिस्तदेदं छस्यावकाशप्रदर्शनम् । भूम्नीति चेति । प्रत्ययार्थबहुत्वमात्रापेक्षो लुगन्तरङ्गो बाह्यप्राग्दीव्यतीयार्थापेक्षत्वात्तु बहिरङ्गोजादिप्रत्ययः । अन्तरङ्गबहिरङ्गयोश्चातुल्यकालत्वादयुक्तो विप्रतिषेधः । तुल्यकालत्वप्रतिपादनायाह भूम्नीति । समानकालाविति । यदि पूर्वं लुक् प्रवर्तेत तदाभिनिर्वृत्तस्य निवर्तयितुमशक्यत्वादनर्थकमलुग्विधानं स्यात् ।

Indira Gandhi National Centre for the Arts

तज्ज्ञापयत्याचार्यः समानकालावेतावलुग्लुकाविति । यदि वा लुकः प्रसङ्गे भव-त्यलुक् छस्तथा प्रसिद्धोऽस्य यदि वा लुकः प्रसङ्गेऽलुग्भवति तथाऽस्यच्छः प्रसिद्धो भवति । पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः । लुग्वालुकः प्रसङ्गं प्रतीक्षते । छे ऽलुगस्यं तथा । लुग्वा पुनरलुकः प्रसङ्गं यदि प्रतीक्षते । तथाऽस्य छेऽलुक् सिद्धो भवति । प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशत इति । गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक् * । गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुग्वक्तव्यः । बिदानामपत्यं माणवकः बैदः बैदौ । किमर्थमिदम् । नाचोऽत्यवालुक् सिद्धः । अचीत्युच्यते । न चात्राजादिं पश्यामः । प्रत्ययलक्षणेन । वर्णाश्रये नास्ति प्रत्ययलक्षणम् । एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि * । एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि वक्तव्यः । बैदस्यापत्यं बहवो माणवका बिदाः । बैदयोर्वा बिदाः । अञ्यो बहुषु यञ्यो बहुष्वित्युच्यमानो लुग्न प्राप्नोति । मा भूदेवम् । अञ्यो बहुषु यञ्यो बहुष्विति । अञन्तं यद्बहुषु यञन्तं यद्बहुष्वित्येवं भविष्यति । नैवं शक्यम् । इह हि दोषः स्यात् । काश्यपप्रतिकृतयः काश्यपा इति । नैष दोषः । यत्तावदुच्यते । गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुग्वक्तव्यइति । न वक्तव्यः । अचीत्यवालुक् सिद्धः । अचीत्युच्यते न चात्राजादिं पश्यामः । प्रत्ययलक्षणेन । ननु चोक्तं वर्णाश्रये नास्ति प्रत्ययलक्षणमिति । यदि वा कानि चिद्वर्णाश्रयाण्यपि प्रत्ययलक्षणेन

तस्मादलुग्विधानान्न तावत्पूर्वं लुक् प्रवर्तत इति लुकोपि सापेक्षत्वादन्तरङ्गत्वाभावादुपपन्नएव विप्रतिषेध इत्यर्थः । यदि वेति । अन्तरेणापि विप्रतिषेध लुगपवादत्वादलुकस्तन्निमित्तमजादिप्रत्ययो बलवत्त्वात्प्रवर्त्तेत इत्यर्थः । पूर्वमिति । निरपवादे विषये उत्सर्गेण प्रवर्त्तितव्यमिति पश्चादसौ प्रवर्ततइति भावः । प्रकल्प्येति । अन्यथा निर्विषयो ऽपवादः स्याद्यदि सर्वत्रोत्सर्गः प्रवर्तेतेति भावः । गोत्रस्येति । गोत्रप्रत्ययस्येत्यर्थः । बहुषु लोपिन इति । बहुष्वर्थेषु विधीयमानलोपस्येत्यर्थः । बहुवचनान्तस्येति । यदा तदर्थान्तरे यूनि संक्रामति तदन्ताद्यूनि यदा प्रत्ययः क्रियतेइत्यर्थः । द्व्येकयोरिति । द्वित्वैकत्वयोरित्यर्थः । द्वयोर्यूनोरेकस्मिन् वा यूनि यदा प्रत्यय उत्पद्यत इत्युक्तं भवति । बिदानामिति बिदस्यापत्यानि बहूनि । अनृष्यानन्तर्य इति गोत्रेञ् । तदन्ताद्यून्यत इञ् । तस्य ण्यक्षत्रियार्षञित इति लुक् । तत्राञो बहुषूत्पन्नत्वाल्लुक् प्राप्तः प्रतिषिध्यते । अञन्तामिति । इञि लुप्ते युवसु बहुष्वञन्तस्य वर्तनाल्लुग्भविष्यतीत्यर्थः । काश्यपाइति । काश्यपस्यापत्यं बिदादित्वादञ् । तत एकस्यैव काश्यपस्य बह्व्यः प्रतिकृतयो यदा विवक्षिता भवन्ति तदैव प्रतिकृताविति कन्प्रत्ययस्तस्य देवपथादित्वाल्लुप् । हरीतक्यादिषु व्यक्तिरिति वचनाल्लिङ्गमेव युक्तवद्भावेन भवति । वचनं त्वभिधेयगतमेव । यद्वैकशेषः क्रियते तदाऽञन्तस्य प्रकृतिबहुत्वे वर्त्तमानाल्लुक्प्रसङ्गः । यदि वेति । यथैवेत्यर्थः । अतृणेड् इत्यत्र हलादौ पिति सार्वधातुके विधीयमान-

Indira Gandhi National Centre for the Arts

भवन्ति। तथा चेदमपि भविष्यति। अथ वाऽविशेषेण लुकमुक्त्वा हलि नेति वक्ष्यामि। यद्यविशेषेण लुकमुक्त्वा हलि नेत्युच्यते। बिदानामपत्यं बहवो माणवका बिदाः। अत्राप्यलुक् प्राप्नोति। अस्तु पुनरस्य युवबहुत्वे वर्तमानस्य लुग्भविष्यति। पुनरलुक्कस्मान्न भवति। समर्थानां प्रथमस्य गोत्रप्रत्ययान्तस्याऽलुगुच्यते। न चैतत्समर्थानां प्रथमं गोत्रप्रत्ययान्तम्। किं तर्हि। द्वितीयमर्थमुपसंक्रान्तम्। अवश्यं चैतदेवं विज्ञेयम्। अत्रिभरद्वाजिका। वसिष्ठकश्यपिका। भृग्वङ्गिरसिका। कुत्सकुशिकिका इत्येवमर्थम्। गर्गभार्गविकाग्रहणं वा नियमार्थम्। अथ वा गर्गभार्गविकाग्रहणं कर्तव्यम्। तन्नियमार्थं भविष्यति। एतस्यैव गोत्रप्रत्ययान्तस्य द्वितीयमर्थमुपसंक्रान्तस्यालुग्भवति नान्यस्येति। यदप्युच्यते। एकवचनद्विवचनान्तस्य च प्रवृत्तौ बहुषु लोपो यूनि वक्तव्यः। न वक्तव्यः। ननु चोक्तम्। अञ्यो बहुषु यञ्यो बहुष्वित्युच्यमानो लुङ् न प्राप्नोतीति। मा भूदेवमञ्यो बहुषु यञ्यो बहुष्विति। अञन्तं यद्बहुषु यञन्तं यद्बहुष्वित्येवं भविष्यति। ननु चोक्तं नैवं शक्यमिह हि दोषः स्यात्। काश्यपप्रतिकृतयः काश्यपा इति। नैष दोषः, लौकिकस्य तत्र गोत्रस्य ग्रहणम्। नचैतल्लौकिकं गोत्रम्। यद्यञन्तं यद्बहुषु यञन्तं यद्बहुष्वित्येवमु-

---

स्तृणह इमितीमागमो लुप्तेपि सार्वधातुके भवति। तत्र हि हलीत्यनेन सार्वधातुकं विशेष्यते। ततश्च हलादिसार्वधातुकाश्रयत्वादिमागमः प्रत्ययलक्षण इति लुप्तेपि प्रत्यये प्रवर्तते। गवे हितं गोहितमित्यादौ त्ववादयोऽज्मात्रे विधीयमानावर्णरूपतानिमित्ता एव न तु प्रत्ययत्वनिमित्ता इति प्रत्ययलक्षणाभावाल्लोपे न प्रवर्तन्ते। इहाप्यजादौ प्रत्यये लुगुच्यमानः प्रत्ययलक्षणो भवतीति लुप्तेपि प्रत्यये प्रवर्तत इति भावः। अविशेषेणेति। प्राग्दीव्यतीयोऽर्थ एवापेक्ष्यते न त्वजादिः प्रत्ययविशेष इत्यर्थः। हलि नेति। गर्गेभ्य आगतं गर्गरूप्यं गर्गमयमिति हलादावलुङ् भवति। बिदानामपत्यमिति। अत्रापि प्राग्दीव्यतीयार्थस्य विवक्षितत्वादलुक् प्राप्नोतीत्यर्थः। युवबहुत्व इति। लुग्विधौ गोत्रप्रत्ययमात्रं गृह्यत इति युवबहुत्वेपि लुक् प्रवर्तत इति भावः। प्रथमस्येति। प्रथमादित्यनुवृत्तमिहार्थवशात् षष्ठ्यन्तं संपद्यते। प्रथमार्थवृत्तित्वाच्च प्राथम्यं गोत्रप्रत्ययस्य द्वितीयार्थवृत्तित्वे त्वलुगभावः। अत्रिभरद्वाजिकेति। अत्रेरपत्यानि बहूनि इतश्चानिञ इति ढक्। तदन्ताद्युवबहुत्वे अत इञ्। तस्य ण्यक्षत्रियार्षेति लुक्। अत्रिभृग्विति ढको लुक। भरद्वाजशब्दाद्बिदाद्यञ्। ततो यूनीञ्। पूर्ववल्लुक्। अत्रोपि युवबहुत्वे लुगिष्यते। अनेन प्रथमस्योच्यमानोऽत्रिभरद्वाजानां मैथुनिकेति प्राग्दिव्यतीयार्थविवक्षायामलुग्न भवति। वसिष्ठकश्यपिकेति। वसिष्ठादृष्यण्। यूनीञो लुक्। अणो ण्यक्ष्यादिसूत्रेण लुक्। कश्यपाद्बिदाद्यञ्। यूनीञो लुक्। अञो यञञोश्चेति लुक्। पूर्ववद्वुन्। भृगोः ऋष्यण्। यूनीञो लुक्। अणोऽत्रिभृग्विति लुक। एवमाङ्गिरसः। कुत्सादृष्यण् तस्माद्यून्यणो द्व्यचश्च इति फिञा भाव्यं न त्विञेति युवविवक्षा न क्रियते। कुशिकाद्बिदाद्यञ्। यूनीञो लुक्। अत्रोपि लुक्। वुन् गर्गाद्यञो लुक्।

Indira Gandhi National Centre for the Arts

च्यते । बिदानामयमपत्यं माणवको बैदः, बैदौ । अत्रापि प्राप्नोति । अलुगत्र लुकं बाधिष्यते । अलुकि च कृते पुनर्लुको निमित्तं नास्तीति कृत्वा पुनर्लुग्न प्राप्नोति । उक्तं वा किमुक्तम् । आपत्यं वा गोत्रम् । परमप्रकृतेश्चापत्यः । आपत्याज्जीवद्वंश्यात्स्वार्थे द्वितीयो युवसंज्ञः स चास्त्रियामेको गोत्रग्रहणानर्थक्यं च । बहुवचनलोपिषु सिद्धमिति । तत्र बिदानामपत्यं माणवक इति विगृह्य बिदशब्दाद् द्व्येकयोरुत्पत्तिर्भविष्यति । बैदः बैदौ । बैदस्यापत्यं बहवो माणवक इति विगृह्य बिदशब्दाद्बहुषूत्पत्तिर्भविष्याति बिदा इति अविरविकन्यायेन ॥

यूनि लुक् ॥ ९० ॥ यूनि लुगचीति चेत् प्रत्ययस्यायथेष्टप्रसङ्गः * । यूनि लुगचीति चेत् प्रत्ययस्यायथेष्टं प्राप्नोति । अनिष्टे प्रत्यये ऽवस्थिते लुक् । अनिष्टस्य प्रत्ययस्य श्रवणं प्रसज्येत । सिद्धं त्वविशेषेण लुग्वचनं हलि चेति प्रतिषेधः * । सिद्धमेतत् । कथम् । अविशेषेण लुकमुक्त्वा हलि नेति वक्ष्यामि। सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं यूनि लुगचीति चेत् प्रत्ययस्यायथेष्टप्रसङ्ग इति । नैष दोषः । अचीति नैषा परसप्तमी । का तर्हि । विषयसप्तमी । अजादौ विषय इति । तत्राचि विषये लुकि कृते यो यतः प्रत्ययः प्राप्नोति स ततो भविष्यति । कानि पुनरस्य योगस्य प्रयोजनानि । प्रयोजनं सौवीरगोत्रेभ्यो णठक्छाः । ण, फाण्टाहृतेरपत्यं माणवकः फाण्टाहृतः फा-

---

भृगोर्ऋष्यण् । यूनीञो लुक् । अणोत्रिभृग्विति लुक् प्राप्तो न गोपवनादिभ्य इति प्रतिषिध्यते । स एष प्रतिषेधो नियमार्थ इति बिदा इत्यत्र युवलक्षणो यं ऽलुङ् भवतीत्यर्थः । लोपो यूनीति । लोपग्रहणेन लुग् लक्ष्यते । लोपे हि प्रत्ययलक्षणेन वृद्धिस्वरप्रसङ्गः । लौकिकस्येति । अपत्यस्येत्यर्थः । काश्यप इत्यञन्तं तु प्रतिकृतिबहुत्वे वर्त्तते नापत्यस्य बहुत्वे । निमित्तं नास्तीति । बहुत्वं नास्ति द्वित्वैकत्वविषयत्वादित्यर्थः । आपत्यं वेति । अपत्यस्येदमापत्यं पौत्रप्रभृत्यपत्यामित्यर्थस्तद्गोत्रसंज्ञं भवति । परमप्रकृतेरिति । गर्गादेरेवापत्यप्रत्ययःकार्यो न त्वनन्तरगोत्रयुवभ्य इत्यर्थः । आपत्यादिति । गर्गादेर्यदा पौत्रप्रभृतेरपत्ये चतुर्थादौ जीवद्वंश्ये प्रत्ययः क्रियते तदा स्वार्थे द्वितीयो यञिञोश्चेत्यादिना फगादिः क्रियते गार्ग्यायण इति । स चेति । स्त्रियां द्वितीयप्रत्ययाभावाद् गार्गीत्येव भवति । एक इति । परमप्रकृतेश्चापत्य इत्यनेन तदर्थस्य लाभात् । बहुवचनलोपेष्विति । युवबहुत्वे बिदा इत्यादि सिद्धम् । द्वित्वैकत्वयोस्तु बैदो बैदावित्यादीत्यर्थः । तत्र बिदानामिति गोत्रस्य बहुषु लोपिन इति वार्त्तिकप्रयोजनमन्यथा साधयति । परमप्रकृतेरेव यूनि प्रत्ययः । आपत्याज्जीवद्वंश्यादित्यनेन स्वार्थिको द्वितीयो ण्यक्षत्रियार्षञित इति लुप्यते । अविरविकन्यायेनेति । केचिंदाहुरग्रन्थोयमिति । परमप्रकृतेश्चापत्य इति वाचनिकत्वादस्यार्थस्य । अन्ये तु वचनस्यैवाव्यविकन्यायमूलत्वप्रातिपादनायैतदुक्तमित्याहुः ॥ ८९ ॥

यूनि लुक् ॥ यूनि लुगचीति चादिति । अस्मिन् सूत्रन्यासे दोषो न तु न्यासान्तर इत्यर्थः । फाण्टाहृतस्यापत्यमित्यत इञ् । तस्यापत्यं युवा फाण्टाहृतिमिमताभ्यामिति

Indira Gandhi National Centre for the Arts

ण्टाहृतस्य यूनः छात्राः फाण्टाहृताः । ण । ठक्. भागवित्तेरपत्यं माणवको भागवित्तिकः भागवित्तिकस्य यूनश्छात्रा भागवित्ताः । ठक् । छ । तैकायनेरपत्यं माणवकस्तैकायनीयः तैकायनीयस्य यूनश्छात्राः तैकायनीयाः । छ, इञण्यौ सर्वत्र । इञण्यौ सर्वत्र प्रयोजनम् । औपगवेर्यूनश्छात्राः औपगवीयाः । वृद्धवदतिदेशे सति इञो गोत्र इत्यण् प्राप्नोति । नैष दोषः । प्रत्याख्यायतेसावतिदेशः । कथं पुनर्यानि प्रयोजनानि तानि ज्ञापकेन सिद्धानि । यत्खच्छान्तात्तर्हि इञ् प्रयोजनम् । यत् । श्वशुरस्यापत्यं श्वशुर्यः श्वशुर्यस्यापत्यं श्वाशुरिः श्वाशुरेर्यूनश्छात्राः श्वाशुराः । यत् । ख, कुलस्यापत्यं कुलीनः कुलीनस्यापत्यं कौलीनिः कौलीनेर्यूनश्छात्राः कौलीनाः । ख । छ, स्वसुरपत्यं स्वस्रीयः स्वस्रीयस्यापत्यं स्वास्रीयिः स्वास्रीयेर्यूनः छात्राःस्वास्रीयाः । एतान्यपि हि न सन्ति प्रयोजनानि । अत्रापि यूनि श्वशुर्यः कुलीनः स्वस्रीय इत्येव भवितव्यम् । उक्तमेतत् । अणिञोर्लुकि अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानमिति । अब्राह्मणगोत्रमात्रादित्युच्यते न चैतदब्राह्मणगोत्रमात्रम् । अब्राह्मणगोत्रमात्रादिति नायं पर्युदासः । यदन्यद् ब्राह्मणगोत्रमात्रादिति । किं तर्हि । प्रसज्य प्रतिषेधः । ब्राह्मणगोत्रमात्रान्नेति । अवश्यं चैतदेवं विज्ञेयम् । मायूरिः । कापोतिः । कापिञ्जलिरित्येवमर्थम् । एवं

णः । तस्यच्छात्रा इति प्राग्दीव्यतीयार्थविवक्षायामिञश्चेत्यणिष्यते । स च न प्राप्नोति । णान्तत्वात् । ततश्च वृद्धलक्षणे प्रवृत्ते परतो णस्य लुक् स्यादिति च्छश्रवणाप्रसङ्गः । भागवित्तेरिति । भगवित्तस्यापत्यमित्यत इञ् । ततो यूनि वृद्धाट्ठक् सौवीरेषु बहुलमिति ठक् । तस्य छात्रा इत्यर्थे ठको लुकीञश्चेत्यण् । तैकायनेरिति । तिकस्यापत्यमिति तिकादिभ्यः फिञ् । ततो यूनि फेश्छ चेति च्छः । यमुन्दश्च सुषामा च वार्ष्यायणिः फिञः स्मृता इति परिगणनं भाष्यकारेण फेश्छ चेत्यत्र नाश्रितमिति तैकायनेश्छो भवति । परिगणनाश्रये तु प्राप्नोति । तस्य छात्रा इति च्छे लुप्ते वृद्धलक्षणः छः । औपगवेरिति । उपगोरपत्येण् । ततो यूनीञ् तस्मिन् लुप्ते छः । किं पुनरिञो लुकः प्रयोजनं यदा तस्मिन्न लुप्ते पि सिद्धश्छो वृद्धलक्षण इत्याह वृद्धवदिति । वृद्धशब्दः पूर्वाचार्यसंज्ञा गोत्रस्य तत्र यूनो वृद्धवदतिदेशादिञो लुक्यसत्यण् स्यात् । कथं पुनर्यानीति । गार्ग्यायणानां समूह इत्यादौ गोत्रलक्षणो वुञिष्यते स न प्राप्नोति । ज्ञापकेनेति । राजन्याद्वुञ् मनुष्याच्चेति वक्ष्यमाणेन । तदेवमिञो लुका विनाप्यौपगवीया इति च्छस्य सिद्धत्वादनुदाहरणमेतत् । इदानीमिञ उदाहरणान्तरं दर्शयितुमाह यत्खच्छान्तादिति । श्वाशुरिरिति । आपत्यस्य च तद्धिते नातीति यलोपः । उणादीनामव्युत्पन्नत्वाद् न युवाभ्यामिति वृद्धिनिषेधः ऐजागमश्च न प्रवर्त्तते । कुलीन इति । कुलात्खः । स्वस्रीय इति । स्वसुश्छः । एतान्यपीति । लक्षणान्तरेण युवप्रत्ययस्य लुकः सिद्धत्वादित्यर्थः । न चैतदिति । अब्राह्मणशब्देन ब्राह्मणसदृशक्षत्रियादिग्रहणाच्छ्वशुरादिशब्दैश्च क्षत्रियादेरनभिधानादित्यर्थः । प्रसज्य प्रतिषेध इति । युवप्रत्ययमात्रस्य लुकं विधाय ब्राह्मणगोत्रात्परस्य स निषिध्यत इत्यर्थः । मायूरिरिति । मयूरस्य

Indira Gandhi National Centre for the Arts

तर्हि अण्ण्यौ सर्वत्र प्रयोजनम् । अण्, ग्लुचुकायनेरपत्यं माणवकः ग्लौचुकायनः ग्लौचुकायनस्य यूनश्छात्रा ग्लौचुकायनाः । ण्यश्च कापिञ्जलाद्यर्थम् । कापिञ्जलादेरपत्यं माणवकः कापिञ्जलाद्यः कापिञ्जलाद्यस्य यूनश्छात्राः कापिञ्जलादाः । प्राग्दीव्यतोधिकारे यूनो वृद्धवदतिदेशः * । प्राग्दीव्यतोऽधिकारे यूनो वृद्धवदातिदेशः कर्तव्यः । युवा वृद्धवद्भवतीति वक्तव्यम् । किं प्रयोजनम् । गार्ग्यायणानां समूहो गार्ग्यायणकं गार्ग्यायणानां किं चिद् गार्ग्यायणकम् । गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः । गोत्राश्रयो वुञ् यथा स्यात् । यदि वृद्धवदतिदेशः क्रियते । औपगवियूनश्छात्रा औपगवीया इतीञो गोत्र इत्यण् प्राप्नोति । यदि पुनर्युवा वृद्धवदित्यनेनानुत्पत्तिरतिदिश्येत कथं पुनर्युवा वृद्धवदित्यनेनानुत्पत्तिः शक्या निर्देष्टुम् । वतिनिर्देशोयम् । कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा । उशीनरवन्मद्रेषु यवाः सन्ति न सन्तीति, मातृवदस्याः कलाः सन्ति न सन्तीति । एवमिहापि युवा वृद्धवद्भवति न भवतीति । एवं वाक्यशेषं समर्थयिष्यामहे यथा गोत्रे युवप्रत्ययो न भवति । प्राग्दीव्यतोधिकारे यून्यपि न भवतीति । तद्वक्तव्यम् । यद्यप्येतदुच्यते । अथ वैतर्हि यूनि लुगित्येतन्न क्रियते । कथं तर्हि फक्फिञोरन्यतरस्यामिति । फक्फिञ्वर्ती युवा वा वृद्धवद्भवतीति वक्ष्यामि । यदा तर्हि न

पक्षिविशेषस्य गोत्र इञ् तदन्ताद्यूनि यञिञोश्चेति फक् । तस्य लुक् । ग्लुचुकायनेरिति । ग्लुचुकस्यापत्यं गोत्रमिति प्राचामवृद्धात्फिन्बहुलमिति फिन् । ततो यून्यण् । तस्य लुक्यणेव भवति । अन्यथा वृद्धत्वाच्छः स्यात् । कापिञ्जलादेरिति । कपिञ्जलादस्यापत्यमत इञ् । ततो यूनि कुर्वादिभ्यो ण्य इति ण्यः । तस्य लुकीञश्चेत्यण् भवति । अन्यथा छः स्यात् । प्राग्दीव्यत इति । प्राग्दीव्यतो येऽर्थास्तेषु विवक्षितेष्वित्यर्थः । वृद्धवदिति । गोत्रवदित्यर्थः । अन्यथा गोत्रसंज्ञाया युवसंज्ञया बाधितत्वाद् गोत्राश्रयकार्याप्रसङ्गः । गार्ग्यायणानामिति । गर्गस्यापत्यं गोत्रं गर्गादिभ्यो यञ् । तदन्ताद्यूनि यञिञोश्चेति फक् । तदन्तात्समूहे गोत्रोक्षोष्ट्रोरभ्रेति वुञ् । इदमर्थे गोत्रचरणाद् वुञिति वुञ् सास्य भक्तिरित्यत्रार्थे गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् इति वुञ् । औपगवेरिति । सत्यतिदेशे यूनि लुगित्यस्य प्रत्याख्यानादिञो लुगभावाद्वृद्धवदतिदेशादिञश्चेत्यणप्रसङ्गः । एतद्दोषपरिहारायाह यदि पुनरिति । यथा गोत्रे युवप्रत्ययो नोत्पद्यते यथा यून्यपि प्राग्दीव्यतीयार्थविवक्षायां युवप्रत्ययस्यानुत्पादादिञश्चेत्यण् भविष्यतीत्यर्थः । अतिदिश्येतेति । अतोयं दोषो न स्यादिति वाक्यशेषः । एवं वाक्यशेषमिति । उभयसंभवेन भवतीत्यध्याहरिष्यत इत्यर्थः । एवमित्यनेनानन्तरप्रक्रान्तो न भवतीति वाक्यशेषः परामृश्यते । तद्वक्तव्यमिति । ततश्च गौरवं स्यादिति भावः । अथ वै तर्हीति । एवं सतीत्यर्थः । एतेन गौरवं परिहृतम् । कथमिति । यूनि लुगित्यस्मिन्नकृते फक्फिञोरन्यतरस्यामित्येतदपि न कर्तव्यम् । विधेयकार्यानिर्देशात् । ततश्च गार्ग्यायणस्य छात्राः गार्गीयाः गार्ग्यायणीया इति रूपद्वयं न सिध्यतीति

Indira Gandhi National Centre for the Arts

वृद्धवत्तदा गार्ग्यायणानां समूहो गार्ग्यायणकम्। गार्ग्यायणानां किं चिद् गार्ग्यायणकम्। गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः। गोत्राश्रयो वुञ् न प्राप्नोति। यदि पुनर्युवा वृद्धवदित्यनेनार्थोऽतिदिश्यते। प्राग्दीव्यतोऽधिकारे यूनो वृद्धवदर्थो भवतीति। तद्वक्तव्यम्। यद्यप्येतदुच्यते। अथ वैतर्हि यूनि लुगित्येतन्न क्रियते। तत्कथं फक्फिञोरन्यतरस्यामिति। फक्फिञ्वर्ती युवार्थो वावृद्धवद्भवतीति वक्ष्यामि। यदा तर्हि न वृद्धवत्। तदा गार्ग्यायणानां समूहो गार्ग्यायणकम्। गार्ग्यायणानां किं चिद् गार्ग्यायणकम्। गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः। गोत्राश्रयो वुञ् न प्राप्नोति। एवं तर्हि राजन्याद् वुञ् मनुष्याच्च लौकिकं ज्ञापकं परम्। यदयं वुञ्विधौ राजन्यमनुष्ययोर्ग्रहणं करोति। तज्ज्ञापयत्याचार्यः लौकिकं परं गोत्रग्रहणमिति। युवा च लोके गोत्रमित्युपचर्यते। किं गोत्रोऽसि माणवक। गार्ग्यायणः। किं गोत्रोऽसि माणवक। वात्स्यायनः। तद्येतज् ज्ञाप्यते। औपगवेर्यूनश्छात्राः औपगवीयाः। गोत्राश्रय इञो गोत्रइत्यण् प्राप्नोति। सामूहिकेषु ज्ञापकम्। यदि सामूहिकेषु ज्ञापकम्। गार्ग्यायणानां किंचिद् गार्ग्यायणकम्। गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः। गोत्राश्रयो वुञ् प्राप्नोति। एवं तर्हि वुञ्विधौ ज्ञापकम्। यदि वुञ्विधौ ज्ञापकम्। शालङ्केर्यूनश्छात्राः। शालङ्काः। इञो गोत्र इत्यण् प्राप्नोति। अस्तु तर्ह्यविशेषेण। कथमौपगवेर्यूनश्छात्रा औपगवीयाः। गोत्रेणेञं विशेषयिष्यामः। गोत्रे य इञ् विहित इति॥

भावः। फक्फिञ्वर्तीति। वर्तनं वर्तः फक्फिञोर्वर्तः फक्फिञ्वर्तः स विद्यते यस्मिन् यूनि स वा वृद्धवत्। ततः पक्षे फक्फिञोरुत्पत्तिः पक्षेऽनुत्पत्तिरिति द्वैरूप्यसिद्धिः। यदा तर्हीति। गार्ग्यायणानां समूह इति विवक्षायां यदा वृद्धवदतिदेशात् फकोऽनुत्पत्तिस्तदा गार्ग्यकमिति सिध्यति। यस्मिंस्तु पक्षे वृद्धवदतिदेशाभावात् फक्श्रवणं तत्र गोत्रलक्षणो वुञ् न प्राप्नोति। इदानीमर्थातिदेशदर्शनायाह यदि पुनरिति। यूनि गोत्रत्वातिदेशाद् युवप्रत्ययस्याभावाल्लुग्न विधेय इत्यर्थः। यदयमिति। प्राग्गोत्रसंज्ञाया गोत्रे कुञ्जादिभ्य इत्यतो गोत्रग्रहणानुवर्तनाच्छास्त्रीयगोत्राभिधायिनौ राजन्यमनुष्यशब्दौ ततश्च गोत्रग्रहणेनैव ताभ्यां वुञः सिद्धत्वात् किं तयोर्ग्रहणेन। गृहीतौ तु ज्ञापयतो गोत्रग्रहणं लौकिकगोत्रपरमिति। राजन्यमनुष्यशब्दौ च लौकिके प्रयोगे जातिविशेषवाचित्वाल्लौकिकगोत्राभिधायिनौ न भवत इति कर्तव्यं तयोर्ग्रहणम्। लौकिकं च गोत्रमपत्यमात्रम्। परमिति। अपत्याधिकारादुत्तरमित्यर्थः। उपचर्यत इति। व्यवह्रियत इत्यर्थः। शालङ्केरिति। शलङ्कोरपत्यमिति बाह्वादेराकृतिगणत्वादिञ्। पैलादिषु शालङ्किशब्दपाठान्निपातनाच्छलङ्क्वादेशः। अत एव च निपातनाद् गोत्रेऽपि नडादिफक्ञ् न बाध्यते। ततो यूनि फक्। तस्य पैलादित्वाल्लुकि कृते इञन्तं यूनि वर्तत इति गोत्राश्रय इञश्चेत्यण् न प्राप्नोति। गोत्रेणेञमिति। कण्वादिभ्यो गोत्र इत्यत्र गोत्रग्रहणेन पौत्रप्रभृति गोत्रं गृह्यते। गोत्रप्रत्ययानुवादेन छात्राण्विधीयते। कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितस्तदन्तेभ्योऽण् भवतीति। कण्वादयश्च गर्गादिषु

Indira Gandhi National Centre for the Arts

तस्यापत्यम् ॥ ९२ ॥ तस्येदमित्यपत्ये ऽपि ॥ तस्येदमित्यपत्ये ऽपि अण् सिद्धः । तस्येदंविशेषा ह्येते अपत्यं समूहो विकारो निवास इति । किमर्थं तर्हीदमुच्यते । बाधनार्थं कृतं भवेत् ॥ ये तस्य बाधकास्तद्बाधनार्थम् । कथं पुनरशैषिकः शैषिकं बाधेत । उत्सर्गः शेष एवासौ ॥ यो ह्युत्सर्गः सोपि शेष एव । अथैतस्मिन् बाधकबाधनार्थे सति किं प्रयोजनम् । वृद्धान्यस्य प्रयोजनम् । वृद्धानि प्रयोजयन्ति । भानोरपत्यं भानवः । श्यामगोरपत्यं श्यामगव इति । कथं पुनरिच्छतापि अपवादः प्राप्नुवन् शक्यो बाधितुम् । तस्यग्रहणसामर्थ्यात् । किमिदं भवानध्यारुह्य तस्यग्रहणस्य प्रयोजनमाह न पुनः सर्वस्यैव योगस्य । अवश्यमुत्तरार्थमर्थनिर्देशः कर्तव्यः । समर्थविभक्तिरपि तर्हि अवश्यमुत्तरार्था प्रतिनिर्देष्टव्या । एवं तर्हि योगविभागकरणसामर्थ्यात् । इतरथा हि तस्यापत्यमत इञ् भवतीत्येव ब्रूयात् । पुल्लिङ्गेनायं निर्देशः क्रियते एकवचनान्तेन च । तेन पुल्लिङ्गादेवोत्पत्तिः स्यात् । एकवचनान्ताच्च । स्त्रीनपुंसकलिङ्गाद् द्विवचनबहुवचनान्ताच्चेदं न स्यात् । तद्धितार्थनिर्देशे लिङ्गवचनमप्रमाणं तस्याविवक्षितत्वात्* ।

पठितास्तत्र च गोत्र इति वर्तते । अपत्याधिकारे च गोत्रग्रहणादेव शास्त्रीयं गोत्रं गृह्यते । तदेव कण्वादिभ्यो गोत्र इत्यत्रानूद्यते । तदेवेञश्चेत्यत्रानुवर्तते । तेन गोत्रे य इञ् विहितस्तदन्तादण् विधीयमानः शालङ्केर्भविष्यति न त्वौपगवेरित्यर्थः । नन्वौपगविशब्दे ऽनेन सूत्रेणाञो लुका भाव्यम् । नैष दोषः । पूर्वमेवास्योदाहरस्य प्रत्याख्यानादन्यथासिद्धत्वादित्यभिप्रायेणेदमुक्तम् ॥ ६० ॥

तस्यापत्यम् ॥ तस्येदमिति । इदमिति संबन्धिसामान्ये सर्वविशेषान्तर्भावादपत्यस्याप्यन्तर्भूतत्वादित्यर्थः । बाधका इति जातौ बहुवचनम् । तस्येदमित्यनेन विधीयमानस्याणो बाधकश्छस्तस्य बाधनार्थमिदं सूत्रमित्यर्थः । कथं पुनरिति । एकस्मिन्नर्थे प्राप्तौ सत्यां बाध्यबाधकभावो भवति । तत्र शेषे ऽर्थे विधीयमानश्छः, अण् त्वनेनापत्य इति भिन्नार्थत्वादनयोः कथं बाध्यबाधकभाव इति प्रश्नः । उत्सर्ग इति । प्रकृतिसामान्यसंबद्धः सामान्यभूतो ऽपत्यार्थ उक्तः । अथ वेदमिति सामान्यभूतोर्थ उत्सर्गस्तदन्तर्भावादसत्यस्मिन् पृथग्योगे ऽपत्यार्थ उत्सर्गः शेष एव भवति । अनुपयुक्तत्वादित्यर्थः । कथं पुनरिति । प्रकृतिसामान्याद्विधानादणेवोत्सर्गः । प्रकृतिविशेषात्तु विधानाच्छोऽपवाद इति मत्वा प्रश्नः । तस्य ग्रहणसामर्थ्यादिति । एकदेशेन सूत्रं लक्ष्यते । तेन पृथक्सूत्रारम्भादित्यर्थः । पृथक्सूत्रे हि अपत्यार्थस्य शेषत्वाभावाच्छस्याभावः । इतरोऽज्ञाताभिप्राय आह किमिदमिति । अध्यारुह्येति । तत्रैव तात्पर्यं कृत्वेत्यर्थः । सिद्धान्तवादी स्वाभिप्रायं दर्शयितुमाह एवं तर्हीति । पुल्लिङ्गेनेति । यद्यपि नपुंसके ऽपि तस्येतिरूपं तथापि पुंनपुंसकयोर्युगपन्निर्देशस्य कर्तुमशक्यत्वात् कामाचारादेवमुक्तम् । स्त्रीनपुंसकलिङ्गादिति । सुमातुरपत्यं सौमात्रः । क्षत्रस्यापत्यं क्षात्रिरित्यादावित्यर्थः । तद्धितार्थनिर्देश इति । ताद्धितप्रकारणादेवमुक्तम् । सर्वत्रैव हि शास्त्रे ऽस्मिन्नन्तरीयकत्वादुपात्तं लिङ्गसंख्यं न विवक्ष्यते । क्व चित्संख्या तु विवक्ष्यते । यथा सुप्सुपेति । अप्रमाणमिति । तद्वशात्कार्यस्य विधिनिषेधौ न भवत

Indira Gandhi National Centre for the Arts

तद्धितार्थनिर्देशे लिङ्गवचनमप्रमाणम्। किं कारणम्। तस्याविवक्षितत्वाद्। नात्र निर्देशस्तन्त्रम्। कथं पुनस्तेनैव च नामानिर्देशः क्रियते। तच्चातन्त्रं स्यात्। तत्कारी च भवांस्तद्द्वेषी च नान्तरीयकत्वादत्र पुल्लिङ्गेन निर्देशः क्रियते एकवचनान्तेन च। अवश्यं कया चिद्विभक्त्या केन चिद्वचनेन निर्देशः कर्तव्यः। तद्यथा। कश्चिद् धान्यार्थी शालिकलापं सतुषं सपलालमाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालानुत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान् सशकलान् सकण्टकानाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय शकलकण्टकानुत्सृजति। एवमिहापि नान्तरीयकत्वात्पुल्लिङ्गेन निर्देशः क्रियते। एकवचनान्तेन च। न ह्यत्र निर्देशस्तन्त्रम्। सर्वनामनिर्देशे विशेषाऽसंप्रत्ययः समान्यनिर्देशात् *। सर्वनामनिर्देशे विशेषासंप्रत्ययः। किं कारणम्। सामान्यनिर्देशात्। सर्वनाम्नायं निर्देशः क्रियते। सर्वनाम च सामान्यवाचि। तेन सामान्यवाचिन एवोत्पत्तिः स्याद् विशेषवाचिनो न स्यात्। सामान्यचोदनास्तु विशेषेषु *। सामान्यचोदनास्तु विशेषेष्ववतिष्ठन्ते। तद्यथा। गौरनुबन्ध्योऽजोऽग्नीषोमीयइति। आकृतौ चोदितायां द्रव्ये आरम्भणालम्भनप्रोक्षणविशसनादीनि क्रियन्ते। विषम उपन्यासः। अस्ति कारणं येनैतदेवं भवति। किं कारणम्। असंभवात् आकृतावारम्भणादीनां संभवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरम्भणालम्भनविशसनादीनि क्रियन्ते। इदमप्येवं जातीयकमेव। असंभवात् सामान्यवाचिन उत्पत्तौ विशेषवाचिन उत्पत्तिर्भविष्यति। अपत्याभिधाने स्त्रीपुल्लिङ्गस्याप्रसिद्धिर्नपुंसकलिङ्गत्वात् *। अपत्याभिधाने स्त्रीपुल्लिङ्गस्याप्रसिद्धिः। किं कारणम्। नपुंसकलिङ्गत्वात्। अपत्यं नपुंसकलिङ्गं तेन नपुंसकलिङ्गस्यैवापत्याभिधानं स्यात्। स्त्रीपुँल्लिङ्गस्य न स्यात्। ननु चेदं पुरस्तादेव चोदितं परिहृतं च उत्पत्तिस्तत्र चोद्यते। इह पुनरुत्पन्नेनाभिधानं चोद्यते। सिद्धं तु प्रजनस्य विवक्षितत्वात् *। सिद्धमेतत्। कथम्। प्रजनस्य विवक्षितत्वात्। प्रजनोऽत्र विवक्षितः। स च सर्वलिङ्गः। किं पुनः कारणं समा-

---

इत्यर्थः। भावसूत्रे विस्तरेण भाष्यमेतद् व्याख्यातमिति तत एवावधार्यम्। सामान्यनिर्देशादिति। तस्येति निर्देशात्तच्छब्दादेव सामान्यवाचिनः प्रत्ययः स्यान्नोपग्वादिभ्य इत्यर्थः। सामान्यचोदना इति। विशेषाणामेव कार्यसिद्ध्यर्थं सामान्यमुपादीयते न तु स्वार्थमित्यर्थः। इदमपीति। अपत्यमित्यनेनैव सम्बन्धिशब्दत्वादपत्यवन्मात्रस्याक्षेपात्सामान्येनापत्यस्य विशेषणविशेष्यभावायोगादिहापि सामान्येन विशेषा एवं गृह्यन्ते। यदा तु प्रकरणवशाद्विशेषे सर्वनाम वर्तते तदा तस्मादपि प्रत्ययो भवति तादायनिरिति। नपुंसकलिङ्गस्येति। औपगवमित्यनेनैवापत्यस्याभिधानं स्यात्। औपगव औपगवीत्येवं न स्यादित्यर्थः। प्रजन इति। प्रसव-

Indira Gandhi National Centre for the Arts

नायाम्प्रवृत्तौ अपत्यं नपुंसकलिङ्गं प्रजनः सर्वलिङ्गः। एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम् *। एकार्थत्वेपि शब्दान्यत्वाल्लिङ्गान्यत्वं दृश्यते तद्यथा। पुष्यः तारकानक्षत्रं गेहं कुटी मठ इति। अवयवान्यत्वाच्च *। अवयवान्यत्वाच्च लिङ्गान्यत्वं दृश्यते। तद्यथा। कुटी कुटीरः शमी शमीरः। शुण्डा शुण्डारः। अवयवान्यत्वात्किल लिङ्गान्यत्वं स्यात्। किं पुनर्यत्र शब्दान्यत्वमपि॥

एको गोत्रे॥ ९३॥ किमर्थमिदमुच्यते॥ उत्पादयितारं प्रत्यपत्ययोगात् तस्य चाभिसम्बन्धस्य विवक्षितत्वादेकवचनं गोत्रे *। उत्पादयितोत्पादीयताऽपत्येन युज्यते तस्य च विवक्षितत्वात्। उत्पादयितुः स चाभिसम्बन्धो विवक्षितः। उत्पादयितारं प्रत्यपत्ययोगात्तस्य चाभिसम्बन्धस्य विवक्षितत्वात्। उत्पादयितुरुत्पादयितुरुत्पादयितुरपत्याभिधाने ऽनेकः प्रत्ययः प्राप्नोति। इष्यते चैक एव स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्येकवचनं गोत्रे। एवमर्थमिदमुच्यते।

मात्रं विवक्षितं न तु लिङ्गसंख्ये अपीत्यर्थः। स चेति। सन्ततिरपत्यं प्रसव इति सर्वलिङ्गस्य शब्दैरभिधीयमानस्य दर्शनादित्यर्थः। समानायामिति। एकस्मिन्नर्थं इत्यर्थः। अपत्यमिति। अपत्यशब्दप्रत्याय्यमानमित्यर्थः। प्रजन इति। सर्वलिङ्गैः प्रत्याय्यमानत्वात्सर्वलिङ्गइत्युच्यते। एकार्थ इति। एकोर्थः सर्वालिङ्गः स च केन चिच्छब्देन प्रत्याय्यमानः केन चिदेव लिङ्गेन युक्तः प्रतीयते। अवयवान्यत्वादिति। स्वार्थिकस्यापि प्रत्ययस्योत्पत्तौ भिन्नावयवत्वाद्भिन्नशब्दप्रत्याय्यमानत्वादेकस्यैवार्थस्य लिङ्गभेदोवगम्यते किं पुनरत्यन्तभिन्नशब्दप्रत्याय्यमानस्य लिङ्गभेदावगतिर्न स्यादित्यर्थः ६२॥

एको गोत्रे॥ एकशब्दोयमन्यप्रधानासहायसंख्याप्रथमसमानवाची इह तु संख्यावाची प्रथमवाची वा गृह्यते इत्येव निर्णयोऽर्थान्तरासम्भवात्। किमर्थमिति। क्रियमाणे पि सूत्रद्वये सर्वमिष्टं न सिध्यतीति प्रश्नः। इह पौत्रप्रभृतावपत्ये विवक्षिते मूलप्रकृतेरेव गर्गादेः प्रत्यय इष्यते। न त्वनन्तरापत्यवाचिनो गार्गिप्रभृतेर्नापि गोत्रप्रत्ययान्ताद् गार्ग्यप्रभृतेः। यूनि तु गोत्रप्रत्ययान्तादेवेष्यते न तु मूलप्रकृत्यनन्तरयुवभ्यः। स्त्रियां तु युवकार्यं नेष्यते। अपि तु गोत्रकार्यमेव। एतत्सर्वमेतस्मात्सूत्रद्वयाद्यथा न सिध्यति तथा क्रमेण वक्ष्यते। वार्तिककारः प्रयोजनं तावदाद्यस्य सूत्रस्य कथयितुमाह उत्पादयितारमिति। प्रतिशब्दो लक्षणे वाक्यकारेण प्रयुक्तः। उत्पादयितृसामान्यविवक्षया च द्विर्वचनं नाकारि भाष्यकारेण तु भेदविवक्षया वीप्सामाश्रित्य द्विर्वचनं कृतम्। अपत्ययोगादिति। अपत्यस्य योग इति कर्तृषष्ठीसमासः। उत्पादयिता चात्र कर्मत्वेन न विवक्षितः किं तर्हि प्रतिशब्दयोगविवक्षायां कर्मप्रवचनीययुक्ते द्वितीयया निर्दिष्टः। अन्यथोपपदविभक्तेः कारकविभक्तिर्बलीयसीति कर्मणि कृद्योगलक्षणा षष्ठी स्यात्। तस्य चेति। सन्नप्यर्थो यदा लोके न विवक्ष्यते तदा नासौ शब्दसंस्कारनिमित्तं भवति। अपत्येन योगस्तु लोके उत्पादयितुरेव विवक्षित इति तन्निमित्तानेकप्रत्ययप्रसङ्ग इत्यर्थः। एकवचनमिति। एकस्य प्रत्ययस्य प्रतिपादनमित्यर्थः। यावन्त्यापत्यानि तावतां प्रत्ययानां प्रसङ्गे सति एक एव प्रत्ययो

Indira Gandhi National Centre for the Arts

कथं पुनर्ज्ञायते उत्पादयितोत्पादयितापत्येन युज्यते इति। एवं हि दृश्यते लोके पितामहस्योत्सङ्गे दारकमासीनं कश्चित् कंचित्पृच्छति कस्यायं दारक इति। स आह। देवदत्तस्य यज्ञदत्तस्य चेति। उत्पादयितारं व्यपदिशति नात्मानम्। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्र प्रत्ययान्ताद्गोत्रे प्रतिषेधो गोत्रे नियतत्वात् *। तत्र प्रत्ययान्ताद्गोत्रे प्रतिषेधो वक्तव्यः। औपगवस्यापत्यमिति। किं कारणम्। गोत्रे नियतत्वात्। गोत्रे ह्ययं नियमः क्रियते। तेन यश्चासौ यथा जातीयकश्च गोत्रे प्रत्ययः प्राप्नोति स एकः स्यात्। कश्च प्राप्नोति। यः प्रत्ययान्तात्। परमप्रकृतेश्चोत्पत्तिः *। परमप्रकृतेश्चोत्पत्तिर्वक्तव्या। अयोगाद्धि

यथा स्यादित्येवमर्थमित्यर्थः। गोत्र इति च जात्यपेक्षयैकवचनं तेन गोत्रसमुदाये प्रत्ययसमुदायो निवार्यते। कथमिति। एकमप्यपत्यं पितृपितामहादीनां सर्वेषां सम्बन्धि भवति। तथा चापत्यं पौत्रप्रभृतिगोत्रमिति सूत्रकारेण सामानाधिकरण्येन निर्देशः कृत इति प्रश्नः। एवं हि दृश्यत इति। शब्दार्थसम्बन्धे लोकव्यवहार एव प्रमाणं नान्यत्। तत्र च प्रष्टृप्रतिवक्त्रोरुत्पादयितृविषय एव प्रश्नप्रतिवचने इति तत एतदवधार्यत इत्यर्थः। अपत्य पौत्रप्रभृतीति सामानाधिकरण्यं तु गौणमाश्रयिष्यते। तस्येति। अनन्तरोक्ते प्रयोजने अभिमते सूत्रस्यासामर्थ्यान्नापत्यादिति वक्तव्यम्। अपत्यप्रत्ययान्तादपत्ये प्रत्ययाभावार्थम्। गोत्र इति। यदैको गोत्रे इति गोत्रशब्दोपादानेन नियमः कृतः तदायं प्रतिषेधो वक्तव्यः। यदि त्वेकोपत्य इति उच्यते तदाऽपत्यप्रत्ययान्तादपत्ये नैवापरः प्रत्ययः स्यादपत्यजातावेकस्यैव विधानात्। एको गोत्र इति तूच्यमाने तदानन्तरापत्ययान्ताद् गोत्रप्रत्ययः स्यादेव। तुल्यजातीयापेक्षो हि नियमः। तेन गोत्रप्रत्यय एवापरो निवार्यते। ततश्च गोत्रप्रत्ययान्तादपरो गोत्रप्रत्ययो मा भूत्। अनन्तरापत्यप्रत्ययान्तात्तु गोत्रे प्रत्ययः स्यादेवेति भावः। अथ वा यदोत्पादयितैवापत्येन युज्यते न तु पितामहादिरेको गोत्र इत्येतच्च नियमार्थं तदा यतोनेकप्रत्ययप्रसङ्गो गोत्राकृतौ विवक्षितायां तस्मादेक एवेति नियम्यते। अपत्यप्रत्यान्तादेव च क्रमेणापत्यपरंपराविवक्षायामनेकप्रत्ययप्रसङ्गात्तत एवैकाभ्यनुज्ञानद्वारेणानेकानिवारणं स्यादिति भावः। यश्चासौ यथाजातीयकश्चेति। यत्प्रकृतिरित्यर्थः। उभयोपादानं सर्वविशेषयोगप्रतिपत्त्यर्थम्। परमप्रकृतेरिति। गर्गादेरित्यर्थः। अयोगादिति। उत्पादयितर्यपत्ययुक्ते गर्गस्य पौत्रादिना अपत्यापत्यवत्संबन्धाभावात्प्रत्ययो न प्राप्नोति। यद्यपि गर्गादिभ्यो यञिति विधानसामर्थ्याद् गर्गादिभ्यो गोत्रप्रत्ययाः सिध्यन्ति तथापि ये ऽणादयोऽनन्तरापत्ये सावकाशास्ते परमप्रकृतेरुपग्वादेर्गोत्रे न प्राप्नुवन्तीति विवक्षितम्। अथोच्यते। एको गोत्र इत्येतत्परमप्रकृतेर्विध्यर्थं भविष्यतीति नियमस्तर्हि न प्रकल्पेत। ततश्चापत्यमालायां प्रत्ययमालाप्रसङ्गः। ननु परमप्रकृतेः प्रत्ययोत्पत्तावुच्यमानायामपि प्रकृतिप्रत्ययार्थयोः परस्परायोगस्तदवस्थ एवेति प्रयोगो नैव स्यात्। नैष दोषः। पारम्पर्येण संबन्धसद्भावात्प्रयोगो भविष्यति। साक्षात् संबन्धे तु प्रत्ययस्य चरितार्थत्वात् गौणसंबन्धाश्रयेणोत्पत्तिर्न स्यादिति वक्तव्या। इदानीमेतद् दोषद्वयं वक्ष्यमाणेन दोषेण

न प्राप्नोति । एतयोश्चैव परिहारः । पठिष्यति ह्याचार्यः । यूनि चान्तर्हिते प्राप्तिरिति । तस्य च । यथा तत्प्रत्ययान्तं यथा तदेव विकारावयवप्रत्ययान्तं द्वितीयं तृतीयं च विकारं संक्रामति । एवमिहापि तदेवापत्यप्रत्ययान्तं द्वितीयं च तृतीयं चापत्यं संक्रमिष्यति । भवेत्सिद्धम् । औपगवस्यापत्यमौपगवः । यत्र स एवानन्तर इष्यते स एव गोत्रे । इदं तु खलु न सिध्यति । गर्गस्यापत्यं गार्ग्य इति । अत्र ह्यन्योनन्तर इष्यते । अन्यो गोत्रः । स्त्रियां चानियमः * । स्त्रियां च युवत्यां नियमो न प्राप्नोति । औपगवीयं माणविका । नियमाद्धि स्त्री पर्युदस्यते । एको गोत्रे गोत्राद्यून्यस्त्रियामिति । कतरस्मिन् पक्षेऽयं दोषः । उत्पादयितर्यपत्ययुक्ते । उत्पादयितरि तावत् अपत्ययुक्ते न दोषः । उत्पादयितर्यपत्य-

---

सह परिहर्तुमाह एतयोश्चेति । चशब्दो वक्ष्यमाणापेक्षया समुच्चयार्थः । तत्प्रत्ययान्तमिति । ञितश्च तत्प्रत्ययादित्येतत् सूत्रं प्रत्याख्यायते । यो हि कपोतस्य तदवयवस्य तद्विकारस्य वावयवो विकारो वासोऽभेदोपचारात् कापोतस्याप्यवयवो विकारश्च भवतीति कापोत एव भविष्यतीति नार्थो मयड्बाधनार्थेन ञितश्च तत्प्रत्ययादित्यनेन सूत्रेण । तत्र यथा कपोतस्य विकारावयवाभ्यामभेदोपचारात्कापोतस्य वेत्युभयथेष्टं सिध्यति । तथेहाप्युपग्वौपगवयोरौपगवतदपत्ययोर्वा ऽभेदोचारात्पौत्रप्रभृतिरौपगवशब्देनाभिधास्यते । गार्ग्यायणापत्यं च गार्ग्यायणशब्देनेति दोषत्रयमपि परिहृतम् । अस्य परिहारस्याव्याप्तिं दर्शयितुमाह भवेदिति । अत्र ह्यन्य इति । यदि गर्गौ गर्गत्वमारोप्यते तदा गार्गिरेव भेदसंबन्धस्य निवृत्तत्वाद् गर्गशब्दवाच्य इति गार्गेरपत्यं गार्गिरेव स्यात् । गार्ग्यश्चेष्यते । अथ गार्गितदपत्ययोरभेदाध्यवसायस्तथापि गार्गेरपत्यं गार्गिः प्राप्नोति । गर्गादिभ्यो यञिति वचनसामर्थ्याद् गार्ग्यः स्यात् तथापि गार्गिरपि स्यात् । तस्मादपत्याविषये दोषवानभेदोपचार इति भेद एवाश्रयणीयः । तथा च प्रत्ययान्तात्प्रतिषेधः । परमप्रकृतेश्चोत्पत्तिर्वक्तव्येति स्थितमेतत् । स्त्रियां चेति । चशब्दो दोषसमुच्चयार्थः । तत्रानन्तरापत्यस्त्रियां गोत्रस्त्रियां चानियमप्रसङ्गाभावात्सामर्थ्यात्पौत्रप्रभृतेरपत्यं स्त्री गृह्यते । युवसंज्ञया गोत्रसंज्ञाया एकसंज्ञाधिकारे वृद्धं युवेति वचनात्तुशब्दाद्वा नियमार्थाद्बाधितत्वात् स्त्रियाः पौत्रप्रभृतेरपत्यस्य गोत्रसंज्ञा नास्तीत्येको गोत्र इत्येष नियमो नास्ति । अस्त्रियामिति निषेधाद् गोत्राद्यूनीत्यपि नास्ति नियमस्तथा च स्त्रियां विवक्षितायामनेकप्रत्ययप्रसङ्गः । औपगवस्यापत्यं स्त्रीत्यत इञिती‌ञ् प्राप्नोति । इतो मनुष्यजातेरिति ङीष् इञन्ताच्च प्राप्नोति । गोत्रं च चरणैः सहेत्यत्र शास्त्रीयस्य गोत्रस्य ग्रहणात् स्त्रियाश्चास्या गोत्रसंज्ञाया अभावात् एतच्चेत्र उपसंख्यानमजात्यर्थमित्येतदनपेक्ष्यैवोदाहृतम् । गोत्रलक्षणश्च यञादिः पौत्र्यामेव स्यात् । अजीवद्वंश्यायां च स्त्रियां पौत्रप्रभृतेरपत्ये । जीवद्वंश्यायां तु न स्यात् । अपत्यसामान्यलक्षण एव तु स्यात् । नियमादिति । सामान्यापेक्षमेकवचनं नियमद्वयादित्यर्थः । कतरस्मिन्निति । येनोद्भावितो दोषस्तदीयोयं न प्रश्नः । विरोधात् । तर्हि पक्षप्रविभागदर्शनेन भाष्यकारोनन्तरोक्तमेवार्थं प्रश्नपूर्वकं विवृणोति उत्पादयितरि तावदिति । अनियम इति

युक्ते न सर्वत उत्पत्त्या भवितव्यम् । तत्र नियमो नोपपद्यते । असति नियमे नैष दोषः । सर्वेषु तर्ह्यपत्ययुक्तेष्वयं दोषः । सर्वेषु तर्ह्यपत्ययुक्तेषु सर्वत उत्पत्त्या भवितव्यम् । तत्र नियम उपपन्नो भवति । सति च नियम एष दोषः । उत्पादयितरि चापत्ययुक्ते स्त्रिया युवत्याभिधानं न प्राप्नोति । किं कारणम् । गोत्रसंज्ञा युवसंज्ञां बाधते । गोत्राद्यूनि चास्त्रियां प्रत्ययो विधीयते । यूनि चान्तर्हितेऽप्राप्तिः * । यूनि चान्तर्हिते नियमस्याप्राप्तिः । गार्ग्यायणस्यापत्यमिति । कतरस्मिन् पक्षेऽयं दोषः । सर्वेष्वपत्ययुक्तेषु । सर्वेषु अपत्ययुक्तेषु तावन्न दोषः । सर्वेष्वपत्ययुक्तेषु सर्वत उत्पत्त्या भवितव्यम् । तत्र नियम उपपन्नो भवति । सति च नियमे नैष दोषः । उत्पादयितर्यपत्ययुक्तेऽयं दोषः । उत्पादयितारि तर्ह्यपत्ययुक्ते परमप्रकृतेरनन्तराद् गोत्राच्चायोगान्न प्राप्नोति । यूनश्च न प्राप्नोति । किं कारणम् । गोत्रादिति नियमात् । सन्तु तर्हि सर्वेऽपत्ययुक्ता इति । कथं पुनर्ज्ञायते सर्वेऽपत्ययुक्ता इति । एवं हि याज्ञिकाः पठन्ति

यदुक्तं तत्र वाक्छलमुद्भावयति । यदोत्पादयितुरेवापत्येन योगो नान्यस्य तस्मिंश्च विवक्षिते एकस्या एव प्रकृतेरेक एव प्रत्ययः प्राप्नोति नानेकस्तदा सूत्रद्वयं नैव नियमार्थं किं तर्हि विध्यर्थमिति किमुच्यते स्त्रियां चानियम इति । प्रत्ययमालाप्रसङ्गदोषस्तु गोत्रलक्षणप्रत्ययाप्रसङ्गदोषश्च स्थित एव सर्वेष्विति । वक्ष्यमाणेन न्यायेन सर्वे अपत्येन युज्यन्त इति पक्षोपपत्तिः । इदानीं वाक्छलं परिहरति उत्पादयितरि चेति । च शब्दो न केवलं पक्षान्तरे यावदस्मिन्नपीत्यस्यार्थस्य द्योतनार्थः । अभिधानं न प्राप्नोतीति । गोत्रविषयेण यञादिप्रत्ययेनेत्यर्थः । अयमेवात्रानियमो विवक्षितः । एको गोत्र इत्येतन्नियमपूर्वकं स्त्रिया गोत्रप्रत्ययेनाभिधानं न प्राप्नोतीत्येषोऽर्थोऽत्र विवक्षित इत्यर्थः । यूनि चेति । चतुर्थादिना व्यवहितं पञ्चमादावित्यर्थः । अत्रापि पूर्ववत्प्रश्नपूर्वकं पक्षप्रविभागेन विवरणं कर्त्तुमाह कतरस्मिन्निति । तत्र नियम इति । गोत्रादेव यूनीति भावः । परमप्रकृतेरिति । पञ्चमस्य त्रिभिरपत्यापत्यवत्सम्बन्धाभावादित्यर्थः । यूनश्चेति । चतुर्थादित्यर्थः । गोत्रादिति । चतुर्थस्य युवत्वाद् गोत्रसंज्ञाया अभावः । ननूत्पादयितर्यपत्ययुक्ते नियन्तव्यस्याभावाद् गोत्राद्यूनीति विध्यर्थं भविष्यति । तत्रानन्तरे यूनि गोत्रात्सिद्ध एव प्रत्यय इति व्यवहिते यूनि गोत्रेण तस्यायोगादप्राप्तः प्रत्ययो विधास्यते । तत्किमुच्यते यूनि चान्तर्हितेऽप्राप्तिः प्रत्ययस्येति । उच्यते । उत्पादयितर्यपत्ययुक्ते गोत्रसमुदाये प्रत्ययमालाप्रसङ्गनिवृत्त्यर्थमेको गोत्र इति सूत्रं यथा नियमार्थम् । एवं युवसमुदाये युवसामान्ये वा युवशब्देनोच्यमाने गोत्रादगोत्राच्च प्रत्ययप्रसङ्गे गोत्रादेव यूनीति नियमे क्रियमाणे विध्यर्थत्वाभावाद्युक्तमुक्तं यूनि चान्तर्हित इति । सन्तु तर्हीति । तेन व्यवहितेऽपि यूनि गोत्रादेवेति वचनाद् गोत्रप्रत्ययो भविष्यतीति नास्त्ययं दोषो यूनि चान्तर्हित इति । दशापुरुषानूकमिति । अनुपूर्वात्कायतेरनूकानमनुक इति घञर्थे कविधानमिति कः । अन्येषामपीति दीर्घत्वम् । दशापुरुषा अस्मिन्ननूक इति बहुव्रीहिः दशापुरुषोऽनूकोऽस्मि-

दशपुरुषानूकं यस्य गृहे शूद्रा न विद्येरन् स सोमं पिबेदिति । यदि च सर्वेऽपत्ययुक्ता भवन्ति । तत एतदुपपन्नं भवति । कथं यदुक्तं पितामहस्योत्सङ्गे दारकमासीनं कश्चित्कं चित्पृच्छति कस्यायमपत्यमिति स आह देवदत्तस्य यज्ञदत्तस्य वेति उत्पादयितारं व्यपदिशति नात्मानमिति । उत्पत्तिस्तस्य विवक्षिता सर्वेषां नेदमपत्यं देवदत्तस्त्वस्योत्पादयितेति । अथ सर्वेष्वपत्ययुक्तेषु किमनेन क्रियते एको गोत्र इति । सर्वेषामपत्ययोगात् प्रत्ययान्ताद् गोत्रे प्रतिषेधार्थमेको गोत्रे * । सर्वेषामप्यपत्ययोगात् प्रत्ययान्ताद्गोत्रे प्रतिषेधार्थमेको गोत्र इत्युच्यते । अस्ति प्रयोजनमेतत् । किं तर्हीति । तत्र नतु ज्ञायते क एको भवति । यो वा परमप्रकृतेर्यो वानन्तरादिति । नियमानुपपत्तिश्चानियमश्च नोपपद्यते । किं कारणम् । न ह्येकस्मिन्नपत्येऽनेकप्रत्ययप्राप्तिः * । नह्येकस्मिन्नपत्येऽनेकः प्रत्ययः प्राप्नोति । किं तर्हि । अपत्यान्तरे शब्दान्तरात्प्रत्ययान्तरप्राप्तिः *। अपत्यान्तरे अपत्यान्तरे शब्दान्तराच् शब्दान्तरात् प्रत्ययान्तरं प्रत्ययान्तरं प्राप्नोति । फगन्तादिञ् इञन्तात्फगिति । फगिञोर्दाशतयी प्रत्ययमाला प्राप्नोति । कतरस्मिन्

न्निति पुनर्बहुव्रीहिः दशपुरुषानुसंशब्दनं दशसु पुरुषेष्विति यावत् । शूद्रा इति । विवाहिताः । शूद्रा वेदी पतत्यध इति वचनात्पातहेतुः शूद्रा । एकस्मिश्च पतिते सर्वेषां च पात इत्येतद्दशपुरुषानूकशब्देनोक्तं भवति । ततश्चार्थादेकस्यैव सर्वान् प्रत्यपातहेतुत्वादपत्यत्वमित्युक्तं भवति । नन्वेकस्यैवापत्योत्पत्तौ व्यापारात्कथं तेनान्येषां सम्बन्धः । क्रियागर्भो हि सर्वत्र सम्बन्धो नान्यथेति उद्घुष्यते । नैषः दोषः । पुत्रोत्पादनमेव पौत्राद्युत्पत्तौ व्यापारः तदन्तरेण तस्यासम्भवात् । अपत्यं पौत्रप्रभृतीतिमुख्यं सामानाधिकरण्यमस्मिन् पक्ष उपपद्यते । पूर्वत्र तु पक्षे गौणं सामानाधिकरण्यं स्यादपत्यापत्यस्यापत्यत्वोपचारात् । उत्पत्तिस्तस्येति । सामान्यशब्दस्यापि क्वचिद्विशेषवृत्तिदर्शनात् । यथा गोमण्डले स्थितं गोपालकं कश्चित्पृच्छति गां पश्यसीति । सर्वेषामिति । यदा गार्गस्य पौत्रप्रभृति सर्वेषां गर्गगार्गिगार्ग्याणामपत्यं भवति तदा गार्गिगार्ग्याभ्यां प्रत्ययो मा भूद् गर्गशब्दादेव यथा स्यादिति एवमर्थमेको गोत्र इत्येतदित्यर्थः । न तु ज्ञायत इति । एक इति सामान्येनोपदानाद्विशेषस्यानवगम इत्यप्रतिपादकत्वात्सन्देहलक्षणमप्रामाण्यं प्रसक्तमित्यर्थः । उत्पादयितरि त्वपत्ययुक्ते क्रमेण सम्बन्धविवक्षायां गोत्रसमुदाये प्रत्ययमालाप्रसङ्गे एक एव भवतीत्युच्यमाने य एव परमप्रकृतेः प्राप्नोति स एव भवतीति नास्ति तत्रैकविशेषाज्ञानलक्षणो दोषः । न ह्येकस्मिन्निति । एकेनैव तस्यार्थस्योक्तत्वाद् यस्मिन्नपत्ये एकः प्रत्ययः क्रियते तस्मिन्नेव नास्त्यपरस्य प्रत्ययस्य प्रसङ्ग इति तन्निवारणमनर्थकमेवेत्यर्थः । अपत्यान्तर इति । सामान्यापेक्षं वार्त्तिकएकवचनम् । भाष्यकारस्तु भेदं वीप्सां च साकल्यप्रतिपादनायाश्रित्य विवृणोति । दाशतयीति दशावयवा यस्य संघातस्य स दशतयः संघः तत्र भवा दशतयी । अनेकप्रत्ययप्रसङ्गप्रतिपादनपरं चैतत् । नत्वत्र दशार्थो विवक्षितः । अतोनन्तरमेव क्वचित्पुस्तके अपत्यं समुदायश्चेदिति पठ्यते ।

पक्षएष दोषः। सर्वेष्वपत्ययुक्तेषु *। सर्वेष्वपत्ययुक्तेषु तावन्न दोषः। सर्वेष्वपत्ययुक्तेषु सर्वत उत्पत्त्या भवितव्यम्। तत्र नियम उपपन्नो भवति। सति नियमे नैष दोषः। उत्पादयितरि तर्ह्यपत्ययुक्ते अयं दोषः। उत्पादयितारि तर्ह्यपत्ययुक्ते न सर्वत उत्पत्त्या भवितव्यम्। तत्र नियमो नोपपद्यते। असति नियमे एष दोषः। उत्पादयितारि चापत्ययुक्ते नायं दोषः।कथम्। अपत्यं समुदायश्चेन्नियमोऽस्य समीक्षितः तस्मिंस्तु बहवः प्राप्ता नियमोऽस्य भविष्यति ॥ अपत्यमित्यनेन सर्वमुपगवादिपितृकमपत्यं समीक्षितम्। तस्मिंस्तु बहवः प्रत्ययाः प्राप्ताः। नियमोऽस्य भविष्यति एको-गोत्र इति। यदप्युच्यते स्त्रियां चानियम इति। एवं वक्ष्यामि। गोत्राद्यूनि प्रत्ययो भवति स्त्रियां नेति। एवमपि स्त्रिया युवत्या अभिधानं न प्राप्नोति।

अन्यत्र तु प्रत्ययमालाप्रसङ्गग्रन्थान्तरं कतरस्मिन्नित्यादि सर्वं पूर्वोक्तं पठ्यते। तत्पुनरुक्तत्वादग्रन्थत्वादन्यैरुपेक्षितम्। अन्ये त्वेवं पठन्ति। कतरस्मिन् पक्षएष दोषः। सर्वेष्वपत्ययुक्तेषु। सर्वेष्वपत्ययुक्तेषु तावन्न दोषः। सर्वेषु ह्यपत्ययुक्तेषु सर्वत उत्पत्त्या भवितव्यं तत्र नियम उपपन्नो भवति। सति च नियमे नैष दोषः। उत्पादयितर्यपत्ययुक्तेऽयं दोषः। उत्पादयितर्यपत्ययुक्तेन सर्वत उत्पत्त्या भवितव्यम्। तत्र नियमो नोपपद्यते। असति नियमे एष दोषः। उत्पादयितरि चापत्ययुक्तेन दोषः। कथम्। अपत्यं समुदायश्चेदिति। अयं ग्रन्थ एव। पक्षप्रविभागेन दोषपरिहारात्। अस्यायमर्थः। यदा सर्वे ऽपत्येन युज्यन्ते तदैकस्मिन्नेव गोत्रापत्ये गर्गगार्गिगार्ग्येभ्यः पर्यायेणापत्यापत्यवत्सम्बन्धविवक्षायां प्रत्ययप्रसङ्गः। तत्र यदा गर्गशब्दात् प्रत्यय उत्पद्यते तदैक एव गोत्रापत्ये प्रत्ययो भवति। यदि तु गार्गिगार्ग्यशब्दाभ्यामुत्पद्यते तदा पूर्वस्मिन् स्थिते परस्योत्पादनादनेकः प्रत्ययः कृतः स्यात्। तस्मादनेकप्रत्ययनिवारणायैको गोत्र इति नियमः क्रियते। तेन गर्गशब्दादेवोत्पत्तिरनुज्ञाता भवति। यदा तूत्पादयितैवापत्ये न युज्यत इति पक्षो गोत्रशब्देन चैकमेवापत्यमुच्यते तदोत्पादयितुरेवैक एव प्रत्ययः प्राप्नोतीति नियन्तव्याभावान्नियमो नोपपद्यत इत्यपत्यपरम्पराविवक्षायां प्रत्ययमालाप्रसङ्गदोष आपतत्येव। अत्रापि पक्षे परिहारोऽभिधीयते। अपत्यं समुदायश्चेदिति। अपत्यशब्देनापत्यसामान्यवाचिनापि प्रकरणवशाद् गोत्रापत्यमेवोच्यते। तेनायमर्थो गोत्रशब्देन गोत्रसमुदायोऽभिधीयते अवयवधर्मेण समुदायस्य गोत्रव्यपदेशात्। अन्ये त्वाहुः। अपत्यं पौत्रप्रभृतिगोत्रमित्यत्रापत्यशब्देन समुदायोऽभिधीयत इति तस्यैव गोत्रसंज्ञा क्रियते। क्वचित्तु अवयवमात्रे ऽपि गोत्रशब्दो वर्त्तते। समुदायेषु प्रवृत्ताः शब्दा अवयवेष्वपि वर्त्तन्त इति न्यायात्। ततश्चैको गोत्र इत्यस्यायमर्थः। पौत्रप्रभृत्यपत्यपरम्पराविवक्षायां प्रत्ययमालाप्रसङ्गे एक एव कर्त्तव्यो नानेक इति तेन परमप्रकृतेरेव सम्बन्धिसम्बन्धाश्रयेणापत्यापत्यवत्सम्बन्धविवक्षायां प्रत्ययः कर्तव्य इत्युक्तं भवति। तस्मिन्निति। समुदाय इत्यर्थः। एवमपीति। अस्त्रियामिति योगविभागे ऽपि कृते यदि नाम गोत्रादेव यूनीत्यस्य नियमस्य निषेधो न भवति तथापि प्राधान्याद्युवप्रत्ययस्यैव निषेधः प्राप्नोति न तु युवसंज्ञायाः ततश्च गोत्रलक्षणः प्रत्ययो न प्राप्नोति। अपत्यसामान्यलक्षण एव तु प्रत्ययः स्यादित्यर्थः। ततश्च गर्गस्यापत्यं स्त्रीति गार्ग्यशब्दाद्यञ् स्यात्। तदभावाद्यञश्च प्राचां ष्फ तद्धित

एवं तर्हि वक्ष्यामि । गोत्राद्यूनि प्रत्ययो भवति ततः स्त्रियां लुक् । एवमप्यौपगवी माणविका । अनुपसर्जनलक्षण ईकारो न प्राप्नोति । मा भूदेवम् अण्योनुपसर्जन इति । अणन्तादनुपसर्जनादित्येवं भविष्यति । नैवं शक्यम् । इह हि दोषः स्यात् । काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी काशकृत्स्नीमधीते काशकृत्स्ना ब्राह्मणीति । अणन्तादितीकारः प्रसज्येत । नैष दोषः । अध्येत्र्यामभिधेयायामण ईकारेण भवितव्यम् । यश्चात्राध्येत्र्यामभिधेयायामण् लुप्तः सः । यश्च श्रूयते उत्पन्नस्तस्मादीकार इति कृत्वा पुनर्न भविष्यति । इह तर्हि औपगवी माणविका भार्यास्य औपगवीभार्यः । जातिलक्षणः पुंवद्भावप्रतिषेधो न प्राप्नोति । मा भूदेवं वृद्धिनिमित्तस्येत्येवं भविष्यति । यस्तर्हि न वृद्धिनिमित्तम् । ग्लुचुकायनी माणविका भार्यास्य ग्लुचुकायनीभार्यः । तस्मात्स्त्रियां युवत्यां युवसंज्ञैव पर्युदसितव्या । युवसंज्ञायां पर्युदस्तायां गोत्रप्रत्ययान्तमेतद्यूनि वर्तते । इहोत्पादयितर्यपत्ययुक्ते प्रत्ययान्तात्प्रतिषेधो वक्तव्यः । परमप्रकृतेश्चोत्पत्तिर्वक्तव्या । सर्वेष्वपत्ययुक्तेषु प्रत्ययान्तात्प्रतिषेधो वक्तव्यः । तस्मात्प्रतिषेधः * ।

इति ङीष्फौ न स्यातां गार्गी गार्ग्यायणीति । स्त्रियां लुगिति । गार्ग्यशब्दात् फको लुकि कृते यञाश्रयं रूपद्वयं सिध्यति । एवमपीति । औपगवस्यापत्यं स्त्रीत्यतइञ् तस्य लुकि कृते ऽनुपसर्जनाधिकारादणश्चार्थद्वारेणोपसर्जनत्वात्तदर्थस्य प्रत्ययार्थे प्रति विशेषणत्वादणलक्षण ईकारो न प्राप्नोतीत्यर्थः । अणन्तादिति । प्रत्यये लुप्ते प्रकृतिरेव प्रत्ययार्थमाहेत्यणन्तस्यानुपसर्जनत्वमिति भावः । काशकृत्स्निनेति । इञश्चेत्यण् । तदन्तादध्येत्र्यामण् । तस्य प्रोक्ताल्लुगिति लुक् । लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुक् । अत्राणन्तस्याध्येत्र्यां संक्रान्तत्वादनुपसर्जनत्वादीकारस्य प्रसङ्गः । पुनर्न भविष्यतीति । शास्त्रस्य सकृत्प्रवृत्त्या चरितार्थत्वादिति भावः । टाप् तु पूर्वमनुत्पन्न इति उत्पद्यते । अपवादस्याप्रवृत्तावुत्सर्गस्यानिवारणात् । नन्वेवमापिशलिना प्रोक्तमापिशलं तदधीते आपिशला ब्राह्मणीति ङीप् प्राप्नोति । तस्मादण एवानुपसर्जनग्रहणं विशेषणमित्यौपगवी माणविकेति न सिध्यति । एवं तर्हि वक्ष्यमाणाद्दोषादिष्टसिद्ध्यभावादेतद्भाष्यकारेण सुष्ठु न निरूपितम् । जातिलक्षण इति । गोत्रसंज्ञाया अभावे जातिरूपाभावात् । यदा तु गोत्रं च चरणैः सहेत्यत्र गोत्रशब्देनापत्यमात्रं गृह्यते तदौपगवीभार्य इत्यत्र जातिलक्षणङीष्पुंवद्भावप्रतिषेधौ सिध्यत एव । ग्लुचुकस्यापत्यमिति प्राचामवृद्धादिति फिन्प्रत्ययः तदन्तादणो लुकि क्रियमाणे जातित्वाभावादितो मनुष्यजातेरिति ङीष्न प्राप्नोति । अथापि सर्वतोक्तिन्नर्थादिति ङीष् क्रियते । तथापि पुंवद्भावप्रतिषेधो न प्राप्नोति । लुक् चाधिको विधेयः । तस्मादिति । अस्त्रियामिति योगविभागे सति यूनीति वर्त्तते । परिभाषा चेयम् । तेन युवसंज्ञायामस्त्रियामित्युपतिष्ठते । तदुपस्थानेन स्त्रियां युवसंज्ञा निवार्यते इति गोत्रसंज्ञा प्रवर्त्तते । यूनि वर्त्तत इति । युवसंज्ञाया अभावे ऽपि युवत्वेन पौत्रप्रभृतेरपत्यमुपलक्ष्यत इति यूनीत्युक्तम् । इदानीं पक्षद्वयोक्तदोषपरिहाराय तत्संकीर्त्तनं करोति इहेति । सर्वेष्विति । ननु नायं दोषः पूर्व-

तस्मात्प्रतिषेधो वक्तव्यः । संज्ञाकारिभ्यो वा प्रत्ययोत्पत्तिः * । अथवा संज्ञाकारिभ्यः प्रत्ययोत्पत्तिर्वक्तव्या । यदि संज्ञाकारिभ्यः प्रत्ययोत्पत्तिरुच्यते । कथं गार्ग्यायणो वात्स्यायन इति।गोत्राद्यूनीति च * । गोत्राद्यूनीत्येतद्वक्तव्यम् । तच्च जात्यादिनिवृत्त्यर्थम् । तच्चावश्यं संज्ञाकारिग्रहणं कर्तव्यम् । किं प्रयोजनम् । जात्यादिनिवृत्त्यर्थम् । जात्यादिभ्य उत्पत्तिर्मा भूदिति । जातिर्न वर्तते संख्या न वर्तते । सर्वनाम न वर्तते । जातिर्न वर्तते । काकस्यापत्यं कुररस्यापत्यमिति संख्या न वर्तते । नवानामपत्यं दशानामपत्यमिति । सर्वनाम न वर्तते । सर्वेषामपत्यं विश्वेषामपत्यमिति।यत्तावदुच्यते जातिर्न वर्तते काकस्यापत्यं कुररस्यापत्यमिति। येनैव हेतुना एकः काकस्तेनैव हेतुना द्वितीयस्तृतीयश्च काको भविष्यति । यदप्युच्यते संख्या न वर्तते नवानामपत्यं दशानामपत्यमिति । संख्येयमपेक्ष्य संख्या प्रवर्तते । तत्सापेक्षम् । सापेक्षमसमर्थं भवतीति । असामर्थ्यान्न भविष्यति । यदप्युच्यते सर्वनाम न वर्तते सर्वेषामपत्यं विश्वेषामपत्यमिति । निर्देश्यमपेक्ष्य निर्देशः प्रवर्तते । तत्सापेक्षम् । सापेक्षमसमर्थं भवति असमर्थत्वान्न भविष्यति । यत्तावदुच्यते येनैव हेतुना एकः काकस्तेनैव हेतुना द्वितीयस्तृतीयश्च काको भविष्यतीति । नैतद्विवदामहे । काको न काक इति । किं तर्हि । येनैव हेतुना एतद्वाक्यं भवति काकस्यापत्यं कुररस्यापत्यमिति । तेनैव हेतुना वृत्तिरपि प्राप्नोति । यदप्युच्यते संख्येयमपेक्ष्य संख्या प्रवर्तते तत्सापेक्षं सापेक्षं चासमर्थं भवतीति । भवति वै कस्य चिदर्थात्प्रकरणाद्वा अपेक्ष्यं निर्ज्ञातम् तदा वृत्तिः प्राप्नोति । यदप्युच्यते सर्वेषामपत्यं विश्वेषामपत्यमिति निर्देश्यमपेक्ष्य निर्देशः प्रवर्तते तत्सापेक्षं सापेक्षं चासमर्थं भवतीति । भवति वै कस्य चिदर्थात्प्रकरणाद्वा अपेक्ष्यं निर्ज्ञातम् । यदा निर्ज्ञातं तदा वृत्तिः प्राप्नोति । एवं तर्हि अनभिधानाज्जात्यादिभ्य उत्पत्तिर्न भविष्यति । तच्चावश्यमनभिधानमाश्रयितव्यम् । क्रियमाणेऽपि च संज्ञाकारिग्रहणे यत्र जात्यादिभ्य उत्पद्यमानेन प्रत्ययेनार्थाभिधानं भवति, भवति तत्रो-

---

मुक्तः । नैतदस्ति । न ज्ञायते क एको भवतीत्यभिधानादर्थ उक्त एवायं दोषः । तस्मादिति । नापत्यादित्येव वक्तव्यम् । तेनापत्यप्रत्ययान्तादपत्ये प्रत्ययो न भवतीत्ययमर्थः संपद्यते । संज्ञाकारिभ्य इति । कुलव्यपदेशहेतव आदिपुरुषाः संज्ञाकारिण उच्यन्ते । जातिर्नेति । प्रत्ययं नोत्पादयतीत्यर्थः । परार्थाभिधानं हि वृत्तिः । सति च प्रत्यये प्रकृतिः प्रत्ययार्थे वर्तते तत्र जात्यादिवृत्तिः संज्ञाकारिग्रहणेन निवार्यते । येनैवेति । अपत्यविशेषप्रतिपत्तये प्रकृत्यर्थो विशेषणमुपादीयते । स च विशेषो जातिसंबन्धावगमेनैवागम्यत इत्यपत्यापत्यवत्संबन्धाविवक्षाया एवात्राभाव इत्यर्थः ।संख्येयमिति।ब्राह्मणादिकमवश्यमपेक्षणीयं निराधारस्य गुणस्याभावादित्यर्थः । निर्देश्यमिति । पूर्वप्रकृतमित्यर्थः । वृत्तिर्प्राप्नोति । यदा जात्यपव्यञ्जनानि नाभिव्यक्तानि तदा पितृसंबन्ध एव विशेषावगमायोपादीयते तत्र वाक्यवद्वृत्तिप्रसङ्ग इत्यर्थः । भवतीति । ततश्च संख्याद्य-

उत्पत्तिः । तद्यथा । कुतश्चराति मायूरिः केन कापिञ्जलिः कृशः । आहेयेन च दष्टस्य पार्श्विः सुतसमो मतः ॥ तादायनिर्यादायनिः कैमायनिरिति । तदेतदनन्यार्थं संज्ञाकारिग्रहणं कर्तव्यम् । प्रत्ययान्ताद्वा प्रतिषेधो वक्तव्यः । उभयं न कर्तव्यम् । गोत्रग्रहणं करिष्यते । एको ऽपत्ये प्रत्ययो भवतीत्येव । यदि चेदानीं प्रत्ययान्तादपि प्रत्ययः स्यान्नैकोपत्ये प्रत्ययः कृतः स्यात् । यदि गोत्रग्रहणं न क्रियते । कथं गार्ग्यायणो वात्स्यायन इति । वक्तव्यमेवैतत् गोत्राद्यून्यस्त्रियामिति । अथापि गोत्रग्रहणं क्रियते । एवमपि न दोषः । नैकग्रहणेन प्रत्ययोभिसम्बध्यते एको गोत्रे प्रत्ययो भवतीति । किं तर्हि प्रकृतिरभिसम्बध्येत । एका प्रकृतिर्गोत्रप्रत्ययमुत्पादयतीति । यदि चेदानीं प्रत्ययान्तादपि प्रत्ययः स्याद् । नैका प्रकृतिर्गोत्रे प्रत्ययमुत्पादयेत् । अथ वा अस्थानेयं यत्नः क्रियते । न हीदं लोकाद्भिद्यते । लोके हि संख्यां प्रवर्तमानामुपाचरन्ति एक इति वा प्रथम इति वा । यावद् ब्रूयात् प्रथमो गोत्रे प्रत्ययमुत्पादयतीति तावदेको गोत्रे इति ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम् ॥

अतइञ् ॥ ९५ ॥ इञो वृद्धावृद्धाभ्यां फिञ्फिनौ विप्रतिषेधेन * । इञो वृद्धावृद्धाभ्यां फिञ्फिनौ भवतः विप्रतिषेधेन । इञोवकाशः । दाक्षिः प्लाक्षिः । फिञोवकाशः । तादायनिः । यादायनिः । इहोभयं प्राप्नोति । तापसायनिः । सांमितिकायनिः । फिनोऽवकाशः । सुचायनिः । त्वचायनिः । इञः स एव । इहोभयं प्राप्नोति । ग्लुचुकायनिः । फिञ्फिनौ भवतो विप्रतिषेधेन । इह कस्मान्न

ब्द एव विशिष्टसंख्येयवाचीति सापेक्षत्वाभावाद्वर्त्तत एवेत्यर्थः । आहेयेनेति । अहेरपत्यमितश्चानिञ इति ढक् । पार्श्विरिति । बाह्वादित्वादिञ् । तादायनिरिति । उदीचां वृद्धादिति फिञ् । एका प्रकृतिरिति । एकशब्दः संख्यावाचीति केचिदाहुः । प्रथमातिक्रमे च कारणाभावात् परमप्रकृतिरेवैकशब्देन गृह्यते । शब्दापेक्षया चैक इति पुल्लिङ्गनिर्देशः । अन्ये तु साधारणे एक इत्याहुः । परमप्रकृतिश्च सर्वप्रत्ययसाधारणीति तत एवोत्पत्तिर्भवति । सर्वे ऽपत्येन युज्यन्त इत्ययं च पक्षः प्रमाणोपपन्नत्वात् स्थितः । न हीदमिति । लोके योऽर्थ एकशब्दस्य दृश्यते स एवेहाश्रीयते । लोके च प्रथमशब्दसमानार्थ एकशब्दो दृश्यते इतीहापि प्रथमार्थ एवाश्रीयते । शास्त्रे ऽपि प्रथमार्थ एकशब्दो दृश्यते एके ऽल्पप्राणा इत्यत्र प्रथमे ऽल्पप्राणा इति गम्यते । उपाचरन्तीति । व्यवहरन्तीत्यर्थः । अस्यां पङ्क्तावेकमानयेत्यादावनियतस्यैकस्यावगमात्संख्यावाच्येकशब्दो न प्रथमवाची ॥६२॥ इत्युपाध्यायजैयटपुत्रकैयटविरचिते भाष्यप्रदीपे चतुर्थस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम् ॥

अत इञ् ॥ दाक्षिरिति । वा नामधेयस्येति यदा वृद्धसंज्ञा नास्ति तदायमिञोवकाशः । इञःस एवेति । प्राचामवृद्धात् फिन् बहुलमिति प्राचां मतेन फिनो विधाना-

Indira Gandhi National Centre for the Arts

भवति दाक्षिः प्लाक्षिः । बहुलवचनात् । तद्राजश्च * । तद्राजश्चेञो भवति विप्रतिषेधेन । तद्राजस्यावकाशः । ऐक्ष्वाकः । इञः स एव । इहोभयं प्राप्नोति । पाञ्चालः । वैदेहः । वैदर्भः । तद्राजो भवति विप्रतिषेधेन ॥

बाह्वादिभ्यश्च ॥ ९६ ॥ बाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोन्यत्र तेषां प्रतिषेधः * । बाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोन्यत्र तेषां प्रतिषेधोः वक्तव्यः। बाहोरपत्यं बाहविः । यो हि बाहुर्नाम बाहवस्तस्य भवति । नडस्यापत्यं नाडायनः । यो हि नडो नाम नाडिस्तस्य भवति । सम्बन्धिशब्दप्रत्ययानां च तत्सदृशात्प्रतिषेधः * । सम्बन्धिशब्दप्रत्ययानां च तत्सदृशात्प्रतिषेधो वक्तव्यः । श्वशुरस्यापत्यं श्वशुर्यः । यो हि श्वशुरो नाम श्वाशुरिस्तस्य भवति । प्रत्ययग्रहणेन नार्थः । सम्बन्धिशब्दानां तत्सदृशात्प्रतिषेध इत्येव । इदमपि सिद्धं भवति । मातृपितृभ्यां स्वसा । मातृष्वसा पितृष्वसा । अन्या तु मातृस्वसेति ॥

सुधातुरकङ्च ॥९७ ॥ सुधातृव्यासयोः * । सुधातृव्यासयोरिति वक्तव्यम् । सौधातकिः । वैयासकिः शुकः । अल्पमिदमुच्यते । सुधातृव्यासवरुडनिषादचण्डालबिम्बानामिति वक्तव्यम् । सौधातकिः । वैयासकिः शुकः । वारुडकिः । नैषादकिः । चाण्डालकिः । बैम्बकिः । तर्हि वक्तव्यम् । न वक्तव्यम् । प्रकृत्यन्तराण्येवैतानि ॥

त । उदीचां मतेन तदभावादिञोवकाश इति भावः । इह कस्मादिति । प्राचां मतेन वृद्धत्वात् फिन् प्राप्नोतीति भावः । ऐक्ष्वाक इति । इक्ष्वाकोरपत्यमिति जनपदशब्दात् क्षत्रियादञित्यञ् । दाण्डिनायनादिसूत्रेणोकारलोपो निपात्यते । पाञ्चाल इति । पाञ्चालविदेहविदर्भेभ्योञ् ॥ ९५ ॥

बाह्वा ॥ बाह्वादिप्रभृतिष्विति । प्रभृतिग्रहणेन वक्ष्यमाणानां कुञ्जादिनडादीनां ग्रहणम् । लौकिक इति । लोके विदित इत्यर्थः । गोत्रभाव इति । संज्ञाकारित्वे आदिपुरुषत्व इत्यर्थः । एतच्च स्मृतिशास्त्रस्यार्थतोऽनादित्वादनाद्यर्थाभिधायित्वं बाह्वादिग्रहणस्य न्याय्यत्वाल्लभ्यते । यत्तु कार्यं विशिष्टशब्दस्वरूपोपादानेन न विधीयते । किं तु प्रकारान्तरेण यथा अत इञिति तदिदानीन्तनार्थाभिधायिनां ऽपि भवति दैवदत्तिरिति । संबन्धिशब्देति । अयमपि न्यायानुवादः । आदिमत्वात् संज्ञा श्वशुरस्य संबन्धोपाधिकस्य त्वनादित्वात्तद्ग्रहणस्यैव न्याय्यत्वात् । मातृस्वसेति । मातृशब्दोत्र क्रियावाची न जननीवाचीति मातृपितृभ्यां स्वसेति षत्वं न भवति । यद्यपि क्रियाशब्दार्थोपि नित्यस्तथापि प्रसिद्धतरः संबन्धिलक्षणोर्थ इति तस्यैव ग्रहणं युक्तम् । उक्तं च हरिणा । अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः । शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिष्विति ॥ ९६ ॥

सुधातुरकङ्च ॥ प्रकृत्यन्तराणीति । स्वार्थिककन्प्रत्ययान्तत्वादिति भावः । अव्ययविकृन्यायेन च कन्रहितैर्वाक्यमेव भवति । व्यासकशब्दाच्च कन्नन्तादप्रिधानेनोपि बाह्वादेराकृतिगणत्वादिञ् भवति न तु ऋष्याणीति भावः ॥ ९७ ॥

Indira Gandhi National Centre for the Arts

गोत्रे कुञ्जादिभ्यश्च्फञ् ॥ ९८ ॥ किमर्थश्चकारः । स्वरार्थः । चितोन्तोदात्तो भवतीत्यन्तोदात्तत्वं यथा स्यात् । अथ ञकारः किमर्थः । ञकारो वृद्ध्यर्थः । ञ्णितीति वृद्धिर्यथा स्यात् । एकेन ककारेणोभयं सिद्धम् । अवश्यमत्र विशेषणार्थोन्योनुबन्धः कर्तव्यः । क्व विशेषणार्थेनार्थः । व्रातच्फञोरस्त्रियामिति । फगित्युच्यमाने नाडायनः, अत्रापि प्रसज्येत । अथापि फञ् इत्युच्यते । एवमप्याश्वायनः, अत्रापि प्रसज्येत । तस्माच्चकार एव कर्तव्यः । अन्तोदात्तत्वमपि यथा स्यात् । चकारे चेदानीं विशेषणार्थे क्रियमाणेऽवश्यं वृद्ध्यर्थोन्योनुबन्धः कर्तव्यः । स च ञकार एव कर्तव्यः । सूत्रभेदो मा भूदिति । अथ क्रियमाणेऽपि वै चकारे अन्तोदात्तत्वं न प्राप्नोति । किं कारणम् । परत्वाज् ञ्नितीत्याद्युदात्तत्वं प्राप्नोति । चित्करणसामर्थ्यादन्तोदात्तत्वं भविष्यति । ञित्करणसामर्थ्यादाद्युदात्तत्वं प्राप्नोति । अस्त्यन्यद् ञित्करणे प्रयोजनम् । किम् । वृद्ध्यर्थो ञकारः । चित्करणेऽप्यन्यत्तर्हि प्रयोजनम् । किम् । विशेषणार्थश्चकारः । शक्योत्र विशेषणार्थोन्योनुबन्ध आसङ्क्तुम् । तत्र ञकारानुरोधादन्तोदात्तत्वं भवति । वृद्ध्यर्थोप्यन्यः शक्योनुबन्ध आसङ्क्तुम् । तत्र ञकारानुरोधादाद्युदात्तत्वं प्राप्नोति । एवं तर्हि स्वरे योगविभागः करिष्यते । इदमस्ति । चितः । चितोन्त उदात्तो भवतीति । ततस्तद्धितस्य । तद्धितस्य चितोन्त उदात्तो भवतीति । किमर्थमिदं परत्वात् ञ्नितीत्याद्युदात्तत्वं प्राप्नोति । तद्बाधनार्थम् । ततः कितः । कितस्तद्धितस्यान्त उदात्तो भवतीति । किं पुनरत्र स्वरार्थेन चकारेणानुबन्धेन । यावता च्फञन्तात् ञ्यो विधीयते । तत्र ञ्नितीत्याद्युदात्तत्वेन भवितव्यम् । नैतदस्ति । बहुषु लोपे कृते अन्तोदात्तत्वं यथा स्यात् । कौञ्जायना इति । इह केचिद् द्व्येकयोः ष्यञं विदधाति बहुषु च फकम् । केचिच्च्फञन्ताज् ञ्यम् । किमत्र न्याय्यम् । ञ्यवचनमेव न्याय्यम् । द्व्येकयोर्हि ष्यञि सति बहुषु च फकि कौञ्जायनानामपत्यं माणवकः कौञ्जायन्यः कौञ्जायन्यौ । केन यशब्दः श्रूयेत । द्व्येकयोरित्युच्यमानो न प्राप्नोति । इह कौञ्जायन्यस्यापत्यं बहवो माणवकाः कौञ्जायनाः । केन यशब्दो न श्रूयेत ।

गोत्रे ॥ अथापि फञ् इति । सर्वथा सामान्यग्रहणं प्राप्नोतीत्येवं परमेतत् फाञिति क्रियमाणे कौञ्जायना इति ञित्स्वरप्रसङ्गः । सूत्रभेद इति । चफक्यपि सिध्यति । सूत्रभेदस्तु स्यादिति भावः । एवं तर्हीति । चकारस्य विशेषणे चरितार्थत्वाद् वृद्धौ च ञकारस्य परत्वाञ् ञित्स्वरप्राप्तावित्यर्थः । तत्र ञ्नितीति । सति शिष्टस्वरस्य बलीयस्त्वादिति भावः । इहेति । पूर्वे वैयाकरणाः । केन यशब्द इति । यशब्दस्य बहुत्वे प्रयोगाभावात् । यदा तु ञ्यः क्रियते तदा गोत्रेऽलुगचीति लुकि प्रतिषिद्धे यशब्दः श्रूयते । कौञ्जायन्यस्यापत्यानि बहूनीत्यत इञो ण्यक्षत्रियार्षेति लुकि तद्राजान्तस्य

द्वेयकयोरित्युच्यमानः प्राप्नोति । तदेतत्कथं कृत्वा ज्यवचनं ज्यायो भवति । यदि तन्नास्ति । आपत्यं वा गोत्रम् । परमप्रकृतेश्चापत्यः । आपत्याज्जीवद्वंश्यात्स्वार्थे द्वितीयो युवसंज्ञः । स चास्त्वियाम् । एको गोत्रग्रहणानर्थक्यं च । बहुवचनलोपिषु च सिद्धमिति । सति हि तस्मिन् द्व्येकयोरपि फयञि सति बहुषु च फकि सति न दोषो भवति । तत्र कौञ्जायनानामपत्यं माणवक इति विगृह्य कुञ्जशब्दाद् द्वयेकयोरुत्पत्तिर्भविष्यति कौञ्जायन्यःकौञ्जयन्यौ । कौञ्जायन्यस्यापत्यं माणवका इति विगृह्य कुञ्जशब्दाद्बहुषूत्पत्तिर्भविष्यति । कौञ्जयना इति ॥

अनृष्यानन्तर्ये विदादिभ्योऽञ् ॥ १०४ ॥ अनृष्यानन्तर्य इत्युच्यते तत्रेदं न सिद्ध्यति । कौशिको विश्वामित्र इति । किं कारणम् । विश्वामित्रस्तपस्तेपे नानृषिः स्यामिति । तत्र भवानृषिः संपन्नः । स पुनस्तपस्तेपे नानृषेः पुत्रः स्यामिति । तत्र भवान् गाधिरपि ऋषिः संपन्नः । स पुनस्तपस्तेपे नानृषेः पौत्रः स्यामिति । तत्र भवान् कुशिकोऽपि ऋषिः संपन्नः तदेतदृष्यानन्तर्यं भवति । तत्रानृष्यानन्तर्यइति प्रतिषेधः संप्राप्नोति । नैष दोषः । नैवं विज्ञायते । ऋष्यानन्तर्ये न भवतीति । कथं तर्हि ऋषावनन्तरे नेति । यद्येवम् । अनृष्यानन्तर्यवचनमनर्थकं संज्ञागोत्राधिकारात् * । अनृष्यानन्तर्यवचनमनर्थकम् । किं कारणम् । संज्ञागोत्राधिकारात् । संज्ञागोत्रइति वर्तते कः प्रसङ्गो यदनन्तरे स्यात् । नैव प्राप्नोति । नार्थः प्रतिषेधेन । एवं तर्हि सिद्धे सति यदनृष्यानन्तर्य इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो विदादिषु ये ऽनृषयः पठ्यन्ते तेषामनन्तरेऽपि वृत्तिर्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । नानान्द्रः । पौत्रः । दौहित्र इत्येतत् सिद्धं भवति ॥

वतण्डाच्च ॥ १०८ ॥ किमर्थमिदमुच्यते । न गर्गादिभ्यो यञिसेव

बहुषु वर्तमानाञ् ञ्यस्य लुक सिध्यति । आपत्यं चेति । गोत्रे लुगचीत्यत्रैतद्व्याख्यातम् । कुञ्जशब्दादेव यूनि फ्याञि फकि च कृते स्वार्थिकस्य चेञो लुकि कृते सर्वेष्टसिद्धिः ॥ ९८ ॥

अनृष्या ॥ अनृष्यानन्तर्य इत्यस्यार्थद्वयं सम्भवति । ऋषीणामानन्तर्यं अव्यवधानेन भवति । यद्वाऽनन्तरमेवानन्तर्यं तेन ऋषिभ्योऽनन्तरापत्ये प्रत्ययो न भवतीति । उभयत्राप्यसमर्थसमासो भवतिना नञः सम्बन्धात् । तत्राद्यपक्षाश्रयेण पूर्वः पक्षो द्वितीयपक्षाश्रयेणोत्तरम् । संज्ञागोत्राधिकारादिति । संज्ञाया यद् गोत्रं पौत्रप्रभृति तदेवाधिकृतं न त्वपत्यमात्रमित्यर्थः । तेषामनन्तर इति । अन्यथा प्रतिषेधोऽनर्थकः स्यात् । तत्रर्षिभ्यो गोत्र एव प्रत्ययः । अनृषिभ्यस्त्वनन्तरापत्य एवेत्येष विषयविभागः । नन्वस्माज् ज्ञापकादनृषिभ्योऽपत्यमात्रे प्रत्ययः प्राप्नोति । नैष दोषः । विशेषविषयस्यानुमानस्याश्रवणात् ॥ १०४ ॥

Indira Gandhi National Centre for the Arts

सिद्धम् । लुक् स्त्रियामिति वक्ष्यामीति । यदि पुनस्तत्रैवोच्येत । नैव शक्यम् । आङ्गिरसग्रहणं हि विच्छिद्येत ॥

शिवादिभ्योऽण् ॥ ११२ ॥ किमर्थं शिवादिभ्योऽण् विधीयते । न यथाविहितमित्येवोच्येत । शिवादिभ्यो यथाविहितमितीयत्युच्यमाने इञ् प्रसज्येत । इञतो यथाविहितः । पुनर्वचनमिदानीं किमर्थं स्यात् । ये तस्य बाधकास्तद्बाधनार्थम् । स वै नास्ति यस्तं बाधेत । तत्रारम्भसामर्थ्याद्यो विहितो न च प्राप्नोति स भविष्यति । कश्चासावणेव । उत्तरार्थं तर्हि । अृष्ट्याभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्य इत्यत्र यथाविहितमितीयत्युच्यमाने ढक् प्रसज्येत । ढगतो यथाविहितः । पुनर्वचनमिदानीं किमर्थं स्यात् । ये तस्य बाधकास्तद्बाधनार्थम् । स वै नास्ति यस्तं बाधेत । तत्रारम्भसामर्थ्याद् यो विहितो न च प्राप्नोति स भविष्यति । कः पुनरसावणेव । उत्तरार्थमेव हि तर्हि । ऋष्यन्धकवृष्णिकुरुभ्यश्चेत्यत्र यथाविहितमितीयत्युच्यमाने इञ् प्रसज्येत । इञतो यथाविहितः । पुनर्वचनमिदानीं किमर्थं स्यात् । ये तस्य बाधकास्तद्बाधनार्थम् । स वै नास्ति यस्तं बाधेत । तत्रारम्भसामर्थ्याद्यो विहितो न प्राप्नोति स भविष्यति । कश्चासावणेव । उत्तरार्थमेव तर्हि । मातुरुत्संख्यासंभद्रपूर्वायाः, कन्यायाः कनीन चेति । अत्र यथाविहितमितीयत्युच्यमाने ढक् प्रसज्येत । ढगतो यथाविहितः । पुनर्वचनमिदानीं किमर्थं स्यात् । मातुरुकारं वक्ष्यामि । कन्यायाः कनीनभावमिति । यद्येतावत्प्रयोजनं स्यात् । तत्रैव ब्रूयात् स्त्रीभ्यो ढक् मातुरुकारः कन्यायाश्च कनीन इति । इदं तर्हि प्रयोजनम् । अयमृष्टिषेणशब्दः शिवादिषु पठ्यते । अत्र यथाविहितमितीयत्युच्यमाने इञ् प्रसज्येत । तं परत्वात्सेनान्ताद् ण्यो बाधेत । तत्रारम्भसामर्थ्यादिञ् प्रसज्येत । पुनरण्ग्रहणादणेव भवति ॥

वतण्डा ॥ लुक् स्त्रियामिति वक्ष्यामीति । तत्र च वतण्डशब्दानुवृत्त्यर्थमेतादित्यर्थः । यदीति । गर्गादिगण एव वतण्डशब्दानन्तरं लुक् स्त्रियामिति पठितव्यमिति भावः । आङ्गिरसग्रहणमिति । तथा च सर्वत्र लुक् स्यात् । योगविभागस्तर्हि किमर्थो न वतण्डाल् लुक् स्त्रियामित्येकयोग एवोच्येत । आङ्गिरसे शिवाद्यणबाधनार्थो योगविभागः । वतण्डो नाम ऋषिः । तत ऋष्यण्वादेवाणि सिद्धे शिवादिषु तस्य पाठो गोत्रे गर्गादियञा समावेशार्थः । अनेन तु योगेनाङ्गिरसे ऽणप्रसङ्गे यञ्विधानादण् बाध्यते । अन्यत्र तु गोत्रे यञणौ द्वावपि भवतः । ऋषि वादेव च वातण्डीत्यत्र ष्यङ् भवति ॥ १०८ ॥

शिवा ॥ गोत्र इति निवृत्तमपत्यमित्येवानुवर्तते । ढगत इति । ननु मातृशब्दस्यास्त्रीप्रत्ययान्तत्वात्कथं ढग्विहितः । एवं तर्हि परिहारान्तराभिधानान्न विचारितमेतद्भाष्यकारेण । तत्परत्वादिति । परत्वग्रहणेन बाधकत्वं लक्ष्यते । तेनापवादत्वादित्यर्थः ॥ ११२ ॥

Indira Gandhi National Centre for the Arts

ऋष्यन्धकवृष्णिकुरुभ्यश्च ॥ ११४ ॥ ऋषिस्त्र्यणो ढक्ढ्रकौ विप्रतिषेधेन * । ऋष्यणस्त्र्यणश्च ढक्ढ्रकौ भवतो विप्रतिषेधेन । ऋष्यणोवकाशः । वासिष्ठः । वैश्वामित्रः । ढकोवकाशः । दुलि । दौलेयः । वलि । वालेयः । इहोभयं प्राप्नोति । अत्रि । आत्रेयः । स्त्र्यणोवकाशः । मकन्दिका । माकन्दिकः । ढ्रकोवकाशः । काणिकेरः । इहोभयं प्राप्नोति । पौणिकेरः । मौद्गलिकेरः । ढक्ढ्रकौ भवतो विप्रतिषेधेन । द्व्यचो ढको ढ्रक्ढञौ * । द्व्यचो ढग् भवतीत्येतस्माद् ढक्ढञौ भवतो विप्रतिषेधेन । द्व्यचो ढग् भवतीत्यस्यावकाशः । दात्तेयः गौप्तेयः । ढ्रकः स एव । इहोभयं प्राप्नोति । नटी । नाटेरः । दासी । दासेरः । ढञो ऽवकाशः । कामण्डलेयः । हैरण्यवाहेयः । माद्रवाहेयः । ढकः स एव । इहोभयं प्राप्नोति । जम्बू । जाम्बेयः । ढक्ढञौ भवतो विप्रतिषेधेन । न चर्ष्यणः पुनर्वचनमन्यनिवृत्त्यर्थम् । न वा एष युक्तो विप्रतिषेधः, योयमृष्यणो ढकश्च । किं कारणम् । ऋष्यणः पुनर्वचनमन्यनिवृत्त्यर्थम् । सिद्धोत्राणुत्सर्गेणैव । तस्य पुनर्वचने एतत्प्रयोजनं येन्ये तदपवादाः प्राप्नुवन्ति तद्बाधनार्थम्। स यथैव तदपवादमिञं बाधते । एवं ढकमपि बाधेत । तस्मादृषिभ्योण्विधाने ऽञ्यादिप्रतिषेधः * । तस्मादृषिभ्यो ऽण्विधाने ऽञ्यादिभ्यः प्रतिषेधो वक्तव्यः । न वक्तव्यः । मध्येपवादाः पूर्वान् विधीन् बाधन्ते इत्येवमृष्यण् इञं तदपवादं बाधिष्यते ढकं न बाधिष्यते । अयं चाप्ययुक्तो विप्रतिषेधो योयं ढकः ढ्रक्ढञोश्च । किं पुनः कारणम् । ढकः पुनर्वचनमन्यनिवृत्त्यर्थम् । सिद्धोत्र ढक् । स्त्रीभ्यो ढगित्येव । तस्य पुनर्वचन एतत्प्रयोजनं येन्ये तदपवादाः प्राप्नुवन्ति तद्बाधनार्थम् । स यथैव तन्नामिकाणं तदपवादं बाधते एवं ढ्रक्ढञावपि बाधेत । तस्मात्तन्नामिकाण्यद्व्यचः * । तस्मात्तन्नामिकाणि अद्व्यच इति वक्तव्यम् । न वक्तव्यम् । मध्येपवादाः पूर्वान् विधीन् बाधन्ते इत्येवमयं ढक् तन्नामिकाणं तदपवादं बाधिष्यते । ढ्रक्ढञौ न बाधिष्यते । ऋष्यन्धकवृष्णिकुर्वणः सेनान्ताण्ण्यः * । ऋष्यन्धकवृष्णिकुर्वणः सेनान्ताण्ण्यो भवति विप्रतिषेधेन । ऋष्यणोवकाशः । वासिष्ठः । वैश्वामित्रः । ण्यस्यावकाशः । पारिषेण्यः।

ऋष्यन्ध ॥ ऋषिस्त्र्यण इति । अवृद्धाभ्यो नदीमानुषीभ्य इति मानुषीलक्षणोण् स्त्र्यणशब्देनोक्तः । अत्र च यथासङ्ख्यं सम्बन्धः । दौलेय इति । दुलेरनृषित्वाद् ढकोयमवकाशः । काणिकेर इति । काणैव काणिका । पौणिकेर इति । पुणिका तन्नामिका क्षुद्रा च । जाम्बेय इति । चतुष्पाल्लक्षणो ढञ् ढे लोपो कद्र्वा इत्यूकारलोपः । जम्बूशब्दस्यास्त्रीप्रत्ययान्तत्वाद् ढक्प्राप्तिश्चिन्त्या । नवेति । प्राप्तिमात्रं बाध्यं मन्यते । मध्येपवादा इति । पूर्वस्य निर्ज्ञातस्वरूपत्वाद् बाध्यत्वं नतूत्तरस्यानिर्ज्ञातस्वरूपस्येति

Indira Gandhi National Centre for the Arts

षारिषेण्यः । जातसेनो नाम ऋषिस्तस्मादुभयं प्राप्नोति । ण्यो भवति विप्रतिषेधेन । जातसेन्यः । अन्धकाणोवकाशः । श्वाफल्कः । चैत्रकः । रान्धसः । ण्यस्य स एव उग्रसेनो नामान्धकस्तस्मादुभयं प्राप्नोति । ण्यो भवति विप्रतिषेधेन । औग्रसेन्यः । वृष्ण्यणोवकाशः । वासुदेवः । बालदेवः । ण्यस्य स एव । विश्वक्सेनो नाम वृष्णिस्तस्मादुभयं प्राप्नोति ण्यो भवति विप्रतिषेधेन । वैष्वक्सेन्यः । कुर्वणोवकाशः । नाकुलः । साहदेवः । ण्यस्य स एव । भीमसेनो नाम कुरुस्तस्मादुभयं प्राप्नोति । ण्यो भवति विप्रतिषेधेन । भैमसेन्यः । सेनान्ताण् ण्यो भवति विप्रतिषेधेन । जातोग्रविष्वग्भीमेभ्य इति वक्तव्यम् ॥

मातुरुत्संख्यासम्भद्रपूर्वायाः ॥ ११५ ॥ किमर्थं स्त्रीलिङ्गेन निर्देशः क्रियते न संख्यासंभद्रपूर्वस्येत्येवमुच्यते । स्त्रीलिङ्गे यो मातृशब्दस्तस्माद्यथा स्यात् । इह मा भूत् । संमिमीते संमाता । संमातुरपत्यं सांमात्र इति ॥

कन्यायाः कनीन च ॥ ११६ ॥ इदं विप्रतिषिद्धम् । को विप्रतिषेधः । अपत्यमिति वर्तते । यदि च कन्या नापत्यम् । अथापत्यं न कन्या । कन्या चापत्यं चेति विप्रतिषिद्धम् । नैतद्विप्रतिषिद्धम् । कथम् । कन्याशब्दोयं पुंसाभिसम्बन्धपूर्वके संप्रयोगे निवर्तते । या चेदानीं प्रागभिसम्बन्धात् पुंसा सह संप्रयोगं गच्छति तस्यां कन्याशब्दो वर्तत एव । कन्यायाः कन्योक्तायाः कन्याभिमतायाः सुदर्शनायाः यदपत्यं स कानीन इति ॥

भावः । अथात्राहुः । कथं पुनर्नित्यानां शब्दानामनित्यान्धकादिवंशाश्रयेणान्वाख्यानं युज्यते । अत्र समाधिः । त्रिपुरुषानूकं नाम कुर्यादिति न्यायेनान्धकादिवंशा अपि नित्या एव । अथ वा ऽनित्योपायाश्रयेणापि नित्यान्वाख्यानं दृश्यते । यथा शकाश्रयणेन कालस्य ॥ ११४ ॥

मातुरुत् ॥ अणि सिद्धे तत्सन्नियोगेनोत्वार्थं वचनम् । स्त्रीलिङ्ग इति । अर्थधर्मं स्त्रीत्वं शब्दे समारोप्य क्रियाशब्दनिवृत्त्यर्थः स्त्रीलिङ्गनिर्देशः कृतः । न्यायानुवादश्चायं स्त्रीलिङ्गनिर्देशः । सम्बन्धिशब्दस्य प्रसिद्धतरत्वात् तस्यैव ग्रहणस्य सिद्धत्वात् । एतच्च बाह्वादिभ्यश्चेत्यत्रोक्तम् ॥ ११५ ॥

कन्यायाः ॥ यदीति । अक्षतयोनिः कन्या सा कथमपत्येन सम्बध्यतेति भावः । अभिसम्बन्धपूर्वक इति शास्त्रोक्तो विवाहोभिसम्बन्धस्तत्पूर्वके पुरुषसंयोगे कन्याशब्दो निवर्तते । या तु शास्त्रोक्तेन विवाहसंस्कारेण विना पुरुषं युनक्ति सा कन्यात्वं न जहाति । कन्योक्ताया इति । कन्यैवा सा युक्ता । तदेव व्याचष्टे कन्याभिमताया इति । कन्यैव साभिमता स्मृतिकाराणामित्यर्थः । सुदर्शनाया इति । प्रकटदर्शनाया अगुप्तत्वादित्यर्थः । अन्ये त्वाहुः । मुनिदेवतामाहात्म्याद्या पुंयोगेप्यक्षतयोनिर्भवति । यथा कुन्ती मन्त्राहूतदिनकरोत्पादितकर्णाख्यपुत्रापि पुनः कन्यैवाऽभूत् । तदपत्यं कानीनशब्दाभिधेयम् ॥ ११६ ॥

Indira Gandhi National Centre for the Arts

स्त्रीभ्यो ढक् ॥ १२० ॥ इदं सर्वेष्वेव स्त्रीग्रहणेषु विचार्यते । स्त्रीग्रहणे स्त्रीशब्दग्रहणं स्यात् स्त्रीप्रत्ययग्रहणं वा । स्त्र्यर्थग्रहणं वा । किं चातः । यदि स्त्रीशब्दग्रहणमर्थग्रहणं वा । इडविड् । ऐडविडः । पृथ् । पार्थः । उशिक् । औशिजः । दरद् । दारदः । अत्रापि प्राप्नोति । अथ प्रत्ययग्रहणम् । लैखाभ्रेयः । वैमात्रेयः । इति न सिध्यति । अस्तु प्रत्ययग्रहणम् । कथं लैखाभ्रेयः वैमात्रेय इति । शुभ्रादिषु पाठः करिष्यते । वडवाया वृषे वाच्ये । वडवाया वृषे वाच्ये ढग् वक्तव्यः । वडवाया वृषः वाडवेयः । अण् कुञ्चाकोकिलात्स्मृतः । क्रौञ्चः । कौकिल इति । आरक् पुंसि ततोन्यत्र । ततोन्यत्र आरक्पुंसि वक्तव्यः । मुषिकाया अपत्यं पुमान् मौषिकारः । मृग्याः पुमान्मार्गारः । गोधाया ढ्रक्विधौ स्मृतः ॥ गोधायाः पुमान् गौधेरः ॥

चटकाया ऐरक् ॥ १२८ ॥ चटकायाः पुंल्लिङ्गनिर्देशः * । चटकायाः पुल्लिङ्गेन निर्देशः कर्तव्यः । इहापि यथा स्यात् । चटकस्यापत्यं चाटकैरः । यदि पुल्लिङ्गेन निर्देशः क्रियते । चटकाया अपत्यं चाटकैर इति न सिध्यति । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्येवं भविष्यति । स्त्रियामपत्ये लुग्वक्तव्यः * । चटकस्यापत्य चटका ॥

आरगुदीचाम् ॥ १३० ॥ आरग्वचनमनर्थकं रका सिद्धत्वात् * । आरग्वचनमनर्थकम् । किं कारणम् । रका सिद्धत्वात् । गोधा आकारान्ता रच्क प्रत्ययः । एवं तर्हि सिद्धे सति यदारकं शास्ति तज्ज्ञापयत्याचार्योन्येभ्योप्ययं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । जाडारः पाण्डारः इत्येतत्सिद्धं भवति ॥

क्षुद्राभ्यो वा ॥ १३१ ॥ क्षुद्राभ्य इत्युच्यते । का क्षुद्रा नाम । अनियतपुंस्का । अङ्गहीना वा ॥

स्त्रीभ्यो ॥ बहुवचननिर्देशात् स्वरूपग्रहणे निरस्ते पक्षत्रयसम्भावनापूर्वकं प्रत्ययग्रहणमिह व्यवस्थाप्यते । इदं सर्वेष्विति । तत्र क्व चित्कश्चित्पक्ष आश्रीयते । इह तु स्वरितप्रतिज्ञानात् स्वरितेनाधिकारावगतिर्भवतीत्यस्याप्यर्थस्याश्रयणाट्टाबादिप्रत्ययग्रहणम् । स्त्रियां क्तिन्नित्येतत्प्रकरणविहितास्तु प्रत्यया व्यवधानान्न गृह्यन्ते । स्त्रीशब्दग्रहणमिति । स्त्रीलिङ्गानां शब्दानां ग्रहणमित्यर्थः । अर्थग्रहणमिति । अर्थे कार्यासम्भवे तदभिधायिशब्दग्रहणमेव सम्बध्यते । इडविडादयः शब्दाः स्त्रीवृत्तयो न तु स्त्रीप्रत्ययान्ता इति । तेभ्योणेव भवति । वडवाया इति । वृषो बीजाश्वः । तेन चार्थेन विशेषविहितेनापत्यलक्षणोर्थो ढको बाध्यते । तेनापत्ये वाडव इति भवति । क्रौञ्च इति । अपत्य एवायं ढगपवादः ॥ १२० ॥

चटकायाः ॥ पुल्लिङ्गेनेति । अन्यथा पुल्लिङ्गादिन्न प्रसज्येत ॥ १२८ ॥

क्षुद्राभ्यो ॥ अङ्गहीना वेति । वाशब्दश्चार्थे ॥ १३१ ॥

Indira Gandhi National Centre for the Arts

पितृष्वसुश्छण्॥१३२॥**ढकि लोपः**॥१३३॥केन विहिते पितृष्वसुः ढकि लोप इत्युच्यते । एतदेव ज्ञापयति पितृष्वसुर्ढगिति । यदयं ढकि लोपं शास्ति ॥

मातृष्वसुश्च ॥ १३४ ॥ ढकि लोप इत्युच्यते तत्रेदं न सिध्यति । मातृष्वस्रीयः । नैष दोषः । एवं वक्ष्यामि । पितृष्वसुश्छण् ढकि लोपः । ततो मातृष्वसुश्च । पितृष्वसुर्यदुक्तं तन्मातृष्वसुर्भवतीति । किं पुनस्तत् छणढकिलोपाविति ॥

राजश्वशुराद्यत् ॥ १३७ ॥ राज्ञोपत्ये जातिग्रहणम् * । राज्ञोपत्ये जातिग्रहणं कर्तव्यम् । राजन्यो नाम जातिः । क्व मा भूत् । राजन इति ॥

व्यन्सपत्ने ॥ १३७ ॥ व्यन्वचनमनर्थकं प्रत्ययार्थाभावात् * । व्यन्वचनमनर्थकम् । किं कारणम् । प्रत्ययार्थाभावात् । किमिदं प्रत्ययार्थाभावादिति । अपत्यार्थाभावात् । अपत्यमिति वर्तते । अनपत्ये चापि सपत्ने भ्रातृव्यशब्दो वर्तते । पाप्मना भ्रातृव्येण । अस्तु तावदपत्यं सपत्नश्च । तत्र भ्रातृव्य इति । कथं पाप्मना भ्रातृव्येणेति । उपमानात्सिद्धं भ्रातृव्य इव भ्रातृव्य इति ॥

गोत्रस्त्रियाः कुत्सने ण च ॥ १४७ ॥ किमर्थो णकारः वृद्ध्यर्थः । ञ्णितीति वृद्धिर्यथा स्यात् । गार्गो जाल्मः । गोत्रस्त्रियाः प्रत्ययस्य णित्करणानर्थक्यं वृद्धत्वात्प्रातिपदिकस्य * । गोत्रस्त्रियाः प्रत्ययस्य णित्करणमनर्थकम् । किं कारणम् । वृद्धत्वात्प्रातिपदिकस्य । वृद्धमेवेदं प्रातिपदिकम् । लुगर्थं तर्हि णकारः कर्तव्यः । यल्लुगन्तमवृद्धं तत्र वृद्धिर्यथा स्यात् वातण्डो जाल्मः । लुगर्थमिति चेन्न लुक्प्रतिषेधात् * । लुगर्थमिति चेत्तन्न । किं कारणम् । लुक्प्रतिषेधात् । प्रतिषिध्यते तत्र लुक् । गोत्रे लुगचीति । व्यवहितत्वादप्रतिषेधः । ईकारेण व्यवहितत्वात्प्रतिषेधो न प्राप्नोति । व्यवहितत्वादप्रतिषेध इति चेन्न

मातृष्वसुः ॥ तत्रेदमिति । अनन्तरस्य विधिं मन्यते । एवं वक्ष्यामीति । व्याख्यास्यामीत्यर्थः । चकारेण पितृष्वसुरित्यनुकृष्यते इति कार्यद्वयलाभः ॥ १३४ ॥

राज ॥ राजशब्दः क्षत्रियशब्दपर्यायः । जातिग्रहणमिति । यदा प्रकृतिप्रत्ययसमुदायेन जातिर्गम्यते तदा प्रत्ययो नान्यदा । तेन क्षत्रियजातौ प्रतिपिपादयिषितायां राजन्यशब्दप्रयोगो वैश्ये शूद्रे वा राजापत्ये राजनशब्दप्रयोगः ॥ १३७ ॥

व्यन्सपत्ने ॥ प्रत्ययार्थाभावादिति । भ्रातृव्यशब्दः सर्वस्मिन् सपत्न इष्यते । न हि सर्वः सपत्नो भ्रातुरपत्यमित्यपत्यलक्षणस्य प्रत्ययार्थस्याभाव इत्यर्थः । अस्तु तावदिति । विरोधाभावात्सपत्नेनापत्यार्थो न बाध्यते । न च समुदायार्थः सपत्नः । प्रकृतिप्रत्ययार्थयोस्त्यागप्रसङ्गात् । न च गत्यन्तरसम्भवे तस्यागो युक्त इति भावः ॥ १४५ ॥

गोत्र ॥ बहूनां गोत्रप्रत्ययानां वृद्धिमत्त्वदर्शनाद्विचारः । गोत्रस्त्रिया इति ॥ वातण्ड इति । वातण्डस्यापत्यं गोत्रं स्त्री । वतण्डाच्चेति यञ् तस्य लुक् ॥ स्त्रियामिति लुक् । शार्ङ्गरवादित्वात् ङीन् । वतण्ड्या अपत्यमिति णः । व्यवहितत्वादिति । अचीति परसप्तमीं मन्यते । विषयसप्तम्यां तु दोषः । अथ वा यतो गोत्रप्र-

Indira Gandhi National Centre for the Arts

पुंवद्भावात् * । व्यवहितत्वादप्रतिषेध इति चेत्तन्न । किं कारणम् । पुंवद्भावात् । पुंवद्भावोत्र भवति । भस्याढे तद्धिते । पुंवद्भवतीति फिनर्थं तु णकारः कर्तव्यः । यत्फिनन्तमवृद्धं तत्र वृद्धिर्यथा स्यात् । ग्लौचुकायनो जाल्म इति । पुंवद्भावप्रतिषेधार्थं च णकारः कर्तव्यः । गार्गी भार्या अस्य गार्गीभार्यः । वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो यथा स्यात् । गोत्राद्यून्यस्त्रियामिति वचनादप्रयोजनम् * । गोत्राद्यून्यस्त्रियामिति वचनादप्रयोजनमेतदिति भवति । नास्ति गार्गी इति । अवंश्यत्वाद्वा स्त्रियाः प्रयोजनम् * । अवंश्यत्वाद्वा स्त्रियाः प्रयोजनमेतद्भवति । न च स्त्री वंश्या । अस्ति गार्गी स्त्री । अपर आह । द्वावेव वंशौ । मातृवंशः पितृवंशश्च । यावता मातृवंशोस्ति नास्ति गार्गी ॥

वृद्धाट्ठक् सौवीरेषु बहुलम् ॥ १४८ ॥ गोत्रस्त्रियाः । वृद्धाट्ठक् फेश्छच । फाण्टाहृतिः । इमे चत्वारो योगाः । एषां त्रयः कुत्सने । त्रयः सौवीरगोत्रे । आद्यो योगः कुत्सन एव । अन्त्यः सौवीरगोत्र एव ॥

फाण्टाहृतिमिमताभ्यां णफिञौ ॥ १५० ॥ किमर्थो णकारः । वृद्ध्यर्थः । ञ्णितीति वृद्धिर्यथा स्यात् । फाण्टाहृतः । फाण्टहृतेः प्रत्ययस्य णित्करणानर्थक्यं वृद्धत्वात्प्रातिपदिकस्य फाण्टाहृतेः प्रत्ययस्य णित्करणमनर्थकम् । किं कारणम् । वृद्धत्वात् प्रातिपदिकस्य । वृद्धमेवैतत्प्रातिपदिकम् ।

त्ययाद्व्यवहितोजादिरुत्पद्यते तस्यालुगिति विज्ञानाद्विषयसप्तम्यामपि दोषाय व्यवधानम् । पुंवद्भावादिति । पुंवद्भावेन रूपातिदेशाद्वातण्डचशब्दात् स्त्रीवृत्तेर्णप्रत्यय इति भावः । ग्लौचुकायन इति । ग्लुचुकस्यापत्यं स्त्री प्राचामिति फिन्प्रत्ययः । इतो मनुष्यजातेरिति ङीष् पुंवद्भावे कृते णः । नास्ति गार्गीति । गार्ग्या अपत्यं स्त्रीत्यत्रार्थे नास्ति प्रत्ययः । अस्त्रियामिति युवसंज्ञानिषेधाद् गोत्रसंज्ञावस्थानादेको गोत्र इति नियमाद् गोत्रप्रत्ययान्तात्परगोत्रप्रत्ययानुत्पादात् । अवंश्यत्वाद्वेति । गार्ग्या अपत्यं या स्त्री तस्या न युवसंज्ञा नापि गोत्रसंज्ञा न हि सा गर्गस्यापत्यम् । पौत्रप्रभृतेश्चापत्यस्य गोत्रसंज्ञा विधीयते तदभावादेको गोत्र इति नियमाभावाण्णस्य भावादस्ति गार्गेत्यर्थः । न च स्त्री वंश्येति । पितृपितामहादिर्वंशो न मातृमातामहादिरित्यर्थः । तस्मात् पुंवद्भावप्रतिषेधार्थो णकारः । न च जातश्चेति प्रतिषेध सिध्यति । गोत्रत्वाभावे जातित्वाभावात् । यदा च गोत्रं च चरणैः सहेत्यत्रापत्यमात्रं गृह्यते तदा जातित्वमस्त्येव । फिनर्थस्तु कर्तव्य एव णकारो वृद्धये । मातृवंश इति । गार्ग्या अपत्यं या स्त्री सा मातृवंशेन गर्गकुला भवत्येवेति गर्गापेक्षया तस्य गोत्रत्वादेको गोत्रइति नियमात्प्रत्ययान्तराभावान्नास्ति गार्गी । पौत्रप्रभृतिग्रहणं तु व्यवहितापत्योपलक्षणम् । तस्मात् फिनर्थो णकारः ॥ १४७ ॥

वृद्धाट्ठक् सौ ॥ गोत्रस्त्रिया इति । विषयविभागकथनार्थोत्रोपक्षेपः कुत्सनग्रहणस्य सौवीरग्रहणस्य च सूत्रद्वयएवानुवर्तनाद्यथोक्तविषयविभागलाभः ॥ १४८ ॥

पुंवद्भावप्रतिषेधार्थं तु * । पुंवद्भावस्य प्रतिषेधार्थं णकारः कर्तव्यः । फाण्टाहृता भार्या अस्य फाण्टाहृताभार्याः । वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो यथा स्यात् । उक्तं वा * । किमुक्तम् । गोत्राद्यून्यस्त्रियामिति वचनादप्रयोजनम् । अवंश्यत्वाद्वा स्त्रियाः प्रयोजनमिति ॥

कुर्वादिभ्यो ण्यः ॥ १५१ ॥ वामरथस्य कण्वादिवत्स्वरवर्जम् * । वामरथस्य कण्वादिवद्भावो वक्तव्यः । किमविशेषेण । नेत्याह । स्वरवर्जम् । स्वरं वर्जयित्वा । किं प्रयोजनम् । वामरथ्यस्यच्छात्राः वामरथाः । कण्वादिभ्यो गोत्र इत्यण्यथा स्यात् । यदि कण्वादिवदित्युच्यते । प्रत्ययाश्रयमनतिदिष्टं भवति । तत्र को दोषः । वामरथाः । बहुषु लोपो न प्राप्नोति । वामरथानां संघः । वामरथा । संघाङ्कलक्षणेष्वञ्यञिञामणित्यण् प्राप्नोति । यदि पुनर्यञ्वदित्युच्यते । एवमपि प्रकृत्याश्रितमनतिदिष्टं भवति । तत्र को दोषः । वामरथ्यस्यच्छात्रा वामरथाः । कण्वादिभ्यो गोत्र इत्यण् प्राप्नोति । अस्तु तर्हि कण्वादिवदित्येव । कथं वामरथाः । वामरथानां संघ इति च । यदयं स्वरवर्जमित्याह तज्ज्ञापयत्याचार्यः प्रत्ययाश्रयमप्यतिदिष्टं भवतीति ॥

उदीचामिञ् ॥ १५३ ॥ उदीचामिञ्विधौ तक्ष्णोण्वचनम् । उदीचामिञ्विधौ तक्ष्णोण् वक्तव्यः । ताक्ष्णः । यदि पुनरयं तक्षशब्दः शिवादिषु पठ्येत । शिवादिरिति चेण्ण्यविधिः * । शिवादिरिति चेद् ण्यो विधेयः । ताक्षण्यः । सिद्धं

फाण्टा ॥ फांण्टाहृतेरिति । यथासंख्यसंबन्धस्येष्टत्वान्न मिमतशब्दार्थं णित्वम् । पूर्वनिपातव्यवस्था तु शास्त्रे नावश्यं सर्वत्राश्रीयते इति तदनाश्रयणमपि न यथासंख्याभावं सूचयितुमलम् । शिष्टं भाष्यं पूर्ववद्व्याख्येयम् ॥ १५० ॥

कुर्वा ॥ वामरथस्येति । प्रकारणाण्ण्यप्रत्ययान्तस्येति विज्ञेयम् । कण्वादीनां यञन्तानां यत्कार्यं तदतिदेशः केवलानां तेषां कार्यस्य कस्य चिदनभिधानात् वामरथा इति । छे प्राप्ते ऽण्विधिः । आपत्यस्येति यलोपः । यदीति कण्वादिवदिति वचनात्कण्वादीनामाहत्य यत्कार्यं विहितं कण्वादिभ्यो गोत्र इति तस्यैवातिदेशः प्राप्नोति न तु यञन्तमात्रनिबन्धनस्येति भाव । एवमपीति । सामान्यातिदेशे विशेषानतिदेशात् । यदयमिति । लिङ्गादाहत्यानाहत्य च कण्वादीनां यञन्तानां यत्कार्यं विधीयते । तदतिदिश्यते ॥ १५१ ॥

उदीचाम् ॥ उदीचामिति । इञ्बाधनायाण्विध्यर्थं वचनम् । तदण इति । षपूर्वहन्धृतराज्ञामणीत्यल्लोपः। यदीति। विशेषविहितेनाणा बाधितत्वादिञ् न भविष्यतीति भावः । ण्यविधिरिति । यद्यणा कार्यमात्रं बाध्यते तदा द्वयोरपि ण्येञोर्बाधः स्यात् । अथ विशेषचिन्ता तदा पुरस्तादपवादा इति न्यायाद् ण्यस्यैव बाधः प्राप्नोति नेञः । सिद्धं त्विति । विकल्पितण्यमुक्ते पक्षे तक्षन्शब्दात् प्राग्दीव्यतोणित्यण् भवति । ननु

वृदीचां वा ण्यवचनात् * । सिद्धमेतत् । कथम् । उदीचां वा ण्यवचनात् । उदीचां वा ण्यो भवतीति वक्तव्यम् । ण्येन मुक्ते यो यतः प्राप्नोति स ततो भविष्यति ॥

कौसल्यकार्मार्याभ्यां च ॥ १५५ ॥ किमिदं कौसल्यकार्मार्ययोर्विकृतयोर्ग्रहणं क्रियते । एवं विकृताभ्यां यथा स्यात् । अत्यल्पमिदमुच्यते । कौसल्यकार्मार्याभ्यां चेति । फिञ्प्रकरणेदगुकोसलकर्मारच्छागवृषाणां युट् च* । फिञ्प्रकरणे दगुकोसलकर्मारच्छागवृषाणां युट् चेति वक्तव्यम् । दगु । दागव्यायनिः । कोशल । कौसल्यायनिः । कर्मार । कार्मार्यायणिः । छाग । छाग्यायनिः । वृष । वार्ष्यायणिः । यदि युट् क्रियते । युटि कृते अनादित्वादादेशो न प्राप्नोति । इदमिह संप्रधार्यमादेशः क्रियतां युडिति । किमत्र कर्तव्यम् । परत्वादादेशः । नित्यो युट् । कृते ऽप्यादेशे प्राप्नोति अकृते ऽपि । युडप्यनित्यः । अन्यस्य कृते आदेशे प्राप्नोति अन्यस्याकृते । शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति । अन्तरङ्गस्तर्हि युट् । कान्तरङ्गता । उत्पत्तिसंनियोगेन युडुच्यते उत्पन्ने प्रत्यये प्रकृतिप्रत्ययावाश्रित्याङ्गस्यादेशः । आदेशोऽप्यन्तरङ्गः । कथम् । वक्ष्यत्येतत् । आयन्नादिष्वुपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति । अनवकाशस्तर्हि युट् । एवं तर्हि पूर्वान्तः करिष्यते । यदि पूर्वान्तः करिष्यते । दागव्यायनिः । ओर्गुणो न प्राप्नोति । अस्तु तर्हि परादिरेव । ननु चोक्तम् । युटि कृते अनादित्वादादेशो न प्राप्नोतीति । नैष दोषः । सिद्धं त्वादेशस्य युड्वचनात् * । सिद्धमेतत् । कथम् । आदेशस्य युड्वचनात् । युडादिष्टस्येति वक्तव्यम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । चेन संनियोगः करिष्यते । युट् च । किं च । यच्चान्यत्प्राप्नोति । किं चान्यत् प्राप्नोति । आदेशः ॥

वाकिनादीनां कुक् च ॥ १५८ ॥ यदि पुनरयं कुट् परादिः क्रियते । कुटि प्रसयादेरादेशानुपपत्तिरनादित्वात् * । कुटि सति प्रसयादेरादेशो नोपप-

---

जातसेनोग्रसेनविष्वक्सेनभीमसेनेभ्यो ण्येन मुक्ते पक्षे अण् ऋष्यादिलक्षणः प्राप्नोति। यथान्यासे तु तेभ्योण्येञौ भवतः । एवं तर्हि बाह्वादेराकृतिगणत्वादेतेभ्यो ण्येन मुक्ते इञ् भविष्यतीत्यदोषः ॥ १५३ ॥

कौसल्य॥ किमिदमिति । कोसलस्यापत्यं वृद्धेत्कोसलाजादाञ्ञ्यङिति ञ्यङ् । कर्मारस्यापत्यं कारिलक्षणो ण्य इत्येवं यौ कौसल्यकार्मार्यशब्दौ तयोर्ग्रहणं नेष्यत इति प्रश्नः । उत्तरं तु । प्रत्ययसंनियोगेनैवंभूतप्रकृत्यादेशविधानार्थं एव निर्देशः । अङ्गस्यादेश इति । अङ्गनिमित्तप्रत्ययावयवस्येत्यर्थः । चेनेति । तेन युगपदागमादेशौ भवतः ॥ १५ ॥

वाकि ॥ क्रियतइति । गणसूत्रमेवैवं पठ्यतइ त्यर्थः । यद्यपि वाकिनादीनां कुक्चेति सूत्रपाठे लाघवं भवति । न लोपश्चेति गणसूत्रैकदेशस्याकरणात् । तथापि गणपाठस्य

Indira Gandhi National Centre for the Arts

द्यते । किं कारणम् । अनादित्वात् । कुटि कृते ऽनादित्वादादेशो न प्राप्नोति । एवं तर्हि पूर्वान्तः करिष्यते । पूर्वान्ते नलोपवचनम् * । यदि पूर्वान्तः करिष्यते । न लोपो वक्तव्यः । चार्मिकायणिः । वार्मिकायणिः । न लोपः प्रातिपदिकान्तस्येति न लोपो न प्राप्नोति । परादौ तु पुनः सति न लोपः प्रातिपदिकान्तस्येति नलोपः सिध्यति । अस्तु तर्हि परादिरेव । ननु चोक्तम् । कुटि कृते अनादित्वादादेशो न प्राप्नोतीति । सिद्धं त्वादिष्टस्य कुड्वचनात् * । सिद्धमेतत् । कथम् । कुड्चादिष्टस्येति वक्तव्यम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । चेन संनियोगः करिष्यते । कुट् च । किं च । यच्चान्यत् प्राप्नोति । किं चान्यत्प्राप्नोति । आदेशः, सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं पूर्वान्ते नलोपवचनमिति । नैष दोषः । क्रियते न्यास एव एतत् । चर्मिवर्मिणोर्नलोपश्चेति । कारिभ्य इञोगोत्रात्फिञ् विप्रतिषेधेन * । कारिभ्य इञ् भवतीत्येतस्मादगोत्रात् फिञ् भवति विप्रतिषेधेन । कारिभ्य इञ् भवतीत्यस्यावकाशः । अयस्कारिः । लौहकारिः । फिञोवकाशः । तापसायनिः । साम्मितिकायनिः । इहोभयं प्राप्नोति । नापितायनिः । फिञ्भवति विप्रतिषेधेन ॥

मनोर्जातावञ्यतौ षुक्च ॥ १६१ ॥ अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः । नकारस्य च मूर्द्धन्यस्तेन सिध्यति माणवः ॥ यदि षुक् पूर्वान्तः क्रियते । मानुषाः । बहुषु लोपः प्राप्नोति । माणुषाणां संघः । संघाङ्कलक्षणेष्वञ्यञिञामण् प्राप्नोति । अस्तु तर्हि परादिः । यदि परादिः क्रियते मानुषी । अञन्तादितीकारो न प्राप्नोति । अस्तु तर्हि पूर्वान्त एव । कथं मानुषा मानुषाणां संघ इति च । उभयत्र लौकिकस्य गोत्रस्य ग्रहणम् । न चैतल्लौकिकं गोत्रम् । किं तर्हि । जातिः । इह तर्हि मानुष्यकमिति हलस्तद्धितस्येति यलोपः प्राप्नोति ।

पश्चात् सूत्रप्रणयनाद् गणपाठदर्शनात् कुक्चेत्युक्तमिति भावः । लिङ्गविशिष्टपरिभाषया चर्मिणीवर्मिणीभ्यां प्रत्ययविधानाद्भस्याढइति पुंवद्भावः सिद्धचेति । कुटि तु भत्वाभावात् पुंवद्भावो न स्यात् ॥ १५८ ॥

मनोः ॥ अपत्य इति । णत्वविधानार्थमिदम् । अणः सिद्धत्वात् । न च न दण्डमाणवान्तेवासिष्विति निपातनाण्णत्वस्य सिद्धत्वाद्वचनं नारम्भणीयम् । निपातनादर्थविशेषस्यानिश्चयात् । अनधीतविद्यत्वान् मूढत्वं विहिताकरणान्निषिद्धाचरणाच्च कुत्सितत्वम् । मानुषा इति । अपत्याधिकारादपत्ये प्रत्ययो विधीयते । जातिग्रहणं तु प्रकृतिप्रत्ययविशेषणं न तु जातिः प्रत्ययार्थइति यञञोश्चेति लुक्प्रसङ्गः । परादौ तु षञ् भवति नत्वाञिति लुगभावः । ननु तद्भक्तस्तद्ग्रहणेन गृह्यते इति परादावप्यञ् कृतप्रसङ्गः । एवं तर्हि अकारप्रश्लेषादकारमात्रस्याञोत्र ग्रहणात्परादावञ् कार्याभावः । ईकार इति । शार्ङ्गरवाद्यञो ङीनित्यनेनेति भावः । न चैतदिति । अपत्ये व्युत्पादितस्यापि मानुषशब्दस्य ब्राह्मणशब्दस्येव जातिवाचित्वादपत्यवाचित्वाभावादित्यर्थः ।

Indira Gandhi National Centre for the Arts

परादावप्येष दोषः । यद्धि तद्धलस्तद्धितस्येति हल्ग्रहणं न तदङ्गविशेषणं शक्यं विज्ञातुम् । इह हि दोषः स्यात् । वृकाट्टेण्यण् । वार्केणीति । तस्मादुभाभ्यामेतद्वक्तव्यम् । मकुसाके राजन्यमनुष्ययुवान इति ॥

अपत्यं पौत्रप्रभृति गोत्रम् ॥ १६२ ॥ पौत्रप्रभृतेर्गोत्रसंज्ञायां यस्यापत्यं तस्य पौत्रप्रभृति संज्ञाकरणम् । पौत्रप्रभृतेर्गोत्रसंज्ञायां यस्यापत्यविवक्षा तस्य पौत्रप्रभृति गोत्रसंज्ञं भवतीति वक्तव्यम् । गर्गोऽपि कं चित्प्रति पौत्रः । कुशिकोऽपि, तत्र मा भूदिति । तर्त्तर्हि वक्तव्यम् । न वक्तव्यम् । समर्थानां प्रथमादिति वर्त्तते । समर्थानां प्रथमस्य यदपत्यं पौत्रप्रभृति विज्ञायते । जीवद्वंश्यं च कुत्सितं गोत्रसंज्ञं भवतीति वक्तव्यम् । गार्ग्यस्त्वमसि जाल्म, वात्स्यस्त्वमसि जाल्म इति । का पुनरिह कुत्सा । पितृतो लोके व्यपदेशवता अस्वतन्त्रेण भवितव्यम् । य इदानीं पितृमान् स्वतन्त्रो भवति स उच्यते गार्ग्यस्त्वमसि जाल्म, वात्स्यस्त्वमसि जाल्म । न त्वं पितृतो व्यपदेशमर्हसीति ॥

जीवति तु वंश्ये युवा ॥ १६३ ॥ जीवति तु वंश्ये युवेति पौत्रप्रभृत्यपेक्षं च * । जीवति तु वंश्ये युवेति पौत्रप्रभृत्यपेक्षं चेति वक्तव्यम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । पौत्रप्रभृतीति वर्तते । एवं तर्हि अन्वाचष्टे पौत्रप्रभृतीति वर्ततइति । किमेतस्यान्वाख्याने प्रयोजनम् । तच्च दैवदत्त्यर्थम् । देवदत्तस्यापत्यं दैवदत्तिरिति । अनन्तरं यदपत्यं तत्र युवसंज्ञा मा भूदिति । उच्यमाने

इह तर्हीति । हलन्तादङ्गात्परस्य तद्धितयकारस्य लोप इति मन्यते हलस्तद्धितस्येति वर्त्तमाने आपत्यस्य च तद्धितेनातीति लोपोत्र प्राप्नोति । हलस्तद्धितस्येत्यत्र त्वीतीति वर्त्तते । वार्केणीति । वृकशब्दादायुधजीविसंघविशेषवचनात् स्वार्थे टेण्यण् ॥ १६१ ॥

अपत्यम् ॥ पौत्रप्रभृतेरिति । नन्वपत्यमात्रस्य लोके गोत्रत्वादपत्यविशेषे गोत्रशब्दस्य नियमात्परिभाषेयं न्याय्या न तु संज्ञा । नैष दोषः । लिङ्गवती परिभाषा भवति विध्यन्तरशेषभूता वा । न चेयं तथा । यथा च वृद्ध्यादयः सर्वार्थप्रत्यायनयोग्या अपि संज्ञिविशेषे शक्त्यवच्छेद करणात् संज्ञा उच्यन्ते तथेयमपि । उक्तं च हरिणा । व्यवहाराय नियमः संज्ञानां संज्ञिनि क्व चित् । नित्य एव तु संबन्धो डित्थादिषु गवादिवत् ॥ वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः । अकृत्रिमो हि संबन्धो विशेषण विशेष्यवदिति ॥ गर्गोऽपीति । वस्तुस्थित्या तस्यापि पौत्रत्वमवश्यं भावि । सत्यां च गोत्रसंज्ञायां गोत्राद्यूनीति वचनाद्यूनि प्रत्ययप्रसङ्गो गार्ग्यादेव च यूनीष्यते । समर्थानामिति । यद्यप्यपत्यशब्दस्य संबन्धिशब्दत्वेन चोद्यमेतत्परिह्रियते । नहि गर्गशब्दस्यापत्यत्वं सदपि वस्तुस्थित्यार्थं इति । तथापि परिहारान्तरसद्भावाद्भाष्यकारेणैतन्नोक्तम् । जीवद्वंश्यमिति । यूनश्च कुत्सायामिति सूत्रमनार्षमिति वचनम् । न त्वं पितृत इति । पितृतो व्यपदेशं हि गार्ग्यायण इति भाव्यम् ॥ १६२ ॥

जीवति ॥ अभिजनप्रबन्धो वंशः तत्र भवो वंश्यः पित्रादिः । तस्मिन् जीवति यस्य

Indira Gandhi National Centre for the Arts

ऽप्येतस्मिन् देवदत्तस्य पौत्रस्य युवसंज्ञा प्राप्नोति । एतदपि पौत्रप्रभृति भवति । न पौत्रप्रभृतीत्यनेनापत्यमभिसंबध्यते पौत्रप्रभृति यदपत्यमिति । किं तर्हि । वंश्योऽभिसंबध्यते । पौत्रप्रभृति वंश्ये जीवति यदपत्यमिति । एवमपि देवदत्तस्य द्वौ पुत्रौ तयोः कनीयसि युवसंज्ञा प्राप्नोति भ्रातरि च ज्यायसीति । एवं तर्ह्यपत्यमेवाभिसंबध्यते न तु पौत्रप्रभृतिसमानाधिकरणमपत्यम् । नैवं विज्ञायते । पौत्रप्रभृति यदपत्यमिति । कथं तर्हि । पौत्रप्रभृतेर्यदपत्यमिति । वृद्धस्य च पूजायाम् * । वृद्धस्य च पूजायां युवसंज्ञा वक्तव्या । तत्रभवन्तो गार्ग्यायणाः । तत्रभवन्तो वात्स्यायनाः । का पुनरिह पूजा । युवत्वं लोके ईप्सितं पूजेत्युपचर्यते । तत्रभवन्तश्च युवत्वेनोपचर्यमाणाः पूजिता भवन्ति । आपत्यो वा गोत्रम् * । अथ वा आपत्यो गोत्रसंज्ञो भवतीति वक्तव्यम् । परमप्रकृतेश्चापत्यः * । परमप्रकृतेश्चापत्यो भवतीति वक्तव्यम् । आपत्याज्जीवद्वंश्यात्स्वार्थे द्वितीयो युवसंज्ञः । आपत्याज्जीवद्वंश्यात्स्वार्थे द्वितीयः प्रत्ययः स च युवसंज्ञो भवतीति वक्तव्यम् । स चास्त्रियाम् * । सचास्त्रियां भवतीति वक्तव्यम् । एको गोत्रग्रहणानर्थक्यं च* । एवं च कृत्वा एकोगोत्रग्रहणमनर्थकं भवति । बहुवचनलोपिषु च सिद्धम् * । बहुवचनलोपिषु च सिद्धं भवति । तत्र बिदानामपत्यं माणवक इति विगृह्य बिदशब्दाद् द्व्यकयोरुत्पत्तिर्भविष्यति । बैदः बैदौ । बैदस्यापत्यानि बहवो माणवका इति विगृह्य बिदाशब्दाद्बहुषूत्पत्तिर्भविष्यति । बिदा इति ॥

वान्यस्मिन् सपिण्डे स्थविरतरे जीवति ॥ १६५ ॥ अन्यग्रहणं किमर्थम् । भ्रातरीति वर्त्तते । सपिण्डमात्रे यथा स्यात् । अथ स्थविरतरग्रहणं किमर्थ-

---

संज्ञेष्यते न स निर्दिष्ट इत्यपत्यमात्रस्य युवसंज्ञा प्राप्नोतीति मत्वाह पौत्रप्रभृत्यपेक्षं चेति । इदं संज्ञाविधानमिति शेषः । पौत्रप्रभृतीति व्यधिकरणं विशेषणमपत्यस्यापेक्ष्य युवसंज्ञा विधीयते पौत्रप्रभृतेर्यदपत्यं तद्युवसंज्ञमित्यर्थः । अनन्तरमिति । अनन्तरस्य च युवसंज्ञायां ण्यक्षत्रियार्षेति लुक्प्रसङ्गः । इतरः पौत्रप्रभृति यदपत्यमिति सामानाधिकरण्येन संबन्धं मत्वाह देवदत्तस्येति । आचार्यदेशीय आह न पौत्रप्रभृतीति । चोदक आह एवमपीति । भ्रातरीत्यनेन वंश्यस्य निवर्त्तितत्वात्तद्विशेषणस्यापि पौत्रप्रभृतिग्रहणस्य निवृत्तौ ज्यायसि भ्रातरि जीवत्यनन्तरापत्यस्यापि कनीयसो युवसंज्ञाप्रसङ्ग इत्यर्थः । कथं तर्हीति । एतच्चेहार्थादपत्यग्रहणाल्लभ्यते । अन्यथा पौत्रप्रभृतेरपत्यत्वाव्यभिचारादनर्थकमेवापत्यग्रहणं स्यात् । वृद्धस्येति । सूत्रेषु तु कैश्चिद् वृद्धस्य च पूजायामिति वार्त्तिकदर्शनात्प्रक्षिप्तम् । गार्ग्यायणा इति । युवसंज्ञाविधानसामर्थ्यात् स्वार्थे युवप्रत्ययः । युवत्वमिति । ननु युवशब्दो ऽनपेक्षितप्रवृत्तिनिमित्त एव संज्ञेति कथमेतदुच्यते । प्रायेणाल्पवयसो जीवद्वंश्यत्वं भवतीति तदध्यारोपः । पूजेत्यदोषः । आपत्यो वेति । गोत्रे लुगचीत्यत्र व्याख्यातम् ॥ १६३ ॥

वान्यस्मिन् ॥ सपिण्डमात्र इति । अन्यथा पूर्वेण नित्यायां युवसंज्ञायां प्राप्तायां-

म्। उभयतो विशिष्टे यथा स्यात्। स्थानतो वयस्तश्च। अथ जीवतीति वर्तमाने पुनर्जीवतिग्रहणं किमर्थम्। जीवतो जीवति यथा स्यात्। मृते हि मा भूत्। मृते हि गार्ग्यो मृत इत्येव भवितव्यम्। अथ गोत्रयूनोः समावेशो भवति। उताहो न। किं च प्राप्नोति। बाढं प्राप्नोति। न ह्ययमेकसंज्ञाधिकारः। किं चातः। गोत्रयूनोः समावेशे को दोषस्तत्कृतं भवेत्॥ गोत्रयूनोः समावेशे को दोषो भवति। तत्कृतं प्राप्नोति। गोत्राश्रया विधयो यून्यपि प्राप्नुवन्ति। यास्कायनयः। लाह्यायनयः। यस्कादिभ्यो गोत्रे इति लुक् प्राप्नोति। यस्कादिषु न दोषोस्ति न यूनीत्यनुवर्तनात्। यस्कादिषु न दोषः। किं कारणम्। न यूनीत्यनुवर्तनात्। न यूनीति तत्रानुवर्त्तते। क्व प्रकृतम्। न तौल्वलिभ्य इति। दोषो त्रिबिदपञ्चाला न यूनीत्यनुवर्त्तनात्॥ यदि न यूनीत्यनुवर्त्तते। अत्रयः बिदाः पञ्चाला माणवका इति न सिध्यति। नैष दोषः। संबन्धमनुवर्त्तिष्यते। न तौल्वलिभ्यः तद्राजस्य बहुषु तेनैवास्त्रियां लुग् भवति। न तौल्वलिभ्यो यूनि न। यस्कादिभ्यो गोत्रे लुग् भवति। न यूनि। तौल्वलिभ्य इति निवृत्तम्। यञञोश्च, अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च लुग् भवति। यूनि नेत्यपि निवृतम्। इह तर्हि काण्व्यायनीयाः। कण्वादिभ्यो गोत्रइत्यण् प्राप्नोति। कण्वादिषु न दोषोस्ति न यून्यस्ति ततः परम्॥ कण्वादिषु दोषो नास्ति। किं कारणम्। न यून्यस्ति ततः परम्। कण्वादिभ्यो यो विहितस्तदन्तात्प्रातिपदिकादित्युच्यते। यश्चात्र कण्वादिभ्यो

मियं विभाषा स्यात्। उभयत इति। ज्यायसीत्यनुवृत्त्या वयः प्रकर्षे लब्धे स्थविरतर इति वचनसामर्थ्यादुभयनिमित्तः प्रकर्ष आश्रीयते। जीवत इति। जीवतीत्याख्यातपदं संज्ञिविशेषणार्थमिहोपात्तमित्यर्थः। मृते हीति। संज्ञिनि सपिण्डे चेति भावः। अथेति। एकसंज्ञाधिकारादन्यत्र समावेशस्य दर्शनादर्शनाभ्यां प्रश्नः। यास्कायनय इति। यस्कस्यापत्यं गोत्रमिति शिवाद्यण्। तदन्ताद्यूनि अणो द्व्यच इति फिञ् एकदेशविकृतस्यानन्यत्वाद्वृद्धौ यस्येति लोपे च यास्किशब्दो यस्कशब्द एवेति लुक् प्राप्नोति। न यूनीति। तत्र वाक्यभेदेन संबन्धो यस्कादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु लुग् भवति। यूनि तु न भवतीति। अत्रय इति। अत्रेर्गोत्रे इतश्चानिञ इति ढक्। बिदादञ्। पञ्चालाज्जनपदशब्दादित्यञ्। ततो बहुषु युवस्वत इञ्। तस्य ण्यक्षत्रियार्षेति लुकि कृते ढगञोर्लुगिष्यते स न यूनीत्यनुवर्त्तनान्न प्राप्नोति। संबन्धमिति। तेन यस्कादिभ्यो गोत्र इत्यत्रैव न यूनीति संबध्यते नान्यत्रेत्यर्थः। इह तर्हीति। व्यवहितेऽपि परशब्दस्य वृत्तिदर्शनात्कण्वशब्दात्परः फग् भवतीति गोत्रसंज्ञायामण्प्रसङ्गः। विहितविशेषणाश्रयेण परिहारमाह कण्वादिष्विति। कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितस्तदन्तात्प्रातिपदिकाच्छेषे ऽर्थे ऽण्प्रत्यय इति

Indira Gandhi National Centre for the Arts

विहितः न तदन्तं प्रातिपदिकम् । यदन्तं च प्रातिपदिकं नासौ कण्वादिभ्यः परः । इह तर्ह्यौपगवस्यापत्यमौपगविरिति एको गोत्र इत्येतस्मान्नियमात्प्रत्ययो न प्राप्नोति । एको गोत्रे प्रतिपदम् । प्रतिपदमत्र प्रत्यया विधीयन्ते । गोत्राद्यून्यस्त्रियामिति । तदन्तात्तर्ह्यनेकः प्रत्ययः प्राप्नोति । गोत्राद्यूनि च तत्स्मरेत् । गोत्राद्यून्यस्त्रियामिति तत् स्मरेत् । किम् । एक इत्येव । गोत्रे तर्हि लुगुक्तः स यून्यपि प्राप्नोति । अस्तु पुनर्यूनि लुगित्येव लुग् भविष्यति । नैवं शक्यम् । फक्फिञोर्हि दोषः स्यात् । शालङ्केर्यूनः छात्राः शालङ्काः । पैलस्य पैलीयाः । फक्फिञोरन्यतरस्यामित्यन्यतरस्यां श्रवणं प्रसज्येत । तस्माद्युवसंज्ञायां गोत्रसंज्ञायाः प्रतिषेधो वक्तव्यः । न वक्तव्यः । तुर्नियामकः । तुः क्रियते । स नियामको भविष्यति । जीवति वंश्ये अपत्यं युवसंज्ञमेव भवतीति । यदि तर्हि युवसंज्ञायां गोत्रसंज्ञा न भवति । य इष्यन्ते यूनि गोत्राश्रया विधयस्ते न सिध्यन्ति । गार्ग्यायणानां समूहो गार्ग्यायणकम् । गार्ग्यायणानां किं चिद् गार्ग्यायणकम् । गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः । गोत्राश्रयो वुञ् प्राप्नोति । एवं तर्हि । राजन्याद् वुञ् मनुष्याच्च ज्ञापकं लौकिकपरम् । यदयं वुञ्विधौ राजन्यमनुष्ययो-

---

सूत्रार्थाश्रयणात्तद्दोषाभावः । प्रतिपदमिति । एको गोत्र इति नियमादप्राप्तो यून्यंपरः प्रत्ययो विधीयतइत्यर्थः । तदन्तात्तर्हीति । यदि एको गोत्र इति नियमो बाध्यते तदौपगवयूनोऽपत्यमित्यत्रापि यूनो गोत्रत्वे सति यञिञोश्चेति फक्प्रसङ्गः । गोत्रादिति । गोत्राद्यूनीत्यत्रैकग्रहणमनुवर्त्तते तेनैकस्यैव युवप्रत्ययस्यानुज्ञानादनेकः प्रत्ययो न भविष्यतीत्यर्थः । यद्यप्यादस्य युवप्रत्ययस्य यूनि लुगिति लुकि कृते इष्टं सिध्यति । तथापि परिहारान्तरसंभवादेतन्नाश्रितम् । स यून्यपीति । अत्रीणां यूनां छात्रा इत्यादावित्यर्थः । पुनरिति । परत्वादलुकं बाधित्वा लुग् भविष्यतीत्यर्थः । शालङ्केरिति । शालङ्कोरपत्यं गोत्रमिति बह्वादेराकृतिगणत्वादिञ् । पैलादिषु शालङ्किशब्दपाठान्निपातनाद्भेञ्प्रत्ययः शलङ्कादेशश्च । ततः शालङ्केरपत्यं युवेति यञिञोश्चेति फक् । तस्य पैलादिभ्यश्चेति लुक् । ततः शालङ्केर्यूनः छात्रा इति प्राग्दीव्यतीयार्थविवक्षायां यूनो गोत्रसंज्ञायां सत्यां पैलादिषु लुको गोत्रेलुगचीत्यलुग् बाधकः स्यात् । तस्यापि यूनि लुगिति परत्वाल्लुग् बाधकः तस्यापि फक्फिञोरन्यतरस्यामिति विकल्प इति पक्षे तु फकः श्रवणप्रसङ्गः । यदा तु यूनो गोत्रसंज्ञा नास्ति तदा गोत्रेलुगचीत्यस्याप्रवृत्तौ पैलादिभ्यश्चेति लुग् भवत्येव ततः कण्वादिभ्यो गोत्रे इत्यश्चेत्यणि सति शालङ्का इति भवति । फक्फिञोरन्यतरस्यामित्ययं च विकल्पोनन्तरस्य यूनि लुगित्यस्यैव बाधको न तु पैलादिलुकोऽव्यवहितस्यान्तरङ्गस्य च । पैलीया इति । पीलाया अपत्यं गोत्रं पीलाया वेत्यण् । ततो यून्यणो द्व्यच इति फिञ् । तस्य पैलादिभ्यश्चेति लुक् । ततो वृद्धाच्छः । तुर्नियामक इति । अनेकार्थत्वान्निपातानामवधारणार्थत्वात्तु शब्दस्य ॥ १६५ ॥

Indira Gandhi National Centre for the Arts

ग्रहणं करोति। तज्ज्ञापयत्याचार्यः। लौकिकं परं गोत्रग्रहणमिति। युवा च लोके गोत्रमित्युपचर्यते। किं गोत्रोसि माणवक गार्ग्यायणः। किं गोत्रोसि माणवक वात्स्यायन इति। यद्येतज्ज्ञाप्यते औपगवेर्यूनः छात्रा औपगवीयाः। इञो गोत्र इत्यण् प्राप्नोति। सामूहिकेषु ज्ञापकम्। यदि सामूहिकेषु ज्ञापकम्। गार्ग्यायणानां किं चिद् गार्ग्यायणकम्। वुञ्विधावेव तज्ज्ञापकम्। यदि वुञ्विधौ ज्ञापकं शालङ्केर्यूनः छात्राः शालङ्काः। इञो गोत्रइत्यण्न प्राप्नोति। अस्तु तर्ह्यविशेषेण। कथमौपगवेर्यूनः छात्रा औपगवीयाः। इञो गोत्र इत्यण् प्राप्नोति। नैष दोषः। गोत्रेणाविञं विशेषयिष्यामः। गोत्रे य इञविहित इति॥

जनपदशब्दात् क्षत्रियादञ्॥ १६८॥ क्षत्रियादेकराजात्सङ्घप्रतिषेधार्थम् *। क्षत्रियादेकराजादिति वक्तव्यम्। किं प्रयोजनम्। सङ्घप्रतिषेधार्थम्। सङ्घान्मा भूत्। पञ्चालानामपत्यं विदेहानामपत्यमिति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। न ह्यन्तरेण बहुषु लुकं पञ्चालानामित्येतद्भवति। यस्तस्मादुत्पद्यते स युवप्रत्ययः स्यात्। युवप्रत्ययश्चेत्तस्य लुक्। तस्मिंश्चालुग् भविष्यति। इदं तर्हि क्षौद्रकाणामपत्यं मालवानामपत्यमित्यत्रापि प्राप्नोति क्षौद्रक्यो मालव्य इति। नैतत् तेषां दासे वा भवति कर्मकरे वा। किं तर्हि तेषामेव कस्मिंश्चित्। यावता तेषामेव कस्मिंश्चित्। यस्तस्मादुत्पद्यते स युवप्रत्ययः स्यात्। युवप्रत्ययश्चेत्तस्य लुक्। तस्मिंश्चालुग् भविष्यति। अथ क्षत्रियग्रहणं किमर्थम्। इह मा भूत्। विदेहो नाम ब्राह्मणस्तस्यापत्यं वैदेहिः। क्षत्रियग्रहणानर्थक्यं चोक्तम् *। किमुक्तम्। एकं तावदुक्तं बाह्वादिप्रभृतिषु येषां दर्शनं लौकिके गोत्रभावे ततोन्यत्र तेषां प्रतिषेध इति। अपरमुक्तमनभिधानादिति। क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत् *। क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्प्रत्ययो भव-

---

जनपद॥ एकराजादिति। एकश्चासौ राजा चेति क्षत्रिय एकराजः। तेनैकक्षत्रियवाचिन एव प्रत्ययो न तु बहुत्वसंख्यायुक्तक्षत्रियवाचिन इत्यर्थः। यथैवैकः क्षत्रियः पञ्चालस्तथैव बहवः क्षत्रियाः पञ्चाला इति प्रत्ययप्रसङ्गे वचनमिदम्। न ह्यन्तरेणेति। पञ्चालापत्येषु यौगिकः पञ्चालशब्दस्तद्राजस्याञो बहुषु लुप्तत्वात्। तस्य लुगिति' ञ्यक्षत्रियार्षञित इत्यनेन। तस्मिंश्चेति। गोत्रेलुगचीत्यनेन। यद्येवं पाञ्चाल इति सर्वथा भवितव्यमिति किं वार्त्तिकारम्भेण। तत्र वार्त्तिककारस्याभिप्रायमाहुः। असति वार्त्तिकारम्भे बहुवचनान्तादेव प्रत्ययः स्यात् नैकवचनान्तात्। जनपदे हि बहुवचनान्तः पञ्चालशब्दो वर्तत इति तस्यैव जनपदसमानशब्दत्वं क्षत्रियवृत्तित्वं च। भाष्यकारस्तु मन्यते प्रातिपदिकस्य जनपदसमानशब्दत्वं ग्राह्यं न सुबन्तस्येत्येकवचनान्तात् प्रत्ययः केन निवार्यतइति। इदं तर्हीति। क्षौद्रकस्य राज्ञो भृत्या अपि क्षत्रियाः क्षौद्रका उच्यन्ते। ततश्चापत्यापत्यवत्सम्बन्धाभावान्

Indira Gandhi National Centre for the Arts

तीति वक्तव्यम् । पञ्चालानां राजा पाञ्चालः । पूरोरण् वक्तव्यः । पौरवः । पाण्डोर्ड्यण् वक्तव्यः । पाण्ड्यः ॥

द्व्यञ्मगधकलिङ्गसूरमसादण् ॥ १७० ॥ अणोऽयङ्ण्येञो विप्रतिषेधेन *। अणोऽयङ्ण्यइञ्इत्येते भवन्ति विप्रतिषेधेन । अणोवकाशः । आङ्गः वाङ्गः । ञ्यङोवकाशः । आम्बष्ठ्यः सौवीर्यः । इहोभयं प्राप्नोति । दार्व्यः । ण्यस्यावकाशः । निचक । नैचक्यः । अणः स एव । इहोभयं प्राप्नोति । नीप । नैप्यः । इञोवकाशः । आजमीढिः । आजक्रन्दिः । अणः स एव । इहोभयं प्राप्नोति । बुध । बौधिः । ञ्यङ्ण्येञो भवन्ति विप्रतिषेधेन । ञ्यङः कुरुनादिभ्यो ण्यो भवति विप्रतिषेधेन । ञ्यङोवकाशः । आवन्त्यः । कौन्त्यः । ण्यस्य स एव । नैषोनामजनपदस्तस्मादुभयं प्राप्नोति । ण्यो भवति विप्रतिषेधेन । नैष्यः ॥ द्व्यञ्मगध ॥

कम्बोजाल्लुक् ॥ १७५ ॥ कम्बोजादिभ्यो लुग्वचनं चोलाद्यर्थम् *। कम्बोजादिभ्यो लुग्वक्तव्यः । किं प्रयोजनम् । चोलाद्यर्थम् । चोलः । शकः । केरलः । यवनः ॥

अतश्च ॥ १७७ ॥ इह कस्मान्न भवति आम्बष्ठ्या सौवीर्येति । अत इत्युच्यते । नैषो ऽकारः तदन्तविधिना प्राप्नोति । अत उत्तरं पठति । अत इति तदन्ताग्रहणमवन्त्यादिभ्यो लुग्वचनात् * । अत इति तदन्तस्याग्रहणम् । किं कारणम् । अवन्त्यादिभ्यो लुग्वचनात् । यदयमवन्त्यादिभ्यो लुकं शास्ति । तज्ज्ञापयत्याचार्यः, नात्र तदन्तविधिर्भवतीति । पर्श्वादिभ्यो लुग्वक्तव्यः । पर्शुः । रक्षाः । असुरी । यौधेयादिप्रतिषेधो ज्ञापकः पर्श्वादिलुकः । यदयं न प्राच्यभ-

---

गोत्रयुवाश्रयकार्याभावादनिष्यमाणोपि तद्राजो ञ्यः प्राप्नोतीत्यर्थः । नैतदिति । मुख्यया वृत्त्या दासेषु वृत्त्यभावादुपचरितार्थात्प्रत्ययादर्शनात् तदेवोत्तरमित्यर्थः । पूरोरिति । सिद्धे प्राग्दीव्यतीये ऽणि तद्राजसंज्ञार्थमिदं वचनम् । पुरुषशब्दो न जनपदवाची । अन्यथा द्व्यञ्मगधेत्यणः सिद्धत्वाद्वचनमनर्थकं स्यात् । पाण्डोरिति । बाह्वादिप्रभृतिषु येषां दर्शनं लौकिके गोत्रभाव इति वचनाद् युधिष्ठिरादिपितुः पाण्डोरग्रहणात्तद्वाचिनः पाण्डव इत्येव भवति ॥ १६८ ॥

द्व्यञ्मग ॥ दार्व्य इति । दार्वस्यापत्यमिति ञ्यङ् । बौधिरिति । साल्वावयवलक्षण इञ् ॥ १७० ॥

अतश्च ॥ पर्शूरिति । पर्शोरपत्यं स्त्री द्व्यञ्मगधेत्यण् । तस्यातश्चेति लुक् । पर्श्वादियौधेयादिभ्यामणञाविति स्वार्थे ऽण् । तस्य भिन्नप्रकरणत्वाल्लुगप्राप्तो वचनेन विधीयते । तत ऊङुत इत्यूङ् । रक्षा इति । रक्षसः क्षत्रियविशेषस्यापत्यं स्त्रीति पूर्वपदस्य लुकि कृते स्त्रिया अभिधायकात्सुलोपे दीर्घत्वे च रक्षा इति भवति । रक्षु इत्ययुक्तः पाठः । असुरीति । असुरशब्दात् स्त्रियामपत्ये ऽञो लुक् । ततो ऽण् । तस्यापि लुक् । जातिलक्षणो ङीष् । यौधेयादिप्रतिषेध इति । यदि पाश्चमिकस्यापि तद्राज

Indira Gandhi National Centre for the Arts

र्गादियौधेयादिभ्य इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः, भवति पर्श्वादिभ्यो लुगिति । इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थाध्यायस्य प्रथमे पादे चतुर्थमाह्निकं पादश्च समाप्तः ॥

तेन रक्तं रागात् ॥ १ ॥ रागादिति किमर्थम् । देवदत्तेन रक्तं वस्त्रम् । रक्तादीनामर्थाभिधाने प्रत्ययविधानादुपाध्यानर्थक्यम् * । रक्तादीनामर्थाभिधाने प्रत्ययविधानादुपाधिग्रहणमनर्थकम् । न ह्यरागादुत्पद्यमानेन प्रत्ययेनार्थाभिधानं स्यात् । अनभिधानात्तत्र उत्पत्तिर्न भविष्यति ॥

लाक्षारोचनाट्ठक् ॥ २ ॥ ठक्प्रकरणे शकलकर्दमाभ्यामुपसंख्यानम् * । ठक्प्रकरणे शकलकर्दमाभ्यामुपसंख्यानं कर्तव्यम् । शाकलिकं कार्दमिकम् । नील्या अन् * । नील्या अन् वक्तव्यः । नील्या रक्तं नीलम् । पीतात्कन् * । पीतात्कन्वक्तव्यः । पीतेन रक्तं वस्त्रं पीतकम् । पीतकशब्दो वा प्रकृत्यन्तरम् । तस्माल्लुग्वक्तव्यः । हरिद्रामहारजनाभ्यामञ् * । हरिद्रामहारजनाभ्यामञ् वक्तव्यः । हारिद्रम् । माहारजनम् । रागादित्युच्यते । तत्रेदं न सिध्यति । हारिद्रौ कुक्कुटस्य पादौ । काषायौ गर्दभस्य कर्णाविति । उपमानात्सिद्धम् । हरिद्राविव हारिद्रौ । काषायाविव काषायौ ॥

नक्षत्रेण युक्तः कालः ॥ ३ ॥ अयुक्तोयं निर्देशः । योगो हि नाम स

स्यातश्चेति लुङ् स्यात्तदा यौधेयादिभ्यो विहितस्याञो लुक्प्रतिषेधविधानमनर्थकमेव स्यादित्यर्थः । युधाया अपत्यं स्त्री द्व्यचः इति ढक् । ततः स्वार्थे ऽञ् । तस्य लुकि प्रतिषिद्धे ऽञन्तलक्षणे ङीनि कृते यौधेयीति भवति । यदि त्वञो लुक् स्यात्तदा ढलक्षणे ङीपि सति उदात्तनिवृत्तिस्वरः स्यात् ॥ १७७ ॥

इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे चतुर्थस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकं पादश्चायं समाप्तः ॥

तेन रक्तम् ॥ रक्तादीनामिति । रक्तादीनां शब्दानां योर्थः स एव यदि लौकिके प्रयोगे प्रत्ययेनाभिधीयते तदा प्रत्ययो भवति नान्यदा । प्रयुक्तानां शब्दानां साध्वसाधुविवेकाय शास्त्रारम्भाद्देवदत्तेन रक्तं वस्त्रमिति वाक्याद्योर्थोवगम्यते नासौ देवदत्तं वस्त्रमित्यतोवगम्यते । स्वस्वामिसम्बन्धस्यैवातः सम्प्रत्ययादत एवानभिधानात् कोपेन रक्तं मुखं रूपेण कान्तायां रक्त इत्यादौ वर्णाभिष्वङ्गयोर्न भविष्यति प्रत्ययः १॥

लाक्षा ॥ ठक्प्रकरण इति । शकलकर्दमयोः सूत्रे पाठो नार्षः । नील्या इति । ओषधिविशेषो नीली । अण्बाधनार्थं वचनम् । नीलशब्दस्तु गुणगुणिनोरभेदोपचारान्मतुब्लोपाद्वा नील्या रक्ते वस्त्रे सिध्यति । पीतादिति । रागविशेषवाची पीतशब्दः प्रकृत्यन्तरमिति । स्वार्थिककन्प्रत्ययान्तमित्यर्थः । उपमानादिति । रूपसादृश्यनिमित्तादित्यर्थः ॥ २ ॥

नक्षत्रेणायोगो हीति ॥ अप्राप्तिपूर्विका प्राप्तिर्योगः स कालनक्षत्रयोर्नास्ति द्वयोरपि

Indira Gandhi National Centre for the Arts

भवति ययोः संनिकर्षविप्रकर्षौ स्तः। न च कालनक्षत्रयोः संनिकर्षविप्रकर्षौ स्तः। नित्ये हि कालनक्षत्रे। कथं तर्हि निर्देशः कर्तव्यः। नक्षत्रेण चन्द्रमसो योगात्तद्युक्तात्काले प्रत्ययविधानम् * नक्षत्रेण चन्द्रमसो योगात्तद्युक्तात्काले प्रत्ययविधानं भवतीति वक्तव्यम्। पुष्येण युक्तः पुष्ययुक्तः पुष्ययुक्तश्चन्द्रमा अस्मिन् काले पौषमहः। पौषी रात्रिः। तत्रोत्तरपदलोपः *। तत्रैवं सति उत्तरपदलोपो वक्तव्यः। पुष्ययुक्तशब्दाद्धि प्रत्ययो विधीयते। लिङ्गवचनानुपपत्तिश्च *। लिङ्गवचनयोश्चानुपपत्तिः। चन्द्रमसो यल्लिङ्गं वचनं च तद्युक्तवद्भावेन। प्राप्नोति कालयोगात्सिद्धम् *। अस्तु नक्षत्रेण युक्तः काल इत्येव। ननु चोक्तम्। अयुक्तोयं निर्देशः। योगो हि नाम स भवति ययोः संनिकर्षविप्रकर्षौ स्तः। न च कालनक्षत्रयोः संनिकर्षविप्रकर्षौ स्तः। नित्ये हि कालनक्षत्रे। नैष दोषः। पुष्यसमीपगते चन्द्रमसि पुष्यशब्दो वर्तते। तेन तत्संज्ञकेन कालो विशेष्यते। तथा च संप्रत्ययः *। एवं च कृत्वा लोकेत्र संप्रत्ययो भवति। पुष्यसमीपगते चन्द्रमसि वक्तारो भवन्ति पुष्येणाद्य मघाभिरद्येति॥

लुबविशेषे ॥ ४ ॥ इह कस्मान्न भवति। पौषी रात्रिः पौषमहरिति। अविशेषइत्युच्यते। विशेषश्चात्र गम्यते रात्रिरित्युक्तेहर्नेति गम्यते। अहरित्युक्तेरात्रिर्नेति गम्यते। इहापि तर्हि न प्राप्नोति। अद्य पुष्य इति। अत्रापि हि विशेषो गम्यते। अद्येत्युक्ते न ह्यो न श्व इति गम्यते। अविशेषोपि तु गम्यते।

नित्यत्वात्। न च चन्द्रमसैव योगः पुष्यादीनां नक्षत्रता। सर्वदा तेषां लोके नक्षत्रव्यवहारादर्शनात्। अथापि सम्बन्धमात्रं योगः स च नित्यानामपि प्रधानपुरुषवदविरुद्धः। तथापि कालविशेषावगमार्थः पौषादिशब्दप्रयोगः। एवं सत्यसत्यां कालविशेषावगतौ न स्यात्। तद्युक्तादिति। नक्षत्रयुक्तचन्द्रवाचिनः काले ऽभिधेये प्रत्ययो विधेय इत्यर्थः। चन्द्रनक्षत्रयोश्चाविभुत्वादस्ति कादाचित्को योगः। कालस्तु नित्यो व्यापी चेति योगाभावः। लिङ्गेति। मघायुक्तशब्दात्प्रत्यये क्रियमाणे तस्य च लुपि सति मघा इति स्त्रीत्वबहुत्वे न सिध्यत इत्यर्थः। कालयोगादिति। कालस्यैव पुष्यादिसमीपस्थेन चन्द्रमसा योग आश्रीयत इत्यर्थः। पुष्यसमीपगत इति। मुख्यार्थासम्भवे गौणस्याश्रयणादिति भावः। मघादयः शब्दा अपरित्यक्तस्वलिङ्गसङ्ख्या एव चन्द्रमसि वर्तन्ते। यथा मञ्चादयो मञ्चान् स्त्रियः पश्येति। तेन युक्तवद्भावेपि दोषाभावः॥ ३ ॥

लुब॥ अविशेषस्वरूपदर्शनाय प्रश्नप्रतिवचने इहेति। पौषमहरित्यहर्विशेषानवगमादस्त्यविशेष इति लुप्प्रसङ्गः। अहोरात्र इति। तेनाहोरात्रस्य यदावान्तररात्र्याद्यवयवाविशेषाविवक्षा तदा लुप्। विशेषविवक्षायां तु श्रवणम्। पौषोहोरात्र इत्यत्रापि विशेषस्य शब्देनाश्रितत्वाल्लुबभावः॥ ४ ॥

Indira Gandhi National Centre for the Arts

अद्येत्युक्ते न ज्ञायते रात्रौ दिवा वेति । यतो विशेषस्तदाश्रयो लुब्भविष्यति। इहापि तर्हि । यद्यपि विशेषो गम्यते अविशेषोपि तु गम्यते । रात्रिरित्युक्ते न ज्ञायते कदेति । दिवेत्युक्ते न ज्ञायते कदेति । यतो विशेषस्तदाश्रयो लुप्प्राप्नोति। एवं तर्हि । नक्षत्रेण युक्तः काल इति वर्तते । नक्षत्रेण युक्तस्य कालस्याविशेषे। कियान् पुनः कालो नक्षत्रेण युज्यते । अहोरात्रः ॥

संज्ञायां श्रवणाश्वत्थाभ्याम् ॥ ५ ॥ इह कस्मान्न भवति युक्तवद्भावः। श्रवणा रात्रिः । निपातनादेतत्सिद्धम् । किं निपातनम् । विभाषा फाल्गुनी श्रवणाकार्तिकीचैत्रीभ्य इति ॥

दृष्टं साम ॥ ७ ॥ दृष्टं साम कलेर्ढक् * । दृष्टं सामेत्यत्र कलेर्ढग्वक्तव्यः। कलिना दृष्टं साम कालेयं साम गीयते । अपर आह । सर्वत्राग्निकलिभ्यां ढक्*। सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः । अग्निना दृष्टमाग्नेयम् । अग्नौ भवमाग्नेयम् । अग्नेरागतमाग्नेयम् । अग्नेः स्वमाग्नेयम् । अग्निर्देवता अस्याग्नेयम । कलिना दृष्टं कालेयम् । कलौ भवं कालेयम् । कलेरागतं कालेयम् । कलेः स्वं कालेयम् । कलिर्देवताऽस्य कालेयम् । दृष्टे सामनि जाते चाप्यण् डिद् द्विर्वा विधीयते । दृष्टे सामनि जाते च द्विरण् डिद्वा वक्तव्यः । उशनसा दृष्टं साम औशनम् । औशनसम् । शतभिषजि जातः शातभिषजः । शातभिषः । तीयादीकक् । तीयादीकक् वक्तव्यः । द्वैतीयीकः । तार्तीयीकः । न विद्यायाः*। विद्याया न भवतीति वक्तव्यम् । द्वितीया विद्येत्येव । गोत्रादङ्कवदिष्यते । औपगवकम् । कापटवकम् । दृष्टे सामनि जाते च द्विरण् डिद्वा विधीयते । तीयादीकञ्च विद्याया गोत्रादङ्कवदिष्यते ॥

वामदेवाड्ड्यड्ड्यौ ॥ ८ ॥ किमर्थो डकारः । डिति टेरिति टिलोपो यथा स्यात् । नैतदस्ति प्रयोजनम् । यस्येति लोपेनाप्येतत्सिद्धम् । एवं तर्हि सिद्धे सति यद्यतौ डितौ करोति तज् ज्ञापयत्याचार्यः । भवत एते परिभाषे ।

दृष्टम् ॥ कलिना दृष्टमिति । यस्य साम्नो विशिष्टकार्यविषयो विनियोगो ज्ञानातिशयसम्पत्त्या कलिनाज्ञायि तत्तेन दृष्टमित्युच्यते । सर्वत्रेति । सर्वेषु प्राग्दीव्यतीयेष्वर्थेष्वित्यर्थः । जाते चेति । जातार्थे यो द्विरण् विधीयते पूर्वविहितो बाधकेन निवर्तितः पुनर्विधीयते इत्यर्थः । स वा डिद्भवति । शतभिषजीति शतभिषजयुक्तः काल इत्यण् । तस्य लुक् । ततो जातेर्थे प्राग्दीव्यतोणित्यण् विहितः कालाट्ठञिति ठञा बाधित पुनः सन्धिवेलेत्यादिसूत्रेण विधीयते । तीयादीकगिति । अर्थानिर्देशात्स्वार्थ एवेति ज्ञेयम्। न विद्याया इति । विद्यावाचिनी न भवतीत्यर्थः । गोत्रादिति । यथाङ्कं गोत्रप्रत्ययान्तात्प्रत्ययः । एवं दृष्टे सामनीत्यर्थः । औपगवकमिति । गोत्रचरणाद्वुञिति वुञ् ॥ ७ ॥

वामदेवा ॥ अवामदेव्यमिति । अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमित्यर्थः । अ-

अननुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणं तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणमिति । किमेतस्य ज्ञापने प्रयोजनम् । अत्रामदेव्यमित्येष स्वरो भवति । सिद्धे यस्येति लोपेन किमर्थं ययतौ ङितौ। ग्रहणं मा तदर्थे भूद्रामदेव्यस्य नञ्स्वरे ॥

परिवृतो रथः ॥ १० ॥ परिवृतो रथइति तदेकान्तग्रहणम् * । परिवृतो रथ इत्यत्र तदेकान्तग्रहणं कर्तव्यम् । येन परिवृतो रथो रथैकान्तश्चेत् स भवतीति वक्तव्यम् । इह मा भूत् पुत्रैः परिवृतो रथः । छात्रैः परिवृतो रथ इति। तत्तर्हि वक्तव्यम् । न वक्तव्यम् । कस्मान्न भवति पुत्रैः परिवृतो रथः छात्रैः परिवृतो रथइति । अनभिधानात् ॥

पाण्डुकम्बलादिनिः ॥ ११ ॥ अयं योगः शक्योऽवक्तुम् । कथं पाण्डुकम्बली पाण्डुकम्बलिनौ पाण्डुकम्बलिन इति । इति नैतन्मत्वर्थीयेन सिद्धम् । पाण्डुकम्बलीति ॥

कौमारापूर्ववचने ॥ १२ ॥ कौमारापूर्ववचन इत्युभयतः स्त्रिया अपूर्वत्वे * । कौमारापूर्ववचन इत्यत्रोभयतः स्त्रिया अपूर्वत्व इति वक्तव्यम् । अपूर्वपतिं कुमारीमुपपन्नः कौमारो भर्ता । कुमारी अपूर्वपतिः पतिमुपपन्ना कौमारी भार्या । कौमारापूर्ववचने कुमार्या अण्विधीयते । अपूर्वत्वं यदा तस्याः कुमार्या भवतीति वा ॥ अथ वा कुमार्यां भवः कौमारः । यद्येवं कौमारीभार्येति न सिध्यति । पुंयोगात् स्त्र्यभिधानम् * । पुंयोगात् स्त्र्यभिधानं भविष्यति । कौमारस्य भार्या कौमारीति ।

न्यथा ययतोश्चातदर्थ इत्यनेनान्तोदात्तत्वं स्यात् । ग्रहणमिति । अतदर्थग्रहणेन सूत्रं लक्ष्यते । नञ् स्वर इति । नञाश्रयेऽन्तोदात्तत्वे विधीयमान इत्यर्थः ॥ ९ ॥

परि ॥ तदेकान्तग्रहणमिति । रथस्य चर्मवस्त्रादयोऽवयवाइति तद्वाचिभ्य एव प्रत्ययो भवतीत्यर्थः । अनभिधानादिति । पौत्रो रथइत्यादावभिधानस्याभावादित्यर्थः ॥ १० ॥

पाण्डुकम्बला ॥ इति नैतादिति । अण् चानभिधानान्न भवतीति तद्बाधनार्थमपीदं न वाच्यमिति भावः ॥ ११ ॥

कौमारापू ॥ उभयत इति । उभयस्मिन्नुभयतः । यदि कौमारीति स्त्रियां प्रयोगो ऽथ कौमारः पतिरिति पुंस्युभयत्रापि स्त्रियाः पाणिग्रहणस्यापूर्वत्वे प्रयोगः कार्य इत्यर्थः । एतच्च निपातनसामर्थ्याल्लभ्यमेव वार्तिककृता प्रकाशितम् । अपूर्वपतिमिति । अविद्यमानः पूर्वः पतिर्यस्यास्तां प्राप्त इत्यर्थः । द्वितीयासमर्थात्कुमारीशब्दादुपयन्तर्यण् प्रत्ययः । स्त्रियां तु स्वार्थे प्रत्ययः । कुमार्यां भव इति । रोगादिषु तु यद्यभिधानं नास्ति तदानभिधानात्प्रत्ययाभावः । कौमारस्य भार्येति । प्रत्यासत्त्या यैव तस्य कौमारव्यपदेशनिबन्धनं सैवाभिधीयते नान्या ॥ १२ ॥

Indira Gandhi National Centre for the Arts

सास्मिन् पौर्णमासीति ॥ २१ ॥ सास्मिन् पौर्णमासीति संज्ञाग्रहणम्*। सास्मिन् पौर्णमासीत्यत्र संज्ञाग्रहणं कर्तव्यम् । असंज्ञायां हि गरीयानुपसंयोगः*। अक्रियमाणे हि संज्ञाग्रहणे गरीयानुपसंयोगः कर्त्तव्यः स्यात् । मासार्द्धमासयोरिति वक्तव्यं स्यात् । इह मा भूत् पौषी पौर्णमास्यस्मिन् पञ्चदशरात्रे दशरात्रे वेति । संवत्सरपर्वणीति च वक्तव्यं स्यात् । भृतकमासे मा भूदिति । तर्हि वक्तव्यम् । न वक्तव्यम् । इतिकरणः क्रियते । ततश्चेद्विवक्षा ॥

कस्येत् ॥ २५ ॥ यस्येति लोपः कस्मान्न भवति । इकारोच्चारणसामर्थ्यात् । अथ यत्कायं हविः । कथं तस्य संप्रैषः कर्त्तव्यः । यदि तावत्किमः कादेशः । कस्मै अनुब्रूहीति भवितव्यम् । अथ न किमः । कायानुब्रूहीति भवितव्यम्। यद्यपि किमः । अथापि न किमः । उभयथा कस्मायनुब्रूहीति भवितव्यम् । सर्वस्य हि सर्वनामसंज्ञा क्रियते । सर्वश्च प्रजापतिः । प्रजापतिश्च कः । अपर आह । यद्येव किमः । अथापि न किमः । उभयथा कायानुब्रूहीति भवितव्यम्। संज्ञोपसर्जनयोर्हि सर्वनामसंज्ञा प्रतिषिध्यते । संज्ञा चैषा तत्रभवतः ॥

अपोनप्त्रपांनप्तृभ्यां घः ॥ २७ ॥ अथ यदपोनप्त्रियमपांनप्त्रियं वा

सास्मिन् ॥ संज्ञाग्रहणं सूत्रेनार्षमिति वार्त्तिकमारब्धम् । उपसंयोग इति । उपसंयुज्यत इत्युपसंयोग इत्युपाधिरुच्यते । अनेक उपाधिर्निर्देष्टव्यः स्यादित्यर्थः । संवत्सरपर्वणीति । संवत्सरस्य द्वादश पर्वाणि मासान्तास्तत्र पर्वविशिष्टे मासे यथा स्यात् । भृतकमासे पौष्या पौर्णमास्या तद्वति मासादि व्यपदेशभाजि पौषशब्दो मा भूदित्येवमर्थमित्यर्थः ॥ २० ॥

कस्येत् ॥ इकारोच्चारणसामर्थ्यादिति । यदा कशब्दस्येकारादेशस्तदायं परिहारः । यदा तु किमो मकारस्येकारस्तदा लोपेपि कार्यमिति सिध्यति । यद्यपि कशब्दस्येत्वे कृते परत्वाद्वृद्ध्या लोपो बाध्यते यथा श्रीर्देवता अस्य श्रायमिति । तथापि परिहारान्तरसद्भावादेतद्भाष्यकृता नोक्तम् । अथेति । कल्पकारविप्रतिपत्त्या संशयः । अध्वर्युणा होतुः सम्प्रैषः क्रियते । यदि तावदिति । किमो विभक्तौ कादेशं कृत्वा कस्येति । यदि निर्देशः कृत इत्यर्थः । किंशब्दश्च प्रश्नाक्षेपयोरिव प्रजापतौ वर्तते । अथ नेति । यदा कशब्दस्यैव कस्येति निर्देश इत्यर्थः । सर्वस्येति । सर्वार्थवाचिन इत्यर्थः । सर्वश्चेति । कार्यकारणयोरभेदादिति भावः । प्रजापतिश्च क इति । सर्वादिषु कशब्दस्यापाठे ऽपि अन्वर्थसंज्ञाविज्ञानात्सर्वनामसंज्ञा भवति । गणपाठस्तु प्रपञ्चार्थः । येषां तु सकलकृत्स्नमित्यादीनां सर्वनामसंज्ञा नेष्यते तेषां न बहुव्रीहाविस्यत्र नेति योगविभागात्तदभावः । योगसंप्रदानं देवता । मन्त्रस्तुत्यश्चार्थः । संज्ञा चैषेति । यद्येवं कादेशाभावात्कायेति किमो न सिध्यति । एवं तर्हि कस्येत्यत एव निपातनात्कादेशो भविष्यतीत्यदोषः ॥ २५ ॥

अपो ॥ अथेति । वेदे क्व चिदपोनप्त्रे स्वाहेति ऋकारान्तः प्रयोगो दृश्यते । क्व

हविः कथं तस्य संप्रैषः कर्तव्यः । अपोनपाते अनुब्रूहि अपांनपाते अनुब्रूहीति । अपोनप्त्रपां नप्तृभावः कस्मान्न भवति । प्रत्ययसन्नियोगेन ऋकारान्तत्वमुच्यते । तेनासति प्रत्यये न भवितव्यम् ॥

छ च ॥ २८ ॥ छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानम् * । छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानं कर्तव्यम् । पैङ्गाक्षीपुत्रीयम् । तार्णविन्दवीयम् । शतरुद्राद्घ च * । शतरुद्राद् घप्रत्ययो वक्तव्यः । छश्च वक्तव्यः । शतरुद्रियम् । शतरुद्रीयम् ॥

कालेभ्यो भववत् ॥ ३४ ॥ कथमिदं विज्ञायते भवे ये प्रत्यया विहितास्ते भवन्ति कालेभ्यः सास्य देवतेत्यस्मिन्नर्थ इति । आहो स्वित्कालेभ्यो भवे ये प्रत्यया विहितास्ते भवन्ति सास्य देवतेत्यस्मिन्नर्थइति । कश्चात्र विशेषः । कालेभ्यो भवे चेत् प्रत्ययमात्रप्रसङ्गः । यदि विज्ञायते भवे ये प्रत्यया विहितास्ते भवन्ति कालेभ्यः सास्य देवतेत्यस्मिन्नर्थइति । प्रत्ययमात्रं प्राप्नोति । यः कालेभ्यो भवे तस्य विधाने प्रातिपदिकमात्रात्प्रसङ्गः । अथ विज्ञायते कालेभ्यो भवे ये प्रत्यया विहितास्ते भवन्ति सास्य देवतेत्यस्मिन्नर्थइति । प्रातिपदिकमात्रात् प्राप्नुवन्ति । सिद्धं तूभयनिर्देशात् * । सिद्धमेतत् । कथम् । उभयनिर्देशात् । उभयनिर्देशः कर्त्तव्यः । कालेभ्यो भववत् कालेभ्य इति * । स तर्ह्युभयनिर्देशः कर्तव्यः । न कर्तव्यः । भववदिति वतिनिर्देशोयम् । यदि च याभ्यः प्रकृतिभ्यो येन विशेषणेन भवे प्रत्यया विहितास्ताभ्यः प्रकृतिभ्यस्तेनैव विशेषणेन सास्य देवतेत्यस्मिन्नर्थे भवन्ति । ततोऽमी भववत्कृताः स्युः । अथ हि प्रकृतिमात्राद्वा स्युः प्रत्ययमात्रं वा स्यान्नामी भववत्कृताः स्युः ॥

महाराजप्रोष्ठपदाट्ठञ् ॥ ३५ ॥ ठञ्प्रकरणे तदस्मिन् वर्त्ततइति नवयज्ञादिभ्य उपसंख्यानम् * । ठञ्प्रकरणे तदस्मिन् वर्तते इति नवयज्ञादिभ्य उपसंख्यानं कर्तव्यम् । नवयज्ञोऽस्मिन् काले वर्त्तते नावयज्ञिकः । पाकयज्ञिकः । पूर्णमासादण् * । पूर्णमासादण्वक्तव्यः । पूर्णमासोस्मिन् काले वर्त्तते पौर्णमासी तिथिः ॥

चिदपोनपादपांनपादिति तकारान्तप्रयोग इति प्रश्नः । प्रत्ययसंनियोगेनेति । वेदे तु छान्दसत्वात् क्व चित्तकारान्तप्रयोगः ॥ २७ ॥

काले ॥ कथमिति । कालेभ्य इति । सकृच्छ्रवणाद्भवेन वाभिसंबन्धः स्यात् सास्य० देवतेत्यनेन वेति प्रश्नः । प्रत्ययमात्रमिति । दिगादिभ्यो यदिति यत्प्रत्ययो भवे विहितः स कालवाचिभ्यः प्राप्नोतीत्यर्थः । प्रातिपदिकमात्रादिति । कालाट्ठञिति ठञिन्द्रादेरपि प्राप्नोति । सिद्धं त्विति । वतिरतिदेशमात्रे चरितार्थ इति न सर्वसादृश्यं लभ्यतइति वार्त्तिककारो मन्यते । वतिनिर्देशोयमिति । कालेभ्यो भव इत्येव भावार्थे विहिताः प्रत्ययाः सिध्यन्तीति वतिनिर्देशः सर्वसादृश्यपरिग्रहार्थः कृतः ॥ ३४ ॥

Indira Gandhi National Centre for the Arts

पितृव्यमातुलमातामहपितामहाः ॥ ३६ ॥ पितृव्यमातुलेति किं निपात्यते। पितृमातृभ्यां भ्रातरि व्यड्डुलचौ *। पितृमातृभ्यां भ्रातरि व्यड्डुलचौ प्रत्ययौ निपात्येते। पितुर्भ्राता पितृव्यः। मातुर्भ्राता मातुलः। अथ मातामहपितामहेति किं निपात्यते। मातृपितृभ्यां पितरि डामहच् *। मातृपितृभ्यां पितरि डामहच् प्रत्ययो निपात्यते। मातुः पिता मातामहः। पितुः पिता पितामहः। मातरि षिच्च *। मातृपितृभ्यां मातरि डामहच् षिच्च भवति। पितुर्माता पितामही मातुर्माता मातामही। महो वा छन्दस्यानङोऽवग्रहदर्शनात् *। महो वा पुनरेष भवति। छन्दस्यानङोऽवग्रहदर्शनात्। छन्दस्यानङोऽवग्रहो दृश्यते। मातामहः पितामह इति। अवेर्दुग्धे सोढदूसमरीसचः *। अवेर्दुग्धे सोढदूसमरीसच इत्येते प्रत्यया भवन्तीति वक्तव्यम्। अविसोढम्। अविदूसम्। अविमरीसम्। तिलान्निष्फलात्पिञ्जपेजौ *। तिलान्निष्फलात्पिञ्जपेजौ वक्तव्यौ। तिलपिञ्जः। तिलपेजः। पिञ्जः छन्दसि डिच्च *। पिञ्जः छन्दसि डिच्च वक्तव्यः। तिल्पिञ्जं दण्डानतम्॥

भिक्षादिभ्योऽण् ॥ ३८ ॥ किमर्थं भिक्षादिषु युवतिशब्दः पठ्यते। न तस्य समूह इत्येव सिद्धम्। न सिद्ध्यति। अनुदात्तादिलक्षणोऽञ् प्राप्नोति। तद्बाधनार्थम्। अत उत्तरं पठन्ति। भिक्षादिषु युवतिग्रहणानर्थक्यं पुंवद्भावस्य सिद्धत्वात्। प्रत्ययविधौ भिक्षादिषु युवतिग्रहणानर्थक्यम्। किं कारणम्। पुंवद्भावस्य सिद्धत्वात्। प्रत्ययविधौ पुंवद्भावोऽत्र भविष्यति। भस्याढे तद्धिते पुंवद्भवतीति सिद्धश्च प्रत्ययविधौ। स च सिद्धः प्रत्ययविधौ॥

गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् ॥ ३९ ॥ वृद्धाच्च *। वृद्धाच्चेति वक्तव्यम्। वृद्धानां समूहो वार्द्धकम्। अञो वुञ्पूर्वविप्रतिषिद्धम् *। अञो वुञ्भवति पूर्वविप्रतिषेधेन। अञोऽवकाशः। कापोतम्। वुञोऽवकाशः। ग्लुचकायनिः। ग्लौचुकायनकम्। इहोभयं प्राप्नोति। औपगव-

---

पितृव्यमातुल॥ महोवेति। पितृशब्दस्यानङादेशो निपात्यते महश्च प्रत्ययः। तेन पदसंज्ञायां सत्यां पितेत्यवग्रहो भवति। डामहचि तु न स्यात्। अविसोढमिति। षत्वं सकारोच्चारणसामर्थ्यान्न भवति। अन्यथा षोढप्रत्ययं प्रक्रियालाघवार्थं कुर्यात्। एवं दूसमरीसयोरपि षत्वाभावः सकारस्य। तिलपिञ्ज इति। तिलो धान्यविशेषः। फलरहित इत्यर्थः॥ ३६॥

भिक्षा॥ पुंवद्भावोऽत्रेति। पुंवद्भावे सत्याद्युदात्तत्वादण् सिद्ध इत्यर्थः। सिद्धश्चेति। पुंवद्भावः पूर्वं पश्चात्प्रत्यय इत्यर्थः॥ ३८॥

गोत्रो॥ कापोतमिति। लघावन्ते द्वयोश्च बह्वचो गुरुरिति मध्योदात्तत्वादनुदा-

Indira Gandhi National Centre for the Arts

कम्। कापटवकम्। वुञ्भवति पूर्वविप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः न वक्तव्यः। वक्ष्यत्येतत्। पूर्वोऽपि वुञ् परमञं बाधतइति। अथ वा इष्टवाची परशब्दः। विप्रतिषेधे परं यदिष्टं तद्भवतीति। ठक्तु विप्रतिषेधात् * ठक्तु भवत्यञो विप्रतिषेधात्। ठकोवकाशः। साक्तुकम्। अञः स एव। इहोभयं प्राप्नोति। आपूपिकम्। शाष्कुलिकम्। ठञ्भवति पूर्वविप्रतिषेधेन॥

केदाराद्यञ्च ॥ ४० ॥ गणिकायाश्च *। गणिकायाश्चेति वक्तव्यम्। गणिकानां समूहो गाणिक्यम्॥

ब्राह्मणमाणववाडवाद्यत् ॥ ४२ ॥ किमर्थं ब्राह्मणादिभ्यो यन्विधीयते नञ्प्रकृतस्सोनुवर्त्तिष्यते नं ह्यस्ति विशेषो ब्राह्मणादिभ्यो यञो वा यनो वा। तदेव रूपं स एव स्वरः। एवं तर्हि सिद्धे सति यद् ब्राह्मणादिभ्यो यनं शास्ति तज्ज्ञापयत्याचार्यः अन्येभ्योऽप्ययं भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। यन्प्रकरणे पृष्ठादुपसंख्यानं वक्ष्यति तन्न वक्तव्यं भवति। यन्प्रकरणे पृष्ठादुपसंख्यानम् *। यन्प्रकरणे पृष्ठादुपसंख्यानं कर्तव्यम्। पृष्ठानां समूहः पृष्ठ्यः। षडहः॥

ग्रामजनबन्धुभ्यस्तल् ॥ ४३ ॥ गजसहायाभ्यां च *। गजसहायाभ्यां चेति वक्तव्यम्। गजता। सहायता। अह्नः खः *। खो वक्तव्यः। अह्नां समूहोऽहीनः। क्रतौ *। क्रताविति वक्तव्यम्। इह मा भूत्। अह्नाय धूतपाप्मानो भास्कराजितमृत्यवः। पर्श्वाः सण् *। पर्श्वाः सण् वक्तव्यः। पर्शूनां समूहः पार्श्वम्। यदि सण् क्रियते इत्संज्ञा न प्राप्नोति। एवं तर्हि णस्वक्तव्यः॥

खण्डिकादिभ्यश्च ॥ ४५ ॥ खण्डिकाशुकोलूक। किमर्थं खण्डिकादिषूलूकशब्दः पठ्यते। न अनुदात्तादेरञित्येव सिद्धम्। न सिध्यति। चाषोलूकयोश्छन्दस्याद्युदात्तः प्रयोगो दृश्यते। चाषेण किकर्दीविना, यदुलूको वदति नैकयोश्छन्दसि सामूहिको दृश्यते तत्रैतावनुदात्तादी इदं तर्हि प्रयोजनम्। अयमौलूक्यो गोत्रम्। तत्र गोत्राश्रयो वुञ्प्राप्तस्तद्बाधनार्थम्। एतदपि नास्ति प्रयोजनम्। बहुवचनान्तानां हि सामूहिकः। बहुषु च लुक्। तत्र लुकि कृते अनुदात्तादोरि-

---

त्तादिः कपोतशब्दः। सक्तुशब्दस्तुन्प्रत्ययान्तत्वादाद्युदात्तः। शष्कुलीशब्दो ङीषन्तोन्तोदात्तत्वादनुदात्तादिः॥ ४३॥

ग्राम॥ आह्नायेति। खण्डिकादिषु दर्शनादहःशब्दादञ् तदन्याच्चतुर्थी॥ ४५॥

खण्डि॥ तत्रैताविति। चाषशब्दः चषेर्ण्यन्तादच्यन्तोदात्तः। उलूकशब्दो लघावन्ते द्वयोश्चेति मध्योदात्त। औलूक्यशब्दो गर्गादियञन्तः। बहुवचनान्तानामिति। द्वयोस्तु समूहव्यवहारो लोके प्रायो नास्तीति भावः। बहुषु चेति। यञञोश्चेत्यनेन। लुकि कृत इति। ननु लुक्यपि कृते प्रत्ययलक्षणेन गोत्रलक्षणो वुञ् पूर्वविप्रतिषेधेन प्राप्नोत्येव। एवं तर्हि परिहारान्तराभिधानान्नोक्तम्। सामर्थ्याच्चौलू-

Indira Gandhi National Centre for the Arts

सेत्र सिद्धम् । न सिध्यति । गोत्रेऽलुचीत्यलुक् प्राप्नोति । अञ्सिद्धिरनुदात्तादेः कोर्थः क्षुद्रकमालवात् । अनुदात्तादेरञित्येवाञ्सिद्धः । किमर्थं क्षुद्रकमालवशब्दः खण्डिकादिषु पठ्यते । गोत्राश्रयो वुञ् प्राप्तस्तद्बाधनार्थम् । गोत्राद् वुञ् । न च तद्गोत्रम् । गोत्राद् वुञ् भवतीत्युच्यते । न च क्षुद्रकमालशब्दो गोत्रम् । न च गोत्रसमुदायो गोत्रग्रहणेन गृह्यते । तद्यथा । न जनपदशब्देन गृह्यते । काशिकोसलीया इति वुञ्न प्राप्नोति । तदन्तविधिना प्राप्नोति । तदन्तान्न स सर्वतः । परिगणितेषु कार्येषु तदन्तविधिः । न चेदं तत्र परिगण्यते । ज्ञापकं स्यात्तदन्तत्वे । एवं तर्हि ज्ञापयत्याचार्यो भवतीह तदन्तविधिरिति । तथा चापिशलेर्विधिः । एवं चापिशलेराचार्यस्य विधिरुपपन्नो भवति । धेनुरनञि ठकमुत्पादयति । धेनूनां समूहो धैनुकम् । अनञीति किमर्थम् । अधेनूनां समूहः आधेनवम् । सेनायां नियमार्थं वा । अथ वा नियमार्थोयमारम्भः । क्षुद्रकमालवशब्दात्सेनायामेव । क्व मा भूत् । क्षौद्रकमालवकमन्यदिति । यथा बाध्येत वाञ् वुञा । अथैतज्ज्ञापयत्याचार्यः पूर्वोपि वुञ् परमञं बाधतइति । ननु चोक्तं गोत्राद् वुञ् न च तद्गोत्रमिति । तदन्तविधिना प्राप्नोति । ननु चोक्तं तदन्तान्न स सर्वत इति । ज्ञापकं स्यात्तदन्तत्वे । एवं तर्हि ज्ञापयत्याचार्यो भवतीह तदन्तविधिरिति । कथं पुनरेतदुभयं शक्यं ज्ञापयितुम् । भवति च तदन्तविधिः । पूर्वोपि वुञ् परमञं बाधत इत्युभयं ज्ञाप्यते । अञ्प्रकरणे क्षुद्रकमालवात्सेनासंज्ञायाम् * । अञ्प्रकरणे क्षुद्रकमालवात्सेनासंज्ञायामिति वक्तव्यम् । क्षौद्रकमालवा सेना चेत् । क्व मा भूत् । क्षौद्रकमालवकमन्यदिति ॥

क्यशब्दार्थ उलूकशब्दस्य यञन्तस्य पाठः । कृतयञ्लुक् उलूकशब्दस्यानुकरणो गणे निर्दिष्टः । अञ्सिद्धिरिति । क्षुद्रकस्यापत्यानीति जनपदशब्दाद्विहितस्य तद्राजस्य लुक् । मालवात्तु वृद्धलक्षणस्य ञ्यङः । ततो द्वन्द्वः । ततः समासान्तोदात्तत्वे नानुदात्तादित्वमिति भावः । अत्र च गोत्रे ऽलुगचीति यञो लुक् प्रतिषेधादापत्येति यलोपः । न चेति । चशब्दो ह्यर्थे । नहीत्यर्थः । वुञ्न भवतीति । अवृद्धादपीत्यनेन । तदन्तादिति । तदन्ताद्वुञ् प्राप्नोतीति यदुच्यते तन्न यस्मात्स तदन्तविधिः सर्वत्र न भवति । उगिद्वर्णग्रहणवर्जं प्रत्ययविधौ तदन्तविधेरिष्टत्वात् । भवतीहेति । समूहः प्रकरण इत्यर्थः । एवं चेति । तदन्तविध्यभावे ह्यनञीति प्रतिषेधो नर्थकः स्यादित्यर्थः । आधेनवमिति । तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वादण् । अन्ये त्वाहुः । उत्सादित्वादञ् । तत्र हि वष्कयास इति समासनिषेधात्तदन्तविधिरस्ति जङ्गलधेन्वित्युत्तरपदस्य वा वृद्धिः । नियमार्थं वेति । वाशब्दः समुच्चये । एवमथवेत्ययमपि । यदा सेनारूपः समूहः तदा ऽञ् प्रत्ययो ऽन्यदा तु वुञेवेत्यर्थः । ननु चेति । ज्ञापकं स्यादित्युक्तमपि चोद्यपरिहारायानूदितम् । उभयमिति । अन्यथानुपपत्त्या ज्ञापकत्वं भवत्युभयेन च विना क्षुद्रकमालवादञ्विधानंनोपपद्यते इत्युभयस्यापि ज्ञापकत्वमित्यर्थः । ४५॥

Indira Gandhi National Centre for the Arts

पाशादिभ्यो यः॥४९॥ पाशतृणधूमवात। पृथग्वातादर्शनान्न समूहः। पृथग्वातादर्शनादयुक्तोयं वातशब्दस्य सामूहिके पाठः। न हि पृथग्वाता दृश्यन्ते। न तर्हीदानीमिदं भवति वात्येति। शीघ्रत्वे तु। शीघ्रो वातो वात्या। अथ वा पृथग्वाता अपि दृश्यन्ते। तद्यथा। पूर्वो वातः। उत्तरो वातः। सर्वतो वाता वान्तु दिशो दश॥

खलगोरथात्॥५०॥ इनित्रकट्यचश्च॥५१॥ खलादिभ्य इनिः। खलादिभ्यइनिर्वक्तव्यः। खलिनी डाकिनी। कुटुम्बिनीति॥

विषयो देशे॥५२॥ विषयाभिधाने जनपदे लुब् बहुवचनविषयात्। विषयाभिधाने जनपदे लुब् बहुवचनविषयाद्वक्तव्यः। अङ्गानां विषयो देशः अङ्गाः वङ्गाः। सुह्माः पुण्ड्राः। गान्धार्यादिभ्यो वा *। गान्धार्यादिभ्यो वेति वक्तव्यम्। गान्धारः। गान्धारयः वासातः वासान्तयः। शैबः शिवयः। राजन्यादिभ्यो वा वुञ् *। राजन्यादिभ्यो वा वुञ् वक्तव्यः।राजन्यकः। राजन्याः।दैवयातवाः दैवयातवकः।बैल्ववनादिभ्यो नित्यम्*।बैल्ववनादिभ्यो वुञ् नित्यमिति वक्तव्यम्।

अञ् प्रकरण इति। यद्यपि गणएवैतत्पठ्यते तथापि क्षुद्रकमालवादिति योगविभागेनार्थद्वयं ज्ञाप्यं ततः सेनासंज्ञायामिति नियमः कर्तव्य इति दर्शयितुं वार्त्तिकारम्भ ॥ ४५

पाशा ॥ पृथगिति। वातपरमाणूनामनेकत्वेपि वातसंज्ञकस्यावयविन एकत्वादनेकाश्रयरूपसमूहानुपपत्तिरित्यर्थः। शीघ्रत्वे त्विति। ततश्च वाताच्छैघ्र्य इति पृथग्वक्तव्यमित्यर्थः। अथ वेति। एकस्यापि वातस्य दिग्भेदनिमित्तभेदप्रतिभासादनेकाश्रयसमूहोपपत्तिः। यथैकापि दिक् सूर्योदयास्तमयाद्युपाधिभेदादनेका व्यपदिश्यते। तथा च दश दिश इति लोके व्यवहारः। यद्वा भिन्ना एव वाता अवयविनः पृथगुपलम्भात् ॥ ४९ ॥

विषयो ॥ विषयाभिधान इति। अङ्गानां निवासो जनपद इत्यतः स्वस्वामिभावो न प्रतीयते। अङ्गानां विषय इत्यत्र तु स्वस्वामिभावः प्रतीयते न तु निवासार्थ इति। जनपदे लुबिति चातुरर्थिकस्य लुब्विधीयमानो विषये न प्राप्नोतीति वचनम्। बहुवचनविषयादिति। बहुवचनान्ताच्छब्दात्परस्य प्रत्ययस्येत्यर्थः। गान्धार इति। गान्धारस्यापत्यं गान्धारिः। तस्यापत्यानि साल्वेयगान्धारिभ्यां चेत्यञ्। ततो गान्धारीणां विषय इत्यण्। ततस्तस्य वा लुप्। लुपि युक्तवदिति लिङ्गसंख्यातिदेशः। राजन्या इति। औत्सर्गिकस्याणो विषयाभिधान इति लुप्। वुञ् पक्षे तु तद्विधानसामर्थ्याल्लुबभावः। न वेति जनपदलक्षणस्याभिधेयस्याङ्गादिसंबन्धिनो निवासरूपत्वं विषयरूपत्वं चास्ति। यद्यपि विषयनिवासयोः परस्परव्यभिचारस्तथाप्यङ्गादीनां य एव स्वो विषयः स एव तेषां निवास इति स्मर्यते। तत्रैकस्योभयरूपत्वात्प्रयोगदर्शनवशादङ्गादौ निवासविवक्षैव गान्धार्यादिषु राजन्यादिषु च पर्यायेणोभयविवक्षा बैल्ववनादिषु विषयविवक्षैवाश्रीयतइति नार्थो लुब्विधिना तद्विकल्पनवुञ्विकल्पेन वा। नापि विकल्पबाधनार्थेन नित्यवचनेनेत्यर्थः ॥ ५२ ॥

Indira Gandhi National Centre for the Arts

बैल्ववनकः। आम्बरीषपुत्रकः। आत्मकामेयकः। तर्हीदं बहु वक्तव्यम्। न वाभिधेयस्य निवासविषयत्वाद् निवासविवक्षायां लुब्विषयविवक्षायां प्रत्ययः *। न वा वक्तव्यम्। किं कारणम्। अभिधेयस्य निवासविषयत्वाद्यदत्राभिधेयं स निवासश्च विषयश्च। अभिधेयस्य निवासविषयत्वात्। निवासविवक्षायां लुप्। विषयविवक्षायां प्रत्ययो भविष्यति। इदं तर्हि प्रयोजनम्। एतज्ज्ञास्यामि। इह नित्यो विधिरिह विभाषेति। एतदपि नास्ति प्रयोजनम्। यावता यदभिधेयं स निवासश्च विषयश्च। अभिधेयस्य निवासविषयत्वान्निवासविवक्षायां लुप्। विषयविवक्षायां प्रत्यय इत्येव॥

सोऽस्यादिरिति छन्दसः प्रगाथेषु ॥५५॥ छन्दसः प्रत्ययविधाने नपुंसकात्स्वार्थे उपसंख्यानम् *। छन्दसः प्रत्ययविधाने नपुंसकात्स्वार्थउपसंख्यानं कर्तव्यम्। त्रिष्टुबेव त्रैष्टुभम्। अनुष्टुबेवानुष्टुभम्। जगत्येव जागतम्॥

तदधीते तद्वेद ॥ ५९ ॥ किमर्थमुभावप्यर्थौ निर्दिश्येते। न योऽधीते वेत्त्यप्यसौ। यस्तु वेत्त्यधीतेऽप्यसौ। नैतयोरावश्यकः समावेशः। भवति हि कश्चित्संपाठं पठति न वेत्ति तथा तथा कश्चिद्वेत्ति न च संपाठं पठति॥

क्रतूक्थादिसूत्रान्ताट्ठक् ॥ ६० ॥ उक्थादीत्युच्यते। कानि पुनरुक्थानि। सामानि। यद्येवं सामगमात्रे औक्थिक इति प्राप्नोति। नैष दोषः। तादर्थ्यात्ताच्छब्द्यं भविष्यति। उक्थार्थमुक्थम्। इह उक्थान्यधीते औक्थिकः। यज्ञमधीते याज्ञिकः। य इदानीमौक्थिक्यं याज्ञिक्यं वाधीते कथं तत्र भवितव्यम्। औक्थिको याज्ञिक इत्येव भवितव्यम्। कथम्। तस्येदं प्रत्ययाल्लुक्।

सो स्यादि छन्दस इति॥ छन्दःशब्देनाक्षरेयत्ताविशेषवाचिनो गायत्र्यादिशब्दग्रहणम्। नपुंसकादिति। नपुंसकार्थाभिधायिन इत्यर्थः। नपुंसकार्थाभिधायित्वं च त्रिष्टुबादीनां स्वार्थिकाण्प्रत्ययान्तानामेवेति नपुंसके स्वार्थे इत्युक्तं भवति॥ ५५॥

तदधीते॥ न य इति। यो हि यं ग्रन्थमधीते स तं स्वरूपतोऽवश्यं वेत्ति। यश्च स्वरूपतो वेत्ति सोऽवश्यमधीतइति भावः। नैतयोरिति। अर्थावबोधो वेदनमभिप्रेतं न तु स्वरूपमात्रवेदनम्। तत्र परस्परव्यभिचारदर्शनादुभयोपादानमित्यर्थः। संपाठमिति। अर्थनिरपेक्षं स्वाध्यायं पठतीत्यर्थः॥ ५९॥

क्रतू॥ कात्यायनीति। उक्थशब्दो येषु सामसु रूढस्तान्यधीयाने प्रत्ययो नेष्यते। यदधीयाने प्रत्यय इष्यते तत्रोक्थशब्दो न रूढ इति प्रश्नः। उक्थार्थमिति। सामलक्षणं प्रातिशाख्यं शास्त्रमित्यर्थः। मुख्यार्थाभिधायिनस्तूक्थशब्दात्प्रत्ययो नेष्यते। तत्र वाक्यमेव भवत्युक्थान्यधीते वेद वेति। इहेति। उक्थशब्देन गौण्या वृत्त्या सामलक्षणमौक्थिक्यमुच्यते। य इदानीमिति। औक्थिकानामाम्नाय इतीदमर्थे छन्दोगौक्थिकेति ञ्यः। तस्येदं प्रत्ययादिति। अध्येतृवेदित्रोरुत्पन्नस्याणो लुगाम्नाये

Indira Gandhi National Centre for the Arts

तस्येदं प्रत्ययस्य च। स तर्हि वक्तव्यः। न वक्तव्यः। इहास्माभिस्त्रैशब्द्यं साध्यम्। उक्थान्यधीते औक्थिक्यमधीते औक्थिक इति। तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः, अपरस्मादुत्पत्तिर्भविष्यति। अविरविकन्यायेन। तद्यथा अवेर्मांसमिति विगृह्याविकशब्दादुत्पत्तिर्भवत्याविक इति। एवमुक्थान्यधीतइति विगृह्य औक्थिक इति भविष्यति। औक्थिक्यमिति विगृह्य वाक्यमेव भवति। विद्यालक्षणकल्पसूत्रान्तादकल्पादेरिकक्स्मृतः॥ विद्या, वायसविद्यिकः। सार्पविद्यिकः। लक्षण। गौलक्षणिकः। आश्वलक्षणिकः। कल्प। पाराशरकल्पिकः। मातृकल्पिकः। सूत्र। वार्तिकसूत्रिकः। सांग्रहसूत्रिकः। अकल्पादेरिति किमर्थम्। काल्पसूत्रः। विद्या चानङ्गक्षत्रधर्मत्रिपूर्वा *। विद्या चानङ्गक्षत्रधर्मत्रिपूर्वेति वक्तव्यम्। आङ्गविद्यः। क्षात्रविद्यः। धार्मविद्यः। त्रैविद्यः। आख्यानाख्यायिकेतिहासपुराणेभ्यश्च। आख्यानाख्यायिकेतिहासपुराणेभ्यश्चेकग्वक्तव्यः। यावक्रीतिकः। प्रैयङ्गविकः। यायातिकः। आख्यान। आख्यायिका। वासवदत्तिकः। सौमनोत्तरिकः। ऐतिहासिकः। पौराणिकः। सर्वसादेर्द्विगोश्च लः *। सर्वसादेर्द्विगोश्च लो वक्तव्यः। सर्ववेदः। सर्वतन्त्रः। सवा-

---

विहितस्य ञ्यस्य चेत्यर्थः। विद्येति। इकगिति। ठगित्यर्थः। अकल्पादेरित्येतदानन्तर्यात् सूत्रान्तस्यैव कल्पादेर्निषेधं करोति। तथा च भाष्ये काल्पसूत्र इति प्रत्युदाहृतम्। अन्ये तु सर्वेषामेव निषेधमिच्छन्त. काल्पविद्य इत्यादि भाष्यमित्याहुः। तत्तु प्रथमातिक्रमे कारणातिक्रमाद्भाष्यविरुद्धमिति लक्ष्यते। त्रैविद्य इति। त्र्यवयवा विद्या त्रिविद्या तामधीत इति प्रत्ययः कार्यः। तिस्रो विद्या अधीत इति क्रियमाणे द्विगोर्लुगिति लुक्प्रसङ्गः। आख्यानेति। द्वयोरर्थग्रहणं द्वयोः स्वरूपग्रहणम्। यावक्रीतिक इति। यावक्रीताधिकारेण कृतमाख्यानमुपचाराद् यावक्रीतशब्देनोच्यते। तदधीते वेद वा यावक्रीतिकः। एवं प्रैयङ्गवाधिकारकृताख्यानाध्यायी प्रैयङ्गविकः। वासवदत्तिक इति। वासवदत्तामधिकृत्य कृताख्यायिकाऽधिकृत्य कृते ग्रन्थ इत्यत्रार्थे वृद्धाच्छः। तस्य लुबाख्यायिकाभ्यो बहुलमिति लुप्। ततोऽनेन ठक्। एवं सौमनोत्तरिक इति. ऐतिहासिक इति। इतिहशब्दउपदेशपारम्पर्ये वर्तते। इति हास्यतेऽस्मिन्निति इतिहासः। हलश्चेति घञ्। मयूरव्यंसकादित्वात्समासस्ततष्ठक्। सर्वसादेरिति। सशब्दोऽर्थवान् गृह्यतइति सर्वशब्दः पृथङ्निर्दिष्टः। द्विगोश्चेत्यनेन द्विगोर्लुगिति स्मारितम्। सर्ववेद इति। सर्ववेदानधीतइत्यणो लुक्। सवार्तिक इति। वृत्तौ साधु वार्तिकम्। कथादिभ्यष्ठगिति ठक्। वार्तिकान्तमधीत इत्यन्तवचने सहस्याव्ययीभाव। अव्ययीभावे चाकाले इति सभावः। ततोऽणो लुक्। पञ्चकल्प इति। पञ्चकल्पानधीतइति द्विगुः। ततो विद्यालक्षणेति ठक्। तस्य लुक्। अनुसूरिति। अनुसूशब्दो ग्रन्थविशेषवाची स ठकमुत्पादयति। लक्ष्यलक्षणशब्दौ चेत्यर्थः। अनुसूमधीतइति ठक्। इसुसुक्तान्तादिति कादेशः, केण इति ह्रस्वो वृद्धिश्च। तत आनुसुक इति भवति। लक्ष्यमधीते लाक्षिकः। लक्षणमधीते लाक्षणिकः। इकान्निति। पूर्वपदमधीते पूर्वपदिकः। शतपथमधीते शतपथिकः। शतपथिकी। षष्टिपथिकः। षष्टिपथिकी॥६०॥

Indira Gandhi National Centre for the Arts

र्तिकः । ससंग्रहः । पञ्चकल्पः । द्वितन्त्रः । द्विवेदः । सनुसूर्लक्ष्यलक्षणे सर्वसादेर्द्विगोश्च लः । इकन्पदोत्तरपदात् शतषष्टेः षिकन्पथः ॥

अनुब्राह्मणादिनिः ॥ ६२ ॥ अयं योगः शक्योऽवक्तुम् । कथमनुब्राह्मणी अनुब्राह्मणिनौ अनुब्राह्मणिन इति । इति नैतन्मत्वर्थीयेन सिद्धम् । अनुब्राह्मणमस्यास्तीत्यनुब्राह्मणी ॥

वसन्तादिभ्यष्ठक् ॥ ६३ ॥ अयुक्तोयं निर्देशः । अधीते वेदेति वर्तते । न च वसन्तोनामाध्ययनमस्ति । नैष दोषः । साहचर्यात्ताच्छब्द्यं भविष्यति । वसन्तसहचरितमध्ययनं वसन्तः ॥

प्रोक्ताल्लुक् ॥ ६४ ॥ अयुक्तोयं निर्देशः । प्रोक्तादिति भवितव्यम् । सौत्रो निर्देशः ॥

सूत्राच्च कोपधात् ॥ ६५ ॥ संख्याप्रकृतेरिति वक्तव्यम् । इह मा भूत् । महावार्तिकः । चान्दनगन्धिकः । कालापकः ॥

छन्दोब्राह्मणानि च तद्विषयाणि ॥ ६६ ॥ किमर्थमिदमुच्यते । अन्यत्राभिधेयस्यानित्यत्वात् छन्दोब्राह्मणानां तद्विषयवचनम् * । अन्यत्राभिधेयमनित्यं भवति । पाणिनीयमिति वा भवति । पाणिनीया इति वा । अन्यत्राभिधेयस्यानित्यत्वाच्छन्दोब्राह्मणानामप्यनित्यता प्राप्नोति । इष्यते च तद्विषयतैव स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीति च्छन्दोब्राह्मणानां तद्विषयवचनम् ।

अनुब्रा ॥ अयमिति । अध्येतृवेदित्रोरनभिधानादण्न भविष्यतीति तद्बाधनार्थमपि सूत्रं न कर्तव्यम् ॥ ६२ ॥

वसन्ता ॥ वसन्तसहचरितमिति । यत्र वसन्तो वर्ण्यते यद्वा वसन्तेऽधीयते तत्साहचर्यात्ताच्छब्द्यं लभते ॥ ६३ ॥

प्रोक्ता ॥ अनुक्त इति । अर्थस्य प्रोक्तत्वादर्थस्य च प्रत्ययेन पौर्वापर्यासंभवादिति भावः । सौत्र इति ।।प्रोक्तशब्दस्येह स्वरितत्वं प्रतिज्ञातं तेन तदधिकारविहितप्रत्ययग्रहणमित्यर्थः ॥ ६४ ॥

सूत्रा ॥ संख्याप्रकृतेरिति । अष्टौ अध्यायाः परिमाणमस्य संख्याया अतिशदन्तायाः कन्निति कन्प्रत्ययस्ततोऽष्टकमधीयते इति अणो लुकि कृते ऽष्टका पाणिनीया इत्युदाहरणम् ॥ ६५ ॥

छन्दो ॥ इह प्रोक्तप्रत्ययान्तस्यानेकः प्रकारो दृश्यते । स्वातन्त्र्यमुपाध्यन्तरयोगो वाक्यमध्येतृवेदित्रोः प्रत्ययश्च । स्वातन्त्र्यं तावद् यथा । पाणिनिना प्रोक्तं व्याकरणं पाणिनीयमिति । उपाध्यन्तरयोगो महत्पाणिनीयमिति वाक्यम् । पाणिनीयमधीयत इति । अध्येतृवेदित्रोः प्रत्ययः । पाणिनीया इति । छन्दोब्राह्मणवाचिनां तु प्रोक्तप्रत्ययान्तानामध्येतृवेदितृप्रत्ययविषयतैवेष्यते न तु स्वातन्त्र्यादीति तद्विषयार्थमिदं

Indira Gandhi National Centre for the Arts

एवमर्थमिदमुच्यते । अस्ति प्रयोजनमेतत् । किं तर्हीति । तत्र यथाधिकारं तद्विषयप्रसङ्गः * । तत्र यथाधिकारं तद्विषयता प्राप्नोति । अधीते वेदेति वर्त्तते । तेनाध्येतृवेदित्रोरेव तद्विषयता स्यात् । येऽन्ये उपचारास्तत्र तद्विषयता न स्यात् । यथेह भवति । पाणिनीयं महत्सुविहितमिति । एवमिहापि स्यात् कठं महत्सुविहितमिति । सिद्धं तु प्रोक्ताधिकारे तद्विषयवचनात् * । सिद्धमेतत् । कथम् । प्रोक्ताधिकारे एव तद्विषयता वक्तव्या । तेन प्रोक्तं छन्दोब्राह्मणान्यध्येतृवेदित्रोरिति तत्तर्ह्यध्येतृवेदितृग्रहणं कर्त्तव्यम् । ननु चेहापि क्रियते । परार्थमेतद्भविष्यति । तदधीते तद्वेदेति । एवं तर्हि यावदिह च्छन्दोब्राह्मणग्रहणं तावत्तत्राध्येतृवेदितृग्रहणम् । ननु च तत्रापि क्रियते । परार्थं तद्भविष्यति । पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । शौनकादिभ्यश्छन्दसीति । इह वा छन्दोब्राह्मणग्रहणं क्रियते । तत्र वाध्येतृवेदितृग्रहणम् । कोन्वत्र विशेषः । याज्ञवल्क्यादिभ्यः प्रतिषेधः * । याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्यः याज्ञवल्क्यानि ब्राह्मणानि । सौलभानि । किं प्रोक्ताधिकारे तद्विषयता क्रियतइत्यतो याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्यः । नेत्याह । सर्वथा याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्यः । इनिर्वा प्रोक्ते तद्विषयः * । अथ वा इनिः प्रोक्ते तद्विषयो भवतीति वक्तव्यम् । यदि इनिः प्रोक्ते तद्विषयो भवतीत्युच्यते एवमपि पैङ्गीकल्पः अत्रापि प्राप्नोति । काश्यपकौशिकग्रहणं च कल्पे नियमार्थम् * ।

सूत्रम् । क्रियमाणेपि चैतस्मिन्नधीते वेदेत्यधिकाराद्ध्येतृवेदितृविषयस्य वाक्यस्यैव निवृत्तिः । सिध्यति न तु स्वातन्त्र्यादेरिति मत्वा पृच्छति किमर्थमिति । अन्यत्रेति । पाणिनीयादौ । अभिधेयस्येति । प्रोक्तलक्षणस्यार्थस्येति । अनित्यत्वादिति । नानाविषयत्वादध्येतृवेदित्रोर्नित्यं विशेषणत्वेनाप्रयोगादनियतत्वादित्यर्थः । तत्र यथाधिकारमिति । । अधिकारमनतिक्रम्येत्यर्थः । अधीते वेदेत्यधिकारादध्येतृवेदित्रोरेव विवक्षितयोस्तद्विषयता विधीयमाना तद्विषयमेव वाक्यं निवर्त्तयेद् न तु क्रियान्तरमित्यर्थः । येऽन्ये उपचारा इति । व्यवहारा इत्यर्थः । सिद्धं त्विति । अध्येतृवेतित्रोरेव विवक्षितयोः छन्दोब्राह्मणेषु प्रोक्तप्रत्यय उत्पद्यते नान्यत्रेत्येवं वक्तव्यमित्यर्थः । परार्थंतदिति । छन्दोब्राह्मणान्यध्येतृवेदित्रोरिति परिभाषां कृत्वा पुराणप्रोक्ते कल्पे चेति करिष्यते । चकारेण ब्राह्मणग्रहणमनुकृष्यते । ततः शौनकादिभ्य इति । ततश्छन्दोग्रहणमनुवर्त्तिष्यतइति भावः । याज्ञवल्क्यानीति । यज्ञवल्कस्यापत्यमिति । गर्गादित्वाद्यञ् । तदन्तात्प्रोक्तार्थे कण्वादिभ्यो गोत्र इत्यण्, अत्र तद्विषयता न भवति । सौलभानीति । सुलभेन प्रोक्तानीति तेन प्रोक्तमित्यण् किं त्वित्यस्यानन्तरं प्रतिषेधवचनात् । तन्निमितत्वं प्रतिषेधवचनस्याशङ्क्य पृच्छति । किं प्रोक्ताधिकार इति । इनिर्वेति । इनिशब्देन णिनिरपि गृह्यते । कर्मन्दकृशाश्वादिनिरित्ययमिनिरपि । तेनेनेरेव प्रोक्तार्थविहितस्य तद्विषयता भविष्यति न त्वण इत्यर्थः । पैङ्गीति । पिङ्गेन प्रोक्तः

Indira Gandhi National Centre for the Arts

काश्यपकौशिकग्रहणं कल्पे नियमार्थं द्रष्टव्यम् । काश्यपकौशिकाभ्यामेवेनिः कल्पे तद्विषयो भवति नान्येभ्य इति । एवमपि छणादीनां तद्विषयता न प्राप्नोति । तैत्तिरीयाः वारतन्तवीयाः । यदि पुनश्छणादयः प्रोक्ते तद्विषया भवन्तीत्युच्यते । एवमपि पैङ्गीकल्पः । अत्रापि प्राप्नोति । काश्यपकौशिकग्रहणं च कल्पे नियमार्थमित्येव । एवमप्यौत्सर्गिकाणस्तद्विषयता न प्राप्नोति । क्रौडाः । काङ्कताः मौदाः पैप्पलादाः । छणादयश्चाप्यौत्सर्गिकाणमध्येतृवेदित्रोरेव बाधेरन् । येऽन्ये उपचारास्तत्र न बाधेरन् । तित्तिरिणा प्रोक्ताः श्लोका इति । अस्तु तर्ह्यविशेषेण । ननु चोक्तं याज्ञवल्क्यादिभ्यः प्रतिषेध इति । वक्ष्यत्येतत् याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वादिति तत्रैव वक्तव्यं तद्विषयता च न भवतीति । कथं काश्यपिनः कौशिकिन इति । इनिः प्रोक्ते तद्विषयो भवतीत्युच्यमाने अवश्यमत्र काश्यपकौशिकग्रहणं कल्पे नियमार्थं द्रष्टव्यम् । तदेवेदानीं विध्यर्थं भविष्यति । कथं पराशरिणो भिक्षवः शैलालिनो नटाः । अत्रापि तद्विषयता चेत्यनुवर्त्तिष्यते ॥

कल्प इति णिनिः । अत्रापि छन्दोब्राह्मणग्रहणेऽक्रियमाणे तद्विषयताप्रसङ्गः । काश्यपकौशिकग्रहणं चेति । इनेरध्येतृवेदित्रोरिति परिभाषां कृत्वा काश्यपकौशिकाभ्यां कल्प इति सूत्रं नियमार्थं कर्तव्यमित्यर्थः । एवमपीति । इनेरेकस्योपादानात्तित्तिर्यादिसूत्रविहितानां छणादीनां तद्विषयता न स्यात् । क्रौडा इति । क्रोडेन प्रोक्तं छन्दोऽधीयते । कङ्कतेन मुदेन पिप्पलादेन चेति तेन प्रोक्तमित्यण् तस्य छणादिष्वनन्तर्भावात्तद्विषयता न प्राप्नोति । दोषान्तरमुद्भावयति छणादय इति । अध्येतृवेदितृविवक्षायामेव प्रोक्तार्थ उत्पद्यमानाश्छणादयस्तत्रैव स्वयं भवन्त औत्सर्गिकान् बाधेरन् । अन्यत्र तु स्वयमभवन्तो न बाधेरन् इत्यर्थः । तित्तिरिणा प्रोक्ता इति । तित्तिरिवरतन्त्वित्यत्र छन्दोग्रहणं कर्त्तव्यमिति वक्ष्यते तेनात्र छण् न भवति । तदभावेऽप्यण् नेष्यते । यद्येवमपवादाभावउत्सर्गस्य प्रवृत्तिः केन वार्यते अथानभिधानादिकमुत्सर्गानुत्पत्तौ हेतुरभिधीयते तर्हि छणादयश्चापीति दोषो नोपन्यसनीय इति चिन्त्यमेतत् । अस्तु तर्हीति । इह वा छन्दोब्राह्मणानि च तद्विषयाणीति क्रियेत । प्रोक्ताधिकारे वा छन्दोब्राह्मणान्यध्येतृवेदित्रोरित्युच्यते नास्ति विशेषः । इहापि च प्रकरणे प्रोक्तग्रहणानुवृत्त्यां प्रोक्तप्रत्ययान्तानां छन्दोब्राह्मणवाचिनां तद्विषयता विधीयमाना सर्वं स्वातन्त्र्यादि निवर्त्तयितुं क्षमेति यथाधिकारमित्ययं दोषो नावतरति । सिद्धं तु प्रोक्ताधिकारइत्येतदपि वार्त्तिकमत्रैव सूत्रे प्रोक्ताल्लुगित्यतः प्रोक्तशब्दस्याधिकार इत्येवं केचिद्व्याचक्षते । वक्ष्यत्येतदिति । पुराणप्रोक्तेष्वित्यत्र । कथमिति । कल्पे तद्विषयता न प्राप्नोतीति प्रश्नः । अत्रापि तद्विषयता चेति । अर्थमात्रमत्र निर्दिष्टम् । तथा हि । यद्यत्र प्रकरणे सूत्रमिदं क्रियते । तदा व्यवहितत्वात्कथं तत्र तद्विषयग्रहणस्यानुवृत्तिः स्यात् । अथ प्रोक्तप्रकरणे छन्दोब्राह्मणान्यध्येतृवेदित्रोरित्युच्यते तदा तद्विषयग्रहणं नास्ति । तस्मात्प्रोक्तप्रकरणेऽध्येतृवेदितृग्रहणं पाराशर्यशिलालिभ्यामित्यादावनुवर्त्यमिति भाष्यकारो मन्यते । यद्वा । याज्ञवल्क्याद्यर्थं तद्विषयता च नेति यदुक्तं तदेव तद्विषयताग्रहणमुत्तरत्रानुवर्त्यमित्यर्थः । ६६ ॥

Indira Gandhi National Centre for the Arts

तदस्मिन्नस्तीति देशे तन्नाम्नि ॥ ६७ ॥ तेन निर्वृत्तम् ॥ ६८ ॥ तस्य निवासः ॥ ६९ ॥ अदूरभवश्च ॥ ७० ॥ किं पुनरेकयोग आहोस्विन्नाना योगाः। किं चातः। यद्येको योग उत्तरेष्वर्थादेशनेषु देशे तन्नाम्नीत्यनुवृत्तिः कर्त्तव्या न ह्येकयोगे अनुवृत्तिर्भवति। कथं ज्ञायते। यदयं तदधीते तद्वेदेति द्विस्तद्ग्रहणं करोति। अथ नाना योगाः ओरञित्येवमाद्यनुक्रमणं यदेव सर्वान्त्यमर्थादेशनं तस्यैव विषये स्यात्। यथेच्छसि तथास्तु। अस्तु तावदेको योगः। ननु चोक्तमुत्तरेष्वर्थादेशनेषु देशे तन्नाम्नीत्यस्यानुवृत्तिः कर्त्तव्या न ह्येकयोगेऽनुवृत्तिर्भवतीति। एकयोगे प्यनुवृत्तिर्भवति। कथं ज्ञायते। यदयं तदस्यास्त्यस्मिन्निति मतुबिति द्विस्तद्ग्रहणं न करोति। कथं तदधीते तद्वेदेति। प्रमादकृतमाचार्यस्य शक्यमकर्तुम्। अथ वा सन्तु पुनर्नाना योगाः। ननु चोक्तम्। ओरञित्येवमाद्यनुक्रमणं यदेव सर्वान्त्यमर्थादेशनं तस्यैव विषये स्यात्। नैष दोषः। गोयूथवदधिकाराः। तद्यथा। गोयूथमेकदण्डप्रघट्टितं सर्वं समं घोषं गच्छति तद्वदधिकारः॥

ओरञ् ॥ ७१ ॥ ओरञ्विधेर्नद्यां मतुब्विप्रतिषिद्धम् *। ओरञ्विधेर्नद्यां मतुब्विप्रतिषिद्धम् *। ओरञ्विधेरवकाशः। कक्षतु काक्षतवम्। काकपेलवम्। नद्यां मतुपोऽवकाशः। उदुम्बरावती। मशकावती। इहोभयं प्राप्नोति। इक्षुमती। द्रुमती। मतुब्भवति विप्रतिषेधेन॥

अदूर॥ चतुर्णां योगानां किमेकवाक्यता अथ वा नानावाक्यतेति विचारः। किं पुनरिति। ननु समर्थविभक्तयः प्रत्ययार्थाश्च भिन्ना इति कथमेकयोगत्वसंभावना। उच्यते। अणादयः पञ्च एतैर्योगैर्विधीयन्तइति तद्विधानापेक्षमेकयोगत्वं संभवति। यदा युगपदेतेष्वर्थेष्वणादयो विधीयन्ते ग्रहणैकवाक्येनैकेन तदैकयोगत्वं तदा चैतन्निबन्धनानि प्रक्रियावाक्यान्युपप्लवन्ते। यदा तु क्रमेण भिन्नेष्वर्थेषु प्रत्ययविधानं तदा नानावाक्यता। देशे तन्नाम्नीति चतुर्ष्वपि योगेषु प्रत्ययान्तोपाधित्वेनैतदुपयुज्यते। एकयोगे च प्रथमेनैवार्थेनानन्तर्यात्संबध्येत नान्यैः। नानायोगत्वे तु स्वरितत्वादधिकारे सति सर्वैरर्थैरस्योपाधेः संबन्ध उपपद्यते। प्रमादकृतमिति। शिष्याणां सुखावबोधाय लाघवं प्रत्यनवधानलक्षणेन प्रमादेन कृतमित्यर्थः। लौकिको ह्यधिकापेक्षालक्षण एकस्मिन्नपि योगे न विरुध्यते। अर्थसमुदायं चापेक्ष्य समर्थविभक्तिरुपाधिर्वा निर्दिश्यमानः प्रत्येकमभिसंबध्यते। यत्त्वन्यत्रोक्तं न चैकयोगे ऽनुवृत्तिर्भवतीति। यच्छास्त्रीयमधिकारमन्तरेणैव संबन्धस्यान्याय्यत्वमनाश्रित्येत्यविरोधः। गोयूथवदिति। स्वरितलिङ्गासङ्गदण्डप्रेर्य्यमाणा अधिकारगवा आनन्तर्यव्यवधाननिरपेक्षाः सममेव कार्यदेशमनुसरन्तीत्यर्थः॥ ७०॥

ओर॥ उदुम्बरावतीति। मतौ बह्वचोनजिरादीनामिति दीर्घः॥ ७१॥

मतोश्च बह्वजङ्गात् ॥ ७२ ॥ अङ्गग्रहणं किमर्थम्। यथा बह्वज्ग्रहणमङ्गविशेषणं विज्ञायेत। बह्वजङ्गादिति। अथाक्रियमाणेऽङ्गग्रहणं कस्य बह्वज्ग्रहणं विशेषणं स्यात्। मत्वन्तविशेषणम्। तत्र को दोषः। इहापि प्रसज्येत। मालावतां निवासः मालावतम्। अस्ति चेदानीं कश्चिदबह्वज्मत्वन्तो यदर्थो विधिः स्यात्। अस्तीत्याह। स्ववान् श्ववान् ॥

नद्यां मतुप् ॥ ८५ ॥ किमर्थं नद्यां मतुब्विधीयते न तदस्यास्त्यस्मिन्निति मतुबित्येव सिद्धम्। नद्यां मतुब्वचनं मत्वर्थेऽविधानात् *। नद्यां मतुब्वचनं क्रियते। मत्वर्थेऽविधानात्। अयं मत्वर्थेऽविधीयते। स विशेषविहितः सामान्यविहितं मतुपं बाधेतेति। निर्वृत्ताद्यर्थं च *। निर्वृत्ताद्यर्थं च नद्यां मतुब्वचनं क्रियते। निर्वृत्ताद्यर्थेषु मतुब्यथा स्यात् ॥

कुमुदनडवेतसेभ्यो ड्मतुप् ॥ ८७ ॥ महिषाच्च *। माहिषाच्चेति वक्तव्यम्। महिष्मान् ॥

नडादीनां कुक् च ॥ ९१ ॥ यदि पुनरयं कुट् परादिः क्रियते। कुटि प्रत्ययादेरादेशानुपपत्तिरनादित्वात् *। कुटि सति प्रत्ययादेरित्यादेशस्यानुपपत्तिः। कुटि कृते अनादित्वादादेशो न प्राप्नोति। एवं तर्हि पूर्वान्तः करिष्यते। पूर्वान्ते ह्रस्वत्वम् *। यदि पूर्वान्तः। ह्रस्वत्वं वक्तव्यम्। कुञ्चकीयः। परादौ पुनः सति केण इति ह्रस्वत्वं सिद्धं भवति। अस्तु तर्हि परादिः। ननु चोक्तं कुटि कृतेऽनादित्वादादेशो न प्राप्नोतीति। सिद्धं त्वादिष्टस्य कुड्वचनात् *। सिद्धमेतत्। कथम्। आदिष्टस्य कुड्वचनात्। कुट् चादिष्टस्येति वक्तव्यम्। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। संनियोगात्सिद्धम् *। संनियोगः करिष्यते। क एष यत्नश्चोद्यते संनियोगो नाम। चकारः कर्तव्यः। कुट् च। किंच यच्चान्यत्प्राप्नोति। कि-

---

मतो ॥ अङ्गग्रहणमिति। मतोश्च बह्वच इत्येवास्तु व्यधिकरणे पञ्चम्यौ व्याख्यास्येते बह्वचो यो विहितो मतुप् तदन्तादण्भवतीति स एवार्थः सम्पद्यतइति प्रश्नः। यथेति। सामानाधिकरण्ये सम्भवति वैयधिकरण्याश्रयणस्यान्याय्यत्वादित्यर्थः ॥७२॥

नद्याम् ॥ अयमिति। तदस्मिन्नस्तीति देशे तन्नाम्नीत्येतत्सूत्रविहितो नद्या अपि देशत्वाद्विशिष्टलिङ्गो नदीदेशोऽग्रामा इत्यत्र तु पृथङ्नदीग्रहणं सर्वनदीवाच्यत्वबह्वन्द्वपरिग्रहणार्थम्। स विशेषविहित इति। देशे तन्नाम्नि विधानात्। निर्वृत्ताद्यर्थं चेति। निर्वृत्तादिषु त्रिष्वर्थेषु अप्राप्त एव मतुब् विधीयते। तदस्मिन्नस्तीत्यत्र त्वर्थे प्रतिप्रसूयतइत्यर्थः ॥ ८५ ॥

नडा ॥ सूत्रकारेण कुक् पूर्वान्तः कृतः। तत्र कुञ्चा अस्मिन् सन्तीति कुञ्चकीयमिति ह्रस्वो न सिध्यति। तक्षकीयमित्यत्र च नलोपो न प्राप्नोति। परादौ तु केण इति ह्रस्वो नान्तस्य च पदत्वान्नलोपः सिध्यतीति मन्वान आह यदि पुनरयमिति। क

चान्यत् प्राप्नोति । आदेशः । सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं पूर्वान्ते ह्रस्वत्वमिति । निपातनात्सिद्धम् । किं निपातनम् । कुञ्चा ह्रस्वत्वं चेति । तर्हि पूर्वान्ते सति निपातनं कर्तव्यम् । परादावप्येष दोषः । यद्धि तत्केण इति ह्रस्वत्वम् । न तत्कादिमात्रे शक्यं विज्ञातुम् । इहापि प्रसज्येत । नदीकल्पः परीवाहः कुमारीकाम्यतीति । तस्मादुभयमेतद्वक्तव्यम् । कुञ्चा ह्रस्वत्वञ्चेति ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थाध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥

शेषे ॥ ९२ ॥ शेष इत्युच्यते । कः शेषो नाम । अपत्यादिभ्यश्चातुरर्थपर्यन्तेभ्यो येन्येर्थाः स शेषः । किमर्थं पुनः शेषग्रहणं क्रियते । शेषे घादयो यथा स्युः स्वार्थे मा भूवन्निति । नैतदस्ति प्रयोजनम् । इदं तावदयं प्रष्टव्यः । अणादयः स्वार्थे कस्मान्न भवन्तीति । अपत्याद्यर्थेष्वणादयो विधीयन्ते तेन स्वार्थे न भविष्यन्ति । इमेपि तर्हि जातादिष्वर्थेषु विधीयन्ते तेन स्वार्थे न भविष्यन्ति । कथं पुनरिहोच्यमाना घादयो जातादिष्वर्थेषु शक्या विज्ञातुम् । अनुवर्तिष्यन्ते तत्र घादयः । यद्यनुवर्तिष्यन्ते घादयः । या या परा परा प्रकृतिस्तस्याः पूर्वे पूर्वे प्रत्ययाः प्राप्नुवन्ति । एवं तर्हि जातादिष्वर्थेषु घादीनपेक्षिष्यामहे । अयुक्ता एवं बहुनोपेक्षा । अपेक्ष्यमाणो यमनन्तरं योगमपेक्षेत । बहुनोप्यपेक्षा भवति । तद्यथा ।

एष इति । आगमादेशौ सह भवत इत्युच्यमाने गौरवप्रसङ्ग इति मन्यते । निपातनादिति । गण एव कुञ्चा ह्रस्वत्वं च तत्रान्नलोपश्चेत्युच्चारणादित्यर्थः । यद्धि तदिति । केऽण इत्यत्र कप्रत्ययस्य ग्रहणं न तु वर्णमात्रस्य यतस्तदादिविधिः स्यादित्यर्थः॥९१॥

इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे चतुर्थस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥

शेषे ॥ शेषग्रहणमन्तरेणापत्यादीनां चातुरर्थपर्यन्तानां निवृत्तत्वाद्वक्ष्यमाणेषु जातादिषु घादयः सिध्यन्तीति मत्वा पृच्छति कः शेष इति । इतरः शिष्यबुद्धिपरीक्षार्थं शेषं दर्शयति अपत्यादिभ्य इति । येनाभिप्रायेण पृष्टवांस्तेनैव पुनः पृच्छति किमर्थमिति । स्वार्थे मा भूवन्निति । अर्थानिर्देशे हि स्वार्थे घादिप्रसङ्गो विप्रकर्षात्तु जातादिभिर्घादीनां सम्बन्धो न स्यादिति भावः । अपत्यादिष्विति । प्राग्दीव्यत इति विशिष्टावधिपरिच्छिन्नार्थाश्रयेणाणादीनां विधानादिति भावः । इमेपीति । घादिविधानवाक्येष्वर्थनिर्देशाभावात् । तत्र जात इत्यादिष्वर्थनिर्देशवाक्येषु प्रत्ययानुपादानात् परस्पराकाङ्क्षावशादेकवाक्यतायां सत्यां जातादिष्वेव घादयो भविष्यन्ति न तु स्वार्थे इत्यर्थः । एवं तर्हीति । तत्र जात इत्यादिषु प्रत्ययानिर्देशादवश्याकाङ्क्षितव्या घादय इति भावः । अयुक्तेति । बहुनो वस्तुनोपेक्षा न युक्ता । अनन्तरेणैव प्रत्ययेनाकाङ्क्षाविच्छेदसम्भवादिति भावः । अनन्तरमिति । विभाषा पूर्वाह्णापराह्णाभ्यामित्येतदित्यर्थः । कर्षादीश्चाति ।

Indira Gandhi National
Centre for the Arts

कषादिषु यथाविध्यनुप्रयोग इति। ससामान्यकं विशेषकं सर्वमपेक्षते। अथ वा पुनरस्त्वनुवृत्तिः। ननु चोक्तं याया परा परा प्रकृतिस्तस्यास्तस्याः पूर्वे पूर्वे प्रत्ययाः प्राप्नुवन्तीति। नैष दोषः। संबन्धमनुवर्तिष्यते। राष्ट्रावारपाराद् घखौ। ग्रामाद्यखञौ। राष्ट्रावारपाराद् घखौ। कत्त्र्यादिभ्यो ढकञ्। राष्ट्रावारपाराद् घखौ। ग्रामाद्यखञाविति। अत उत्तरं पठति। शेषवचनं घादीनामपत्यादिष्वप्रसङ्गार्थम् *। शेषवचनं क्रियते। शेषे घादयो यथा स्युः। अपत्यादिषु मा भूवन्निति। कथं च प्राप्नुवन्ति। तस्येदंवचनात्प्रसङ्गः *। तस्येदंविशेषा ह्येते अपत्यसमूहो निवासो विकार इति। विप्रतिषेधात्सिद्धम् *। अणादयः क्रियन्तां घादय इति। किमत्र कर्तव्यम्। अणादयो भवन्ति विप्रतिषेधेन। न वा परत्वाद् घादीनाम् *। न वा एष युक्तो विप्रतिषेधः। किं कारणम्। परत्वाद् घादीनाम्। विप्रतिषेधे परमित्युच्यते। पूर्वे चाणादयः परे घादयः। परेऽणादयः करिष्यन्ते। सूत्रविपर्यासः कृतो भवति। अणपवादत्वाच्चाण्विषये घादिप्रसङ्गः *। अणपवादत्वाद् घादीनामण्विषये घादयः प्राप्नुवन्ति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति अण्विषये घादयो न भवन्तीति। यदयं फेश्छ चेति फिञन्ताच्छं शास्ति। नैतदस्ति ज्ञापकम्। फिनर्थमेतत् स्यात्। सौवीरगोत्रेष्विति वर्तते। न च फिन्नन्तं सौवीरगोत्रमस्ति। गोत्रग्रहणं सामूहिकेषु ज्ञापकम्। दैवयातवग्रहणं वैषयिकेषु भास्त्रायणग्रहणं नैवासिकेषु॥

यथात्र कषादिष्विति वचनेनापेक्षा प्रतिपाद्यते तथेहापि योगविभागसामर्थ्यात्प्रत्ययसमुदायापेक्षा भविष्यतीति मन्यते। ससामान्यकमिति। उपमाने कर्मणि चेत्यत्र धातुसामान्यं प्रकृतित्वेनोपादीयतेऽन्यत्र तु विशेषः। ततश्च सर्वस्यैवापेक्षा भविष्यतीत्यर्थः। अथ वेति। स्वरितत्वादिति भावः। विप्रतिषेधादिति। पूर्वविप्रतिषेधादिति भावः। न वेति। अनिष्टप्रसङ्गाद्विप्रतिषेध आश्रयितुं न युक्तः। परशब्दस्य व्यवस्थाविषयस्य तत्र ग्रहणादिष्टवाची संगृह्यत इति चेदिष्टानिष्टत्वस्य वचनाद्विना दुर्ज्ञानत्वात्तद्ग्रहणस्यायुक्तत्वात्। अणपवादत्वादिति। नाप्राप्ते ऽणि विधीयमाना घादयो ऽपत्यादिष्वप्यणं बाधेरन्निति शेषाधिकारः कर्तव्य इत्यर्थः। इदानीं भाष्यकारोऽसत्यपि शेषाधिकारे ज्ञापके नापत्यादिषु शेषाधिकारप्रत्याख्यानाय घादीन् व्यावर्तयति। नैष दोष इति। फेश्छ चेति। फेश्चैवं ठग्विधानार्थं कर्तव्यम्। तत्र ठका मुक्ते पक्षे वृद्धाच्छ इतिच्छो भविष्यति नार्थश्छविधानेन। तत्तु ज्ञापकार्थं सम्पद्यते घादयोऽपत्यादिषु न भवन्तीत्यस्यार्थस्य। अपत्य एव ज्ञापकं स्यादित्याशङ्क्य ज्ञापकान्तराण्याह गोत्रग्रहणमिति। गोत्रोक्षोष्ट्रोरभ्रेत्येतादिति भावः। गोत्रचरणाद्वुञिति समूह इदमर्थान्तर्भूते वुञि सिद्धे पुनर्वुञ्विधानं यथोक्तार्थज्ञापनम्। दैवयातवग्रहणमिति। राजन्यादिगणपठितमिति भावः। देवयातूनामपत्यानि दैवयातवा इति। गोत्रप्रत्ययान्तमेतत्। भास्त्रायणग्रहणमिति। अरीहणादिगणपठितं वुञ्विधानार्थमिति भावः। यद्यपि न्यायेनापत्यादिषु घाद्यभावः

Indira Gandhi National Centre for the Arts

राष्ट्रावारपाराद्धखौ ९३ ॥ अवारपाराद्विगृहीतादपि * । अवारपाराद्विगृहीतादपीति वक्तव्यम्। अवारपारीणः । अवारीणः । पारीणः । विपरीताच्च * । विपरीतादपीति वक्तव्यं । पारावारीणः ॥

कत्र्यादिभ्योढकञ् ॥ ९५ ॥ ग्रामाच्चेति वक्तव्यम्। ग्रामेयकः । तर्हि वक्तव्यम्। न वक्तव्यम्। कत्र्यादिभ्यो ढकञित्यत्र ग्रामादित्येतदनुवर्तिष्यते ॥

कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु ॥ ९६ ॥ अयं योगः शक्योवक्तुम्। कथं कौलेयकः, कौक्षेयकः, ग्रैवेयकः। कुलस्यापत्यं, कुक्षिग्रीवासु कन्नृढञः । कुलस्यापत्यं कौलेयक इति भविष्यति । कुक्षिग्रीवादपि ढञन्तात्कन्भविष्यति ॥

कापिष्यात्ष्फक् ॥ ९९ ॥ वाल्हुर्दिपर्दिभ्यश्चेति वक्तव्यम्। वाह्लायनी । और्दायनी । पार्दायनी ॥

रङ्कोरमनुष्येण्च ॥ १०० ॥ अमनुष्यइति किमर्थम्। राङ्कवो मनुष्यः । रङ्कोरमनुष्यग्रहणानर्थक्यं मनुष्यतत्स्थयोर्वुञ्विधानात् * । रङ्कोरमनुष्यग्रहणमनर्थकम्। किं कारणम्। मनुष्यतत्स्थयोर्वुञ्विधानात्। अयं मनुष्यतत्स्थयोर्वुञ्विधीयते । स बाधको भविष्यति । एवं तर्हि ज्ञापयत्याचार्यः अमनुष्ये मनुष्यस्थे ष्फगणौ भवत इति । अमनुष्ये मनुष्यस्थे ष्फगणोर्ज्ञापकमिति चेत्त-

---

सिध्यति। तथापि विस्पष्टप्रतिपत्तये भाष्यकारो ज्ञापकान्युपन्यास्थत्। तथाहि। विशेषशब्दसन्निधाने सामान्यशब्द उपादीयमानस्तत्रैव वा विशेषेऽवतिष्ठते। यथा वृक्षः शिंशपेति। विशेषान्तरेषु वा। यथा दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति। तस्येदमिति सामान्यमपत्यादिशब्दसान्निधावुपादीयमानं यद्यपत्यादिष्वेववर्तेततदा सामान्योपादानमनर्थकमेव स्यात्। तस्मादपत्यादिविशेषपरिहारेण विशेषान्तराणि तस्येदमित्यनेन ग्राहिष्यन्ते। यदि तर्हि शेषग्रहणं प्रत्याख्यायते तदा तस्य लक्षणतया यानि शब्दरूपाणि साध्यानि तानि कथं सिध्यन्ति। चक्षुषा गृह्यते चाक्षुषं रूपम्। श्रावणः शब्दः। चतुर्भिरुह्यते चातुरं शकटम्। आश्वो रथः। दृषदि पिष्टा दार्षदाः सक्तवः। उलूखले क्षुण्ण औलूखलो यावकः। चतुर्दश्यां दृश्यते चातुर्दशं रक्ष इति। तस्येदमिति संस्कृतं भक्षा इति च सिद्धत्वान्नार्थस्तदर्थेन शेषवचनेन। तत्र जात इत्यत्र तु सूत्रेऽस्य लक्षणत्वमाश्रित्यैतेषां सिद्धमभिधास्यति नागनाथः ॥ ९२ ॥

कुल ॥ कुलस्यापत्यमिति। शुनः प्रत्ययार्थत्वे श्वकुलं प्रकृत्यर्थः संपद्यते। कन्निति। स्वार्थिक इति भावः ॥ ९६ ॥

कापि ॥ वाल्हुर्दीति। अवृद्धादपीति वुञि प्राप्ते ष्फगारभ्यते इत्याहुः ॥ ९९ ॥

रङ्कवो ॥ रङ्कवो जनपदस्ततः प्राग्दीव्यतोऽणित्यण् प्राप्तस्ततोऽवृद्धादपीति वुञ् प्राप्तः तत ओर्देशे ठञ् प्राप्तः ततः कोपधादण् ततः कच्छादिभ्यश्चेत्यण् प्राप्तस्ततः ष्फगणौ विधीयेते। कच्छादिषु कोपधत्वादेवाणि सिद्धे रङ्कुशब्दस्य पाठो मनुष्यतत्स्थयोर्वुञ्विधानार्थः। स बाधक इति। विशेषविहितत्वादिति भावः। अमनुष्ये मनुष्यस्थ इति। चूडादावित्यर्थः। यदि हि मनुष्यस्थे वुञं ष्फगणौ न बाधेयातां मनुष्य-

ञ। किं कारणम्। मनुष्यस्थे ष्फगणोर्ज्ञापकमिति चेन्नानिष्टत्वात् *। अमनुष्ये अनिष्टत्वात्। न ह्यमनुष्ये मनुष्यस्थे ष्फगणाविष्येते। किं तर्हि। वुञेवेष्यते। अण्ग्रहणं च कच्छादिभ्योण्वचनात् *। अण्ग्रहणं चानर्थकम्। किं कारणम्। कच्छादिभ्योण्वचनात्। कच्छादिपाठादत्राण्भविष्यति॥

अव्ययात्त्यप्॥ १०४॥ परिगणनं कर्तव्यम्। अमेहक्वतसित्रेभ्यस्त्यब्विधिर्योऽव्ययात्स्मृतः॥ अमा। अमात्यः। इह। इहत्यः। क्व। क्वत्यः। तसि। ततस्त्यः। त्र। तत्रत्यः। इतरथा ह्यौत्तराहौपरिष्टपारतानां प्रतिषेधो वक्तव्यः स्यात्। औत्तराहः। औपरिष्टः। पारतः। त्यब्नेर्ध्रुवे। त्यब्नेर्ध्रुवे वक्तव्यः। नित्यः। निसो गते। त्यब्वक्तव्यः। निष्ट्यः। अरण्याण्णः। अरण्याण्णो वक्तव्यः। आरण्याः सुमनसः। दूरादेत्यः *। दूरादेत्यो वक्तव्यः। दूरेत्यः। उत्तरादाहञ्* उत्तरादाहञ् वक्तव्यः। औत्तराहः। अव्ययात्त्यप्याविष्ट्यस्योपसंख्यानं छन्दसि *। अव्ययात्त्यविसत्राविष्ट्यस्य छन्दस्युपसंख्यानं कर्तव्यम्। आविष्ट्यो वर्द्धते चारुरासु। अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपधविधेर्वृद्धाच्छो विप्रतिषेधेन *। अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपधाविधेर्वृद्धाच्छो भवति विप्रतिषेधेन। अव्ययात्त्यब्भवतीत्यस्यावकाशः। अमात्यः। वृद्धाच्छस्यावकाशः। शालीयो मालीयः। आरादुभयं प्राप्नोति। आरातीयः। तीरोत्तरपदादञ् भवतीत्यस्यावकाशः करवतीर। कारवतीरम्। छस्य स एव। वायसतीरादुभयं प्प्नोति। वायसतीरीयः। रूप्योत्तरपदादञ् भवतीत्यस्यावकाशः। चणाररूप्य। चाणाररूप्यम्। छस्य स एव। माणिरूप्या-

---

प्रतिषेधोनर्थकः स्यात्। कच्छादिभ्योण्वचनादिति। ततश्चैकविषयत्वात्पर्यायेण ष्फगणौ भविष्यत इति नार्थोण्वचनेनेत्यर्थः। तदेवं रङ्कोश्चेत्येव वक्तव्यम्। यत्तु कैश्चिद्व्यधायि। अमनुष्यग्रहणेन पर्युदासाश्रयेण मनुष्यसदृशे प्राणिनि ष्फग्विधीयते नाप्राणिनि। अतएव विशेषविहितत्वादणो बाधकः स्यादित्यण्ग्रहणमपि कृतमिति तदयुक्तम्। न हि भाष्यकारवार्त्तिककाराभ्यामभियुक्ततरः शब्दविषये कश्चिदस्ति॥१००॥

अव्यया॥ अमेहेति। योऽव्ययात्त्यब्विधिःसोऽमादिभ्य एव स्मृत इत्यर्थः। अमाशब्दः सहार्थे सामीप्ये च वर्तते। तेन समीपे भवतीत्यमात्यः। औत्तराह इति। आहि च दूरे उत्तराच्चेत्याहिप्रत्ययः। उत्तराहि भवः। उपरिष्टाद्भवः। परतो भव इत्यण्। अव्ययानां भमात्र इति टिलोपः। परतःशब्दो विभाषापरावराभ्यामित्येतसुजन्तः। त्यब्नेर्ध्रुवे इति ध्रुवं नियतमुच्यते। निसो गत इति। निर्गतो वर्णाश्रमेभ्य इति निष्ट्यः चाण्डालादिः। ह्रस्वात्तादौ तद्धित इति सकारस्य मूर्द्धन्यस्तकारस्य ष्टुत्वम्। अरण्याण्ण इति। अणि सति ङीप् स्यादिति णो विधीयते। आविष्ट्य इति। आविश्शब्दाद् वृद्धाच्छे प्राप्ते त्यब्विधिः। आविर्भूत आविष्ट्यः। आरातीय इति। असति परिगणने ऽत्र प्राप्नोति। योपधलक्षण इति। धन्वयोपधाद्वुञिति वुञ्। परत्वग्रहणेन बाधकत्वं लक्ष्यते। अप-

Indira Gandhi National Centre for the Arts

दुभयं प्राप्नोति । तं चापि छं परत्वाद्योपधलक्षणो वुञ्बाधते । माणिरूप्यकः । उदीच्यग्रामाच्च बह्वचोन्तोदात्तादञ्भवतीत्यस्यावकाशः । शिवपुर । शैवपुरम् । छस्य स एव । वाडवकर्षादुभयं प्राप्नोति । वाडवकर्षीयः । कोपधादण् भवतीत्यस्यावकाशः । निलीनक । नैलीनकः । छस्य स एव । औलूकादुभयं प्राप्नोति । औलूकी । तेभ्यष्ठञ्ञिठौ * । तेभ्यस्सवादिभ्यष्ठञ्ञिठौ भवतो विप्रतिषेधेन । अव्ययात्त्यब्भवतीत्यस्यावकाश । अमात्यः । ठञ्ञिठयोरवकाशः । कारतन्तविकी । कारतन्तविका । आरान्नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति । आरात्की । आरात्का । तीरोत्तरपदादञ्भवतीत्यस्यावकाशः । करवतीर । कारवतीरी । ठञ्ञिठयोः स एव । कास्तीरं नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति । कास्तीरिकी । कास्तारिका । रूप्योत्तरपदाञ्ञो भवतीत्यस्यावकाशः । चणारूप्य । चाणारूप्यम् । ठञ्ञिठयोः स एव । दासरूप्यं नाम वाहोकग्रामस्तस्मादुभयं प्राप्नोति । तौ चापि ठञ्ञिठौ परत्वाद्योपधलक्षणो वुञ् बाधते । दाशरूप्यकः । उदीच्यग्रामाच्च बह्वचोन्तोदात्तादञ्भवतीत्यस्यावकाशः । शिवपुर । शैवपुरः । ठञ्ञिठयोः स एव । शाकलं नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति । शाकलिकी शाकलिका । कोपधादण्भवतीत्यस्यावकाशः । निलीनक, नैलीनकः । ठञ्ञिठयोः स एव । सौसुकं नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति । तौ चापि ठञ्ञिठौ परत्वात्कोपधलक्षणश्छो बाधते । सौसुकीयः । न वा ठञादीनां छापवादत्वात्तद्विषये चाभावादितरेषाम् * । न वार्थो विप्रतिषेधेन । किं कारणम् । ठञादीनां छापवादत्वात् । ठञादयश्छापवादा,स्तद्विषये चाभावादितरेषाम् । तद्विषये छविषये सवादीनामभावः । कोपधादणः पुनर्वचनमन्यनिवृत्त्यर्थम् * । अयं चाप्ययुक्तो विप्रतिषेधः । योयं कोपधा-

---

वादत्वादिह च्छस्य वुञ् बाधकः वार्त्तिककारेण तु प्राप्तिमात्राश्रयेण च्छस्य रूप्योत्तरपदलक्षणस्य च ञ्यस्य विप्रतिषेध उक्तः । शिवपुरमिति । शिवस्य पुरमिति षष्ठीसमासः समासस्वरेणान्तोदात्तत्वम् । प्रस्थपुरवहान्ताच्चेत्यत्र वृद्धात् प्राचामित्यतो वृद्धाधिकारादत्र वुञ् न भवति । कोपधादिति । प्रस्थोत्तरपलद्यादिकोपधादणित्ययमण्विवक्षित । एतस्माद्धि परश्छः । यस्तु कोपधादणित्यण् स जनपदवुञोऽपवादः । तस्यापि वृद्धादकेकान्तखोपधादित्यत्र खोपधग्रहणात् छो बाधकः परत्वात् । औलूकादिति । उलूका अस्मिन् सन्तीति तदस्मिन्नस्तीत्यण् । औलूको नाम ग्रामः । तेभ्य इति । ये छस्य बाध्या अव्ययादिलक्षणाः प्रत्ययास्तेभ्य इत्यर्थः । आरात्कीति । परिगणनानपेक्षयाऽयं विप्रतिषेध उक्तः । शाकलमिति । शकलानि सन्त्यस्मिन्निति पूर्ववदण् । कोपधलक्षण इति । वृद्धादकेकान्तेत्यत्राकेकान्तग्रहणे कोपधग्रहणं कर्तव्यमिति विहितः । नवेति । यदुक्तं तेभ्यष्ठञ्ञिठाविति तन्निराकरोति । अव्ययादिलक्षणानां प्र-

Indira Gandhi National Centre for the Arts

दणः छस्य च। किं कारणम्। कोपधादणः पुनर्वचनमन्यनिवृत्त्यर्थम्। सिद्धो-त्राण् उत्सर्गेणैव। तस्य पुनर्वचनएतत्प्रयोजनं ये तस्य बाधकास्तद्बाधनार्थम्। स यथैव तदपवादमञ्जं बाधते। एवं छमपि बाधेत। तस्मादन्तोदात्ते कोप-धप्रतिषेधः *। तस्मादन्तोदात्ते कोपधादञः प्रतिषेधो वक्तव्यः। न वक्तव्यः। मध्येपवादाः पूर्वान् विधीन् बाधन्तइत्येवं कोपधादण् अञं बाधिष्यते छं न बाधिष्यते। छादोर्देशे कालाट्ठञ् *। छादोर्देशे कालाट्ठञित्येतद्भवति विप्रतिषेधेन। छस्यावकाशः। शालीयो मालीयः। ओर्देशे ठञ्भवतीत्यस्या-वकाशः, निषादकर्षूर्नाम देशः। नैषादकर्षुकः। इहोभयं प्राप्नोति। दाक्षि-कर्षुकः। कालाट्ठञ्भवतीत्यस्यावकाशः। आर्द्धमासिकम्। सांवत्सरिकम्। छस्य स एव। मासादुभयं प्राप्नोति। मासिकम्। नक्षत्रादण् *। नक्षत्राद-ण्भवति छाद्विप्रतिषेधेन। अणोवकाशः। तैषः। पौषः। छस्य स एव। स्वातेरुभयं प्राप्नोति। सौवातः। अव्ययाट्ट्युट्युलौ *। छाद्भवतो विप्रति-षेधेन। ट्युट्युलोरवकाशः। दोषातनम्। दिवातनम्। छस्य स एव। प्रातः शब्दादुभयं प्राप्नोति। प्रातस्तनम्। शरीरावयवाद्यत् *। छाद्भवति विप्रतिषे-धेन। यतोवकाशः। दन्त्यम्। ओष्ठ्यम्। छस्य स एव। पादादुभयं प्राप्नोति। पद्यम्। वर्गान्ताच्चाशब्दे यत्खौ *। छाद्भवतो विप्रतिषेधेन। यत्खयोरवकाशः। अक्रूरवर्ग्यः अक्रूरवर्गीणः। छस्य स एव। वासुदेववर्गादुभयं प्राप्नोति। वासुदेव-वर्ग्यः। वासुदेववर्गीणः। बह्वचोन्तोदात्ताट्ठञ् *। छाद्भवति विप्रतिषेधेन। ठञो-वकाशः। नतानत। नातानतिकः। छस्य स एव। सामस्तशब्दादुभयं प्रा-प्नोति। सामस्तिकः। आयस्थानेभ्यष्ठक् *। छाद्भवति विप्रतिषेधेन। ठकोऽव-काशः। शौल्किकम्। गौल्मिकम्। छस्य स एव। आपणादुभयं प्राप्नोति। आ-पणिकम्। विद्यायोनिसंबन्धेभ्यो वुञ् *। छाद्भवति विप्रतिषेधेन। वुञोऽव-काशः। औपाध्यायकम्। पैतामहकम्। छस्य स एव। इहोभयं प्राप्नोति। आ-

---

स्ययानां परत्वाच्छेन बाधितानां छापवादैः ठञादिभिरुत्कृष्टबलैः सह संप्रधारणा नास्तीत्यर्थः। अञं बाधतइति। उदीच्यग्रामलक्षणामित्यर्थः। तस्मादिति। उदीच्य-ग्रामाच्च बह्वचोन्तोदात्तादकोपधादिति वक्तव्यमित्यर्थः। भाष्यकारो विप्रतिषेधं स-मर्थयितुमाह न वक्तव्य इति। दार्त्तिकर्षुक इति। दाक्षिकर्षूर्नाम वाहीकग्रामः तत्र भव इति ठञ्। इसुसुक्तान्तात्कः केण इति ह्रस्वः। सौवात इति। अतेः सुपूर्वादज्य-तिभ्यामिताण्प्रत्ययः। स्वातिना युक्तः काल इत्यण्। लुबविशेषइति लुप्। स्वातौ भव इति सन्धिवेलादिसूत्रेणाण्। जातेर्थे तु लुका भाव्यम्। श्रविष्ठाफाल्गुनीत्यादिना। पद्यमिति। पद्यत्यतदर्थइति पद्भावः। अक्रूरवर्ग्य इति। अक्रूरो नाम क्षत्रियः भगवान् वासुदेवो वा। नातानतिक इति। नतोऽनुदात्तः। अनतं उदात्तः ततो द्वन्द्वः। समास-

चार्यकम्। मातुलकम्। ऋतष्ठञ् *। छाद्भवति विप्रतिषेधेन। ठञोऽवकाशः। हौतृकम्। स्वासृकम्। छस्य स एव। इहोभयं प्राप्नोति। शास्तृकम्। भ्रातृकम्। रूप्यमयटौ *। छाद्भवतो विप्रतिषेधेन। रूप्यमयटोरवकाशः। देवदत्तरूप्यम्। देवदत्तमयम्। छस्य स एव। वायुदत्तादुभयं प्राप्नोति। वायुदत्तरूप्यम्। वायुदत्तमयम्। अचित्ताट्ठक् *। छाद्भवति विप्रतिषेधेन। ठकोवकाशः, आपूपिकः। शाष्कुलिकः। छस्य स एव। पायसादुभयं प्राप्नोति। पायसिकः। गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् *। छाद् भवति विप्रतिषेधेन। वुञोवकाशः। ग्लौचुकायनकः। त्रैगर्तकः। छस्य स एव। इहोभयं प्राप्नोति। गार्गकः वात्सकः। मालवकः। णिनिरन्तेवासिब्राह्मणेभ्यः *। छाद्भवति विप्रतिषेधेन। णिनेरवकाशः। हारिद्रविणः। तौम्बुरविणः। भाल्लविनः। छस्य स एव। इहोभयं प्राप्नोति। आरुणिनः। शाठ्यायनिनः। पत्रपूर्वादञ् *। छाद्भवति विप्रतिषेधेन। अञोवकाशः। उष्ट्र। औष्ट्रम्। औष्ट्ररथम्। छस्य स एव। इहोभयं प्राप्नोति। वामी। वामम्। वामीरथम्। द्वन्द्वाद् वुन् वैरमैथुनिकयोः*।छाद्भवति विप्रतिषेधेन। वुनोऽवकाशः। अहिनकुलिका। छस्य स एव। इहोभयं प्राप्नोति। काकोलूकिका श्वावराहिका। गोत्रचरणाद् वुञ् *। छाद्भवति विप्रतिषेधेन। वुञोवकाशः। ग्लौचुकायनकम्। काठकम् कालापकम्। छस्य स एव। इहोभयं प्राप्नोति। गार्गकम्। वात्सकम्। मौदकम्। पैप्पलादकम्। कण्वादीञोण्विधेः * कण्वादिभ्योण् भवति इञोण्भवतीत्येतस्माद् वुञ् भवति विप्रतिषेधेन। कण्वादिभ्योण्

स्वरेणान्तोदात्तः। सामस्तं नाम शास्त्रम्। आपणिकमिति। आपणादागतमिति ठक्। स्वास्तृकमिति। उणादीनां क्व चिद् व्युत्पत्तिनिमित्तकार्याभावान् नद्वाभ्यामिति न प्रवर्तते। शास्तृकमिति। शासेस्तृन्तृचौ। शंसिक्षत्तादिभ्यः संज्ञायां चानिटाविति तृन्प्रत्ययः। पायसिक इति। पयसि संस्कृत इत्यण् ततष्ठक्। गार्गक इति। गार्ग्यों भक्तिरस्येति वुञ्। आपत्यस्येति यलोपः। मालवक इति। मालवस्यापत्यम्। वृद्धेत्कोसलेति ञ्यङ्। पूर्ववद्वुञ्यलोपौ। भाल्लविन इति। भल्लुना प्रोक्तमधीयतइति पुराणप्रोक्तेष्विति णिनिः। तदन्तादध्येतर्यण्। तस्य प्रोक्ताल्लुगिति लुक्। आरुणिन इति। अरुणिर्वैशंपायनान्तेवासी। तेन प्रोक्तं छन्दोधीयतइति णिनिः। शाठ्यायनिन इति। शठस्यापत्यं शाठ्यः। तस्यापत्यं युवा यञिञोश्चेति फक्। शाठ्यायनेन प्रोक्तं ब्राह्मणमधीयतइत्यर्थविवक्षायां यूनि लुक्। फक्फिञोरन्यतरस्यामिति पक्षे लुगभावः। पुराणप्रोक्तेष्विति णिनिः। औष्ट्ररथमिति। रथाद्यत्पत्रपूर्वादित्यञ्। वामीति। वामी वडवा तस्या बाह्यमिति पत्राध्वर्य्विवत्यञ्। श्वावराहिकेति! श्वा च वराहश्चेति द्वन्द्वः येषां च विरोध इत्येकवद्भावः। शुनोदन्तदंष्ट्रेति दीर्घः। ततो वैरे वुन्। काण्वा इति। काण्व्यो गर्गादियञन्तः। तस्य दण्डमाणवा इत्यण्। वुञत्र न दण्डमाणवान्तेवासिष्विति निषिद्धः। पुरस्तादपवादा इति न्यायेः नाण् छं बाधते न वुञमिति विप्रतिषेध

भवति इञोण् भवतीत्यस्यावकाशः। काण्वाः दण्डमाणवाः। दाक्षाः दण्डमाणवाः। वुञः सएव। इहोभयं प्राप्नोति। काण्वकम्। दाक्षकम्। ठञ्ञिठाभ्यामोर्देशे ठञ् *। ठञ्ञिठाभ्यामोर्देशे ठञ्भवति विप्रतिषेधेन। ठञ्ञिठयोरवकाशः। कारतन्तविकी। कारतन्तविका। ओर्देशे ठञ् भवतीत्यस्यावकाशः। निषादकर्षूः। नैषादकर्षुकः। इहोभयं प्राप्नोति। नापितवास्तुकः। ठञ् भवति विप्रतिषेधेन। न वा ठञोनवकाशत्वात् *। नवार्थो विप्रतिषेधेन। किं कारणम्। ठञोनवकाशत्वात्। अनवकाशष्ठञ् ठञ्ञिठौ बाधिष्यते। ननु चेदानीमवकाशः प्रक्लृप्तः। यद् वृद्धमुवर्णान्तं वाहीकग्रामश्च स ठञ्ञिठयोरवकाशः। यदवृद्धमुवर्णान्तं न च वाहीकग्रामः स ठञोवकाशः। यद् वृद्धमुवर्णान्तं वाहीकग्रामश्च तस्मादुभयं प्राप्नोति। एवं तर्हि नायमस्य विप्रतिषेधस्योपालम्भः। कस्य। तर्हि छादेर्देशे कालाट्ठञ्ञिसेतस्य। ननु च तत्राप्यवकाशः प्रक्लृप्तः। यद्वृद्धमनुवर्णान्तं स छस्यावकाशः। यदवृद्धमुवर्णान्तं स ठञोवकाशः। यद् वृद्धमुवर्णान्तं देशश्च तस्मादुभयं प्राप्नोति। एवं तर्हि वृद्धात् प्राचामित्यनेन वृद्धग्रहणेन किं क्रियते। यावद् ब्रूयात्पूर्वस्मिन् योगे वृद्धाच्चावृद्धाच्चेति। यदेतस्मिन् योगे वृद्धग्रहणं तदनवकाशं तस्यानवकाशत्वादयुक्तो विप्रतिषेधः। योपधप्रस्थादीनां वुञ् *। ठञ्ञिठाभ्यां भवति विप्रतिषेधेन। योपधाद् वुञ् भवतीत्यस्यावकाशः। साङ्काश्य। साङ्काश्यकः। काम्पिल्यकः। ठञ्ञिठयोः स एव। दाशरूप्यं नाम वाहीकग्रामः तस्मादुभयं प्राप्नोति। दाशरूप्यकः। प्रस्थान्ताद् वुञ् भवतीत्यस्यावकाशः। मालाप्रस्थकः। ठञ्ञिठयोः स एव। पातालप्रस्थं नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति। पातालप्रस्थकः। पुरान्ताद् वुञ् भवतीत्यस्यावकाशः। काञ्चीपुर। काञ्चीपुरकः। ठञ्ञिठयोः स एव। नान्दीपुरं नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति। नान्दीपुरकः। वहान्ताद्वुञ्भवतीत्यस्यावकाशः। वातवह। वातवहकः। ठञ्ञिठयोः स एव। कौक्कुटीवहं नाम वाहीकग्रामस्तस्मादुभयं प्राप्नोति। कौक्कुटीवहकः। ओष्ठञः *। वुञ् भवति विप्रतिषेधेन। ओष्ठञोवकाशः। नैषादकर्षुकः। वुञः स एव। आभीतिमायोरुभयं प्राप्नोति। आभीतिमायवकः। जनपदानामकाणौ *। ओष्ठञो भवतो विप्रतिषेधेन। अकस्यावकाशः। अङ्गाः। अङ्गकः। ओष्ठञः स एव। जिह्लवो नाम जनपदस्तस्मादु-

---

क्तः। एवं तर्हीति। छठञोरपि विप्रतिषेधो नास्तीति दर्शयति वृद्धात्प्राचामिति। ठञो विशेषविहितत्वादित्यर्थः। यावद् ब्रूयादिति। यदि वृद्धाच्छ इत्यतो वृद्धग्रहणम् ओर्देश इत्यत्रानुवर्तेत तदा वृद्धात्प्राचामिति सूत्रं न कुर्यात्। एतद्धि नियमार्थं कृतं प्राग्देशवाचिनो वृद्धादेव यथा स्याद् अवृद्धान्मा भूद् माल्लवास्तव इति।

Indira Gandhi National Centre for the Arts

भयं प्राप्नोति। जैह्वकः। अणोवकाशः। ऋषिक। आर्षिकः। ओष्ठ्जः स एव। इक्ष्वाकवो नाम जनपदस्तस्मादुभयं प्राप्नोति। ऐक्ष्वाकः। न वा वुञप-वादत्वादणः *। न वार्थो विप्रतिषेधेन। किं कारणम्। वुञपवादत्वादणः। वुञपवादोण्। वुञ्श्च ओष्ठ्जं बाधिष्यते। कोपधादणोकान्ताच्छः *। कोपधाद-णभवतीत्येतस्मादकान्ताच्छो भवाति विप्रतिषेधेन। कोपधादण्भवतीत्यस्यावकाशः। निलनिकः। अकान्ताच्छो भवतीत्यस्यावकाशः। आरीहणकम् आरीहणकी-यः। ब्राह्मणको नाम जनपदस्तस्मादुभयं प्राप्नोति। ब्राह्मणकीयः। धन्ववु-ञश्च *। छो भवाति विप्रतिषेधेन। धन्वनो वुञ् भवतीत्यस्यावकाशः। पारेध-न्वकः। छस्य स एव। आष्टकं नाम धन्व तस्मादुभयं प्राप्नोति। आष्टकीयः। न वा छस्य पुनर्वचनं छापवादनिवृत्त्यर्थम् *। न वार्थो विप्रतिषेधेन। किं का-रणम्। छस्य पुनर्वचनं छापवादनिवृत्त्यर्थम्। सिद्धोत्र छः। वृद्धाच्छ इत्येव। तस्य पुनर्वचनएतत्प्रयोजनम्। ये ऽन्ये तदपवादाः प्राप्नुवन्ति तद्बाधनार्थम्। स यथैवान्यांस्तदपवादान् बाधते एवामिममपि बाधिष्यते॥

जनपदतदवध्योश्च॥ १२४॥ जनपदतदवध्योर्वुञ्विधानेऽवयवमात्रा-त्प्रसङ्गः *। जनपदतदवध्योर्वुञो विधाने अवयवमात्रात् प्राप्नोति। मौञ्जो नाम वाहीकेषु ग्रामस्तस्मिन् भवो मौञ्जीयः। एवं तर्हि जनपदादेव जनपदावधेः। जनपदादिति चेद्वचनानर्थक्यम् *। जनपदादिति चेदवधिग्रहणमनर्थकम्। ज-नपदादित्येव सिद्धम्। इदं तर्हि प्रयोजनम्। जनपदावधेर्वुञेव यथा स्यात्। यदन्यत्प्राप्नोति तन्मा भूत्। किं चान्यत्प्राप्नोति। छः। गर्त्तोत्तरपदात् छवि-

---

न च वृद्धग्रहणानुवृत्तात्प्राप्तिष्ठञोस्तीति किं नियमार्थेन सूत्रेणेत्यर्थः। वुञ्श्चेति। परत्वादिति भावः। कोपधादण इति। जनपदवाचिनः कोपधाद्योणिवधीयते तस्मा-दित्यर्थः। आरीहणकमिति। अरीहणेन निर्वृत्तमिति वुञ्छणकठेति वुञ्। अयञ्च जनपदवाचीति कोपधादणो न विषयः। ब्राह्मणक इति। ब्राह्मणकोष्णिके संज्ञा-यामित्यत्र ब्राह्मणा आयुधजीविनो यस्मिन् देशे तस्मिन्नर्थे ब्राह्मणकशब्दो निपा-तितः। धन्ववुञ इति। धन्वशब्दो मरुदेशवाची। पारे धन्वेति। धन्वनः पारमिति पारे मध्ये षष्ठ्या वेत्यव्ययीभावः। अनश्च नपुंसकादन्यतरस्यामिति पक्षेऽच्समा-सान्तः। आष्टकीय इति। वृद्धादकेकान्तेतिच्छः। येन्य इति। वुञादयः। स यथै-वेति। ततश्चापवादत्वादेव च्छो बाधको न तु परत्वादित्यर्थः॥ १०४॥

जनपद॥ तस्यावधिस्तदवधिरिति षष्ठीसमासाश्रयेण चोदयति जनपदेति। अवयवमात्रादिति। यो जनपदस्यावधिः सीमा अजनपदोपि तस्मादपि प्राप्नोति विशेषानुपादानादित्यर्थः। मौञ्जोनाम वाहीकेष्विति। सामीपिकमिदमधिकरणम्। तेन वाहीकग्रामेभ्य इति ठञ्ञिठौ न भवतः। एवं तर्हीति। स चासाववधिस्त-

Indira Gandhi National Centre for the Arts

धेर्जनपदाद् वुञ् पूर्वविप्रतिषिद्धमिति वक्ष्यति स पूर्वविप्रतिषेधो न पठितव्यो भवति ॥

अरण्यान्मनुष्ये ॥ १२९ ॥ अत्यल्पमिदमुच्यते। मनुष्य इति। पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यम्। आरण्यकः पन्थाः। आरण्यकोऽध्यायः आरण्यको न्यायः। आरण्यको विहारः। आरण्यको मनुष्यः। आरण्यको हस्ती। वा गोमयेषु *। वा गोमयेष्विति वक्तव्यम्। आरण्यकाः गोमयाः। आरण्याः गोमयाः ॥

विभाषा कुरुयुगन्धराभ्याम् ॥ १३० ॥ कुरुयुगन्धरेभ्यो वावचनान्मनुष्यतत्स्थयोर्वुञ्विधानम् *। कुरुयुगन्धरेभ्यो वावचनान्मनुष्यतत्स्थयोर्वुञ्भवति विप्रतिषेधेन। कुरुयुगन्धरेभ्यो वा वचनस्यावकाशः। कौरवः। कौरवकः। यौगन्धरः। यौगन्धरकः। मनुष्यतत्स्थयोर्वुञ् भवतीत्यस्यावकाशः। अन्ये कच्छादयः। काच्छको मनुष्यः। काच्छकमस्येप्सितम्। हसितम्। जल्पितम्। स्मितम्।इहोभयं प्राप्नोति। कौरवको मनुष्यः। कौरवकमस्येप्सितम्। हसितम्। जल्पितम्। स्मितम्। वुञ् भवति विप्रतिषेधेन। नैष युक्तो विप्रतिषेधः। न हि कुरुशब्दस्यान्ये कच्छादयोऽवकाशः। कुरुशब्दस्य यः कच्छादिषु पाठः सोऽनवकाशः। न खल्वपि कुरुशब्दो विभाषां प्रयोजयति। अनेन वुञ् कच्छादिषु पाठादण्भविष्यति। सैषा युगन्धरार्था विभाषा ॥

कच्छादिभ्यश्च ॥ १३३ ॥ किमर्थं साल्वानां कच्छादिषु पाठः क्रियते। साल्वानां कच्छादिषु पाठोऽण्विधानार्थः *। साल्वानां कच्छादिषु पाठः क्रियतेऽण्विधानार्थः। अण्यथा स्याद् वुञ् मा भूदिति। न वा पदातिगोयवाग्ग्रहणमवधारणार्थम् *। न चैतत्प्रयोजनमस्ति। किं कारणम्। अपदातिगोयवाग्ग्रहणमवधारणार्थं भविष्यति। अपदातावेव साल्वात्। गोयवाग्वोरेव साल्वादिति ॥

दवधिरिति कर्मधारय आश्रीयत इत्यर्थः। कस्यासाववधिरिति चेत् प्रत्यासत्त्या जनपदस्येति विज्ञायते। वुञेवेति। त्रिगर्त्तेषु भवः त्रैगर्तक इत्यत्रेवेत्यर्थः ॥ १२४ ॥

विभाषा ॥ अन्ये कच्छादय इति। समुदाये कार्यं विधीयमानं केषु चिदप्यवयवेषु प्रवर्तमानं सावकाशमेवेति मन्यते। नहीति। सर्वएवावयवास्तत्र कार्यित्वेन निर्दिष्टा इति भाव। सैषेति। ननु युगन्धरशब्दादप्यवृद्धादपीति नित्ये वुञि सिद्धेऽन्तरेणापि विभाषाग्रहणं विकल्पो विज्ञास्यते। नैतदस्ति। युगन्धरान्नित्यो वुञ्। अवृद्धादित्यनेन तु विभाषेत्येवमपि विज्ञायते। तस्माद्विभाषाग्रहणं कर्तव्यमेव ॥ १३० ॥

कच्छा। साल्वशब्दो गणे पठ्यते तस्य प्रत्याख्यानायाह नवेति। जनपदतदवध्योरिति वुञि सिद्धे अपदातौ साल्वाद् गोयवाग्वोश्चेति वुञो नियमादन्यत्राण् भविष्यतीत्यर्थः। ननु वुञभावे छः प्राप्नोति नत्वणिति चिन्त्यमेतत् ॥ १३३ ॥

गर्त्तोत्तरपदाच्छः ॥ १३७ ॥ गर्तोत्तरपदाच्छविधेर्जनपदाद् वुञ् विप्रतिषिद्धम् * । गर्त्तोत्तरपदाच्छविधेर्जनपदाद् वुञ् भवति पूर्वविप्रतिषेधेन । गर्त्तोत्तरपदाच्छो भवतीत्यस्यावकाशः । श्वाविद्गर्त्तः । श्वाविद्गर्त्तीयः । वुञोवकाशः । अङ्गाः । आङ्गकः । इहोभयं प्राप्नोति । त्रैगर्तकः । वुञ् भवति पूर्वविप्रतिषेधेन । स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । उक्तमेतदवधिग्रहणस्य प्रयोजनम् । जनपदावधेर्वुञेव यथा स्यात् । यदन्यत् प्राप्नोति तन्मा भूदिति ॥

गहादिभ्यश्च ॥ १३८ ॥ गहादिषु पृथिवीमध्यस्य मध्यमभावो वक्तव्यः । पृथिवीमध्येभवो मध्यमीयः । चरणसम्बन्धेन निवासलक्षणोण् * । चरणसम्बन्धेन निवासलक्षणोण् वक्तव्यः । त्रयः प्राच्याः । त्रय औदीच्याः । त्रयो माध्यमाः । सर्वे निवासलक्षणाः ॥

वृद्धादकेकान्तखोपधात् ॥ १४१ ॥ ईकान्तादपीति वक्तव्यम् । इहापि यथा स्यात् । रौणीकीयः । तर्हि वक्तव्यम् । न वक्तव्यम् । अकेकान्तग्रहणे कोपधग्रहणं सौसुकाद्यर्थम् * । अकेकान्तग्रहणे कोपधग्रहणं कर्त्तव्यम् । किं प्रयोजनम् । सौसुकाद्यर्थम् । सौसुकीयः ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थाध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्॥पादः समाप्तः॥

युष्मदस्मदोरन्यतरस्यां खञ्च ॥ १ ॥ युष्मदस्मद्भ्यां प्रत्ययविधाने योगविभागः * । युष्मदस्मद्भ्यां प्रत्ययविधाने योगविभागः कर्त्तव्यः । युष्मद-

---

गर्तो ॥ श्वाविदूगर्तीय इति । श्वानं विध्यतीति क्विप् । नहिवृतीति दीर्घः । श्वाविधां गर्त इति समासः ॥ १३७ ॥

गहा ॥ मध्यो मध्यमं चाण् चरण इति गणपाठस्तं विशेषेऽवस्थापयितुमाह गहादिष्विति । पृथिवीमध्यवाच्येव मध्यशब्दो ग्राह्यो न तु मध्यान्तरवाचीत्यर्थः । चरणसम्बन्धेनेति । पृथिवीमध्यं निवास एषां चरणानामित्यत्रार्थे माध्यमाश्चरणा इति भवतीत्यर्थः । चरणाः कठादयः । निवासलक्षण इति । सोस्य निवास इत्यत्रार्थ इत्यर्थः ॥ १३८ ॥

वृद्धा ॥ अकेकान्तग्रहण इति । अकेकान्तग्रहणमपनीय कोपधग्रहणं व्यापकं कर्तव्यमित्यर्थः॥१४१॥ इति श्रीमहाभाष्यप्रदीपे चतुर्थस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

युष्मदस्मदोरन्यतरस्यां खञ् च ॥ त्यदादित्वाद्वृद्धत्वाद् छे प्राप्ते खञ् विधीयते । ततश्छस्य बाधे प्राप्ते चकारेण छोनुकृष्यते । एवं च खञ्छावन्यतरस्यां युष्मदस्मदोर्विधीयेते । तेन पक्षे यथाप्राप्तमण् भवति । तत्र खञ्छयोर्युष्मदस्मदोश्च संख्यासाम्याद्यथासंख्यं प्राप्नोति तन्निराकरणायाह युष्मदस्मद्भ्यामिति । के चित्त्वत्राहुरेक एवानेन खञ् विधीयते चकारेण तु तस्य सहायता द्योत्यते । तत्र प्रकरणाच्छेति विज्ञायते । अन्यतरस्यांग्रहणेन चाणः प्रतिप्रसवः क्रियते । तत्र

— Indira Gandhi National Centre for the Arts

स्मदोरन्यतरस्यां छो भवति। युष्मदीयः। अस्मदीयः। ततः खञ् च। खञ् भवति युष्मदस्मदोरन्यतरस्याम्। यौष्माकीणः। आस्माकीनः। किमर्थो योगविभागः। संख्यातानुदेशप्रतिषेधार्थः। संख्यातानुदेशो मा भूत्॥

तस्मिन्नणि च युष्माकास्माकौ ॥ २ ॥ आदेशविधाने च *। किम्। योगविभागः कर्तव्यः। तस्मिन्नणि युष्माकास्माकौ भवतः। यौष्माकः। आस्माकः। ततः खञि। खञि च युष्माकास्माकौ भवतः। यौष्माकीणः। आस्माकीनः। किमर्थो योगविभागः क्रियते। संख्यातानुदेशप्रतिषेधार्थ इत्येव। तत्र पुनः खञ्ग्रहणम् * तत्र पुनः खञ्ग्रहणं कर्तव्यम्। न ह्यन्तरेण खञ्ग्रहणं योगाङ्गमपजायते। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। एवं वक्ष्यामि तस्मिन्खञि युष्माकास्माकौ भवतः। ततोणि च। अणि च युष्माकास्माकौ भवत इति॥

तवकममकावेकवचने ॥ ३ ॥ एकार्थग्रहणं च *। एकार्थग्रहणं च कर्तव्यम्। एकार्थयोर्युष्मदस्मदोरिति वक्तव्यम्। किमर्थम्। न एकवचनइत्येव सिद्धम्। न सिध्यति। किं कारणम्। एकवचनाभावात्। एकवचन इत्युच्यते न चात्रैकवचनं पश्यामः। यदि पुनरेकवचनपरत्वेनाण्खञौ विशेष्येयाताम्। नैवं शक्यमिह हि प्रसज्येयाताम्। युष्माकं छात्रो यौष्माकीणः। अस्माकं छात्र आस्माकीनः। इह च न स्याताम्। तव छात्रः तावकीनः। मामकीनः।

यद्येक एवापूर्वः खञ् विधीयते। यदि वा त्रयः खञ्छाणः, सर्वथा नास्ति संख्यासाम्यमिति यथासंख्यनिरासाय न कर्तव्यो योगविभाग इति। अत्राहुः। चकारेण छस्यानुकर्षणं क्रियते। तेन यावदुक्त खञ्छाविति तावत् खञ् चेति। ततश्च सिद्धोपि छप्रत्ययोनेनैवाबाधाय चकारेण समुच्चयार्थेनानुकृष्य विधीयतइति स्यादेव यथासंख्यमन्यतरस्यांग्रहणेन तु खञ्छयोः पक्षे ऽनुत्पत्तिः प्रतिपाद्यते। तदनुपत्तौ चापवादभावात्स्वशास्त्रेणाण् भवतीति कुतः प्रत्ययत्रयस्यानेन विधानम्॥ १॥

तस्मिन्॥ तत्र पुनरिति। खञ्यणि चेति वक्तव्यमित्यर्थः। अन्यथा पूर्वसूत्रे खञ् चेति चकारेण छोऽनुकृष्ट इति स एवानन्तर्यात्तस्मिन्नित्यनेन परामृश्येत। एवं वक्ष्यामीति। एवं व्याख्यास्यामीत्यर्थः। तस्मिन्नित्यनेन पूर्वेण साक्षाद्विहितः खञ् परामृश्यते न तु चकारानुकृष्टश्छः। चशब्दो हि समुच्चयस्य द्योतकः प्रकृतमनुकर्षति। तत्र किं प्रकृतं स्यादिति विचारप्रवृत्तौ विलम्बिता छस्य प्रतीतिरव्यवहिता तु खञ इति तस्यैव सर्वनाम्ना परामर्शो युक्त इति भावः। अथ वा पूर्वसूत्रे योगविभागस्य व्याख्यातत्वान्नैव चकारेण छस्यानुकर्षणमिति कुतस्तस्यानन्तर्यं यतस्तस्य परामर्शः स्यात्॥ २॥

तवक। कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययादिति न्यायात् प्रत्ययस्यैकवचनस्य ग्रहणं स्यात् तस्य च नित्यत्वाल्लुक्प्रवर्त्तनात् प्रत्ययलक्षणप्रतिषेधाच्च एकवचनपरता युष्मदस्मदोर्न संभवतीति मत्वाह एकार्थग्रहणं चेति। यदि पुनरिति। तवायं

Indira Gandhi National Centre for the Arts

तस्मान्नैवं शक्यम् । न चेदेवमेवार्थग्रहणं कर्त्तव्यम् । न कर्तव्यम् । नेदं पारिभाषिकस्यैकवचनस्य ग्रहणम् । किं तर्ह्यन्वर्थग्रहणम् । उच्यते वचनम् । एकस्यार्थस्य वचनमिति ॥

अर्द्धाच्चत् ॥ ४ ॥ अर्द्धाद्यद्विधाने सपूर्वाट्ठञ् * । अर्द्धाद्यद्विधाने सपूर्वाट्ठञ् वक्तव्यः । वालेयार्धिकः । गौतमार्द्धिकः । दिक्पूर्वपदाद्यच्च * । दिक्पूर्वपदाद्यच्च ठञ्च वक्तव्यः । पूर्वार्द्ध्यः । पौर्वार्द्धिकः । दक्षिणार्ध्यः । दाक्षिणार्द्धिकः । उत्तरार्द्ध्यः । औत्तरार्धिकः । किमर्थमिदमुच्यते । यथान्यास एव दिक्पूर्वपदादर्द्धशब्दादुभयमुच्यते । इदमद्यापूर्वं क्रियते । अर्द्धाद्यद्विधाने सपूर्वपदाट्ठञिति । तद् द्रेष्यं विजानीयात् सर्वमेव विकल्पतइति । तदाचार्यः सुहृद्भूत्वाऽन्वाचष्टे दिक्पूर्वपदार्द्धाद्यथान्यासमेव भवतीति ॥

श्वसस्तुट् च ॥ १५ ॥ श्वसस्तुट्यादेशानुपपत्तिरनादित्वात् * । श्वसस्तुटि कृते आदेशानुपपत्तिः । किं कारणम् । अनादित्वात् । तुटि कृते अनादित्वादादेशो न प्राप्नोति । एवं तर्हि पूर्वान्तः करिष्यते । पूर्वान्ते कप्रतिषेधः * । यदि पूर्वान्तः कादेशस्य प्रतिषेधो वक्तव्यः । शौवस्तिकम् । तान्तादिति कादेशः प्राप्नोति । अस्तु तर्हि परादिः । ननु चोक्तं श्वसस्तुट्यादेशानुपपत्तिरनादित्वादिति । सिद्धं त्वादिष्टस्य तुड्वचनात् * । सिद्धमेतत् । कथम् । तुट् चातिदिष्टस्येति वक्तव्यम् । संनियोगाद्वा * अथ वा चेन संनियोगः क्रियते तुट् च । किं च । यच्चान्यत्प्राप्नोति । किं चान्यत्प्राप्नोति, आदेशः ॥

सर्वत्राण्च तलोपश्च ॥ २२ ॥ हेमन्तस्याणि तलोपवचनानर्थक्यं हेम्नः प्रकृत्यन्तरत्वात् * । हेमन्तस्याणि तलोपवचनमनर्थकम् । किं कारणम् । हेम्नः

तावक इत्यादि सिध्यतीति मन्यते । नवं शक्यमिति । अव्याप्त्यतिव्याप्तिदोषद्वयदुष्टत्वादिति भावः । अन्वर्थग्रहणमिति । उभयगतिरिह शास्त्रे संभवति । तत्र विषयभेदेन क्व चित् कृत्रिमस्य ग्रहणं क्वचिदकृत्रिमस्य क्वचिदुभयोः । अथ वचनात् प्रत्ययलक्षणं भवतीति कस्मान्नाश्रितम् । उच्यते । अन्वर्थग्रहणे सत्यव्यवहिता प्रतिपत्तिर्भवतीति तदेवाश्रितम् । एकवचने इति च प्रथमाद्विवचनान्तम् । युष्मदस्मदोः समानाधिकरणं विशेषणम् । एकस्येति । वाच्यवाचकसंबन्धे षष्ठी । एकार्थाभिधानाय ये उच्येते युष्मदौ तयोरादेशावित्यर्थः ॥ ३ ॥

श्वसस्तुट् च ॥ अनादित्वादिति । यद्यपि ठस्येक इत्यत्रादिग्रहणं नास्ति तथाप्यङ्गस्यानिमित्तं यष्ठस्तस्येक इति सूत्रार्थाश्रयणाद् यथा कर्मणि घटोऽठजित्यठजङ्गस्य निमित्तं न ठ इति कर्मठ इत्यत्रेकादेशो न भवति । एवं तुटि कृते समुदायोऽङ्गसंज्ञानिमित्तं न ठमात्रमिति कादेशो न प्राप्नोतीति भावः । शौवस्तिकमिति । द्वारादीनां चेति वृद्धिप्रतिषेध ऐजागमश्च । संनियोग इति । तेनागमादेशौ सह भवतः ॥ १५ ॥

सर्वत्र ॥ हेम्न इति । हेमन्तपर्यायो हेमन्शब्दोऽप्यस्ति तस्मादत्वणि कृते हैमनमिति

Indira Gandhi National Centre for the Arts

प्रकृत्यन्तरं हेमन्शब्दः। आतश्च प्रकृत्यन्तरम्। एवं ह्याह। हेमन् हेमन्नागनीगन्तिकर्णौ तस्मादेतौ हेमन्नशुष्यत इति। अलोपदर्शनाच्च *। अलोपः खल्वपि दृश्यते। पङ्क्तिर्हैमन्तीति। अपर आह। हेमन्तस्याण्वचनमणि च तलोपवचनमनर्थकं हेम्नः प्रकृत्यन्तरत्वात्। हेमन्तस्याण्वचनमणि च तलोपवचनमनर्थकम्। किं कारणम्। हेम्नः प्रकृत्यन्तरत्वात्। प्रकृत्यन्तरं हेमन्शब्दः। अलोपदर्शनाच्चेत्येव। तत्र ऋतुभ्य इत्येव सिद्धम्॥

सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ॥ २३ ॥ चिरपरुत्परारिभ्यस्त्नः *। चिरपरुत्परारिभ्यस्त्नो वक्तव्यः। चिरत्नम्। परुत्नम्। परारित्नम्। अग्रादिपश्चाड्डिमच् *। अग्रादिपश्चाड्डिमज्वक्तव्यः। अग्रिमम्। आदिमम्। पश्चिमम्। प्रागस्यच्छन्दसि गलोपश्च *। त्नश्च वक्तव्यः। प्रत्नमात्मानम्। अन्ताच्च *। अन्ताच्चेति वक्तव्यम्। अन्तिमः। अथ सायचिरयोः किं निपात्यते। सायचिरयोर्मकारान्तत्वं प्रत्ययसंनियुक्तम् *। सायचिरयोर्मकारान्तत्वं प्रत्ययसंनियोगेन निपात्यते। सायन्तनम्। चिरन्तनम्। नैतदस्ति प्रयोजनम्। मकारान्तः सायंशब्दः। यदि मकारान्तः। कथं सायाह्नः। सायमोह्नि मलोपः *। सायमोह्नि मलोपो वक्तव्यः। कथं सायतरे। तरे चेति वक्तव्यम्। कथं सायंसाये। वा सप्तम्यां चेति वक्तव्यम्। अथ प्राह्णप्रगयोः किं निपात्यते। प्राह्णप्रगयोरदन्तत्वम् *। प्राह्णप्रगयोरदन्तत्वं निपात्यते। प्राह्णेतनम्। प्रगेतनम्। नैतदस्ति प्र-

---

भविष्यति नार्थस्तलोपविधानेन सर्वत्राणित्येव वक्तव्यम्। भाषायां चैतद्वतिविषय एव हेमन्शब्द ऋतुवाचीत्यस्वपदविग्रहः कर्तव्यः। हेमन्ते साधु हैमनमिति। अन्निति प्रकृतिभावाट्टलोपाभावः। हेमन् हेमन्निति। सप्तम्येकवचनस्य छन्दसि सुपां सुलुगिति लुक्। न ङिसंबुध्योरिति नलोपप्रतिषेधः। अपर आहेति। सूत्रस्यैव प्रत्याख्यानम्। तथा हि। छन्दस्येव रूपत्रयमिष्टम्। हैमनं हैमन्तिकं हैमन्तमिति। तत्र हेमन्शब्दस्य ऋत्वणि हैमनमिति भवति। हेमन्ताच्चेत्यनेन ठञि हैमन्तिकमिति। सर्वे विधयः छन्दसि विकल्प्यन्त इति हेमन्तशब्दादृत्वणि हैमन्तमिति भवति। भाषायां तु हेमन्हेमन्तशब्दयोर्ऋत्वणि हैमनं हैमन्तमिति रूपद्वयमिष्टं सिध्यतीति नार्थः सूत्रेणेत्यर्थः ॥ २२ ॥

सायंचिरप्राह्णेप्रगे ॥ चिरपरुदिति। ट्युट्युलभ्यां त्नस्य समावेश इष्यते न तु ट्युट्युलोर्बाध इत्याहुः। सायचिरयोरिति। स्यतेर्घञि सायशब्दस्य चिरशब्दस्य च मान्तत्वं निपात्यते इत्यर्थः। मकारान्त इति। अनेन सायंशब्द प्रत्याख्यायते। अव्ययत्वादेव ट्यु ट्युलोः सिद्धत्वाच्चिरशब्दस्यैव तु मान्तत्वं निपात्यते। सायशब्दस्तु घञन्तोवसानमात्रवाची न तु कालविशेषवाचीति तस्येह ग्रहणमयुक्तमिति भावः। सायमोह्न इति। अह्नोह्न एतेभ्य इत्यह्नादेशष्टजन्तो निर्दिष्टः। संख्याविसायपूर्वस्याह्नस्येति ज्ञापकादेकदेशिसमासः। सायतर इति। तरपि रूपमेतत्॥ वा सप्तम्यामिति। मलोपे च कृते

योजनम् । सप्तम्या अलुकापि सिद्धम् । भवेत्सिद्धं यदा सप्तमी । यदा त्वन्या विभक्तयः तदा न सिध्यति । तुट्युक्तम् * । किमुक्तम् । तुट्यादेशानुपपत्तिरनादित्वादिति । तुटि कृते ऽनादित्वादादेशो न प्राप्नोति । एवं तर्हि पूर्वान्तः करिष्यते । पूर्वान्ते विसर्जनीयः * । यदि पूर्वान्तः विसर्जनीयो वक्तव्यः । प्रातस्तनं पुनस्तनम् । परादौ पुनः सति खरवसानयोर्विसर्जनीयइति विसर्जनीयः सिद्धो भवति । अस्तु तर्हि परादिः । ननु चोक्तं तुटि कृते ऽनादित्वादादेशो न प्राप्नोतीति । सिद्धं त्वादिष्टस्य तुड्वचनात् * । सिद्धमेतत् । कथम् । आदिष्टस्य तुड्वचनात् । तुडादिष्टस्येति वक्तव्यम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । चसंनियोगाद्वा * । अथ वा चेन संनियोगः करिष्यते । तुट् च । किंच । यच्चान्यत्प्राप्नोति । किं चान्यत् प्राप्नोति । आदेशः ॥

विभाषा पूर्वाह्णापराह्णाभ्याम् ॥ २४ ॥ पूर्वाह्णापराह्णाभ्यां सुबन्तवचनं सप्तमीश्रवणार्थम् * । पूर्वाह्णापराह्णाभ्यां सुबन्ताभ्यां तद्धितो भवतीति वक्तव्यम् । किं प्रयोजनम् । सप्तमीश्रवणार्थम् । सप्तम्याः श्रवणं यथा स्यात् । पूर्वाह्णेतनम् । अपराह्णेतनम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । आचार्यप्रवृत्तिर्ज्ञापयति भवत्यत्र सप्तमीति । यदयं घकालतनेषु कालनाम्न इति यत्सप्तम्या अलुकं शास्ति । अलुग्वचनं ज्ञापकमिति चेदव्ययात्सप्तमीप्रसङ्गः * । अलुग्वचनं ज्ञापकमिति चेदव्ययात्सप्तमी प्राप्नोति । दोषातनं दिवातनम् । अस्त्वव्ययादिति लुग्भविष्यति । इहापि तर्हि लुक्प्राप्नोति । पूर्वाह्णेतनम् । अपराह्णेतनम् । अलुगत्र लुकं बाधिष्यते । इहापि तर्हि बाधेत । दोषातनम् । दिवातनम् । समानाश्रयो लुगलुका बाध्यते । कश्च समानाश्रयः । यश्च प्रत्ययाश्रयः । अत्र च प्रागेव प्रत्ययोत्पत्तेर्लुग्भवति । न सिध्यति । इह हि सति प्रत्यये लुका भवित-

---

सायं इति भाष्यकारवचनप्रामाण्यादव्ययसंज्ञाभावः । अलुकेति । घकालतनेषु कालनाम्न इत्यनेन । यदा त्वन्या इति । प्राह्णः सोढोऽस्य प्राह्णेतन इत्यादौ । अनादित्वादिति । अङ्गसंज्ञानिमित्तस्य योरनादेश उच्यमानो मृत्युशब्द इव तुटि कृते त्युशब्दोऽङ्गनिमित्तं न तु युशब्द इति न स्यादित्यर्थः । यदीति । पदान्तस्य रेफस्य विधीयमानस्तुटि कृते अपदान्तत्वान्न प्राप्नोतीत्यर्थः ॥ २३ ॥

विभाषा ॥ सुबन्तवचनमिति । ङ्याप्प्रातिपदिकाधिकारात् प्रातिपदिकस्यैव तद्धितोत्पत्तौ प्रकृतित्वेन भाव्यं न तु सुबन्तस्येति भावः । दोषातनमिति । दोषाशब्दस्यापि कालवाचित्वादलुगनुमितायाः सप्तम्याः श्रवणप्रसङ्गः । समानाश्रय इति । सुपो धातुप्रातिपदिकयोरित्ययं लुक् तद्धितोत्पत्तिनिमित्तप्रातिपदिकसंज्ञकसमुदायान्तर्वर्त्तिसुप्स्थानिको ऽलुकस्तद्धितविशेषनिमित्तस्य समानाश्रयः । अत्र चेति । अव्ययादाप्सुप इत्ययं लुग् अव्ययमात्रापेक्षत्वादन्तरङ्गत्वाद्भवतीत्यर्थः । न सिध्य-

Indira Gandhi National Centre for the Arts

ध्यम् । तत्र च प्रत्यय एव नास्ति कुतो लुग्भविष्यति । सैषा ज्ञापकेनासती विभक्तिराकृष्यते । सा यथैवेह बाधिका भवति । पूर्वाह्णेतनम् । अपराह्णेतनमिति । एवमिहापि स्यात् दोषातनम् । दिवातनमिति । एवं तर्हि न ब्रूमोऽलुग्वचनं ज्ञापकं भवत्यत्र सप्तमीति । किं तर्हि भवति सुबन्तादुत्पत्तिरिति किं पुनर्ज्ञाप्यमेतद् यावता समर्थानां प्रथमादिति वर्तते । सामर्थ्यं च सुबन्तेन । ज्ञाप्यमित्याह । कथम् । ङ्याप्प्रातिपदिकादित्यपि वर्तते । तत्र कुत एतत् सुबन्तात्समर्थादुत्पत्तिर्भविष्यति । न पुनर्ङ्याप्प्रातिपदिकादिति । कथं यत्तदुक्तं वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणप्रत्ययविधौ तत्संप्रत्ययार्थमिति । समर्थस्य यद् वृद्धं ङ्याप्प्रातिपदिकदिकमित्येवमेतद्विज्ञायते । यद्येतज् ज्ञाप्यते । कथं द्विपद आगतं द्विपाद्रूप्यम् । प्रष्ठौह आगतं प्रष्ठवाड्रूप्यम् । कीलालप आगतं कीलालपारूप्यम् । पपुष आगतं पपिवद्रूप्यम् । पद्भाव ऊठ् आकारलोपः प्रसारणमित्येते विधयः प्राप्नुवन्ति । लुकि कृते न भविष्यन्ति । इह तर्हि सामसु साधु सामन्यः, वेमन्यः । नलोपः प्रातिपदिकान्तस्येति नलोपः प्राप्नोति । लुकि कृते भत्वान्न भविष्यति । इदमिह संप्रधार्यं लुक् क्रियतां लोप इति । किमत्र कर्तव्यम् । परत्वान्नलोपः । एवं तर्हीदमिह संप्रधार्यं नलोपः क्रियतां तद्धितोत्पत्तिरिति । किमत्र कर्तव्यम् । परत्वान्नलोपः । असिद्धो नलोपः । तस्यासिद्धत्वात्तद्धितोत्पत्तिर्भविष्यति । परिगणितेषु कार्येषु नलोपो सिद्धः । न चेदं तत्र परिगण्यते । इदमपि तत्र परिग-

---

णीति । प्रातिपदिकात्प्रत्ययोत्पत्तिरलुग्विधानात्तु ज्ञापकाद्विभक्तिरिति पक्षः प्रकान्तस्तत्र प्रत्यय उत्पन्ने विभक्त्या भाव्यं न तु पूर्वं ततश्चाव्ययादाप्सुप इत्ययमपि लुक्तद्धितोत्पत्त्युत्तरकालभाविसुप्स्थानिकत्वाद्लुकः समानाश्रयत्वाद् बाध्यत इत्यर्थः । एतच्च हलदन्तादित्यस्यानुवृत्तिमनपेक्ष्योच्यते । तत्र च प्रत्यय इति । प्राक्तद्धितोत्पत्तेः सुप्संज्ञकः प्रत्ययो नास्तीत्यर्थः । कथं यदिति । यद्ययं लुग्विधानेन समर्थस्य प्रकृतित्वमनुमीयते तदा ङ्याप्प्रातिपदिकाधिकारस्य वृद्धादिविशेषणत्वेन ङ्याप्प्रातिपदिकस्य प्रकृतित्वप्रतिपादनप्रयोजनं यदुक्तं तत्कथं न विरुध्येतेति प्रश्नः । परिहारमाह समर्थस्येति । समर्थस्य विभक्त्यन्तस्य प्रत्ययप्रकृतित्वेनाश्रितस्यावयवभूतं ङ्याप्प्रातिपदिकं वृद्धादिति चेद्भवति ततः समर्थादेव प्रत्ययो भवतीति नास्ति विरोध इत्यर्थः । कथं द्विपद इति । विभक्त्यन्तात्प्रत्ययोत्पत्तावाश्रीयमाणायां विभक्तिनिमित्तानि कार्याण्यन्तरङ्गत्वात् प्राप्नुवन्तीति प्रश्नः । सर्वत्र हेतुमनुष्येभ्योऽन्यतरस्यां रूप्य इति रूप्यप्रत्ययः । लुकि कृतइति कृताकृतप्रसङ्गित्वान्नित्यत्वादिति भावः । वर्णाश्रयत्वाद् भसंज्ञायाः प्रत्ययलक्षणत्वाभावात्पद्भावादिकमनित्यम् । इह तर्हीति । नलोपस्य प्रत्ययलक्षणेन प्राप्त्या नित्यत्वं मन्यते । परत्वादिति । द्वावपि लुङ्नलोपौ नित्यौ यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमिति नलोपोऽपि नित्य इति भावः । एतच्चान्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधतइत्यनाश्रित्योक्तम् । एतदेव त्वाश्रयणीयमन्यथान्तरङ्गत्वात्पद्भावादयो नित्यमपि लुकं बाधेरन् ।

Indira Gandhi National Centre for the Arts

ण्यते । कथम् । सुब्विधिरिति सर्वविभक्त्यन्तः समासः । सुपो विधिः सुब्विधिः । सुबन्ताद्विधिः सुब्विधिरिति ॥

तत्र जातः ॥ २५ ॥ किमर्थं जातादयोऽर्था निर्दिश्यन्ते । जातादिष्वर्थेषु घादयो यथा स्युः स्वार्थे मा भूवन्निति । नैतदस्ति प्रयोजनम् । शेष इत्यनुवर्तते तेन स्वार्थे न भविष्यन्ति । अत उत्तरं पठति । तत्र जातादिषु वचनं नियमार्थम् * । नियमार्थोऽयमारम्भः । जातादिष्वेव घादयो यथा स्युरिह मा भूवन् । तत्रास्ते तत्र शेतइति । यदि नियमः क्रियते । दार्षदाः सक्तवः । औलूखलो यावक इति न सिध्यति । संस्कृतमित्येवं भविष्यति । भवेत् सिद्धं दार्षदाः सक्तव इति । इदं तु न सिध्यति औलूखलो यावक इति । संस्कृतं नाम तद्भवति यत्तत एवापकृष्याभ्यवह्रियते । न च यावक उलूखलादेवापकृष्याभ्यवह्रियते । अवश्यं रन्धनादीनि प्रतीक्ष्याणि । तस्मान्नार्थोऽनेन नियमेन । कस्मान्न भवति तत्रास्ते तत्र शेतइति । अनभिधानात् । तच्चावश्यमनभिधानमाश्रयितव्यम् । क्रियमाणेष्वपि ह्यर्थनिर्देशेषु यत्र जातादिषूत्पद्यमानेन प्रत्ययेनार्थस्याभिधानं न भवति तत्र प्रत्ययोत्पत्तिर्न भवति । तद्यथा । अङ्गुल्या खनति वृक्षमूलादागत इति । न तर्हीदानीं जातादयोऽर्था निर्देष्टव्याः । निर्देष्टव्याश्च । किं प्रयोजनम् । अपवादविधानार्थम् । प्रावृषष्ठप् । प्रावृषि जातः प्रावृषिकः । क्व मा भूत् । प्रावृषि भवाः प्रावृषेण्या बलाहका इति । यानि त्वेतानि निरपवादानि अर्थादेशनानि तानि शक्यान्यकर्तुम् । कृतलब्धक्रीतकुशलाः स्रौघ्नो देवदत्त इति ॥

श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाब-

तदुक्तम् । परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसंनिपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति ! सुबन्ताद्विधिरिति । ततश्च तद्धितोऽपि सुब्विधिरिति तत्र कर्त्तव्ये नलोपस्यासिद्धत्वादप्रवृत्तिः । तद्धिते तु कृते लुकोऽपि सुब्विधित्वात्तत्र नलोपस्यासिद्धत्वाल्लुक् प्रवर्त्तते । ततो भत्वान्नलोपाभावः ॥ २४ ॥

तत्र ॥ जातादिषु घादीनामपेक्षामाश्रित्य शेषग्रहणं प्रत्याख्यातम् । इह तु शेष इत्यस्य लक्षणत्वमधिकारत्वं चाश्रित्य जाताद्यर्थाक्षेपः । किमर्थमिति । प्रत्ययार्थवशेनाभिधानसामर्थ्येन च समर्थविभक्तिर्लभ्यतइति तन्निर्देशोऽपि न कर्त्तव्य इति भावः । तेन स्वार्थ इति । ननु स्वार्थोऽपि प्रत्ययविधावनुपयोगाच्छेषइति कुतस्तत्र न स्युः । उच्यते । अन्तरेणापि शेषाधिकारं चातुरर्थपर्यन्तापत्याद्यर्थनिवृत्त्या स्वार्थे प्राप्तिषु प्राप्तेषु शेषाधिकारः स्वार्थव्यतिरिक्तार्थपरिग्रहार्थः । तत्र आस्ते इति । स्रुघ्न आस्त इत्यादावपि शेष इत्यस्य लक्षणत्वात्प्रत्ययप्रसङ्गः । संस्कृतमिति । उपयोगफला हि क्रिया संस्कार इति मन्यते । तच्चावश्यमिति । अर्थनिर्देशाकरणवादिनाप्यनिष्टनिवृत्तयेऽवश्याश्रयितव्यमनभिधानमित्यर्थः । अपवादविधानार्थमिति । असंकरेण विशिष्टप्रवार्थेपवादा यथा स्युरित्येवमर्था अर्थनिर्देशा इत्यर्थः ॥ २५ ॥

Indira Gandhi National Centre for the Arts

हुलाल्लुक् ॥ ३४ ॥ लुक्प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम् । लुक्प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानं कर्त्तव्यम् । चित्रायां जाता चित्रा स्त्री । रेवत्यां जाता रेवती स्त्री । रोहिणी स्त्री । फल्गुन्यषाढाभ्यां टानौ * । फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ । फल्गुनी आषाढा उपदधाति । श्रविष्ठाषाढाभ्यां छण् * । श्रविष्ठाषाढाभ्यां छण्वक्तव्यः । श्राविष्ठीयाः । आषाढीयाः । तर्त्तर्हि वक्तव्यम् । न वा नक्षत्रेभ्यो बहुलं लुग्वचनात् * । न वा वक्तव्यम् । किं कारणम् । नक्षत्रेभ्यो बहुलं लुग्वचनात् । नक्षत्रेभ्यो बहुलं लुगित्येवमत्र लुग्भविष्यति ॥

प्रायभवः ॥ ३९ ॥ प्रायभवग्रहणमनर्थकं तत्रभवेन कृतत्वात् * । प्रायभवग्रहणमनर्थकम् किं कारणम् । तत्रभवेन कृतत्वात् । यो हि राष्ट्रे प्रायेण भवति तत्र भवोसौ भवति । तत्र तत्रभव इत्येव सिद्धम् । न सिध्यति । अनित्यभवः प्रायभवः । नित्यभवस्तत्र भवः । अनित्यभवः प्रायभव इति चेन्मुक्तसंशयेन तुल्यम् * । यद्भवानमुक्तसंशयं तत्रभव उदाहरणं न्याय्यं मन्यते । स्रौघ्नौ देवदत्त इति । तेनैतत्तुल्यम् । सोप्यवश्यमुदग्देशादीन्यभिनिष्क्रामति । अथैतद्भवान् प्रायभवे उदाहरणं न्याय्यं मन्यते । तत्रभवे किमुदाहरणम् । तत्तत्र नित्यं भवति स्रौघ्नाः प्राकारा इति । एवं तर्हि तत्रभव इति प्रकृत्य जिह्वामूलाङ्गुलेश्छो विधीयते । स यथैव तस्मिन् दृष्टापचारे अङ्गुलीयमिति भवति एवं प्रायभवेपि भविष्यति । इदं तर्हि प्रयोजनम् । प्रायभव इति प्रकृत्य उपजानूपकर्णोपनीवेष्ठक् वक्ष्यति स प्रायभवे यथा स्यात्तत्रभवे मा भूत् । उपजानुभवं गड्विति । अथेदानीं तत्रभव इति प्रकृत्य शरीरावयवाद्यद्विधीयते सोत्र कस्मान्न भवति । अनभिधानात् । यथैव तर्ह्यनभिधानाद्यन्न भवति । एवं ठगपि न भविष्यति ॥

कोशाड्ढञ् ॥ ४२ ॥ विकारे कोशाड्ढञ् * । विकारे कोशाड्ढञ्वक्तव्यः ।

श्रविष्ठा ॥ रेवतीरोहिणीति । नक्षत्राणो लुकि कृते लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुक् । ततो गौरादिषु पिप्पल्यादयश्चेति पाठादादिशब्दस्य प्रकारार्थत्वाद् ङीष् प्रत्ययः । नवेति । लुक एव प्रत्ययास्तूपसंख्येयाः ॥ ३४ ॥

प्राय ॥ तत्र भवेनेति ॥ भवे सामान्ये प्रायभवस्यापि विशेषस्यान्तर्भावादिति भावः । अनित्यभव इति । अर्थभेदमनेनाचष्टे । यस्तत्र कदा चिद्भवति कदा चिन्न भवति स प्रायभवः । यस्य तु नियत आधाराधेयभाव. स तत्र भव इति भावः । पर्तात्नरा-करोति मुक्तसंशयेनेति । अथेति । जानुसमीपस्थशरीरावयववाच्युपजानुशब्द इति भावः । एवं ठगपीति । तत्रभवाधिकारे ठग्विधीयमानः प्रायभव एव भविष्यतीत्यर्थः ॥ ३८ ॥

कोशस्य विकारः कौशेयम् । संभूते ह्यर्थानुपपत्तिः * । संभूतइत्युच्यमानेर्थस्यानुपपत्तिः स्यात् । न ह्यदः कोशे संभवति । किं तर्हि । कोशस्यादो विकारः । यदि विकार इत्युच्यते भस्मन्यपि प्राप्नोति । भस्मापि कोशविकारः । अथ सम्भूतइत्युच्यमाने क्रिमौ कस्मान्न भवति । क्रिमिरपि कोशे सम्भवति । अनभिधानात् । यथैव तर्हि क्रिमावनभिधानान्न भवत्येवं भस्मन्यपि न भवति । अर्थश्चोपपन्नो भवति ।

कलाप्यश्वत्थयवबुसाद् वुन् ॥ ४८ ॥ अयुक्तोयं निर्देशः । कालादिति वर्त्तते । न च कलापिनामकालोस्ति । नैष दोषः । साहचर्यात्ताच्छब्द्यं भविष्यति । कलापिसहचरितः कालः कलापी काल इति ॥

तत्रभवः ॥ ५३ ॥ तत्रेति वर्त्तमाने पुनस्तत्रग्रहणं किमर्थम् । तत्रप्रकरणे पुनस्तत्रवचनं कालनिवृत्त्यर्थम् * । तत्प्रकरणे पुनस्तत्रवचनं कालाधिकारनिवृत्त्यर्थम् । कालाधिकारो निवर्त्यते । न हि काको वाश्यत इत्येवाधिकारा निवर्त्तन्ते । कोत्राभिसम्बन्धः यत्तत्रग्रहणं कालाधिकारं निवर्तयेत् । एषोभिसम्बन्धः कालाभिसम्बन्धं हि तत्राग्रहणमनुवर्तते । तत्रग्रहणं च तत्रग्रहणस्य निवर्त्तकं भवति । तस्मिंश्च निवर्त्तमाने कालाधिकारोपि निवर्त्तते ॥

गम्भीराञ्ञ्यः ॥ ५८ ॥ **अव्ययीभावाच्च** ॥ ५९ ॥ ञ्यप्रकरणे परिमुखादिभ्य उपसंख्यानम् * । ञ्यप्रकरणे परिमुखादिभ्य उपसंख्यानं कर्तव्यम् । पारिमुख्यम् । पार्योष्ठ्यम् । अव्ययीभावाद्विधाने उपकूलादिभ्यः प्रतिषेधः * ।

कोशा ॥ विकारे इति । तस्य विकार इत्यत्र प्रकरणे सूत्रमिदं कर्तव्यम् । एराया-ढञिति कृत्वा कोशादिति कर्तव्यम् । अर्थानुपपत्तिरिति । कौशेयशब्दस्य लौकिको योर्थः सूत्रवस्त्रलक्षणः स एवं नोपपद्यते लौकिकार्थो न संगृहीतः स्यादित्यर्थः । न ह्यद इति । कौशेयशब्दाभिधेयं वस्त्रसूत्रलक्षणं कोशेन सम्भवतीत्यर्थः । ननु कोशस्य वस्त्रकारणत्वात् कार्यस्य च कारणे सम्भवात् कथमनुपपत्तिः । नैष दोषः । लोकप्रसिद्धार्थबाध एवं कृतः स्याद् नहि कार्यावस्थायां लोकः कार्यकारणयोः सम्भवक्रियापेक्षमेवाधाराधेयभावमधिगच्छति, किन्तर्हि प्रकृतिविकारभावम् । अर्थश्चेति । लौकिकोर्थो विकारे प्रत्ययविधानेन शास्त्रेणानुसृतत्वाद्युक्तियुक्तो भवतीत्यर्थः ॥ ४२ ॥

कलाप्य ॥ कलापिसहचरित इति । यस्मिन् काले मयूराः कलापिनो भवन्ति स कलापीत्यर्थः ॥ ४८ ॥

तत्र भवः ॥ नहि काक इति । यथा काकवाशितस्य कालाधिकारनिवृत्तिर्नाभिधेया तथा तत्रशब्दस्यापीत्यर्थः । तत्रग्रहणं चेति । सप्तम्यर्थमात्रप्रतिपत्तिप्रयोजनं तत्रग्रहणं कालसम्बद्धस्य विशेषफलस्य तत्रग्रहणस्य निवृत्तिविरोधात् करोतीत्यर्थः ॥ ५६ ॥

गम्भीराञ्ञ्यः ॥ ञ्यप्रकरण इति । अव्ययीभावाच्चेत्येतदनिष्टव्यापकत्वादकृत्वा परिमुखादिभ्य एव ञ्यो विधेयः गणे चाव्ययीभावकार्ययुक्तानि परिमुखादीनि पठितव्यानि न तु प्रातिपदिकान्येव । तेन तेषां बहुव्रीहितत्पुरुषाणां ग्रहणं न भविष्य-

Indira Gandhi National Centre for the Arts

अव्ययीभावाद्विधाने उपकूलादिभ्यः प्रतिषेधो वक्तव्यः। औपकूलाः औपशालः।

अन्तः पूर्वपदाट्ठञ् ॥ ६० ॥ असल्पमिदमुच्यते। समानस्य तदादेश्च ॥ समानस्य सामानिकः। तदादेः। सामानग्रामिकः। सामानदेशिकः। अध्यात्मादिषु चेष्यते। आध्यात्मिकम्। आधिदैविकम्। आधिभौतिकम्। ऊर्ध्वंदमाच्च देहाच्च ॥ ऊर्ध्वदमाच्च देहाच्च ठञ्वक्तव्यः। और्ध्वंदमिकम्। और्ध्वदेहिकम्। लोकोत्तरपदस्य च ॥ लोकोत्तरपदस्य च ठञ् वक्तव्यः। ऐहलौकिकम्। पारलौकिकम्। मुखपार्श्वतसोरीयः ॥ मुखपार्श्वत इत्येताभ्यां तसन्ताभ्यामीयप्रत्ययो वक्तव्यः। मुखतीयः पार्श्वतीयः। कुग्जनस्य परस्य च ॥ ईयो वक्तव्यः। कुच्चागमः। जनकीयः। परकीयः। ईयः कार्योऽथ मध्यस्य ॥ मध्यीयः। मण्मीयौ प्रत्ययौ तथा ॥ मण्मीयौ चापि प्रत्ययौ वक्तव्यौ। माध्यमः। मध्यमीयः। मध्यो मध्यं दिनण् चास्मात् ॥ मध्यशब्दोयं मध्यंभावमापद्यते दिनण् चास्मात्प्रत्ययो भवतीति वक्तव्यम्। माध्यन्दिन उपगायति। स्थाम्नो लुगजिनात्तथा ॥ लुक्स्थाम्नो वक्तव्यः। अश्वत्थामा। अजिनात्तथा। अजिनान्ताच्च लुग्वक्तव्यः। कृष्णाजिनः। उष्ट्राजिनः। सिंहाजिनः। व्याघ्राजिनः। बाह्यो दैव्यः पाञ्चजन्योऽथ गम्भीराञ्ञ्य इष्यते ॥

तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः ॥ ६६ ॥ किमर्थं भवव्याख्यानयोर्युगपदधिकारः क्रियते। भवव्याख्यानयोर्युगपदधिकारोऽपवादविधानार्थः *। भवव्याख्यानयोर्युगपदधिकारः क्रियते। अपवादविधानार्थः। युगपदपवादान् वक्ष्यामीति। किमुच्यतेऽपवादविधानार्थ इति न पुनर्निर्देशार्थोऽपि स्यात्। कृतनिर्देशौ हि तावर्थौ। एकस्तत्र भव इति। अपरस्तस्येदमिति।

तीति भावः। अथ सूत्रं क्रियते तदातिव्याप्तिपरिहारायेदं वक्तव्यमित्याह अव्ययीभावादिति ॥ ५३ ॥

अन्त ॥ ऊर्ध्वंदमाच्चेति। दम उत्तरपदे ठञ्संनियोगेनोर्ध्वशब्दस्य मकारान्तत्वं निपात्यते। ऐहलौकिकमिति। अनुशतिकादित्वादुभयपदवृद्धिः। मुखतीयमिति। अव्ययानां भमात्रे टिलोपः। मध्यमीय इति। गहादिषु मध्यो मध्यमं चाण् चरण इति यत्पठितं तत्र पृथिवीमध्यमवाची मध्यशब्दो गृह्यत इत्युक्तम्। ततोन्यत्रापि भवार्थे मध्यमीय इति यथा स्यादिति मीयप्रत्ययविधिः। जातादिषु पृथिवीमध्यवाचिन एव मध्यमीय इति यथा स्यान्मध्यान्तरवाचिनो मा भूदित्येवमर्थं गहादिषु पृथिवीमध्यस्य मध्यमभाव इत्युक्तम्। स्थाम्नो लुगजिनात्तथेति। उभाभ्यामपि तदन्तविधिरिष्यते। बाह्य इति। गम्भीराञ्ञ्य इत्यत्रेदं वक्तव्यमित्यर्थः ॥ ६० ॥

तस्य व्या ॥ अधिकारोयमिति वृत्तिकारैर्व्याख्यातं तत्र प्रयोजनं पृच्छति किमर्थमिति। यथा विहितविधानार्थमेव भवव्याख्यानयोरुपादानं कस्मान्न भवतीति भावः। अपवादविधानार्थ इति वक्ष्यमाणाष्ठञादयोऽपवादा भवव्याख्यानयोर्यथा स्युरित्येवम-

Indira Gandhi National Centre for the Arts

अथ व्याख्यातव्यनाम्नो ग्रहणं किमर्थम् । तत्र व्याख्यातव्यनाम्नो ग्रहणं भवार्थम्* तत्र व्याख्यातव्यनाम्नो ग्रहणं क्रियते । भवार्थम् । किमुच्यते भवार्थमिति । न पुनर्व्याख्यानार्थमपि स्यात् । व्याख्याने ह्यवचनात्सिद्धम् *। व्याख्याने हि क्रियमाणे अन्तरेण वचनं सिद्धम् । यत्प्रति व्याख्यानमित्येतद्भवाति तस्मादुत्पत्तिर्भविष्यति । किं च प्रत्येतद्भवति । व्याख्यातव्यस्य नाम । यदुच्यते भवार्थमिति तत्र व्याख्यानार्थमपि व्याख्यातव्यनाम्नो ग्रहणं क्रियते । इह मा भूत् । पाटलिपुत्रस्य व्याख्यानी सुकोसलेति । अथ क्रियमाणेपि व्याख्यातव्यनाम्नो ग्रहणे कस्मादेवात्र न भवति । अवयवश आख्यानं व्याख्यानम् । पाटलिपुत्रं चास्मै अवयवश आचष्टे । ईदृशा अस्य प्राकारा ईदृशा अस्य प्रासादा इति सत्यमेतत् । क्व चित्तु का चित्प्रमृततरा गतिर्भवति । शब्दग्रन्थेषु चैषा प्रमृततरा गतिर्भवति । निरुक्तं व्याख्यायते व्याकरणं व्याख्यायतइत्युच्यते न कश्चिदाह पाटलिपुत्रं व्याख्यायतइति । भवे मन्त्रेषु लुग्वचनम् *। भवे मन्त्रेषु लुग्वक्तव्यः। अग्निष्टोमे भवो मन्त्रः अग्निष्टोमः । राजसूयः । वाजपेयः । कल्पे च व्याख्याने*। कल्पे च व्याख्याने लुग्वक्तव्यः । अग्निष्टोमस्य व्याख्यानं कल्पो ऽग्निष्टोमः । राजसूयः । वाजपेयः । स तर्हि वक्तव्यः । न वा तादर्थ्यात्ताच्छब्द्यम्* । न वा वक्तव्यः । किं कारणम् । तादर्थ्यात्ताच्छब्द्यं भविष्यति । अग्निष्टोमार्थोऽग्निष्टोमः। राजसूयः । वाजपेयः ।

क्रतुयज्ञेभ्यश्च ॥ ६८ ॥ क्रतुग्रहणं किमर्थम् । यज्ञेभ्य इतयित्युच्यमाने य एव संज्ञीभूतका यज्ञास्तत एवोत्पत्तिः स्यात् । आग्निष्टोमिको राजसूयिको वाजपेयिकः । यत्र वा यज्ञशब्दोस्ति । नावयज्ञिकः । पाकयज्ञिकः । इह न स्यात् । पाञ्चौदनिकः । शातौदनिकः । दाशौदनिक इति । क्रतुग्रहणे पुनः

र्थस्तयोरधिकार इत्यर्थः । निर्देशार्थोपीति । अणादीनां घादीनाञ्चार्थे निर्देशार्थोपीत्यर्थः । भवार्थमिति । उत्तरैर्योगैर्भवे व्याख्यातव्यनाम्न एव प्रत्यया यथा स्युरित्येवमर्थमित्यर्थः । व्याख्याने हीति । व्याख्यानशब्दस्य संबन्धिशब्दत्वाद् व्याख्यातव्याक्षेपस्य सिद्धत्वादिति भावः । पाटलिपुत्रस्येति । यादृशः सुकोसलायां प्राकारादिसंनिवेशः तादृशः पाटलिपुत्र इति पाटलिपुत्रं व्याख्यातव्यं भवतीति स्यादेव प्रत्ययः । व्याख्यातव्यनामग्रहणात्तु व्याख्यातव्यत्वेन प्रसिद्धतमस्य ग्रन्थस्य यन्नाम तस्य ग्रहणादतिप्रसङ्गाभावः । अग्निष्टोमे भव इति । अग्निष्टोमशब्दोत्र क्रतुवाच्येव न तु व्याख्यातव्यवाचीति ठञभावादणो लुक् । कल्पे चेति । अत्र ठञ एव लुक् ॥ ६६ ॥

क्रतु ॥ क्रतुयज्ञशब्दयोः पर्यायत्वात् प्रश्नः । क्रतुग्रहणमिति । संज्ञीभूतका इति । मुख्या इत्यर्थः । यत्र वेति । बहुवचननिर्देशात् स्वरूपग्रहणे निरस्ते तदन्तविधिः स्यादिति भावः । पाञ्चौदनिक इति । सोमपानाभावादमुख्यत्वमेषामिति भावः । तस्माद् गौणमुख्यपरिहारार्थमुभयोरुपादानम् ॥ ६७ ॥

Indira Gandhi National Centre for the Arts

क्रियमाणे न दोषो भवति। अथ यज्ञग्रहणं किमर्थम्। क्रतुभ्य इतीयत्युच्यमाने य एव संज्ञीभूतकाः क्रतवस्तत उत्पत्तिः स्यात्। अग्निष्टोमिको राजसूयिको वाजपेयिक इति। इह न स्यात्। पाञ्चौदनिकः शातौदनिकः। दाशौदनिक इति। यज्ञग्रहणे पुनः क्रियमाणे न दोषो भवति॥

द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्॥७२॥ नामाख्यातग्रहणं संघातविगृहीतार्थम्*। नामाख्यातग्रहणं संघातविगृहीतार्थं द्रष्टव्यम्। नामिकः। आख्यातिकः। नामाख्यातिकः॥

विदूराञ्ञ्यः॥८४॥ अयुक्तोयं निर्देशः, न ह्यसौ विदूरात्प्रभवति। किं तर्हि। वालवायात्प्रभवति। विदूरे संस्क्रियते। एवं तर्हि, वालवायो विदूरं च। वालवायशब्दो विदूरशब्दमापद्यते ञ्यश्चास्मात्प्रत्ययो वक्तव्यः। प्रकृत्यन्तरमेव वा॥ अथ वा प्रकृत्यन्तरं विदूरशब्दोस्ति वालवायस्य। न वै तत्र वालवायं विदूर इत्युपाचरन्ति। न वै तत्रेति चेद् ब्रूयाज्जित्वरीवदुपाचरेत्। यथा। वणिजो वाराणसीं जित्वरीत्युपाचरन्ति। एवं वैयाकरणा वालवायं विदूर इत्युपाचरन्ति। वालवायो विदूरं च प्रकृत्यन्तरमेव वा। न वै तत्रेति चेद् ब्रूयाज्जित्वरीवदुपाचरेत्॥ १॥

अभिनिष्क्रामति द्वारम्॥८६॥ अयुक्तोयं निर्देशः चेतनावत एतद्भवति। निष्क्रमणमपक्रमणं वा द्वारं चाचेतनम्। कथं तर्हि निर्देशः कर्त्तव्यः। अभिनिष्क्रमणं द्वारमिति। स तर्हि तथा निर्देशः कर्त्तव्यः। नकर्त्तव्यः। अचेतनेष्वपि चेतनवदुपचारो दृश्यते। तद्यथा। अयमस्य कोणोभिनिसृतः। अयमभिप्रविष्ट इति॥

विदूरा॥ वालवाय इति। आदेश एव सूत्रे निर्दिष्टः। तेन त्वनुरूपः स्थानी वालवायशब्द आक्षिप्यते यथा शिवादिगणे विश्रवणरवणेत्यादेशौ पठ्येते ताभ्यां तु विश्रवशब्दः स्थानित्वेनाक्षिप्यते। प्रकृत्यन्तरमिति। विदूरशब्दो नगरविशेषस्येव पर्वतविशेषस्यापि वाचकः स एव च प्रकृतित्वेनाश्रीयतइत्यर्थः। पर्वते विदूरशब्दो न प्रसिद्ध इति चेद् जित्वरीवद्व्यवहरेत् प्रतिनियतपुरुषापेक्षापि प्रसिद्धिर्भवति वणिजश्च मङ्गलार्थः वाराणसीं जित्वरीति व्यवहरन्ति॥ ८४॥

अभि॥ चेतनावत इति। निष्क्रमणस्य पादविक्षेपरूपत्वादिति भावः। यद्यपि शकटादीनां निष्क्रमणादि भवति तथापि चेतनाधिष्ठानान्न तु स्वतन्त्राणामिति भावः। अचेतनेष्वपीति। देशान्तरप्राप्तिलक्षणकार्यदर्शनादचेतनेष्वपि क्रियाव्यवहारः। न च पादविक्षेप एव निष्क्रमणम्। वायुर्निष्क्रामतीति दर्शनात्। ननु द्वारस्य देशान्तरप्राप्तिफलं निष्क्रमणं नैवास्ति। एवं तर्हि करणस्यापि कर्तृसाध्यक्रियारोपादभिनिष्क्रामति द्वारमिति निर्देशः॥ ८८॥

अधि॥ आख्यायिकाभ्य इति। तादर्थ्ये चतुर्थी। आख्यायिकाभिधानाय यः प्रत्ययस्तस्य बहुलं लुब् भवतीत्यर्थः॥ ८७॥

Indira Gandhi National Centre for the Arts

अधिकृत्य कृते ग्रन्थे ॥ ८७ ॥ लुबाख्यायिकाभ्यो बहुलम् * । अधिकृत्य कृते ग्रन्थ इत्यत्र लुबाख्यायिकाभ्यो बहुलं वक्तव्यः वासवदत्ता । सुमनोत्तरा । न च भवति भैमरथी ॥

शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः ॥ ८८ ॥ द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः * । द्वन्द्वे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः । दैवासुरम् राक्षोसुरम् । दैवासुरी । राक्षोसुरी ॥

सोस्य निवासः ॥ ८९ ॥ अभिजनश्च ॥ ९० ॥ अथ निवासाभिजनयोः को विशेषः । निवासो नाम यत्र संप्रत्युष्यते । अभिजनो नाम यत्र पूर्वैरुषितम् ॥

वासुदेवार्जुनाभ्यां वुन् ॥ ९८ ॥ किमर्थं वासुदेवशब्दाद् वुन् विधीयते । न गोत्रक्षत्रियाख्येभ्यो बहुलं वुञित्येव सिद्धम् । न ह्यस्ति विशेषः । वासुदेवशब्दाद् वुञो वा वुनो वा । तदेव रूपं स एव स्वरः । इदं तर्हि प्रयोजनम् । वासुदेवशब्दस्य पूर्वनिपातं वक्ष्यामीति । अथ वा नैषा क्षत्रियाख्या । संज्ञैषा तत्र भगवतः ॥

जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने ॥ १०० ॥ सर्ववचनं किमर्थम् । सर्ववचनं प्रकृतिनिर्ह्रासार्थम् * । सर्ववचनं क्रियते प्रकृतिनिर्ह्रासो यथा स्यात् । तच्च मद्रवृज्यर्थं द्रष्टव्यम् । माद्रो भक्तिरस्य माद्रौ वा भक्तिरस्य मद्रक इत्येव यथा स्यात् । वार्ज्यो वा भक्तिरस्य वार्ज्यौ वा भक्तिरस्य वृजिक इत्येव यथा स्यात् ॥

सोस्य ॥ निवासाभिजनयोरिति । अभिजनशब्देन पूर्वे बान्धवा उच्यन्तेतत्संबन्धाद् देशोभिजनो गृह्यते । निवासशब्देनाप्यधिकरणसाधनेन देश एवेत्यविशेषात्प्रश्नः । निवासो नामेति । यत्र स्वयं वसति स तस्य निवासः । यत्र पूर्वं बान्धवानामुषितं सोभिजन इत्यर्थः । निवाससाहचर्याच्चाभिजनो देशो गृह्यते न तु पूर्वे बान्धवाः ॥८६॥

वासुदेव ॥ वसुदेवस्यापत्यं वासुदेवः ऋष्यन्धकेत्यणन्तः । तत्र गोत्रत्वात् क्षत्रियत्वाच्च वुञि रूपस्वरयोः सिद्धत्वात्प्रश्नः । किमर्थमिति । पूर्वनिपातमिति । अभ्यर्हितं पूर्वं निपततीत्यस्य ज्ञापनार्थमित्यर्थः । संज्ञैषेति । नित्यः परमात्मदेवताविशेष इह वासुदेवो गृह्यतइत्यर्थः । प्रसङ्गेन च निर्देशेन पूर्वोक्तोप्यर्थो ज्ञाप्यते ॥ ६८ ॥

जन ॥ जनपदिनो जनपदस्वामिनः क्षत्रियाः । तद्वाचिनां बहुवचने जनपदवाचिना शब्देन समानश्रुतीनां जनपदवत् सर्वं भवति सोस्य भक्तिरित्येतस्मिन् विषये । यथा अङ्गा जनपदो भक्तिरस्य आङ्गक इत्यवृद्धादपि वुञ् भवति । एवमङ्गाः क्षत्रिया भक्तिरस्येत्यत्रापि भवति । एवं स्थिते प्रश्नः । सर्ववचनमिति । अन्तरेणापि सर्ववचनं जनपदवदिति सामान्येनातिदेशः क्रियमाणः सर्वस्य भविष्यतीति भावः । प्रकृतिनिर्ह्रासार्थमिति । असति सर्वग्रहणे प्रत्ययस्यैव प्राधान्यादतिदेशः स्यान्न तु प्रकृतेरपि । सर्वग्रहणात्तु भवति । निर्ह्रासोपचयोल्पत्वमित्यर्थः । वृद्धिनिमित्तेषु वुञादिषु विशेषाभा-

Indira Gandhi National Centre for the Arts

तेन प्रोक्तम् ॥ १०१ ॥ प्रोक्तग्रहणमनर्थकं तत्रादर्शनात् * । प्रोक्तग्रहणमनर्थकम् । किं कारणम् । तत्रादर्शनात् । ग्रामे ग्रामे कलापकं काठकं च प्रोच्यते तत्रादर्शनात् । न च तत्र प्रत्ययो दृश्यते ग्रन्थे च दर्शनात् * । यत्र च दृश्यते ग्रन्थः स भवति । तत्र कृते ग्रन्थइत्येव सिद्धम् । छन्दोर्थं तर्हीदं वक्तव्यम् । न हि छन्दांसि क्रियन्ते । नित्यानि च्छन्दांसि । छन्दोर्थमिति चेत्तुल्यम् * । छन्दोर्थमिति चेत्तुल्यमेतद्भवति । ग्रामे ग्रामे काठकं कालापकं च प्रोच्यते । तत्रादर्शनात् । न च तत्र प्रत्ययो दृश्यते । ग्रन्थे दर्शनात् । यत्र दृश्यते ग्रन्थः स भवति । तत्र कृते ग्रन्थइत्येव सिद्धम् । ननु चोक्तम् । न हि च्छन्दांसि क्रियन्ते । नित्यानि च्छन्दांसीति । यद्यप्यर्थो नित्यः । या त्वसौ वर्णानुपूर्वी साऽनित्या । तद्भेदाच्चैतद्भवति । काठकम् । कालापकम् । मौदकम् । पैप्पलादकमिति । न तर्हीदानीमिदं वक्तव्यम् । वक्तव्यं च । किं प्रयोजनम् । यत्तेन प्रोक्तं न च तेन कृतम् । माथुरी वृत्तिः । यदि तर्हि अस्य निबन्धनमस्ति । इदमेव वक्तव्यम् । तत्र वक्तव्यम् । तदप्यवश्यं वक्तव्यम् । यत्तेन कृतं न च तेन प्रोक्तम् । वाररुचं काव्यम् । जालूकाः श्लोकाः ॥

कलापिवैशम्पायनान्तेवासिभ्यश्च ॥ १०४ ॥ प्रत्यक्षकारिग्रहणम् * । प्रत्यक्षकारिग्रहणं कर्त्तव्यम् । अन्तेवास्यन्तेवासिभ्यो मा भूदिति । तत्तर्हि वक्त-

---

र्यं मत्वाह तच्चेति । द्वित्वैकत्वयोश्च शब्दभेदादतिदेशः प्रकृतिनिर्ह्रासार्थः । न तु बहुत्वे तत्र मद्रा इति शब्दभेदाभावात् । मद्रक इति । मद्रस्यापत्यमिति द्व्यञ्मगधेत्यण् । माद्रशब्दस्य मद्रशब्दातिदेशः । तत्प्रत्ययादेशश्च वार्ग्य इति । वृजेरपत्यमिति वृद्धेत्कोसलेति ञ्यङ् ॥ १०० ॥

तेन ॥ प्रपूर्वो वचिः प्रकाशने अध्यापनरूपे वा वर्तते करणे वा । तत्राद्येर्थे प्रत्ययो न दृश्यते द्वितीये तु सूत्रान्तरेण सिद्धमिति मत्वाह प्रोक्तग्रहणमिति । ग्रामे ग्राम इति । सुशर्मादीनां प्रतिग्रामं प्रवक्तृत्वेऽपि सुशर्मणा प्रोक्तं काठकं सौशर्मणमिति प्रयोगो न दृश्यतइत्यर्थः । नित्यानीति । कर्त्तुरस्मरणात्तेषामिति भावः । या त्वसाविति । महाप्रलयादिषु वर्णानुपूर्वीविनाशे पुनरुत्पद्य ऋषयः संस्कारातिशयाद्वेदार्थं स्मृत्वा शब्दरचनां विदधतीत्यर्थः । तद्भेदादिति । आनुपूर्वीभेदादित्यर्थः । ततश्च कठादय वेदानुपूर्व्याः कर्त्तार एव न तु स्थिताया एव सुशर्मादिवत्कारः । ततश्च छन्दस्यपि कृते ग्रन्थइत्येव सिद्धः प्रत्यय इति भावः । माथुरीति । माथुरेण प्रथमतः प्रकाशितेत्यर्थः । कलापिनोणित्यण्ग्रहणस्याधिकविधानार्थत्वाद्वृद्धादप्यत्राण् भवति । द्विविधं चेह प्रोक्तं गृह्यते । परकृतं स्वकृतं वा । यत् प्रकाशितं तेन प्रोक्ताधिकारएव कठादिभ्यो वक्ष्यमाणप्रत्ययविधानम् ॥ १११ ॥

कलापि ॥ प्रत्यक्षकारिग्रहणमिति । करोतेः क्रियासामान्यवाचित्वात् सामान्यस्य सर्वविशेषेषु समवायादध्ययनमिह करणं गृह्यते । शिष्यशिष्याणामपि शिष्यव्यवहारदर्शनाद् वार्तिकारम्भः । कलापिखाडायनग्रहणमिति । वैशम्पायनान्तेवासी कलापी कलाप्यन्तेवासिनां वैशम्पायनान्तेवासित्वाण्णिनौ सिद्धे पृथक् कलापिग्रहणं प्रत्यक्ष

व्यम्। न वक्तव्यम्। कलापिखाडायनग्रहणं ज्ञापकं वैशम्पायनान्तेवासिषु प्रत्यक्षकारिग्रहणस्य। यदयं कलापिखाडायनग्रहणं करोति तज्ज्ञापयत्याचार्यो नान्तेवास्यन्तेवासिभ्यो भवतीति। कथं कृत्वा ज्ञापकम्। वैशम्पानान्तेवासी कठः। कठान्तेवासी खाडायनः। वैशम्पायनान्तेवासी कलापी। यद्यन्तेवास्यन्तेवासिभ्योपि स्यात्कलापिखाडायनग्रहणमनर्थकं स्यात्पश्यति त्वाचार्यो नान्तेवास्यन्तेवासिभ्यो भवतीति। ततः कलापिखाडायनग्रहणं करोति। छन्दोग्रहणं चेतरथा ह्यतिप्रसङ्गः*। छन्दोग्रहणं च कर्तव्यम्। इतरथा ह्यतिप्रसङ्गः। इतरथा ह्यतिप्रसङ्गः स्यात्। इहापि प्रसज्येत तित्तिरिणा प्रोक्ताः श्लोका इति॥

पुराणप्रोक्तेषु ब्राह्मणकल्पेषु॥ १०५॥ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात्*। पुराणप्रोक्तेष्वित्यत्र याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्यः। याज्ञवल्क्यानि ब्राह्मणानि सौलभानि इति। किं कारणम्। तुल्यकालत्वात्। एतान्यपि तुल्यकालानीति॥

कृते ग्रन्थे॥ ११६॥ कृते ग्रन्थे मक्षिकादिभ्योण्*। कृते ग्रन्थइत्यत्र मक्षिकादिभ्योण्वक्तव्यः। मक्षिकाभिः कृतं माक्षिकम्। तद्विशेषेभ्यश्च *। तद्विशेषेभ्यश्चाण्वक्तव्यः। सरघाभिः कृतं सारघम्। गार्मुतम्। पौत्तिकम्। स तर्हि वक्तव्यः। न वक्तव्यः। योगविभागात्सिद्धम्*। योगविभागः करिष्यते। कृते ग्रन्थे। ततः संज्ञायाम्। संज्ञायां च तेन कृतइत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। सरघाभिः कृतं सारघम्। गार्मुतम्। पौत्तिकम्। ततः कुलालादिभ्यो वुञ्। संज्ञायामित्येव॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थाध्यायस्य तृतीये पादे प्रथममाह्निकम्॥

तस्येदम्॥१२०॥ तस्येदमित्यसंनिहिते ऽप्राप्तिरिदमः प्रत्यक्षवाचित्वात्*। तस्येदमित्यसंनिहिते ऽप्राप्तिः। किं कारणम्। इदमः प्रत्यक्षवाचित्वादिदमित्येतत्प्रत्यक्षे वर्तते। तेनेहैव स्यात् तस्येदमिति। तस्यादस्तस्य तदित्यत्र न

कारिग्रहणे लिङ्गम्। तथा वैशम्पायनान्तेवासी कठः। कठान्तेवासी खाडायनो वैशम्पायनान्तेवासी भवत्येवेति णिनौ सिद्धे शौनकादिषु णिन्यर्थे खाडायनग्रहणं साक्षाच्छिष्यग्रहणे लिङ्गमित्यर्थः। तित्तिरिणेति छणोऽभावे यथाऽण्न भवति तथा छन्दोब्राह्मणानीत्यत्रोक्तम्॥ १०४॥

पुराण॥ तुल्यकालत्वादिति। शाठ्यायनादिप्रोक्तैर्ब्राह्मणैरेककालत्वादित्यर्थः। कृते योगविभाग इति। संज्ञायां कुलालादिभ्यो वुञिति सूत्रं विभक्तमित्यर्थः॥ इति कैयट कृते भाष्यप्रदीपे चतुर्थस्याध्यायस्य तृतीये पादे प्रथममाह्निकम्॥

तस्येदम्॥ इदम इति। इदंशब्दाद्योर्थः प्रतीयते तस्मिन्नेव प्रत्ययप्रसङ्ग इत्यर्थः। सिद्धं त्विति। सम्बन्धिना योगे षष्ठी विधीयते तस्मिन् प्रत्ययइत्यर्थः। सर्वश्चेति।

Indira Gandhi National Centre for the Arts

स्यात् । सिद्धं तु यद्योगा षष्ठी तत्र* । सिद्धमेतत् । कथम् । यद्योगा षष्ठी वर्तते तत्रेति वक्तव्यम् । अनन्तरादिषु च प्रतिषेधः* । अनन्तरादिषु च प्रतिषेधो वक्तव्यः । तस्यानन्तरस्तस्य समीपे इति । किं यद्योगा षष्ठी वर्तत इत्यतोऽनन्तरादिषु प्रतिषेधो वक्तव्यः । नेत्याह । सर्वथानन्तरादिषु प्रतिषेधो वक्तव्यः । सिद्धं तु परिगणनात्* । सिद्धमेतत् । कथम्, परिगणनं क्रियते। स्वे ग्रामजनपदमनुष्येभ्यः* । स्वे ग्रामजनपदमनुष्येभ्य इति वक्तव्यम् । ग्राम । स्रौघ्नः। माथुरः। जनपद । आङ्गकः । वाङ्गकः । मनुष्य । दैवदत्तः । याज्ञदत्तः । पत्राद्वाह्ये * । पत्राद्वाह्यइति वक्तव्यम् । आश्वमौष्ट्रं गार्दभम् । रथाद्रथाङ्गे* । रथाद्रथाङ्ग इति वक्तव्यम् । आश्वरथम् । गार्दभरथम् । औष्ट्ररथम् । वहेस्तुरणिट् च* । वहेस्त्रन्तादण् चेट्च वक्तव्यः । संवोढुः स्वं सांवहित्रम् । अग्नीधः शरणे रञ्भं च *। अग्नीधः शरणे रञ्प्रत्ययो भसंज्ञा च वक्तव्या । अग्नीधः शरणमाग्नीध्रम् । समिधामाधाने षेण्यण् * । समिधामाधाने षेण्यण् वक्तव्यः । समिधामाधानो मन्त्रः सामिधेन्यो मन्त्रः । सामिधेनी ऋक् । चरणाद्धर्माम्नाययोः* । चरणाद्धर्माम्नाययोरिति वक्तव्यम । कठानां धर्म आम्नायो वा काठकम् । मोदकम् । पैप्पलादकम् । तत्तर्हीदं बहु वक्तव्यम् । सूत्रं च भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं तस्येदमित्यसंनिहितेऽप्राप्तिरिति । किमिदमपि भवान् प्रत्ययार्थमेवोपालभते न पुनः प्रकृत्यर्थमपि । यथैव तर्हि इदमित्येतत् प्रत्यक्षे वर्तते एवं तदित्येतत्परोक्षे वर्तते । तेनैव स्यात्तस्येदमिति । अस्यामुष्य इत्यत्र न स्यात् । अस्त्यत्र विशेषः । एकशेषनिर्देशोऽत्र भविष्यति । तस्य च अमुष्य च तस्येति । इहापि तर्ह्येकशेषनिर्देशो भविष्यति । तच्च अदश्च इदं च इदमि-

---

पाणिनीये कात्यायनीये च न्यासइत्यर्थः । पाणिनीयन्यासेऽपि देवदत्तस्येदमनन्तरमिति प्रत्ययप्रसङ्गः । सिद्धं त्विति । असंनिहिते प्रत्ययविधानमनन्तरादिषु चाप्राप्तिरित्यर्थः । स्व इति । तेनात्मीयज्ञातिधनेष्वेव प्रत्यया भवन्ति न त्वनन्तरादिषु। पत्राद् वाह्यइति । पत्राध्वर्युपरिषदश्चेत्यत्रायमर्थनिर्देशः । रथादिति । रथाद्यत्पत्रपूर्वादञित्येतयोर्योगयोरर्थनिर्देशः । सांवहित्रमिति । तत्र पूर्वत्रासिद्धमिति ढत्वादीनामिटि कर्त्तव्ये ऽसिद्धत्वात् तृचि इटि रूपम् । आग्नीध्रमिति । अग्निमिन्धइति क्विप् । अन्तर्भावितण्यर्थत्वादिन्धिः सकर्मकः । होताग्नीदुच्यते । तस्य शरणं गृहमाग्नीध्रम । भसंज्ञया पदसंज्ञाया बाधनाज्जश्त्वाभावः । चरणादिति । गोत्रचरणादित्यत्रायमर्थनिर्देशः । एकशेषनिर्देश इति । त्यदादीनि सर्वैर्नित्यमित्येकशेषः । त्यदादीनां यद्यत्परं तत्तच्छिष्यतइत्युक्तेः पूर्वशेषदर्शनाच्चेत्युक्तमिति पूर्वस्यापि तद शेषः । सौत्रत्वाच्च निर्देशस्यैकवचनं विभक्त्यन्तानां चैकशेषः । एकशेषद्वारेण चैतत्प्रतिपा-

Indira Gandhi National Centre for the Arts

सेव । यदप्युच्यते । अनन्तरादिषु प्रतिषेधो वक्तव्य इति । न वक्तव्यः । अनभिधानादनन्तरादिषूत्पत्तिर्न भविष्यति ॥

द्वन्द्वाद् वुन् वैरमैथुनिकयोः ॥१२५॥ वैरे देवासुरादिभ्यः प्रतिषेधः * । वैरे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः । दैवासुरम् । राक्षासुरम् ॥

सङ्घाङ्कलक्षणेष्वञ्यञिञामण् ॥ १२७ ॥ सङ्घादिषु घोषग्रहणं कर्तव्यम् । गार्गो घोषः । वात्सो घोषः । किमर्थो णकारः । वृद्ध्यर्थः । ञ्णितीति वृद्धिर्यथा स्यात् । सङ्घादिषु प्रत्ययस्य णित्करणानर्थक्यं वृद्धत्वात्प्रातिपदिकस्य* । सङ्घादिषु प्रत्ययस्य णित्करणमनर्थकम् । किं कारणम् । वृद्धत्वात् प्रातिपदिकस्य । वृद्धमेतत् प्रातिपदिकम् । लिङ्गपुंवद्भावप्रतिषेधार्थं तु *। लिङ्गपुंवद्भावप्रतिषेधार्थस्तु णकारः कर्तव्यः । लिङ्गार्थम् । वैदी । पुंवद्भावप्रतिषेधार्थम् । वैदी स्थूणा ऽस्य वैदीस्थूणः । वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो यथा स्यात् ॥

रैवतिकादिभ्यश्छ ॥ १२९ ॥ कौपिञ्जलहास्तिपदादण् * । कौपिञ्जलहास्तिपदादण् वक्तव्यः । कौपिञ्जलः । हास्तिपदः । आथर्वणिकस्येकलोपश्च * । आथर्वणिकस्येकलोपश्चाण्वक्तव्यः । आथर्वणो धर्मः । आथर्वण आम्नायः । इदमाथर्वणार्थमाथर्वणिकार्थं च चतुर्ग्रहणं क्रियते । वसन्तादिषु अथर्वन्शब्द आथर्वणशब्दश्च पठ्यते । षष्ठे अध्याये प्रकृतिभावार्थं ग्रहणं क्रियते । इदं चतुर्थमिकलोपार्थं द्विग्रहणं शक्यमकर्तुम् । कथम् । तेन प्रोक्तमिति प्रकृत्य ऋषिभ्यो लुग्वक्तव्यः । वसिष्ठोऽनुवाको विश्वामित्रोऽनुवाक इत्येवमर्थम् । ततो वक्तव्यम् । अथर्वणो वेति । तेन सिद्धमथर्वा इति । आथर्वण इति च । अथ वसन्तादिष्वाथर्वणशब्दः पठितव्यस्तत्र च नार्थः प्रकृतिभावार्थेन नापि इकलोपार्थेन । यदि वसन्तादिष्वाथर्वणशब्दः पठ्यते । अथर्वाणमधीते आथर्वणिक

दयति षष्ठ्यन्तमात्र प्रकृतित्वेन विवक्षितं तत्प्रतियोगिमात्रं च प्रत्ययार्थत्वेन यत्त्वपरं लिङ्गसंख्याप्रत्यक्षपरोक्षादिकं तदविवक्षितम ॥ १२० ॥

सङ्घाङ्क ॥ घोषग्रहणमिति । घोषे ऽपि प्रत्ययः सिध्यति । वैषम्याच्च यथासंख्यं न भवति । लिङ्गेति । लिङ्गविहितप्रत्ययो लिङ्गशब्देनोच्यते ॥ १२७ ॥

रैवति ॥ अपाणिनीयःसूत्रेषु पाठ इत्याह कौपिञ्जलेति गोत्रे वुञि प्राप्ते ऽण्विधिः । अस्मादेव निपातनादपत्यार्थे कपिञ्जलहस्तिपादशब्दाभ्यामण् पादस्य पद्भावश्च । गोत्राधिकाराद् गोत्रप्रत्ययान्तादिदं विधानम् । अण्वक्तव्य इति । कौपिञ्जलहास्तिपदादणित्यस्यापाणिनीयत्वात् । ऋषिभ्यो लुगिति । वसिष्ठादिशब्दसिद्धये अवश्यवक्तव्यो लुक न त्वसत्यस्मिन् सूत्रे आथर्वणिकानां धर्म आम्नायो वेत्यत्रार्थे आथ-

Indira Gandhi National Centre for the Arts

इति न सिध्यति। नैष दोषः। इहास्माभिस्त्रैशब्द्यं साध्यम्। अथर्वाणमधीते आथर्वणिक इति। तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः। अपरस्मादुत्पत्तिर्भविष्यति। अव्यविकन्यायेन। तद्यथा। अवेर्मांसमिति विगृह्याविकशब्दादुत्पत्तिर्भवति आविकमिति। एवमाथर्वणमधीतइति विगृह्य आथर्वणिक इति भविष्यति। अथर्वाणमधीतइति विगृह्य वाक्यमेव भविष्यति। तत्राभिसंबन्धमात्रं कर्तव्यम्। आथर्वणिकानामिदमिति। न चेदानीमन्यदाथर्वणिकानां स्वं भवितुमर्हति अन्यदतो धर्मादाम्नायाद्वा॥

तस्य विकारः॥ १३२॥ तस्येति वर्त्तमाने पुनस्तस्यग्रहणं किमर्थम्। तस्यप्रकरणे तस्य पुनर्वचनं शैषिकनिवृत्त्यर्थम् *। तस्यप्रकरणे तस्य पुनर्वचनं क्रियते। शैषिकनिवृत्त्यर्थम्। शैषिका निवर्त्तन्ते। कथं च प्राप्नुवन्ति। तस्येदं वचनात् प्रसङ्गः*। तस्येदंविशेषा ह्येते। अपत्यं समूहो निवासो विकार इति। किमर्थमिदमुच्यते। बाधनार्थं कृतं भवेत्॥ ये तस्य बाधकास्तद्बाधनार्थम्। कथं पुनरशैषिकं बाधेत। उत्सर्गः शेष एवासौ॥ यो ह्युत्सर्गः सोपि शेष

षर्णशब्दो न सिध्यतीत्याह तत्रेति। यदेवाथर्वणा प्रोक्तमाथर्वणं शास्त्रं तदेवाथर्वणिकानामाम्नायो न तु तेषामाम्नायान्तरमाथर्वणशब्दवाच्यं धर्मस्तु आथर्वणसादृश्यादाथर्वणशब्देनाभिधास्यते। न चेदानीमिति। चरणाद्धर्माम्नाययोरिति वचनादर्थान्तरं प्रत्ययाभावादित्यर्थः॥ १३६॥

तस्य विकारः। शैषिकनिवृत्त्यर्थमिति। विकारावयवयोर्मा भूवन्नित्येवमर्थं तस्यग्रहणमित्यर्थः। कथं चेति। किमधिकारात् प्राप्नुवन्ति। अथ तस्येदमिति वचनात्। यद्यधिकारात् प्राप्तानां तस्यग्रहणेन निवृत्तिः क्रियते तदा पुनरपि तस्येदमित्यनेन प्राप्नुवन्ति। अथ तस्येदमित्यनेन प्राप्तानां तस्यग्रहणेन निवृत्तिः क्रियते। तदासौ नोपपद्यते उत्तरार्थत्वादस्य योगस्य तत्रैव चरितार्थत्वादिति प्रश्नः। तस्येदंवचनादिति। तस्यग्रहणं घादिसम्बद्धस्य तस्यग्रहणस्य निवर्त्तकं घादीनपि निवर्त्तयति। तन्निवर्त्तनसामर्थ्यात्तस्येदमित्यनेनापि विकारावयवयोर्घादयो न भवन्ति। अन्यथा तन्निवर्त्तनमनर्थकं स्यादित्यर्थः। प्राग्दीव्यत इत्यवधिविशेषाश्रयेण त्वणादीनामधिकारादणादय इहसम्बध्यन्तइति विपर्ययोऽत्र न चोदनीयः। घादयोऽनुवर्त्तन्ताम् अणादयो मानुवर्त्तन्तामिति। किमर्थमिति। सर्वस्यैव सूत्रस्याक्षेपः। बाधनार्थमिति। तस्येदमित्यत्राणादयो घादयश्चाणाद्यपवादा विहिताः तत्र विकारावयवयोरणादय एव यथा स्युस्तदपवादा घादयो मा भूवन्निति एवमर्थमिदमुच्यते। ये तस्येति। अण इत्यर्थः। कथं पुनरिति। तस्येदमित्यस्मात्तस्य विकार इत्यस्य पृथग्निर्देशादनेन विधीयमानोऽणप्रत्ययोऽशैषिकः कथं विकारेऽप्राप्तान् घादीन् बाधतइति प्रश्नः। उत्सर्ग इति। असत्यस्मिन् पृथक् सूत्रे विकारोपि तस्येदमित्यत्रान्तर्भावाच्छेषो भवतीति घादयः प्राप्नु-

Indira Gandhi National Centre for the Arts

एव । के पुनः शैषिकाणां विकारावयवयोः प्राप्नुवन्ति । यावता सर्वमप्यपवादैर्व्याप्तम् । इह न किं चिदुच्यते । हलसीराट् ठगिति । कथं पुनरिच्छताप्यपवादः प्राप्नुवन् शक्यो बाधितुम् । तस्यग्रहणसामर्थ्यात् । किमिदं भवानध्यारुह्य तस्यग्रहणस्यैव प्रयोजनमाह । न पुनः सर्वस्यैव योगस्य । अवश्यमुत्तरार्थोऽर्थनिर्देशः कर्त्तव्यः । समर्थविभक्तिरपि तर्ह्यवश्यमुत्तरार्था निर्देष्टव्या । प्रकृता समर्था विभक्तिरनुवर्त्तते तस्येदमिति । न वा संप्रत्ययः * । न वा संप्रत्यय इयता सूत्रेण शैषिकाणां निवृत्तेः । न वा काको वाश्यत इत्येवमधिकारा निवर्त्तन्ते । यदि खल्वपि विकारावयवयोः शैषिका नेष्यन्ते । महता सूत्रेण निवृत्तिः कर्त्तव्या ।

अवयवे चाप्राण्योषधिवृक्षेभ्योऽनिवृत्तिः * । अवयवे चाप्राण्योषधिवृक्षेभ्योऽनिवृत्तिरिष्टा तत्र निवृत्तिः प्राप्नोति । पाटलिपुत्रकाः प्राकाराः । पाटलिपुत्रकाः प्रासादा इति । अण्मयटोश्च विप्रतिषेधानुपपत्तिः मयडुत्सर्गात् * । अण्मयटोश्च विप्रतिषेधो नोपपद्यते । पठिष्यति हि विप्रतिषेधम् । अणो वृद्धान्मयडिति स विप्रतिषेधो नोपपद्यते । किं कारणम् । मयडुत्सर्गात् । निवर्त्तमानेषु शैषिकेषु वृद्धान्मयडुत्सर्गः तस्याणपवादः । उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः । अनुवृत्तौ हि छस्योत्सर्गापवादविप्रतिषेधान्मयट् * । अनुवर्त्तमानेषु शैषिकेषु वृद्धाच्छ उत्सर्गः । तस्याण्मयटावपवादौ । अपवादविप्रतिषेधान्मयड् भविष्यति ।

वन्ति । उत्सर्गत्वं विकारस्य प्रकृतिविशेषासंबन्धादसति हि योगविभागे बिल्वादिभ्योऽण् विकार इति वक्तव्यम् । तत्र प्रकृतिविशेषसंबद्ध एव विकार उपयुक्तत्वादशेषः स्यात् । प्रकृतिमात्रसंबद्धस्त्वनुपयोगाच्छेष एव स्यात् । सति तु योगविभागे विकारस्यापि अणिवधावुपयोगादशेषत्वाद् घादीनामप्राप्तिः । अप्राप्त्यनुमानमेव बाध इति भावः । के पुनरिति । शैषिकाणामिति निर्द्धारणे षष्ठी । अपवादैरिति । वक्ष्यमाणैरणारणादिभिरित्यर्थः । हलसीरादिति । हलशब्दो नविषयस्यानिसन्तस्येत्याद्युदात्तः सीरशब्दोऽपि कृन्नन्तो निस्वात् । ततश्चैताभ्यां विकारे न कश्चिदणपवादोऽस्तीति ठकं बाधित्वाणैव भवति हालः सैर इति । कथं पुनरिति । हलसीराट्ठगित्ययमण एवापवादः कथमणैव शक्यो बाधितुं योगस्तूत्तरार्थ एव स्यादिति प्रश्नः । तस्यग्रहणसामर्थ्यादिति । बाधकबाधनार्थादणः पुनर्विधानादित्यर्थः । तस्यग्रहणमेवानन्यार्थमिति तत्सामर्थ्यादित्युक्तम् । इदमर्थाद्धिकारस्योत्कर्षो बाधकबाधनार्थ एवेत्यर्थः । न वेति । घादीनां प्राधान्यात्तस्यग्रहणे गुणे प्राक्तने निवर्त्तमाने ऽपि निवृत्तिर्न शक्यते प्रतिपादयितुं न हि गुणानुयायि प्रधानं भवति । अवयवे अर्थो घादीनां निवृत्तत्वादप्राण्योषधिवृक्षेभ्योऽप्रसङ्ग इत्यर्थः । पाटलिपुत्रका इति । पाटलिपुत्रस्यावयवा इति तस्येदमित्यर्थे रोपधेतोः प्राचामिति वुञ् । मयडुत्सर्गादिति । मयडुत्सर्गः शैषिकेषु निवृत्तेषु सामान्येन विधानमित्यर्थः । अप्राप्त एव वृद्धाच्छे नित्यं वृद्धेति मयडारम्भात् । अनुदात्तादेरित्ययमवृद्धेषु कृतार्थस्तत्राविशेषादञ्मयटोः कोपधाच्चेत्ययमपवादोऽणिति शाकमयमित्यत्र मयट् न ल-

Indira Gandhi National Centre for the Arts

यत्तावदुच्यते न वा संप्रत्यय इयता सूणेत्र शैषिकाणां निवृत्तेरिति संप्रत्यय एव। न ह्यत्राण् दुर्लभः। सिद्धोत्राण्। तस्येदमित्येव। सोयं पुनस्तस्यग्रहणेन सापवादस्याणः प्रसङ्गे इमं निरपवादकमणं प्रतिपादयति तत्र ये तावद् द्वितीयास्तानपवादत्वाद्बाधिष्यन्ते। तृतीयास्तान् परत्वात्। ये चतुर्थास्तत्र केचित्पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते इत्येवमिमं न बाधिष्यन्ते। केचिन्मध्ये ऽपवादाः पूर्वान् विधीन् बाधन्तइति। एतावन्तश्चैते स्युः यदुत द्वितीयास्तृतीयाश्चतुर्था वा न पञ्चमाः सन्ति न षष्ठाः। यदप्युच्यते। अवयवे च प्राण्योषधिवृक्षेभ्यो निवृत्तिरिति। प्राण्योषधिवृक्षेभ्यो निवृत्तिरुच्यते। तत्र कः प्रसङ्गो यदप्राण्योषधिवृक्षेभ्यो निवृत्तिः स्यात्। यदप्युच्यते। अण्मयटोश्च विप्रतिषेधानुपपत्तिर्मयडुत्सर्गादिति। मा भूद्विप्रतिषेधः। पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते इत्येवमणञ्ं बाधिष्यते मयटं न बाधिष्यते॥

अवयवे च प्राण्योषधिवृक्षेभ्यः॥ १३५॥ किमर्थं विकारावयवयोर्युग-

---

भ्यतइत्यर्थः। अपवादविप्रतिषेधादिति। शाकशब्दाच्छापवादयोरण्मयटोः परत्वान्मयट् सिध्यतीत्यर्थः। इदानीं भाष्यकारः सूत्रेणैवेष्टसिद्धिं प्रतिपादयितुमाह यत्तावदिति। इदमिति। घादीनामिह निवृत्तत्वादयमण् निरपवादः, घाद्यनुवृत्तौ हि योगविभागोनर्थकः स्यात्तस्येदमित्यनेनैव विकारेप्यणादीनां घादीनां च सिद्धत्वात्। तत्रेति। यथा हलसीराट्ठगित्याणि ठग्विधीयमानो द्वितीयो भवति तमपवादत्वादयमण् बाधते तृतीयकञ्चाप्राप्तः। ये तृतीयस्थाने प्राप्तत्वादस्याणस्तुल्यकक्ष्यत्वात्परत्वाद् बाध्या यथा वृजीनां विकार इति तस्येदमित्यण् प्रथमः। अवृद्धादपीति वुञ् द्वितीयः। मद्रवृज्योः कन्निति तृतीयोनेन बाध्यते। वार्ज इति। वृजिशब्दस्य फिट्सूत्रेषु विकल्पेनोदात्तत्वविधानात् पक्षे आद्युदात्तत्वादण्। पक्षे अनुदात्तादेश्चेत्यञ्। ये चतुर्था इति यथा त्रिगर्तानां विकारः त्रैगर्त इति त्रिगर्तशब्दो बहुव्रीहिः पूर्वपदप्रकृतिस्वरेणाद्युदात्तः। तत्राण् प्रथमः। जनपदलक्षणो वुञ् द्वितीयः। गर्त्तोत्तरपदलक्षणश्छस्तृतीयः। तदवधिग्रहणविहितो वुञ् चतुर्थः। केचिन्मध्य इति। यथा रङ्कूणां विकारो राङ्कव इत्यत्राण् प्रथमः तदपवादयोरवृद्धादपीति ओर्देश ठञिति वुञ्ठञोस्तुल्यकक्षयोरन्यतरो द्वितीयः। ततः कोपधादणिति वा कच्छादिपाठाद्वाण् तृतीयः। मनुष्यतत्स्थयोर्वुञिति चतुर्थः पूर्वमेवाणं बाधते न तु विकाराणं बाधते। तेनैव तु परत्वाद्वुञ् बाध्यते। तत ओरञित्यञि प्राप्ते कोपधाच्चेत्यण् प्रतिप्रसूयते। न पञ्चमा इति। शैषिका इति शेषः। अन्यथा प्रावृषो विकारः प्रावृण्मयः इति मयडस्त्वेवात्राण् प्रथमः। तदपवादः कालाट्ठञिति द्वितीयः ऋत्वण् तृतीयः। प्रावृष एण्य इति चतुर्थः। विकाराण् पञ्चमः। नित्यवृद्धेति मयट् षष्ठो भवति। यदपीति। अवयवे च प्राण्योषधिवृक्षेभ्य इति प्रकृतिविशेषाद्विधीयमानोण् तस्मादेव शैषिकाणां बाधको न तु प्रकृत्यन्तरात् स्वयमेवाभावादित्यर्थः। अञमिति। ओरञ् अनुदात्तादेश्चेति सूत्रद्वयविहितं कोपधाच्चेत्यण् बाधिष्यते न तु मयटम्। मयटैव तु परत्वादण् बाधिष्यतइत्यर्थः॥ १३२॥

अवयवे॥ कृतनिर्देशौ ह्येताविति। यद्यपि शैषिकनिवृत्त्यर्थत्वमुक्तं तथापि तदनपेक्ष्य

Indira Gandhi National Centre for the Arts

गपदधिकारः क्रियते । विकारावयवयोरुक्तम् * । किमुक्तम् । तत्र तावदुक्तम् । अत्रव्याख्यानयोर्युगपदधिकारोऽपवादविधानार्थः । कृतनिर्देशौ हि ताविति । इहापि विकारावयवयोर्युगपदधिकारोपवादविधानार्थः कृतनिर्देशौ ह्येतावर्थौ तस्येदमिति ॥

बिल्वादिभ्योण् ॥ १३६ ॥ किमर्थं बिल्वादिषु गवीधुकाशब्दः पठ्यते । न कोपधादित्येव सिद्धम् । बिल्वादिषु गवीधुकाग्रहणं मयट्प्रतिषेधार्थम् * । बिल्वादिषु गवीधुकाग्रहणं क्रियते मयट्प्रतिषेधार्थम् । मयडतो मा भूदिति ॥

अनुदात्तादेश्च ॥ १४० ॥ अनुदात्तादेरञोविधाने आद्युदात्तान्ङीष उपसंख्यानम् * । अनुदात्तादेरञो विधाने आद्युदात्तान्ङीष उपसंख्यानं कर्तव्यम् । कुवली । कौवलम् । बदरी । बादरम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । निघाते कृते ऽनुदात्तादेरित्येव सिद्धम् । न सिध्यति । किं कारणम् । पदस्य ह्यनुदात्तादित्वम् * । पदस्य हि निघातः । सुबन्तं च पदम् । ङ्याप्प्रातिपदिकाच्च प्रत्ययो विधीयते । न वा समर्थस्यानुदात्तादित्वात् * । न वा वक्तव्यम् । किं कारणम् । समर्थस्यानुदात्तादित्वात् । समर्थमनुदात्तादित्वेन विशेषयिष्यामः । नैवं शक्यम् । इह च प्रसज्येत । वाचो विकारः । त्वचो विकार इति । एतद्धि समर्थमनुदात्तादि । इह च न स्यात् । सर्वेषां विकारः सर्वइति । तस्मान्नैवं शक्यम् । न चेदेवमुपसंख्यानं कर्त्तव्यम् । न कर्त्तव्यम् । आचार्यप्रवृत्तिर्ज्ञापयति । यावत्येव द्वितीयस्य स्वरस्य प्रादुर्भावस्तावत्येव पूर्वस्य निघात इति । यदयं भिक्षादिगणे गर्भिणीशब्दं पठति । कथंकृत्वा ज्ञापकम् । भिक्षादिषु गर्भिणीशब्दस्य पाठे एतत्प्रयोजनम् । अनुदात्तादिलक्षणोऽञ्‌ मा भूदिति । यदि पदस्य निघातः । गर्भशब्दोयमाद्युदात्तस्तस्मादिनिरिन्नन्ताद्यः प्रत्ययः प्राप्नोति स तावत्स्यात् । तस्मिन्नवस्थिते निघातस्तत्र कोऽनुदात्तादिलक्षणस्याञः प्रसङ्गः ।

क्वचित्तावदणादयस्सिद्धाः भास्मनं मार्तिकमित्यादावित्यभिसंम्बन्धायैतदुक्तम् १३५ ।

अनु ॥ कुवलीति । कुवलबदरशब्दौ ग्रामादीनां चेत्याद्युदात्तौ ताभ्यां गौरादित्वान्ङीष् । पदस्येति । अनुदात्तं पदमेकवर्जमिति वचनादिह चानुदात्तादिग्रहणस्य ङ्याप्प्रातिपदिकविशेषणत्वात् । यथोक्तम् । वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे च प्रत्ययविधौ तत्संप्रत्ययार्थमिति । न वेति । विभक्त्युत्पत्तौ सत्यां ङ्यन्तस्यानुदात्तादित्वं मन्यते । न च वृद्धावृद्धेत्यनेन विरोधः । समर्थावयवस्य ङ्याप्प्रातिपदिकस्य वृद्धादिविशेषणत्वेनाश्रयणात् । एतद्धीति । सावेकाच इति विभक्तेरुदात्तत्वात् प्रातिपदिकयोस्तु धातुस्वरेणान्तोदात्तत्वम् । सर्वशब्दश्च सर्वस्य सुपीति सुप्याद्युदात्तः । केवलस्त्वयमुणादिष्वन्तोदात्तो निपातित इत्यनुदात्तादिः । तस्माद्विभक्त्युत्पत्तेः प्रागनुदात्तादित्वमाश्रयणीयम् । पूर्वस्य निघात इति । प्राग् व्यवस्थितस्य निघात इत्यर्थः । गर्भशब्द इति ।

Indira Gandhi National Centre for the Arts

पश्यति त्वाचार्यः । यावत्येव द्वितीयस्य स्वरस्य प्रादुर्भावस्तावत्येव पूर्वनिघात इति। अतो भिक्षादिषु गर्भिणीशब्दं पठति। पदग्रहणं किमर्थम्। पदग्रहणं परिमाणार्थम् * । पदग्रहणं क्रियते। परिमाणार्थं पदावधेर्यथा स्यात्। वाक्यस्य मा भूत्। अनुदात्तं पदमेकवर्जमिति ॥

मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ॥ १४३ ॥ किमर्थं मयड्वैतयोरित्युच्यते। मयड्वैतयोरिति वचनमपवादविषये ऽनिवृत्त्यर्थम् * । मयड्वैतयोरित्युच्यते अपवादविषये ऽनिवृत्तिर्यथा स्यादिति। बिल्वमयं बैल्वम्। एतयोरित्यर्थनिर्देशः * । एतयोरित्यर्थनिर्देशो द्रष्टव्यः। तद् द्रैष्यं विजानीयात्। योगयोर्वा प्रत्यययोर्वेति। तदाचार्यः सुहृद्भूत्वाऽन्वाचष्टे । एतयोरित्यर्थनिर्देश इति ॥

ञितश्च तत्प्रत्ययात् ॥ १५५ ॥ किमर्थमिदमुच्यते विकारावयवयोर्विकारावयवयुक्तत्वान्मयट्प्रतिषेधार्थं ञितश्च तत्प्रत्ययादञो विधानम् * । विकारो विकारेण युज्यते अवयवश्चावयवेन। विकारावयवयोर्विकारावयवयुक्तत्वान्मयट् प्राप्नोति। इष्यते चाञेव स्यादिति। तच्चान्तरेण यत्नं न सिद्ध्यतीति मयट्प्रतिषेधार्थं ञितश्च तत्प्रत्ययादञ्विधानम्। एवमर्थमिदमुच्यते। न वा दृष्टो ह्यवयवे समुदायशब्दो विकारे च प्रकृतिशब्दः । तस्मान्मयडभावः । न चैतत्प्रयोजनमस्ति। किं कारणम्। दृष्टो ह्यवयवे समुदायशब्द, स्तद्यथा। पूर्वे पञ्चालाः। तैलं भुक्तम्। घृतं भुक्तम्। शुक्लो नीलः कृष्ण इति। विकारे च प्रकृतिशब्दो दृश्यते। तद्यथा शालीन् भुङ्क्ते मुद्गैः शालिविकारान्मुद्गविकारैरिति। तस्मान्मयडभावः। तस्मान्मयडभावो भविष्यति। नैतद्विवदामहे। अवयवे समुदायशब्दोस्ति नास्तीति। विकारे वा प्रकृतिशब्द इति। किं तर्हि विकारावयवशब्दोस्ति ततउत्पत्तिः

र्तिगृभ्यां मन्निति प्रत्ययस्य नित्वात्। पदग्रहणमिति। यस्य पदत्वं भविष्यति तस्यैवैकवर्जमनुदात्तं यथा स्यात् पदसमूहस्य मा भूदित्येवमर्थं पदग्रहणमित्यर्थः ॥ १४० ॥

मयट् ॥ किमर्थमिति। विकारावयवौ प्रकृतावेवेति भावः। मयडिति। एतयोरित्येस्मिन् सति पुनर्विधानं मयटो भवति तच्चापवादविषये पि प्राप्त्यर्थं संपद्यते। योगयोर्वेति। योगयोः प्रत्यययोर्वा विषये मयडित्यर्थः स्यादित्यर्थः ॥ १४३ ॥

ञितश्च तत्प्रत्यय त् ॥ तयोर्विकारावयवयोर्यो ञित्प्रत्ययः तदन्ताद्विकारावयवयोरेवाञ् भवतीति सूत्रार्थः। किमर्थमिति। अन्तरेणापि सूत्रं सिद्धिं मत्वा प्रश्नः। विकारावयवयोरिति। कपोतस्य विकारो यत् मांसं कापोतं तस्यापि विकारो रसो भवति कापोतावयवस्य सक्थ्यादेः कापोतस्यावयवोन्यो भवतीति वृद्धत्वान्मयट्प्रसङ्गे तन्निवृत्त्यर्थमञ्विधानमित्यर्थः। नवेति। यदा कपोतावयवस्य सक्थ्यादेरवयवो विवक्ष्यते तदा कपोतशब्दादेव सक्थ्याद्यवयववृत्तेरञ् भविष्यति। कपोतविकारमांसवृ-

Indira Gandhi National Centre for the Arts

प्राप्नोति । विकारावयवशब्दात्प्रसङ्ग इति चेन्न तेनानभिधानात् * । विकारावयवशब्दात् प्रसङ्ग इति चेत्तन्न । किं कारणम् । तेनानभिधानात् । न हि विकारावयवशब्दादुत्पद्यमानेन प्रत्ययेनार्थस्याभिधानं स्यात् । अनभिधानात्तत उत्पत्तिर्न भविष्यति । तच्चावश्यमनभिधानमाश्रयितव्यम् । अभिधाने ह्यन्यतो मयट्प्रसङ्गः * । अभिधाने सत्यन्ततोपि मयट् प्रसज्येत । बैल्वस्य विकार इति । तस्मात्तत्प्रत्ययान्ताल्लुग्वचनम् * । तस्मात्तत्प्रत्ययान्ताल् लुग्वक्तव्यः । यदि लुगुच्यते । कथं गौमयं भस्म द्रौवयं मानम् । कापित्थो रस इति । अन्यत्र गोमयाद् द्रवयात् फलाच्च लुग्वक्तव्यः । इह तर्हि औष्ट्रकी । अञन्तादितीकारो न प्राप्नोति । इष्टमेवैतत्संगृहीतम् औष्ट्रिकेत्येव भवितव्यम् । इह हि सौनागाः पठन्ति । वुञश्चाञ्कृतप्रसङ्ग इति । इह तर्हि पालाशी समिदित्यनुपसर्जनलक्षण ईकारो न प्राप्नोति । मा भूदेवम् । अञ् योनुपसर्जनमिति । अञन्तादनुपसर्जनादित्येवं भविष्यति । नैवं शक्यम् । इह हि दोषः स्यात् । काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणीति । अणन्तादितीकारः प्रसज्येत । तस्मादस्तु न तेनानभिधानादित्येव । इह तर्हि कापोतो रस इति प्राणिशब्दो नोपपद्यते । नैष दोषः । इदं तावदयं प्रष्टव्यः । योसावाद्यः कपोतः सलोमकः सपक्षः न च संप्रति प्राणिति । कथं तत्र प्राणिशब्दो वर्त्ततइति । अथ मतमेतत् । प्रकृत्यन्वया विकारा भवन्तीति । इहापि न दोषो भवति ॥

त्तेश्च कपोतशब्दान्मांसविकारे रस इत्यर्थः । तेनेति । मयटः कापोतमयमिति विकारावयवयोः प्रयोगाभावादित्यर्थः । तस्मादिति । यद्यनभिधानं नाश्रीयते तदा ञितश्च तत्प्रत्ययादिति सूत्रमपनीय बैल्वमयादिनिवृत्त्यर्थं तत्प्रत्ययाल्लुगिति वक्तव्यम् । अन्यत्रेति । गोश्च पुरीष इति विकारे प्रत्ययं मन्यते । यदा तु पुरीषं नावयवो नापि विकारस्तदा गोर्मयट् तत्प्रत्यय एव न भवतीति लुकः प्रसङ्ग एव नास्ति । द्रुवयवशब्दो द्रोर्विकार इति माने वय इति वयप्रत्ययान्तः । एताभ्यामनुदात्तादिलक्षणोञ् । औष्ट्रकीति । वृद्धलक्षणस्य मयटो लुकि कृतेञन्तत्वाभावादीकाराप्रसङ्गः । वुञश्चेति । पाणिनीयलक्षणे दोषोद्भावनमेतत् । पालाशीति । पलाशस्य विकारः । पलाशादिभ्यो वेति पक्षे ऽञ् कृदन्ताद्विकारे मयटो लुकि ईकाराप्रसङ्गः। पाणिनीयलक्षणे त्वञन्तादञि सतीकारः सिध्यति। काशकृत्स्नेति। अणन्तस्य स्त्रियामध्येत्र्यामनुपसर्जनत्वादीकारप्रसङ्गः। तस्मादिति। यस्माल्लुकि पालाशीति न सिध्यति तस्मादनभिधानान्मयटोनुत्पत्तिराश्रयितव्या । केषांचित्तु ग्रन्थः । नैष दोषः । अध्येत्र्यामभिधेयायामण ईकारेण भवितव्यम् । यथाध्येत्र्यां वर्त्तते लुप्तः सः यश्च श्रूयते उत्पन्नस्तस्मादीकः । अथ वा पुनरस्तु न तेनानभिधानादिति । अनेन यद्यपि काशकृत्स्ना परिहृता तथाप्यापिशला न परिहृता भवति । पालाश्यापिशले न संवदेते तस्मादस्तु न तेनानभिधानादित्येष पाठो युक्तः । इह तर्हीति । उद्गतप्राणे मांसे प्राणिवाचिनः कपोतशब्दस्य वृत्तिः । सत्यां चावृत्तौ प्राणिवाचित्वाभावाद्रसे मांसविकारे कापोतशब्दो

Indira Gandhi National Centre for the Arts

क्रीतवत्परिमाणात् ॥ १५६ ॥ कथमिदं विज्ञायते । क्रीते ये प्रत्यया विहितास्ते भवन्ति परिमाणाद्विकारावयवयोरिति । आहो स्वित्परिमाणात् क्रीते ये प्रत्यया विहितास्ते भवन्ति विकारावयवयोरिति । किं चातः । यदि विज्ञायते क्रीते ये प्रत्यया विहितास्ते भवन्ति परिमाणाद्विकारावयवयोरिति प्रत्ययमात्रं प्राप्नोतीति । अथ विज्ञायते परिमाणात् क्रीते ये प्रत्यया विहितास्ते भवन्ति विकारावयवयोरिति प्रकृतिमात्रात् प्राप्नुवन्ति । तस्मात्, क्रीतवत्परिमाणादङ्गं च * । अङ्गं च क्रीतवद्भवतीति वक्तव्यम् । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । क्रीतवदिति वतिनिर्देशोयम् । यदि च याभ्यः प्रकृतिभ्यो येन विशेषणेन क्रीते प्रत्यया विहितास्ताभ्यः प्रकृतिभ्यस्तेनैव विशेषणेन परिमाणाद्विकारावयवयोरपि भवन्ति । ततोऽमी क्रीतवत् कृताः स्युः । अथ हि प्रकृतिमात्राद्वा स्युः प्रत्ययमात्रं वा स्यान्नामी क्रीतवत्कृताः स्युः । अणो वृद्धान्मयट् * । अणो वृद्धान्मयडिसेतद्भवति विप्रतिषेधेन । अणोवकाशः । तित्तिडिक । तैत्तिडिकम् । मयटोऽवकाशः । काष्ठमयम् । इहोभयं प्राप्नोति । शाकमयम् । ओरञोनुदात्तादेरञश्च * । ओरञोनुदात्तादेरञश्च मयड् भवति विप्रतिषेधन । ओरञोवकाशः । अरडु । आरडवम् । मयटः स एव । इहोभयं प्राप्नोति । दारु । दारुमयम् । अनुदात्तादेरञ्भवतीत्यस्यावकाशः । कुवल । कौवलम् । जरद्वृक्ष । जारद्वृक्षम् । मयटः स एव । इहोभयं प्राप्नोति । आम्रमयम् । मयटः प्राण्यञ्विप्रतिषेधेन * । मयटः प्राण्यञ्भवति विप्रतिषेधेन । प्राण्यञोऽवकाशः । गृध्र, गार्ध्रम् । मयटः स एव । इहोभयं प्राप्नोति । चाषम् । भासम् । प्राण्यञ्भवति विप्रतिषेधेन । न वानव-

---

न सिध्यतीति चोद्यम् । कथं तत्रेति । तत्रापि लोके कपोतशब्दो दृश्यतइति प्रश्नः । प्रकृत्यन्वया इति । प्रकृतेरन्वयो येषु ते प्रकृत्यन्वयाः । प्रकृतिरेव विकाररूपतामापद्यमाना विकारावस्थायामपि क चित्प्रकृतिशब्देनाभिधीयत इत्यर्थः ।

क्रीतव ॥ प्रत्ययमात्रमिति । मुद्गैः क्रीतं मौद्गिकमिति क्रीते ठञ्विहित इति शूर्पस्य विकार इत्यत्रापि प्राप्नोति । प्रकृतिमात्रादिति । शूर्पादञन्यतरस्यामित्यञ्ठञौ हलस्य विकार इत्यत्रापि प्राप्नुतः । अङ्गं चेति । कालेभ्यो भववदित्यत्र यदुक्तं सिद्धं तूभयनिर्देशादिति । तदेवानेन प्रतिपाद्यते । अङ्गग्रहणेन प्रत्यासत्त्या परिमाणमेव गृह्यते । तेनायमर्थो भवति क्रीतार्थे यथा परिमाणमङ्गं यथा च परिमाणात् प्रत्ययस्तथा विकारेपि परिमाणमङ्गं प्रत्ययश्च । तेन यस्मात्परिमाणात् क्रीते यः प्रत्ययस्तस्मादेव स एव विकारेपि भवति । न वक्तव्यमिति । क्रीते परिमाणादित्येवान्यतरविशेषणत्वे परिमाणस्य सिद्धे वतिनिर्देशात्सर्वसादृश्यपरिग्रहार्थादुभयविशेषणं परिमाणग्रहणमर्थाद्भवतीत्यर्थ । अण इति । कोपधाच्चेति विहितात् । कौवलमिति । कुवल्या विकार इत्यर्थेऽञ् । मयटः स एवेति । काष्ठमयमिति । काष्ठशब्दस्याद्युदात्तत्वात् । आम्रमयमिति । आम्रशब्दोमितम्योर्दीर्घश्चेति रगन्तोनुदा-

Indira Gandhi National Centre for the Arts

काशत्वादपवादो मयट् *। न वैष युक्तो विप्रतिषेधः। योयमञो मयटश्च। किं कारणम्। अनवकाशत्वादपवादो मयट्। अनवकाशो मयट् सावकाशमञं बाधिष्यते। स कथमनवकाशः। यद्यनुवर्त्तन्ते शैषिकाः। अथ निवृत्ताः शैषिकाः। वृद्धमाद्युदात्तं मयटोवकाशः। प्राण्यञश्च *। अयं चाप्ययुक्तो विप्रतिषेधः योयं मयटः प्राण्यञश्च। किं कारणम्। अनवकाशत्वादपवादो मयडिसेव। अनवकाशो मयट्। स यथैव ओरञमनुदात्तादेरञं च बाधते एवं प्राण्यञमपि बाधेत। तस्मान्मयड्विधाने प्राणिप्रतिषेधः *। तस्मान्मयड्विधाने प्राणिभ्यः प्रतिषेधो वक्तव्यः। स तर्हि वक्तव्यः। न वक्तव्यः। मध्येऽपवादाः पूर्वान् विधीन् बाधन्तइसेवमयं मयट् ओरञमनुदात्तादेरञं च बाधिष्यते प्राण्यञं न बाधिष्यते। यद्येतदस्ति। मध्ये ऽपवादाः पुरस्तादपवादा इति। मानुवृत्तन् शैषिकाः। पुरस्तादपवादा अनन्तरान् विधीन् बाधन्तइसेवमयमण् अञं बाधिष्यते मयटं न बाधिष्यते। अनुदात्तादेरञः प्राण्यञ्विप्रतिषेधेन *। अनुदात्तादेरञः प्राण्यञ्भवति विप्रतिषेधेन। अनुदात्तादेरञ्भवतीसस्यावकाशः। जारदूवृक्ष। जारदूवृक्षम्। प्राण्यञः स एव। इहोभयं प्राप्नोति। कपोत। कापोतम्। प्राण्यञ्भवति विप्रतिषेधेन। कः पुनरत्र विशेषः। तेन वा सत्यनेन वा। सापवादकः स विधिः। अयं पुनर्निरपवादः। यदि तेन स्याद् इह न स्यात्। श्वाविधो विकारः शौवाविधम्॥

त्तादिः। गार्ध्रमिति। गृध्रस्य विकार इत्यर्थः। नवेति। ओरञोनुदात्तादेरञश्चेति य उक्तो विप्रतिषेधस्तन्निराकरोति यद्यनुवर्त्तन्तइति। तस्य विकार इत्यत्र शैषिकाणामनुवृत्तौ छे प्राप्ते मयडारभ्यमाणोन्यपूर्वको भवतीति छस्येवाञोपि बाधइत्यर्थः। एतच्च बाध्यसामान्यचिन्तायां येन नाप्राप्तइति न्यायस्यानवतारादेतन्न्यायानपेक्षयोच्यते। अथेति। तन्निवृत्तौ विध्यन्तरपूर्वको मयड् न भवतीति काष्ठमयादौ सावकाशः परत्वादेवाञं बाधते न त्वपवादत्वादित्यर्थः। प्राण्यञश्चेति। पूर्वत्र विप्रतिषेधाभावेपीष्टसिद्धिर्भवत्येव। दारुमयमाम्रमयमिति। प्राण्याञि तु तदभावे चाषं भासमितीष्टं न सिध्यति मयट्प्रसङ्गात्। तस्मादिति। नित्यं वृद्धशरादिभ्योऽप्राणिन इति वक्तव्यमित्यर्थः। यद्येतदस्तीति। यद्येतदाश्रीयत इत्यर्थः। मानुवृतन्निति। वृत्तेर्द्युद्भ्यो लुङीति वा परस्मैपदम्। पुषादिद्युताद्दाति च्लेरङादेशः। शैषिकाणां निवृत्त्यनुवृत्त्योरपि विप्रतिषेधोपपत्त्या मयटा परत्वात्कोपधलक्षणोण् बाध्यतइत्यर्थः। जरदूवृक्ष इति। जरदूवृक्षशब्दः समासस्वरेणान्तोदात्तत्वादनुदात्तादिः। स एवेति। गार्ध्रमिति। कपोतशब्दो लघावन्तइति मध्योदात्तत्वादनुदात्तादिः। सापवाद इति। मयटा परत्वाद् बाध्यमानत्वात्। अयमिति। अनेन परत्वान्मयटो बाधनात्। श्वाविध इति। श्वानं विध्यतीति क्विप्। नहिवृतीति दीर्घः। कृत्स्वरेणोत्तरपदस्यान्तोदात्तत्वादनुदात्तादित्वम्। अत्र मयडभावात् प्राण्यञ् भवति। द्वारादीनां चेति वृद्धिप्रतिषेधे ऐजागमश्च भवति॥ १५६॥

Indira Gandhi National Centre for the Arts

फले लुक् ॥ १६३ ॥ फले लुग्वचनानर्थक्यं प्रकृत्यन्तरत्वात् * । फले लुग्वचनमनर्थकम् । किं कारणम् । प्रकृत्यन्तरत्वात् प्रकृत्यन्तरमामलकशब्दः फले वर्त्तते । एकान्तदर्शनात् प्राप्नोति । एकान्तदर्शनात्प्रसङ्ग इति चेद् वृक्षे लुग्वचनम्*। एकान्तदर्शनात्प्रसङ्ग इति चेद् वृक्षे लुग्वक्तव्यः। वृक्षोपि हि फलैकान्तः।

लुप् च ॥ १६६ ॥ लुप्प्रकरणे फलपाकशुषामुपसंख्यानम् * । लुप्प्रकरणे फलपाकशुषामुपसंख्यानं कर्त्तव्यम् । व्रीहयः, यवाः, माषा, मुद्गाः, तिलाः ॥ पुष्पमूलेषु बहुलम् * । पुष्पमूलेषु बहुलं लुग्वक्तव्यः । मल्लिका । करवीरम् । बिसम् । मृणालम् । न च भवति पाटलानि मूलानि ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थाध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥

पादश्च समाप्तः ॥

प्राग्वहतेष्ठक् ॥ १ ॥ ठक्प्रकरणे तदाहेति माशब्दादिभ्य उपसंख्यानम् * । ठक्प्रकरणे तदाहेति माशब्दादिभ्य उपसंख्यानं कर्त्तव्यम् । माशब्दिकः । नैत्यशब्दिकः । कार्यशब्दिकः। आहौ प्रभूतादिभ्यः*। आहौ प्रभूतादिभ्यष्ठग्वक्तव्यः । प्रभूतमाह प्राभूतिकः । पार्याप्तिकः । पृच्छतौ सुस्नातादिभ्यः * । पृच्छतौ सुस्नातादिभ्यष्ठग्वक्तव्यः । सौस्नातिकः । सौखरात्रिकः । सौखशायनिकः । गच्छतौ परदारादिभ्यः * । गच्छतौ परदारादिभ्यष्ठग्वक्तव्यः । पारदारिकः । गौरुतल्पिकः ॥

फले ॥ प्रकृत्यन्तरत्वादिति । आमलकादिशब्दः फले न यौगिकः आमलक्या फलमिति किं तर्हि जातिशब्द एवेत्यर्थः । एकान्तदर्शनादिति । आमलक्या अवयवे आमलकं दृश्यते । ततश्च यौगिक एव फले आमलकशब्द इत्यर्थः । फलैकान्त इति । फलमेकान्तो यस्येति बहुव्रीहिः । यदि संबन्धदर्शनाद्यौगिकत्वमामलकशब्दस्य फले व्यवस्थाप्यते तदा संबन्धाविशेषादामलकस्येयमामलकी वृक्ष इति वृक्षावयविनि ठक्प्रत्ययमुत्पाद्य लुग्विधेयः । तस्मादुभयत्राप्यामलकादयो जातिशब्दा एव स्वभावतो वर्तन्ते इत्यभ्युपगन्तव्यमित्यर्थः ॥ १६३ ॥

लुप् च ॥ फलपाकशुषामिति । फलपाकेन ये शुष्यन्ति व्रीह्यादयस्तद्वाचिनामित्यर्थः । व्रीहय इति । बिल्वाद्यण् । यवा माषा इति । तृणधान्यानां च द्व्यषामित्याद्युदात्तत्वादौत्सर्गिकोण् । मुद्गशब्दाद् बिल्वाद्यण् । पाटलानीति । पाटलिशब्दो बिल्वादिः ॥ १६६ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे चतुर्थस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

प्राग्वहतेष्ठक् ॥ तदाहेति । तादिति कर्ममात्रं निर्दिश्यते । न तु द्वितीयासमर्थविभक्तिः । आहौ प्रभूतादिभ्य इत्यतो भेदेन वचनात्तेन पदसमुदायादयं प्रत्ययः । माशब्द इत्याह माशब्दिकः । नित्यः शब्द इत्याह नैत्यशब्दिकः । तत्र पदसमुदायार्थ इतिनाप्रत्यवमृश्यमानो वचनक्रियासंबन्धात्कर्म संपद्यते । अप्रातिपदिकत्वात्तु द्वितीयानुत्पत्तिः । प्रभूतमाहेति । क्रियाविशेषणत्वात्कर्मत्वम् । पृच्छताविति । तिङन्तानुकरणमेतत् । तत्र शब्दे कार्यासंभवात्तिङन्तार्थे ठग्विधिः ॥ १ ॥

Indira Gandhi National Centre for the Arts

आकर्षात् ष्ठल् ॥ ६ ॥ इह केषां चित्सांहितिकं षत्वम्। केषां चित्षिदर्थम्। तत्र न ज्ञायते केषां सांहितिकं षत्वं केषां षिदर्थमिति। किमत्र न्याय्यम्। परिगणनं कर्तव्यम्। आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च ॥ आवसथात्किसरादेः षितः षडेते ठगधिकारे ॥ १ ॥

विभाषा विवधात् ॥ १७ ॥ वीवधाच्चेति वक्तव्यम्। वैवधिकः।

त्रेर्मम्नित्यम् ॥ २० ॥ नित्यग्रहणं किमर्थम्। विभाषा मा भूत्। नैतदस्ति प्रयोजनम्। पूर्वस्मिन्नेव योगे विभाषाग्रहणं निवृत्तम्। इदं तर्हि प्रयोजनम्। त्रेर्मब्वचनं नित्यविषयार्थम् *। नित्यं क्त्र्यन्तं मब्विषयमेव यथा स्यात्। केवलस्य प्रयोगो मा भूदिति। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्र यथाधिकारं तद्विषयताप्रसङ्गः *। तत्र यथाधिकारं तद्विषयता प्राप्नोति। निर्वृत्तइति वर्तते। तेन निर्वृत्तएव क्त्र्यन्तं मब्विषयं स्यात्। येऽन्ये उपचारास्तत्र न स्यात्। कृत्रिमं महत्सु विहितमिति। एवं तर्हि भाव इति प्रकृत्य इमब्वक्तव्यः। कुट्टिमा भूमिः। सेकिमोसिरिस्त्रेत्रमर्थम्। ततो वक्तव्यम्। त्रेः। त्रेश्चेमप्प्रत्ययो भवति। ततो नित्यम्। नित्यं च त्रेरिमप्प्रत्ययो भवति। किमर्थमिदम्। नित्यं क्त्र्यन्तमिमब्विषयमेव यथा स्यात् केवलस्य प्रयोगो मा भूदिति ॥

आक ॥ इहेति। एकस्य वानेकस्य वा षकारस्य व्यञ्जनपरस्य श्रुत्या विशेषानवधारणात्सांहितिकोपि वा षकारेऽनचि चेति द्विर्वचनविधानादनेकषकारत्वसंभवात्संशयः। आकर्षेति ॥ श्लोकवार्तिककारः संदिग्धानसंदिग्धांश्च भ्रान्तिनिरासाय पर्यजीगणत्। षडेतइति। विधिवाक्यापेक्षं षट्त्वं प्रत्ययास्तु सप्तैते ॥

विभाषा ॥ वीवधाच्चेति वक्तव्यमिति। अत्र विवधवीवधशब्दौ पर्यायौ। तत्राविरविकन्यायो न संभवति। उभाभ्यां प्रत्ययस्येष्टत्वात्। ततो वीवधाच्चेति वक्तव्यमित्युक्तम् ॥ १७ ॥

त्रेमप् ॥ विभाषा मा भूदिति। द्वे अत्र विभाषे संभवतः। एका महाविभाषा अपरा विभाषा। विवधादिति। तत्रान्तरेणापि नित्यग्रहणं पूर्वसूत्र एवानन्तरस्य विभाषाग्रहणस्यास्वरितत्वादननुवृत्तत्वान्महाविभाषा नित्यग्रहणेन निवर्त्यते। इतरोनन्तरा विभाषा निवर्त्यत इत्युक्तमिति मत्वाह नैतदस्तीति। इतरः स्वाभिप्रायं प्रकाशयति इदं तर्हीति। निर्वृत्त एवेति। पक्त्रिणा निर्वृत्तमित्यस्यैव वाक्यस्य निवृत्तिः न तु पक्त्रिः क्रियत इत्यादेरपीत्यर्थः। कृत्रिमं महदिति। प्रत्ययप्रयोगमन्तरेणापि महत्वादीनि कृत्रिमशब्दार्थविशेषणानि स्युरित्यर्थः। भाव इति प्रकृत्येति। भाववाचिनः शब्दान्निर्वृत्ते ऽर्थे इमब् विधेय इत्यर्थः। त्रेरिति। पूर्वेण सिद्धे नित्यार्थं वचनम्। तेन निर्वृत्ते तावद्वाक्यं निवर्त्यते। ततो नित्यमित्यनेनोपचारान्तरविषयस्यापि वाक्यस्य निवृत्तिः क्रियत इति तद्विषयता त्रिप्रत्ययस्य सिध्यति ॥ २० ॥

Indira Gandhi National Centre for the Arts

चूर्णादिनिः ॥ २३ ॥ अयं योगः शक्योवक्तुम् । कथं चूर्णी चूर्णिनौ चूर्णिन इति । इनिनैव मत्वर्थीयेन सिद्धम् ॥

लवणाल्लुक् ॥ २४ ॥ लवणाल्लुग्वचनानर्थक्यं रसवाचित्वात् * । लवणाल्लुग्वचनमनर्थकम् । किं कारणम् । रसवाचित्वात् । रसवाच्येष लवणशब्दः । नैष संसृष्टिनिमित्तः । आतश्च रसवाची । असंसृष्टे च दर्शनात् * । असंसृष्टेपि हि लवणशब्दो वर्त्तते । तद्यथा । लवणं क्षीरम् । लवणं पानीयमिति । त्रेः संसृष्टे चादर्शनात् * । संसृष्टे चापि यदा नोपलभ्यते । तदाह लवणः सूपः । अलवणा यवागूः अलवणं शाकमिति ॥

प्रयच्छति गर्ह्यम् ॥ ३० ॥ अयुक्तोयं निर्देशः । यदसावल्पं दत्वा बहु गृह्णाति तद्गर्ह्यम् । कथं तर्हि निर्देशः कर्त्तव्यः । प्रयच्छति गर्ह्यायेति * । स तर्हि तथा निर्देशः कर्त्तव्यः । न कर्तव्यः । तादर्थ्यात्ताच्छब्द्यं भविष्यति गर्ह्यार्थं गर्ह्यम् । मेस्याल्लोपो वा * । मेस्याच्छब्दलोपो वा वक्तव्यः । द्विगुणं मे स्यादिति प्रयच्छाति द्वैगुणिकः । त्रैगुणिकः । वृद्धेर्वृधुषिभावः * । वृद्धेर्वृधुषिभावो वक्तव्यः ।वार्धुषिकः ॥

धर्मं चरति ॥ ४१ ॥ अधर्माच्च * । अधर्माच्चेति वक्तव्यम् । आधर्मिकः

ऋतोञ् ॥ ४९ ॥ नृनराभ्यामञ्वचनम् * । नृनराभ्यामञ्चेति वक्तव्यम् । नुर्धर्म्या नारी । नरस्यापि नारी । विशसितुरिड्लोपश्च * । विशसितुरिड्लोप-

---

चूर्णा ॥ इति नेति । ठक्तु संसृष्ट इत्यनेनानभिधानान्न भविष्यतीति भावः ॥ १३ ॥

लव ॥ रसवाचित्वादिति । रसस्य गुणत्वाद् गुणवाचिनां शुक्लादीनां गुणगुणिनोरभेदोपचाराद् गुणवृत्तिदर्शनान्नार्थो लुकेत्यर्थः । असंसृष्टे चेति । लवणेन द्रव्येण यदसंसृष्टं लवणरसयुक्तं चेत्तत्रापि लवणशब्दस्य दर्शनाद् गुणशब्दत्वमेवास्येत्यर्थः । संसृष्टे चेति । लवणद्रव्यसंसृष्टमपि यल्लवणरसं न संभवति तत्र न दृश्यते लवणशब्द इत्यर्थः ॥ २४ ॥

प्रयच्छ ॥ अयुक्तोयमिति । उत्तमर्णो यदल्पं ददाति न तद् गर्ह्यम् । यत्त्वल्पं दत्वा बहु गृह्णाति तदेव गर्ह्यमित्यर्थः । गर्ह्यायेति द्विगुणाय प्रयच्छाति द्वे गुणिक इति चतुर्थ्यन्तात् प्रत्ययो विधेय इत्यर्थः । मेस्याल्लोपो वेति । उपचारापेक्षया विकल्पार्थो वाशब्दः । द्विगुणं मेस्यादिति वाक्यात् प्रत्ययो मेस्याच्छब्दलोपश्च । वार्द्धुषिक इति । वृद्ध्यर्थं धनं प्रयच्छतीत्यर्थः ॥ ३० ॥

धर्मम ॥ अधर्माच्चेति । तदन्तविधेर्ग्रहणवता प्रातिपदिकेन निषेधाद्वचनम् । येन विधिरित्यत्र धर्मान्नञ इति वार्त्तिकमनपेक्ष्यैतदुक्तम् ॥ ४१ ॥

ऋतोञ् ॥ नृनराभ्यामिति । नृशब्दस्य सूत्रेणैव सिद्धे प्रत्यये दृष्टान्तत्वेनोपादानम् । यथा नृशब्दादञ् भवत्येवं नरशब्दादपीत्यर्थः ॥ ४९ ॥

Indira Gandhi National Centre for the Arts

श्चाञ्च वक्तव्यः । विशसितुर्द्धर्म्यं वैशस्त्रम् । विभाजयितुर्णिलोपश्च*। विभाजयितुर्णिलोपोऽश्च वक्तव्यः । विभाजयितुर्द्धर्म्यं वैभाजित्रम् ॥

शिल्पम् ॥ ५५ ॥ किं यस्य मृदङ्गः शिल्पं स मार्दङ्गिकः । किं चातः । कुम्भकारे प्राप्नोति। एवं तर्ह्युत्तरपदलोपो द्रष्टव्यः । शिल्पमिव शिल्पम् । मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः । मौरजिकः । पाणविकः ।पैठरिकः ॥

शक्तियष्ट्योरीकक् ॥ ५९ ॥ किमर्थमीकगुच्यते । न कगेवोच्येत । का रूपसिद्धिः । शाक्तीको याष्टीक इति । शक्तियष्ट्योरीकारोन्ते कशब्दश्च प्रत्ययः। न सिध्यति । विभाषा चैव हि शक्तियष्ट्योरीकारः । अपि च केण इति ह्रस्वत्वम् एवं तर्हीकगुच्यते । का रूपसिद्धिः । शाक्तीको याष्टीक इति । सवर्णदीर्घत्वेन सिद्धम् । न सिध्यति । यस्येति लोपः प्राप्नोति । इकारोच्चारणसामर्थ्यान्न भविष्यति । यदि तर्हि प्राप्नुवन् विधिरिकारोच्चारणसामर्थ्याद्बाध्येत । सवर्णदीर्घत्वमपि न प्राप्नोति । यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते । यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । यस्येति लोपं प्रतीकारोच्चारणमनर्थकं सवर्णदीर्घस्य तु निमित्तमेव ॥

अस्तिनास्तिदिष्टं मतिः ॥ ६० ॥ किं यस्यास्ति मतिः स आस्तिकः। किं चातः । चौरे ऽपि प्राप्नोति । एवं तर्हि इति लोपोत्र द्रष्टव्यः । अस्तीत्यस्य

शिल्पम् ॥ अभ्यासपूर्वकं क्रियासु कौशलं शिल्पम् । मृदङ्गादिषु द्विविधा क्रियाऽभ्याहननलक्षणा निष्पादनलक्षणा च । तत्र विशेषानुपादानात् पृच्छति किं यस्येति । एवं तर्हीति । उपचरितवृत्तिः शिल्पशब्द आश्रीयत इत्ययमेवेवशब्दलोपः । कुम्भकारस्य हि मृदङ्गं मुख्यं शिल्पं वादकस्य तूपचरितम् । मृदङ्गवादनमिति । लोके तु मार्दङ्गिकशब्दस्य मृदङ्गवादनशिल्पोऽभिधेयः । तत्र साहचर्यान्मृदङ्गशब्दस्य वृत्तिविषये वृत्त्या गतार्थत्वादप्रयोगो वादनशब्दस्य ॥ ५५ ॥

शक्ति ॥ ईकारान्त इति । बह्वादिपाठात् । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति वचनात् शक्तीयष्टिशब्दाभ्यां कन्भविष्यतीत्यर्थः । ईकारोच्चारणसामर्थ्यादिति । अन्यथा ककमेव विदध्यात् । न ह्यवग्रहनिवृत्तिरिकारस्य प्रयोजनम् । यतो न लक्षणेन पदकारा अनुवर्त्याः । पदकारैर्नाम लक्षणमनुवर्त्यम् । यं विधिमिति । एवं च दीर्घोच्चारणं प्रत्याख्यातम् । इकका सिद्धत्वात् । अन्ये त्वाहुः शक्तियष्टिभ्यां ठगिति ठग्विधानादेव यस्येति लोपाभावः सिद्धः प्रहरणमित्यनेन हि ठकि सिद्धे पुनष्ठग्विधानं यस्येति लोपाभावार्थमेव वाक्यनिवृत्तये नित्यार्थं तत्स्यादिति चेत्तन्न । शक्तियष्टिभ्यामित्येवाधिकस्य ठकः पूर्वेण सिद्धस्य पुनर्विधानेन वाक्यनिवृत्तेरपि सिद्धत्वात् । ५६ ॥

अस्ति ॥ चौरे पीति । तस्यापि मतिसद्भावात् । अचेतनश्च पदार्थो नास्तिकः

Indira Gandhi National Centre for the Arts

मतिः । आस्तिकः । नास्तीत्यस्य मतिः नास्तिकः । दिष्टमित्यस्य मतिः दैष्टिकः॥

छत्रादिभ्यो णः ॥ ६२ ॥ किं यस्य च्छत्रधारणं शीलं च्छात्रः । किं चातः । राजपुरुषे प्राप्नोति । एवं तर्ह्युत्तरपदलोपोत्र द्रष्टव्यः । छत्रमिव च्छत्रम्। गुरुश्छत्रम्। गुरुणा शिष्यश्छत्रवत् छाद्यः । शिष्येण च गुरुश्छत्रवत्परिपाल्यः ॥

हितं भक्षाः ॥ ६५ ॥ हितं भक्षा इति चतुर्थीनिर्देशः * । हितं भक्षा इति चतुर्थीनिर्देशः कर्त्तव्यः । इतरथा ह्यनिर्देशः * । इतरथा ह्यनिर्देशो न भवति । हितशब्देन च योगे चतुर्थी विधीयते सा प्राप्नोति । स तर्हि चतुर्थीनिर्देशः कर्त्तव्यः । न कर्त्तव्यः । एवं वक्ष्यामि । हितं भक्षास्तदस्मै । ततो दीयते नियुक्तम् । तदस्मा इति ॥

तद्वहति रथयुगप्रासङ्गम् ॥ ७६ ॥ वहत्यभिधाने रथशकटहलसीरेभ्यः प्रत्ययविधानानर्थक्यं विहितत्वात् * । वहत्यभिधाने रथशकटहलसीरेभ्यः प्रत्ययविधिरनर्थकः । किं कारणम् । विहितत्वात् । विहितोत्र प्रत्ययस्तस्येदमिति । शब्दभेदादविधानम् । शब्दभेदादविधिरयं भवति अन्यो हि शब्दो रथं वहति अन्यो हि रथस्य वोढेति । शब्दभेदादविधानमिति चेदर्थाश्रयत्वात् प्रत्ययविधानस्यार्थसामान्यात्सिद्धम् * । शब्दभेदादविधानमिति चेदर्थाश्रयः प्रत्ययविधिः । य एवार्थो रथं वहति स एवार्थो रथस्य वोढेति । तत्रार्थसामान्यात्सिद्धम् । इदं

स्यादिति वक्तव्यम् । न्यायस्य तु प्रदर्शनाद्भाष्यकारेण प्रतिपदं नोक्तम् । अस्तीत्यस्येति । परलोककर्तृका च सत्ता विज्ञेया । तत्रैव विषये लोके प्रयोगदर्शनात् तेन परो लोकोस्तीति मतिर्यस्य स आस्तिकस्तद्विपरीतो नास्तिकः । दिष्टशब्दो दैवपर्यायः । तेन दैवपरायणो दैष्टिकः ॥ ६० ॥

छत्रा ॥ राजपुरुष इति । यः पुरुषो राज्ञश्छत्रं धारयति स च्छात्रशब्दाभिधेयः स्यादित्यर्थः । उत्तरपदलोप इति । उत्तरपदस्येवशब्दस्य लोपो द्रष्टव्य इत्यर्थः । गौणी वृत्तिश्छत्रशब्दस्याश्रयणीया । तत्रैव प्रत्ययस्य दर्शनादित्युक्तं भवति । गुरुश्छत्रमिति । अज्ञानं शिष्यस्य च्छादयति निवर्त्तयति यतस्तत्र च्छत्रं शीलमस्य गुरुविषयं पालनं शीलमस्येत्यर्थः ॥ ६२ ॥

हितम् ॥ इतरथा हीति । यदि चतुर्थी न निर्दिश्यते तदा प्रकृताया अस्येति षष्ठ्याः सम्बन्धयोग्यत्वादिहानुपस्थानात्प्रत्ययार्थो न निर्दिष्टः स्यादित्यर्थः ॥ ६५ ॥

तद्वह ॥ शब्दभेदादिति । षष्ठ्यन्तात्प्रत्ययो विधीयमानो द्वितीयान्तान्न प्राप्नोतीत्यर्थः । अर्थसामान्यादिति । अर्थस्यैक्यात् षष्ठ्यन्तादेव प्रत्ययोत्पत्ताविष्टसिद्धिर्भवत्येवेत्यर्थः । ननु रथाद्रथाङ्ग इति तत्रोक्तम् । वोढर्यपि प्रयोगदर्शनादिष्यतामित्यदोषः । द्विरथ्य इति । रथसीताहलेभ्यो यद्विधाविधिः तदन्तविधिः ॥ ७६ ॥

Indira Gandhi National Centre for the Arts

तर्हि प्रयोजनम्। यो द्वौ रथौ वहति स द्विरथ्यः। यो द्वयो रथयोर्वोढा द्विरथः। तेन सति लुग्भवति। अनेन सति कस्मान्न भवति। प्राग्दीव्यतइत्युच्यते॥

संज्ञायां जन्याः ॥ ८२ ॥ किं निपात्यते। जनन्या जनीभावो निपात्यते यच्च प्रत्ययः। जन्या इति निपातनानर्थक्यं पञ्चमीनिर्देशात् *। जन्या इति निपातनमनर्थकम्। किं कारणम्। पञ्चमीनिर्देशात्। जनीशब्दादेषा पञ्चमी। इदं तर्हि प्रयोजनम्। सर्वकालः प्रत्ययविधिर्यथा विज्ञायेत। जनीं वहन्ति जन्याः। जनीं वोढारो जन्याः। जनीमवाक्षुर्जन्या इति॥

विध्यत्यधनुषा ॥ ८३ ॥ विध्यत्यकरणेन *। विध्यत्यकरणेनेति वक्तव्यम्। इतरथा ह्यनिष्टप्रसङ्गः *। अधनुषेत्युच्यमाने ऽनिष्टप्रसङ्गः स्यात्। इहापि प्रसज्येत। शर्कराभिर्विध्यति। कण्टकैर्विध्यतीति। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। कस्मान्न भवति कण्टकैर्विध्यति शर्कराभिर्विध्यतीति। अनभिधानात्॥

गृहपतिना संयुक्ते ञ्यः ॥ ९० ॥ गृहपतिना संयुक्तइत्युच्यते। तत्र दक्षिणाग्नावपि प्राप्नोति। दक्षिणाग्निरपि गृहपतिना संयुज्यते। एवं तर्हि गृहपतिना संयुक्तइत्युच्यते। सर्वश्च गृहपतिना संयुक्तः। तत्र प्रकर्षगतिर्विज्ञायते। साधीयो यो गृहपतिना संयुक्तः। कश्च साधीयः। यस्मिन् पत्नीसंयाजाः क्रियन्ते। अथ वा गृहपतिर्नाम मन्त्रः स यस्मिन्नुच्यते। अथ वा संज्ञायामिति वर्त्तते॥

मत्वर्थे मासतन्वोः ॥ २१८ ॥ मासतन्वोरनन्तरार्थे वा *। मासतन्वोरनन्तरार्थे वेति वक्तव्यम्। मध्वस्मिन्नस्ति मध्वस्मिन्ननन्तरमिति वा मधव्यः।

संज्ञायाम्॥ निपातनानर्थक्यमिति। वृत्तिकारैर्यन्निपातनमाश्रितं तदनर्थकं विधिनैवेष्टसिद्धिर्भवत्येवेत्यर्थः। जनीशब्दादिति। जायतेस्यां गर्भ इति जनी वधूरुच्यते। जनिसहिभ्यामितीण्प्रत्ययो जनिवध्योश्चेति वृद्धिप्रतिषेधः। सर्वकाल इति। यद्यपि विध्यर्थत्वेपि संख्याकालयोरविवक्षयैतत्सिध्यति तथापि न्यायानुसरणे प्रतिपत्तिगौरवं स्यादिति निपातनाश्रयणम्॥ ८२॥

विध्य॥ शर्कराभिरिति। प्रधानस्यात्र सापेक्षत्वाद् वृत्तिप्रसङ्गः। अनभिधानादिति। शर्कराभिः पद्य इति प्रयोगाभावादित्यर्थः। एवं चाधनुषेत्यपि न वक्तव्यम्। अन्ये त्वाहुः, धनुषा करणविशेषेण करणमात्रं लक्ष्यतइति सर्वत्र करणे प्रतिषेधः प्रवर्त्तते॥ ८३॥

गृह॥ गृहपतिर्यजमानः। यस्मिन्निति। यजमानेन पत्न्या च ये यागविशेषाः क्रियन्ते ते पत्नीसंयाजास्ते च गार्हपत्य एव क्रियन्ते न दक्षिणाग्नौ। अथ वेति। स च मन्त्रो गार्हपत्यविषय एव॥ ९०॥

मत्वर्थे॥ अनन्तरार्थे वेति। वाशब्दः समुच्चये। मत्वर्थे मासतन्वर्थाविशेषेणापि

Indira Gandhi National Centre for the Arts

माधवः। लुगकारेकाररेफाश्च प्रत्ययाः *। लुगकारेकाररेफाश्च प्रत्यया वक्तव्याः। लुक्। मधुः। नभः। तपः। अकारः। इषः। ऊर्जः। इकारः। शुचिः। रेफश्च। शुक्रः॥

वसोः समूहे च॥ १४०॥ अक्षरसमूहे छन्दस उपसंख्यानम् *। अक्षरसमूहे छन्दस उपसंख्यानं कर्त्तव्यम्। ओ श्रावयेति चतुरक्षरम्। अस्तु श्रौषडिति चतुरक्षरम्। ये यजामहइति पञ्चाक्षरम्। यजेति द्व्यक्षरम्। द्व्यक्षरो वषट्कारः। एष वै सप्तदशाक्षरः छन्दस्यः प्रजापतिर्यज्ञमनुविहितः। छन्दसि बहुभिर्वसव्यैरुपसंख्यानम् *। छन्दसि बहुभिर्वसव्यैरुपसंख्यानं कर्त्तव्यम्। हस्तौ पृणस्व बहुभिर्वसव्यैः। अग्निरीशे वसव्यस्येत्युपसंख्यानम् *। अग्निरीशे वसव्यस्येत्युपसंख्यानं कर्तव्यम्। तर्त्तर्हि उपसंख्यानं कर्त्तव्यम्। न कर्त्तव्यम्। स्वार्थविज्ञानात्सिद्धम्*। स्वार्थविज्ञानात् सिद्धमेतत्। वसव एव वसव्याः पान्तु॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये चतुर्थस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम्॥ पादोऽध्यायश्च समाप्तः॥ इति चतुर्थोऽध्यायः॥

प्रत्ययोनन्तरार्थेपीत्यर्थः। मधुरिति। मधु विद्यतेस्मिन् नभांसि विद्यते यस्मिन् तपो विद्यते ऽस्मिन्निति यतो लुक्। नभः शब्दोत्राभ्रवाची। अत्र नभस्तप इति नपुंसकत्वं छान्दसत्वात्। इष इति। एषणमिट् सास्मिन्नस्ति ऊर्गस्मिन्नस्ति शोचनं शुक् सास्मिन्नस्तीति प्रत्ययाः। शुक्र इत्यत्रायस्मयादित्वाज्जश्त्वाभावः॥ ११८॥

वसोः॥ अक्षरसमूह इति। अक्षरसमूहवाचिनश्छन्दःशब्दाद्यत्प्रत्ययः। ओश्रावयेति अक्षराणि गण्यन्ते। स्वार्थविज्ञानादिति। वसोरिति योगविभागः कर्तव्यः। तेन स्वार्थे भविष्यतीत्यर्थः॥१४०॥ इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे चतुर्थस्याध्यायस्य चतुर्थे पादे प्रथमाह्निकम्॥ पादोऽध्यायश्च समाप्तः॥

श्रीगणेशाय नमः ।

अथ प्रदीपसहिते व्याकरणमहाभाष्ये पञ्चमोऽध्यायः ।

प्राक् क्रीताच्छः ॥१॥ प्राग्वचनं किमर्थम् । प्राग्वचनउक्तम् *। किमुक्तम् । तत्र तावदुक्तम् । प्राग्वचनं सकृद्विधानार्थम् । अधिकारात्सिद्धमिति चेदपवादविषये ऽणूप्रसङ्ग इति । इहापि प्राग्वचनं क्रियते । सकृद्विधानार्थम् । सकृद्विहितः प्रत्ययो विहितो यथा स्याद् योगे योगे तस्य ग्रहणं मा कार्षमिति । नैतदस्ति प्रयोजनम् । अधिकारादप्येतत्सिद्धम् । अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगउपतिष्ठते । अधिकारात्सिद्धमिति चेदपवादविषये छप्रसङ्गः । अधिकारात् सिद्धमिति चेदपवादविषये च्छः प्राप्नोति । उगवादिभ्यो यत् छश्चेति छोपि प्राप्नोति । तस्मात् प्राग्वचनं कर्त्तव्यम् । अथ क्रियमाणेपि प्राग्वचने किमिदं विज्ञायते प्राक् क्रीताद्याः प्रकृतय आहो स्वित्प्राक्क्रीताद्ये ऽर्था इति । किं चातः। यदि विज्ञायते प्राक्क्रीताद्याः प्रकृतय इति स एव दोषः अपवादविषये छप्रसङ्ग इति । अथ विज्ञायते प्राक् क्रीताद्ये ऽर्था इति न दोषो भवति । समाने ऽर्थे

श्रीगणेशाय नमः । प्राक् क्रीताच्छः । प्राग्वचनमिति । छ इत्येवाधिकारोऽस्त्विति प्रश्नः । प्राग्वचन उक्तमिति । अस्मिन् प्राग्वचने यद्वक्तव्यं तदन्यत्रोक्तं न्यायस्य तुल्यत्वात् । प्राग्दीव्यतोऽणित्यत्र यदुक्तं तदेवेहापि द्रष्टव्यमित्यर्थः । सकृद्विधानार्थमिति । प्राक्क्रीताद्ये ऽर्थास्तानपेक्ष्य सकृदेवानेन तेष्वर्थेषु च्छस्य विधानं यथा स्यादित्यर्थः । विहितो यथा स्यादिति । पुनः श्रुत्या प्रकर्षप्रतिपत्तिः । सुष्ठुलाघवेन विहितो यथा स्यादित्यर्थः । योगे योगइति । असति सकृद्विधाने तस्मै हितं छ इत्येवं प्रत्यर्थनिर्देशसूत्रं छो वक्तव्यस्तथा च शास्त्रगौरवप्रसङ्गः । अधिकारादिति । छ इत्येतावदेव सूत्रमस्तु नार्थः प्राक्क्रीतादित्यनेन । यथैव प्रत्ययादयोऽधिकारा अवधिविशेषोपादानमन्तरेणेष्टं साधयन्ति एवमयमपि साधयिष्यतीत्यर्थः । प्रतियोगमित्यनेन लाघवार्थत्वमधिकारस्य दर्शयति । योगे योगउपतिष्ठतइत्यनेन न त्वधिकारस्य व्यापारः प्रदर्श्यते । उगवादिभ्यो यच्छश्चेतीति । नदीस्रोतोन्यायेन प्रतिसूत्रमधिकारस्योपस्थानात् उत्सर्गापवादयोः सन्निधानाविशेषात्तव्यत्तव्यानीयरामिव विकल्पः स्यादित्यर्थः । के चिदाहुः । उगवादिभ्यो यदित्ययमप्यधिकारस्ततो द्वयोरपि पारार्थ्यात्परस्यासम्बन्धादुपलक्षमेतत् । इदं तु प्रदर्शनीयं शरीरावयवाच्चच्छश्चेति । स एव दोष इति । तस्मै हितमित्यादिष्वर्थनिर्देशेषु ङ्याप्प्रातिपदिकादिति सामान्यप्रकृतिरधिकारात्सन्निहिता शरीरावयवाद्यदित्यादौ तु विशेषप्रकृतिस्तत्र प्राक्क्रीतात् प्रकृतिभ्यो विधीयमानश्छो विशेषप्रकृतेरपि प्राप्नोत्यर्थः । समाने ऽर्थइति । तस्मै हित-

Indira Gandhi National Centre for the Arts

प्रकृतिविशेषादुत्पद्यमानो यत् छं बाधिष्यते। यथा न दोषस्तथास्तु। प्राक् क्रीताद्ये ऽर्था इति विज्ञायते। कुत एतत्। तथा ह्ययं प्राधान्येनार्थं प्रतिनिर्दिशति इतरथा हि बह्व्यस्तत्र प्रकृतयः पठ्यन्ते ततो यां कां चिदेव प्रकृतिमवधित्वेनोपाददीत। अथ वा पुनरस्तु प्राक् क्रीताद्याः प्रकृतय इति। ननु चोक्तमपवादविषयेपि च्छप्रसङ्ग इति। न वा क्व चिद्वावचनात् *। न वा एष दोषः। किं कारणम्। क्व चिद्वावचनात्। यदयं क्व चिद्वावचनं करोति विभाषा हविरपूपादिभ्य इति। तज्ज्ञापयति नापवादविषये छो भवतीति। यद्येवं, नार्थः प्राग्वचनेन। अधिकारात्सिद्धम्। ननु चोक्तमधिकारात्सिद्धमिति चेदपवादविषये च्छप्रसङ्ग इति। परिहृतमेतत्। न वा क्व चिद्वावचनादिति। अथ किमर्थमियानवधिगृह्यते न प्राक् ठञ इत्येवोच्येत। एतज्ज्ञापयत्याचार्यः अर्थेष्वेव भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। समानेर्थे प्रकृतिविशेषादुत्पद्यमानो यच् छं बाधते॥

उगवादिभ्यो यत् ॥ २ ॥ यञ्ञ्यावञः पूर्वविप्रतिसिद्धं सनङ्गूपानहौ प्रयोजनम् *। यञ्ञ्यौ भवतः अञः पूर्वविप्रतिषेधेन। किं प्रयोजनम्। सनङ्गूपानहौ प्रयोजनम्। यतोऽवकाशः, शङ्कव्यं दारु। पिचव्यः कार्पासः। अञोवकाशः, वार्ध्रं वारत्रम्। सनङ्गुर्नाम चर्मविकारः तस्मादुभयं प्राप्नोति। सनङ्गव्यं चर्म। ञ्यस्यावकाशः, औपानह्यं दारु। अञः स एव। उपानन्नाम चर्मविकारस्तस्मादुभयं प्राप्नोति। औपानह्यं चर्म। ढञ्च *। ढञ्च भवत्यञः पूर्ववि-

---

मित्यस्मिन्नर्थे शरीरावयवाद्यद्विधीयमानः प्रकृत्यन्तरे सावकाशं छं बाधते तक्रमिव कौण्डिन्ये दधीत्यर्थः। तथा हीति। यथाजातीयोवधिस्तथाजातीयेनावधिमता भाव्यम्। यथा मासात्पर इत्युक्ते कालः प्रतीयते ग्रामात् पूर्व इत्युक्ते देशः। अलोन्त्यात्पूर्व इत्यत्रेव। यां कां चिदिति। अपरिखायाश्छ इत्येवं वाच्यं स्यादित्यर्थः। अथवेति। अभ्युपगम्यवादोयम्। न त्वयं पक्षो युक्तः। अवधिविजातीयत्वात्। नन्वस्मिन्पक्षे छस्यार्थो न निर्दिष्टः स्यात् ततश्च स्वार्थे प्राप्नोति। नैष दोषः। तस्मै हितमित्यादीनामर्थनिर्देशानां प्रत्ययं प्रति साकाङ्क्षत्वात् सन्निहितेन च्छेन निराकाङ्क्षीकरणादर्थस्य लाभात् स्वार्थे प्रत्ययाप्रसङ्गात्। वावचनादिति। विकल्पवचनादित्यर्थः। अथेति। ठञः परोर्थः प्रकृतिर्वा प्राक्क्रीतान्नास्तीति लाघवार्थं प्राक्ठञ इति वक्तव्यम्। प्राग्वतेष्ठञिति प्रत्यासन्नष्ठञ् ग्रहीष्यत इत्यर्थः। अर्थेष्विति। तेन ज्ञापकाश्रयणमन्तरेण न्यायेनापवादविषये छस्याप्रवृत्तिः सिध्यति। प्राक् ठञ् इति तूच्यमाने तुल्यजातीयस्यावधिमतो भावादर्थाः प्रकृतयो वावधिमत्वेन संगृह्येरन् ॥ १ ॥

उगवा ॥ यञ्ञ्याविति। छापवादानां परविप्रतिषेधबाधनायेदम्। छदिर्नामेति। छादनं छदिस्तच्च चर्मविकारोपि सम्भवति। अत्राहुः, छदिरुपानहोः प्रतिपदं प्रत्यय-

Indira Gandhi National Centre for the Arts

प्रतिषेधेन । ढञोऽवकाशः । छादिषेयं तृणम् । अञः स एव । छादिर्नाम चर्मविकारस्तस्मादुभयं प्राप्नोति । छादिषेयं चर्म । ढञ् भवति पूर्वविप्रतिषेधेन । हविरपूपादिभ्यो विभाषाया यत् * । हविरपूपादिभ्यो विभाषाया यद्भवति पूर्वविप्रतिषेधेन । हविरपूपादिभ्यो विभाषाया अवकाशः । आमिक्ष्यमामिक्षीयम् । पुरोडाश्यं पुरोडाशीयम् । यतः स एव । इहोभयं प्राप्नोति चरव्यास्तण्डुलाः । यद्भवति पूर्वविप्रतिषेधेन । अन्नविकारेभ्यश्च * । अन्नविकारेभ्यश्च विभाषाया यद्भवति पूर्वविप्रतिषेधेन । अन्नविकारेभ्यो विभाषाया अवकाशः । सुर्याः सुरीयाः । यतः स एव । इहोभयं प्राप्नोति सक्तव्या धाना इति । यद्भवति पूर्वविप्रतिषेधेन । स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । इष्टवाची परशब्दः विप्रतिषेधे परं यदिष्टं तद्भवतीति । अयं नाभिशब्दो गवादिषु पठ्यते । तत्रैव चोच्यते नाभिनभं चेति । तत्र चोच्यते । नाभेर्नभभावे प्रत्ययानुपपत्तिः प्रकृत्यभावात् । नाभेर्नभभावे प्रत्ययस्यानुपपत्तिः । किं कारणम् । प्रकृत्यभावात् । विकृतेः प्रकृतावभिधेयायां प्रत्ययेन भवितव्यम् । न च नाभिसंज्ञकाया विकृतेः प्रकृतिरस्ति । यदेव हि तन्मण्डलचक्राणां तदेव मण्डलचक्रं तन्नभ्यमित्युच्यते । सिद्धं तु शाखादिषु वचनाद् ह्रस्वत्वं च । सिद्धमेतत् । कथम् । शाखादिषु नाभिशब्दः पठितव्यः ।

विधानादयुक्तो विप्रतिषेधः । तथा चोक्तम् । परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति नार्थः पूर्वविप्रतिषेधेनेति । चिन्त्यमेतत् । हविरपूपादिभ्य इति सूत्रपाठानुपूर्वीप्रदर्शनार्थमपूपादिग्रहणम् । न ह्यपूपादिषु प्रतिपदं कश्चिदुकारान्तः पठ्यते । पाठेऽपि वापवादोऽसौ भवत्युत्सर्गापवादयोश्चायुक्तो विप्रतिषेधस्तस्माद्धविर्विशेषवाचिविषय एव विप्रतिषेधोऽभिमतः । गवादिगणे हविःशब्दस्य पाठात् स्वरूपग्रहणाच्च विभाषा हविरित्यत्र हविर्विशेषवाचिग्रहणम् । चरव्या इति । चर्वधिकरणं हविरुपचाराच्चरुशब्देनोच्यते । अन्नविकारेभ्यश्चेति । अपूपादिष्वन्नविकारेभ्यश्चेति पठ्यते तद्विषयोऽयं विप्रतिषेध उच्यते । प्रपञ्चार्थश्चाय पाठो हविरपूपादिभ्यो विभाषाया यदित्युक्तत्वात् । तत्र सामर्थ्यादपूपादिग्रहणेनानिर्धारितविशेषा अन्नविकारा एव ग्रहीष्यन्ते । प्रकृत्यभावादिति । यद्यपि हितार्थे नभ्यं तैलं नभ्यं लोहबन्धनमिति सिध्यति । तथापि नभ्यं चक्रमिति न सिध्यति । न हि चक्रस्य नाभिर्विकृतिरपि त्ववयवः । नापि तादर्थ्यमस्ति अवयविनोऽवयवार्थत्वाभावादिति पर्यनुयोगः । यस्तु शरीरावयवो नाभिस्ततः परत्वाद्धितार्थे शरीरावयवाद्यदिति यता भाव्यं नाभ्यं तैलमिति । गवादियता सन्नियुक्तो नभभावोऽन्यत्र यति न भवति । न चेति । यद्यपि दारुलक्षणा प्रकृतिर्नाभेरस्ति । तथापि नभ्यशब्दवाच्यं चक्रं नाभेः प्रकृतिर्नास्तीत्यर्थः । मण्डलचक्राणामिति । नेयं निर्धारणे षष्ठी सामान्यविशेषाभावात् । न हि भवति गवां गौः सम्पन्नक्षीरतमेति । तस्मादवयवावयविभावे षष्ठी । मण्डलाकारं चक्रं येषां तानि मण्डलचक्राणि शकटानि तेषां मण्डलाकारं यच्चक्रं तन्नभ्यमुच्यते । तच्च नाभेः प्रकृतिर्न भवतीति तत्र प्रत्ययो

Indira Gandhi National Centre for the Arts

ह्रस्वत्वं च वक्तव्यम् । नाभिरिव नभ्यमिति । कः पुनरिहोपमार्थः । यत्तदक्षधारणं परिवर्त्तनं वा । अपर आह । यत्तदञ्जनोपाञ्जनमिति । न तर्हीदानीमिदं वक्तव्यं नाभिनभं चेति । वक्तव्यं च । किं प्रयोजनम् । यान्येतान्यरवन्ति चक्राणि तदर्थम् । तत्र नाभिसंज्ञाया विकृतेः प्रकृतिरस्ति यानि चाप्यनरवन्ति चक्राणि तदर्थमपीदं वक्तव्यम् । दृश्यते हि समुदायादवयवस्य पृथक्त्वम् । तद्यथा । वार्क्षी शाखेति । गुणान्तरयोगाच्च विकारशब्दो दृश्यते । तद्यथा । वैभीतको यूपः । खादिरं चषालमिति । तत्रावयवात्समुदाये वृत्तिर्भविष्यति । अथ यो नाभ्यर्थो वृक्षः कथं तत्र भवितव्यं नभ्यो वृक्षो नभ्या शिंशपेति । नभ्यात्तु लुग्वचनम् *। नभ्यात्तु लुग्वक्तव्यः । स तर्हि लुग्वक्तव्यः । न वक्तव्यः । तादर्थ्यात्ताच्छब्द्यं भविष्यति । नभ्यार्थो नभ्य इति ॥

कम्बलाच्च संज्ञायाम् ॥ ३ ॥ अयं योगः शक्योऽवक्तुम् । कथमशीतिशतं कम्बल्यमिति । निपातनादेतत्सिद्धम् । किं निपातनम् । अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकीति । इदं तर्हि प्रयोजनं संज्ञायामिति वक्ष्यामीति ।

न प्राप्नोतीत्यर्थः । कः पुनरिति । अवयवावयविनोः सादृश्याभावादिति प्रश्नः । इतरः क्रियाद्वारकं सादृश्यं प्रतिपादयति यत्तदिति । छिद्रवान् रथाङ्गविशेषो नाभिशब्दवाच्यः स यथाऽक्षाख्यं काष्ठविशेषं धारयति परिवर्त्तते चैवं चक्रमपीति तत्सादृश्यान्नभ्यशब्देनाभिधास्यत इत्यर्थः । अञ्जनोपाञ्जनमिति । अञ्जनं तैलाभ्यङ्गः । उपाञ्जनं समीपाभ्यङ्गः । यान्येतानीति । एतच्चोपलक्षणम् । नभ्यो लोहबन्धो नभ्योक्ष इत्याद्यर्थमपि पठितव्यमेव । अरवत्सु चक्रेषु पृथग् व्यवस्थितेभ्यः काष्ठेभ्यः पृथग्भूता एव नाभ्यादयोऽवयवा उत्पद्यन्ते । तत्र नाभिप्रकृतिः काष्ठं नभ्यं भवत्येव । अररहितं तु चक्रमेकस्मादेव काष्ठादुत्पद्यत इति पृथङ्नाभेः प्रकृतिभूतकाष्ठाभावात् प्रत्ययाप्रसङ्गः स्यादित्यर्थः । यानि चापीति । अनराणीति वक्तव्ये चक्रजातिविशेषप्रतिपत्त्यर्थो मतुब्निर्देशः । अनराणीत्युक्ते भग्नाराण्यपि चक्राणि प्रतीयेरन् तस्मादरवत्पर्युदासेनानुपजातारचक्रप्रतीतिरनरवन्तीत्यनेन भवति । ननु यथा वृक्षा एव बहवो वनं न तु तद्व्यतिरिक्तम् । एवं नाभ्यादय एव चक्रं तत्र भेदनिबन्धनो नाभिचक्रयोः प्रकृतिविकारभावो न स्यादित्याशङ्क्य भेदं तावदवयवावयविनोः साधयति दृश्यत इति । भेदेनापि व्यवहारोऽवयवावयविनोर्दृश्यते न केवलमभेदेनैवेत्यर्थः । ननु प्रकृत्युच्छेदे विकारस्य दर्शनं यथा काष्ठोच्छेदे भस्मनः । न चेह चक्रोच्छेदे नाभिदर्शनमित्याशङ्क्याह गुणान्तरयोगादिति । तत्रावयवो यश्चक्रस्य नाभिसंज्ञकः सोऽञ्जनादिगुणयुक्तनाभिसञ्ज्ञावयवप्रकृतिस्तद्द्वारेण चक्रमपि प्रकृतिर्दृश्यते ह्यवयवनिबन्धनो व्यपदेश समुदाये यथा पटो दग्ध इत्यादौ । तत्र बुद्धिपरिगृहीतभाविविकारापेक्षा लब्धप्रकृतिव्यपदेशनाभिलक्षणावयवद्वारकश्चक्रस्य नभ्यव्यपदेशः । तादर्थ्यादिति । अनेनैव न्यायेन चरव्यतण्डुलार्था व्रीहयोपि चरव्या अङ्गारीयकाष्ठार्थो वृक्षोप्यङ्गारीय एवति प्रकृतौ छो न भवतीति वेदितव्यम् ॥ २ ॥

Indira Gandhi National Centre for the Arts

इह मा भूत् कम्बलीया ऊर्णा । एतदपि नास्ति प्रयोजनम् । परिमाणपर्युदासेन पर्युदासे प्राप्ते कम्बल्यग्रहणं तत्र क्रियते परिमाणार्थम् । परिमाणं च संज्ञैव ॥

विभाषा हविरपूपादिभ्यः ॥ ४ ॥ किमियं प्राप्ते विभाषा आहो स्विदप्राप्ते कथं च प्राप्ते कथं वाऽप्राप्ते। ऊर्णान्तादिति वा नित्ये प्राप्ते अन्यत्र वाऽप्राप्ते । हविरपूपादिभ्यो ऽप्राप्ते * । हविरपूपादिभ्यो ऽप्राप्ते विभाषा प्राप्ते नित्यो विधिः । चरव्यास्तण्डुलाः ॥

शरीरावयवाद्यत् ॥ ६ ॥ यत्प्रकरणे रथाच्च * । यत्प्रकरणे रथाच्चोपसंख्यानं कर्तव्यम् । रथाय हिता रथ्या ॥

खलयवमाषतिलवृषब्रह्मणश्च ॥ ७ ॥ वृषशब्दोयमकारान्तो गृह्यते । वृषन्शब्दोपि नकारान्तोस्ति तस्योपसंख्यानं कर्त्तव्यं वृषशब्दश्चादेशो वक्तव्यः। वृष्णे हितमिति विगृह्य वृष्यमित्येव यथा स्यात् । तथा ब्रह्मशब्दो नकारान्तो गृह्यते ब्राह्मणशब्दश्चाकारान्तोप्यस्ति तस्योपसंख्यानं कर्त्तव्यं ब्रह्मन्शब्दश्चादेशो वक्तव्यः । ब्राह्मणेभ्यो हितमिति विगृह्य ब्रह्मण्यमित्येव यथा स्यात् । तर्त्तहि वक्तव्यम् । न वक्तव्यम् । समानार्थावेतौ । वृषशब्दः वृषन्शब्दश्च । ब्रह्मन्शब्दो ब्राह्मणशब्दश्च । आतश्च समानार्थौ एवं ह्याह । कुतो नुचरसि ब्रह्मन् कुतो नुचरसि ब्राह्मणेति । तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः । अपरस्मादुत्पत्तिर्भविष्यति अविराविकन्यायेन । तद्यथा। अवेर्मांसमिति विगृह्याविकशब्दादुत्पत्तिर्भवति आविकमिति । एवमिहापि वृषाय हितमिति विगृह्य वृष्यमिति भवि-

---

कम्बला ॥ निपातनादिति । अन्तस्वरितपाठाच्च यदन्तत्वं विज्ञास्यते परिमाणपर्युदासेनेति । अपरिमाणान्ताद्विगोस्तद्धितलुकि । पञ्चाश्वेत्यादौ ङीपि प्रतिषिद्धे कम्बल्यग्रहणं तत्र परिमाणार्थमेवेत्यर्थः । परिमाणं च सञ्ज्ञैवेति । सञ्ज्ञायत इति संज्ञा ॥ ३ ॥

विभाषा ॥ किमियमिति । यद्यपि हविरपूपादिभ्यो विभाषाया यदिति पूर्वविप्रतिषेधप्रदर्शनादप्राप्तविभाषात्वमिहावगतम् । तथापि शिष्याणां सुखावबोधनायोपन्यासः ॥ ४ ॥

शरीरा ॥ रथायेति । हितार्थे एव रथाद्यद्यथा स्यादर्थान्तरे मा भूदित्येवमर्थमुगवादिभ्यो यदित्यत्रोपसंख्यानं न कृतम् । के चिद् रथसीताहलेभ्यो यद्विधाविति तदन्तविधिमिच्छन्ति । अन्ये तु हलसीताशब्दयोः साहचर्यात् चतुर्थाध्यायविहित एव यति तदन्तविधिर्न त्वस्मिन्नित्याहुः ॥ ६ ॥

खल ॥ वृषशब्दोयमिति । न तु कृतनलोपोऽकारान्तोऽन्यथाऽसंदेहाय कृतनलोपो निर्दिश्येतेति भावः । वृषन्शब्द इति । उच्चारणादेव नान्तत्वे ज्ञाते नकारान्त इति वचनं स्वरूपनिरूपणार्थम् । तस्येति । अन्यथा ततश्छः प्रसज्येत । वृषशब्दश्चादेश इति। अन्यथा ये चाभावकर्मणोरिति प्रकृतिभावाद्वृषण्यमिति स्यात्। कुतो नुचरसीति।

ष्याति। वृष्णे हितमिति विगृह्य वाक्यमेव। तथा ब्रह्मणे हितमिति विगृह्य ब्रह्मण्यमिति भविष्यति ब्राह्मणेभ्यो हितमिति विगृह्य वाक्यमेव भविष्यति। त्रैशब्द्यं चेह साध्यं तच्चैवं सति सिद्धं भवति॥

आत्मन्विश्वजनभोगोत्तरपदात्खः ॥ ९ ॥ भोगोत्तरपदात्खविधानेऽनिर्देशः पूर्वपदार्थहितत्वात् *। भोगोत्तरपदात्खविधानेऽनिर्देशः। अगमको निर्देशोऽनिर्देशः। किं कारणम्। पूर्वपदार्थहितत्वात्। उत्तरपदार्थप्रधानस्तत्पुरुषः पूर्वपदार्थप्रधाने च प्रत्यय इष्यते। पितृभोगाय हिते प्राप्नोति। पित्रे चैव हित इष्यते। एवं तर्हि भोगीनरूप्रत्ययो विधास्यते। भोगीनरिति चेद्वावचनम् *। भोगीनरिति यदि प्रत्ययो विधीयते वावचनं कर्त्तव्यम्। मात्रीयः पित्रीयइत्यपि यथा स्यादिति। राजाचार्याभ्यां नित्यम् *। राजाचार्याभ्यां नित्यमिति वक्तव्यम्। राजभोगीनः। आचार्यादणत्वं च। आचार्यभोगीनः। किं भोगीनरूप्रत्ययो विधीयत इत्यतः राजाचार्याभ्यां नित्यमिति वक्तव्यम्। नेत्याह। सर्वथा राजाचार्याभ्यां नित्यमिति वक्तव्यम्। इह च ग्रामणिभोगीनः सेनानिभोगीन इति उत्तरपदइति ह्रस्वत्वं न प्राप्नोति। इह चाभ्भोगीन इति अप्सेभीति तत्वं प्राप्नोति। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं भोगोत्तरपदात्खविधानेऽनिर्देशः पूर्वपदार्थहितत्वादिति। नैष दोषः। अयं भोगशब्दोऽस्त्येव द्रव्यपदार्थकः। तद्यथा। भोगवानयं ब्राह्मण इत्युच्यते। यः सम्यक्

ब्रह्मशब्दस्यानेकार्थत्वाद् ब्राह्मणशब्दपर्यायत्वं नातिप्रसिद्धमिति व्युत्पादयति एकेन विग्रह इति। एकेन विग्रह एवेत्यर्थः। विग्रहस्तु नासौ द्वाभ्यामपि भवतीति नासौ नियम्यते। विगृह्येति। भिन्नकर्तृकत्वात् क्त्वानुपपत्तिः। नैष दोषः। उत्पत्तिशब्देनोत्पादनमुच्यते अन्तर्भावितण्यर्थत्वात् पदः परावरयोगे चेति वा क्त्वाप्रत्ययः। वृषन्ब्राह्मणशब्दाभ्यामनभिधानाच्छ प्रत्ययो न भवतीत्यर्थः॥ ७॥

आत्मन्॥ अनिर्देश इति। योयं हितमिति प्रत्ययार्थनिर्देशः स भोगोत्तरपदात्खविधाने विवक्षितार्थप्रत्यायनासामर्थ्यादनिर्देशः तत्कार्याकरणात्। तथाहि। लोके पितृभोगीणादिशब्दैः पित्रादिहितस्यार्थस्य प्रतिपत्तिः पित्रादिभोगहितस्य प्रतिपत्तिप्रसङ्गः वावचनमिति। अन्यथा भोगीनराच्छो बाध्येत। भोगोत्तरपदात् खविधाने केवलेभ्यः पित्रादिभ्यो बाधकाभावाच्छः सिध्यति। किं भोगीनरिति प्रत्यासत्त्याश्रयेण प्रश्नः। सर्वथेति। सामर्थ्यं बलवदित्युत्तरम्। ननु भोगोत्तरपदात् खविधाने क्रियमाणेऽपि नित्यग्रहणे केवलाभ्यां राजाचार्याभ्यां छस्य निवृत्तिर्न सिध्यति। एवं तर्हि तथा पाठः कर्तव्यः। यथेष्टं सिध्यति राजाचार्याभ्यां नित्ये भोगोत्तरपदाभ्यामेव हिते प्रत्ययइति। ग्रामणिभोगीन इति। ग्रामण्यो भोग इति षष्ठीसमासः। इको ह्रस्वोऽङ्यो गालवस्येति ह्रस्वः। तत्वं प्राप्नोतीति। भकारादौ प्रत्यये ऽङ्गस्य विधीयमानमिति भावः। द्रव्यपदार्थक इति। भोगो धनमुच्यते। भोगवानयं ब्राह्मण इति। धन-

स्नानादीः क्रिया अनुभवति । तद्यः क्रियापदार्थकस्तस्येदं ग्रहणम्। यश्च पितृस्थाभ्यः क्रियाभ्यो हितः संबन्धादसौ पित्रे हितो भवति। यदि संबन्धा, दस्तु द्रव्यपदार्थकस्यापि ग्रहणम्। योपि हि पितृद्रव्याय हितः संबन्धादसौ पित्रे हिता भवति। अथ वा भोगशब्दः शरीरवाच्यपि दृश्यते। तद्यथा। अहिरिव भोगैः पर्येति। अहिरिव शरीरैरिति गम्यते। एवं पितृशरीराय हितः पितृभोगीणं इति। खविधाने पञ्चजनादुपसंख्यानम् *। खविधाने पञ्चजनादुपसंख्यानं कर्त्तव्यम्। पञ्चजनाय हितः पञ्चजनीनः। समानाधिकरण इति वक्तव्यम्। यो हि पञ्चानां जनाय हितः पञ्चजनीयः स भवति। सर्वजनाट्ठञ्च *। सर्वजनाट्ठञ्च वक्तव्यः खश्च। सर्वजनाय हितः सार्वजनिकः। सर्वजनीनः। समानाधिकरण इति च वक्तव्यम्। यो हि सर्वेषां जनाय हितः सर्वजनीयः स भवति। महाजनान्नित्यम् *। महाजनान्नित्यं ठञ्वक्तव्यः। महाजनाय हितो माहाजनिकः। तत्पुरुष इति वक्तव्यम् बहुव्रीहौ मा भूत्। महान् जनो ऽस्य महाजनः। महाजनाय हितो महाजनीयः। यदि तर्ह्यतिप्रसङ्गाः सन्तीत्युपाधिः क्रियते। आद्यन्यासेष्वुपाधिः कर्त्तव्यः। आत्मन्विश्वजनसमानाधिकरण इति वक्तव्यम्। यो हि विश्वेषां जनाय हितः विश्वजनीयः स भवति। अथमतमेतदनभिधानादाद्यन्यासे न भवतीति। इहापि नार्थ उपाधिग्रहणेन। इहाप्यनभिधानान्न भविष्यति॥

धनापि कृपणो निर्भोग उच्यते। तस्मादत्र क्रिया भोगशब्दवाच्या। संबन्धादिति। यस्तु पितृधनाय हितो नासाववश्यं पितृहितो भवति। ममैतद्धनं भविष्यतीत्येवं बुद्ध्या पितृधनरक्षणादिति भावः। यो हीति। यस्तु ममैतद्भविष्यतीति मन्यते नासौ पितुरेतद्धनमिति रक्षति किं तर्हि ममैतदित्याभिमानेन। अहिरिवेति। समुदाये वृत्तो भोगशब्द एकदेशेषु फणेषु प्रयुज्यते। केचिदाहुः। भुजङ्गाङ्गमेव भोगशब्देनोच्यते न तु सर्वशरीरमिति। तदयुक्तम्। अनन्तत्वात् प्रयोगविषयस्यावधारणस्य कर्तुमशक्यत्वात्। पञ्चजनादिति। मनुष्याः पञ्चजना उच्यन्ते। चत्वारो वर्णाः रथकारपञ्चमाः। पञ्चजनायेति। दिक्संख्ये संज्ञायामिति समासः। समुदाये वृत्तस्यावयवेपि वृत्त्या एकवचनं यथा सप्तर्षिरिति। यो हि पञ्चानामिति। ननु सापेक्षत्वादत्र समासेन न भाव्यम्। संख्या हि संख्येयविशेषमपेक्षते। संख्येयस्यैव जनापेक्षया व्यतिरेकस्तद्द्वारेण तु संख्याया गुणस्येति साक्षात्संबन्धाभावात्समासाप्रसङ्गः। नैष दोषः। प्रकरणादिवशाद्यदा विशिष्टसंख्येयवृत्तित्वावसायः संख्याशब्दानां तदा जनादिना साक्षात्सबन्धाद्भवति वृत्तिः। सर्वजनायेति। सर्वो जन इति पूर्वकालैकसर्वेति समासः। सर्वेषां जनायेति। सर्वसाधारणाय वेश्यादिजनायेत्यर्थः। महाजनादिति नित्यग्रहणं सर्वजनादुक्तः खो मा भूदित्येवमर्थम्। महाजनशब्दश्च समानाधिकरणपद आत्वनिर्देशादेवावसीयते॥ ६॥

सर्व॥ सर्वादिति। अनुकरणत्वात्सर्वनामकार्याभावः। सर्वनामानीत्यन्वर्थसंज्ञा-

Indira Gandhi National Centre for the Arts

सर्वपुरुषाभ्यां णढञौ ॥ १० ॥ सर्वाण्णस्य वावचनम् * । सर्वाण्णस्य वेति वक्तव्यम् । सार्वः । सर्वीयः। पुरुषाद्वध इति वक्तव्यम् । पौरुषेयो वधः । अत्यल्पमिदमुच्यते पुरुषाद्वध इति। पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यम्। पौरुषेयो वधः। पौरुषेयो विकारः। पौरुषेयस्समूहः।तेन कृतं पौरुषेयं न दैवतम्॥

तदर्थं विकृतेः प्रकृतौ ॥ १२ ॥ तदर्थमिति कृत्यनामभ्यष्ठञ् * । तदर्थमिति कृत्यनामभ्यष्ठञ्वक्तव्यः। इन्द्रमहार्थमैन्द्रमहिकम् । गाङ्गामहिकम् । काशेरुपञ्जिकम् । न वा प्रयोजनेन कृतत्वात् *। न वा वक्तव्यम् । किं कारणम् । प्रयोजनेन कृतत्वात् । यद्वीन्द्रमहार्थम् इन्द्रमहस्तस्य प्रयोजनं भवति। तत्र प्रयोजनमित्येव सिद्धम् ॥

छदिरुपधिबलेर्ढञ् ॥ १३ ॥ उपध्यर्थमिति प्रत्ययानुपपत्तिरुपध्यभावात्* । उपध्यर्थमिह प्रत्ययस्यानुपपत्तिः। किं कारणम् । उपध्यभावाद् विकृतेः । प्रकृतावभिधेयायां प्रत्ययेन भवितव्यम् । न चोपधिसंज्ञिकाया विकृतेः प्रकृतिरस्ति। यद्धि तद्रथाङ्गं तदौपधेयमित्युच्यते । सिद्धं तु कृदन्तस्य स्वार्थेऽञ्वचनात् *। सिद्धमेतत् । कथम् । कृदन्तस्य स्वार्थे अञ्वक्तव्यः। उपधीयते उपधेयम् । उपधेयमेवौपधेयम् । सिद्ध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तम् उपध्यर्थमिति प्रत्ययानुपपत्तिरुपध्यभावादिति। नैतदस्ति अयमुपधिशब्दोऽस्त्येव कर्मसाधनः। उपधीयते उपधिरिति। अस्ति भावसाधन उपधानमुपाधिरिति । तद्यो भावसाधनस्तस्येदं ग्रहणम् । एवमपि न सिध्यति। किं कारणम् । विकृतेः

विज्ञानाद् । अनाश्रितार्थस्य च शब्दरूपस्यानुकरणमिति प्रकृतिवद्भावादपि सर्वनामत्वं न भवति । पुरुषाद्वधेति प्रत्ययार्थसामर्थ्येन षष्ठीसमर्थविभक्तिर्लभ्यते। कृते तु तेनेति तृतीयोपात्तैव । पुरुषश्च लोकप्रसिद्धः पाण्यादियुक्त इह गृह्यते । न तु सांख्यादिशास्त्रप्रसिद्धस्तत्र प्रत्ययस्यादर्शनादित्याहुः ॥ १० ॥

तदर्थम ॥ कृत्यनामभ्य इति । अवश्यकर्त्तव्यत्वात्करणार्हत्वाद्वा कृत्या उत्सवास्तन्नामभ्य इत्यर्थः। नवेति । प्रयुज्यतेऽनेनेति प्रयोजनं फलमप्यभिधीयते कारणमपीति भावः ॥ १३ ॥

छदि ॥ उपध्यभावादिति। उपधिशब्दो विकृतिवाची नास्ति। एकस्यैव रथाङ्गविशेषस्योपध्यौपधेयशब्दाभ्यामभिधानात् प्रकृतिप्रत्ययार्थस्य प्रकृतिविकारभावाभावादित्यर्थः । सिद्धे त्विति । उपधेयशब्दात्कर्मसाधनयदन्तात् स्वार्थेऽञ् वक्तव्य इत्यर्थः। तद्यो भावसाधन इति। तत्र हि तादर्थ्यं संभवति। उपधानक्रियार्थत्वाद्रथाङ्गविशेषस्य । एवमपीति । यद्यपि लोके क्रियाविकारत्वेन कश्चिन्निर्दिश्यते । बहुविकारोयं मनुष्यो हसति गायति नृत्यतीति। तथापि प्रत्ययविधौ विशिष्ट एव प्रकृतिविकारभावो गृह्यते यत्र प्रकृत्युच्छेदो यत्र वा प्रकृते रूपान्तरापत्तिः। बालेया इति। अत्र तण्डुलानां तादर्थ्यमस्ति । न तु प्रकृतिविकारभावो बल्यवस्थायामपि तण्डुलानां तदवस्थत्वा-

Indira Gandhi National Centre for the Arts

प्रकृताविति वर्तते । प्रकृतिविकृतिग्रहणं निवर्त्तिष्यते । तच्चावश्यं निवर्त्त्यम् । इहार्थमुत्तरार्थं च । इहार्थं तावत् । बालेयास्तण्डुलाः । उत्तरार्थम् । ऋषभोपानहोर्ञ्यः । आर्षभ्यो वत्स इति । अथ तदर्थमित्यनुवर्त्तते उताहो न । किं चार्थोऽनुवृत्त्या । बाढमर्थः। तदस्य तदस्मिन् स्यादिति तदर्थे यथा स्यात् इह मा भूत् प्रासादो देवदत्तस्य स्यादिति । प्राकारो नगरस्य स्यादिति । यदि तदर्थमित्यनुवर्त्तते । ऋषभोपानहोर्ञ्यः । ऋषभार्थो घासः । उपानदर्थस्तिलकल्क इत्यत्रापि प्राप्नोति । एवं तर्हि अनुवर्त्तते प्रकृतिविकृतिग्रहणम् । ननु चोक्तं बल्यृषभयोर्न सिध्यतीति । किं पुनर्भवान् विकारं मत्वाह बल्यृषभयोर्न सिध्यतीति । यदि तावद्यः प्रकृत्युपमर्देन भवति स विकारः । वैभीतिको यूपः। खादिरं चषालमिति न सिध्यति अथ मतमेतत्तदेव गुणान्तरयुक्तं विकार इति बल्यृषभयोरपि सिद्धं भवति । गुणान्तरयुक्ता हि तण्डुला बालेयाः । गुणान्तरयुक्तश्च वत्स आर्षभ्यः ।

औपधेयं तु न सिध्यति । वचनात्स्वार्थिको भविष्यति ॥

दिति भावः । आर्षभ्य इति । यथा पक्कमाम्रफलमाम्रफलविकारत्वेन न प्रसिद्धमपि तु प्रत्यभिज्ञावशात्तत्वेनैवमृषभोपि न वत्सविकारः । अथेति । तदर्थग्रहणानुवृत्तौ स्वार्थे प्रत्ययउपधिशब्दात्सिध्यतीति भावः । ऋषभोपानद्वरत्रादयश्च शब्दास्तादर्थ्याद्वत्सादिषु वर्त्तमानाः स्वार्थ एव प्रत्ययमुत्पादयिष्यन्ति । प्रासाद इति । अत्र संभावनामात्रं गम्यते न तु तादर्थ्यमिति प्रत्ययो नेष्यते इति करणापरामर्शेनेदमुच्यते । यदि तर्हि तदस्येत्यनेन तादर्थ्ये प्रत्ययः क्रियते तदा योग्यतामात्रविवक्षायां प्रत्ययाप्रसङ्गः । अरणीयं स्थूणाकाष्ठमिति । अत्रापि बुद्धिपरिकल्पितारोपिततादर्थ्याश्रयणे प्रत्ययो भविष्यतीत्याहुः । गुणान्तरयुक्ता हीति । बल्यवस्थायां यो गुणः सन्निवेशलक्षणो लाक्षादिकृतलौहित्यादिलक्षणो वा तदपेक्षया प्राक्तनगुणयुक्ताइत्यर्थः । गुणान्तरयुक्तश्च वत्सइति । सुजातावयवः संहननवान् महाप्राण ऋषभावस्थाप्राप्तये यदा परिपोष्यते न तु दानविक्रयार्थं तदा तादर्थ्यस्य संभवः । आम्रं तु पक्कं यद्यप्याम्रविकारो गुणभेदात् । तथापि तत्त्वबुद्ध्युत्पादाल्लोके प्रकृतिविकारभावस्याऽप्रसिद्धत्वात् । तत्र प्रत्ययाभावः । आम्रपक्कावस्थयो राम्रशब्द एव वाचकत्वेन प्रवर्त्तते न तु शब्दान्तरं वत्सर्षभशब्दवत् । औपधेयं त्विति। सत्यपि क्रियापेक्षे द्रव्यस्य तादर्थ्ये प्रकृतिविकारभावात् । वचनादिति । कर्मसाधनकिप्रत्ययान्तादुपधिशब्दात्स्वार्थे ढञ् प्रत्यय उपध्यौपधेयशब्दयोर्लोके पर्यायत्वोदकस्यार्थस्यात्मापेक्षया तादर्थ्ये प्रकृतिविकारभावाभावात् ॥ १२ ॥

तदस्य ॥ स्याद्ग्रहणमिति ॥ क्रियमाणेऽपि स्याद्ग्रहणे नैवातिप्रसङ्गनिवृत्तिरितिकरणादेव सर्वातिप्रसङ्गनिवृत्तिः सेत्स्यतीति प्रश्नः । प्रासादो देवदत्तस्येति । अक्रियमाणे स्याद्ग्रहणे स्वस्वामिसंबन्धादावतिप्रसङ्ग उक्तः । अस्येति षष्ठ्या संबन्धमात्रस्य प्रतिपादनात्सामान्ये च सर्वविशेषान्तर्भावात् । ननु तदर्थग्रहणानुवृत्त्यात्र न भविष्यति । तथा च च्छदिरुपधिबलेर्ढञित्यत्र भाष्यं बाढमर्थ इत्यादि । एवं तर्ह्यसति स्याद्ग्रहणे प्रासादार्थोयं देवदत्त उत्पन्नो योग्योयं प्रासादलाभइति तादर्थ्यसंभवात्प्रत्ययप्रसङ्गः । अथेति । यदा देवदत्तनामा केनचिदीश्वरो दृष्टस्ततः प्रासादं विस्तीर्णं दृष्ट्वा-

Indira Gandhi National Centre for the Arts

तदस्य तदस्मिन्त्स्यादिति ॥ १६ ॥ स्याद्ग्रहणं किमर्थम्। इह मा भूत्। प्रासादो देवदत्तस्य प्राकारो नगरस्येति। अथ क्रियमाणेपि स्याद्ग्रहणइह कस्मान्न भवति प्रासादो देवदत्तस्य स्यात् प्राकारो नगरस्य स्यादिति। शक्यार्थे लिङिति वक्तव्यम्। नैवं शक्यम्। इदानीमेव ह्युक्तं न ह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणमिति। एवं तर्हि इतिकरणः क्रियते ततश्चेद्विवक्षा भवति। विवक्षा च द्वयी। अस्त्येव प्रायोक्त्री विवक्षा। अस्ति लौकिकी प्रायोक्त्री विवक्षा प्रयोक्ता हि मृद्व्या स्निग्धया श्लक्ष्णया जिह्वया मृदून् स्निग्धान् श्लक्ष्णान् शब्दान् प्रयुङ्क्ते। लौकिकी विवक्षा यत्र प्रायस्य संप्रत्ययः प्राय इति लोको व्यपदिश्यते। न च प्रासादो देवदत्तस्य स्यात् प्राकारो नगरस्य स्यादित्यत्रोत्पद्यमानेन प्रत्ययेन प्रायस्य संप्रत्ययः स्यात्। यद्येवं, नार्थः स्याद्ग्रहणेन। न

सौ संभावयति नायं प्रासादोऽन्यस्य संभवति देवदत्तस्यायं प्रासादः स्यादिति तदा प्रत्ययः प्राप्नोतीत्यर्थः। नन्वत्र तादर्थ्यं न प्रतीयत इति प्रत्ययो न भविष्यति। एवं तर्हि प्रासादलाभयोग्योसौ देवदत्तः प्रासादार्थ इत्येवं विवक्षायामिदमुदाहरणम्। अथ वा तदर्थग्रहणमत्र नानुवर्तते इतिकरणेनानिष्टनिवृत्तेः साधयिष्यमाणत्वात् पूर्वसूत्रे तु भाष्यकारेणेतिकरणापरामर्शेन प्रसङ्गान्तरेण यदर्थग्रहणस्यैवानुवृत्तिर्दर्शिता न त्वसौ सिद्धान्तस्तथा चान्यार्थमपि दारु योग्यतामात्रेण प्रासादीयमुच्यते न च तत्र तादर्थ्यलेशोप्यस्ति। न च प्रतीयते येनासदपि तादर्थ्यं बुद्ध्या परिकल्प्य प्रयोगः क्रियेत। शक्यार्थ इति पठितव्यमित्यर्थः। इदानीमेवेति। चिरवृत्तमपि वस्तु बुद्ध्या भावितत्वात्प्रत्यासन्नमिव प्रतीयते। उपदेशेऽजनुनासिक इदित्यत्रेदमुक्तम्। प्रायग्रहणादसंज्ञायामपि घञ् भवति। प्रायवचनात् संज्ञायामेव घञ् स्याद्वा न वा ह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणमिति तत्र हि घञ् विधेयत्वात्प्रधानं तस्यैव प्रायग्रहणं च विशेषणं न्याय्यम्। न तु संज्ञायां प्रायग्रहणं विशेषणं परार्थस्य स्वसंस्कारप्रतिपत्तावयोग्यत्वाच्छब्देन पारार्थ्योपपन्नस्यैव प्रत्यायनादेकवाक्यत्वाच्चोपाधिविशेषणशब्दयोश्च क्व चित्पर्यायत्वं क्रियाभावशब्दयोरिव। क्वचित्तु भेदेन व्यवहारः। तदुक्तम्। अर्थाविशेष उपाधिस्तदन्तवाचः समानशब्दो यः अनुपाधिरतोऽन्यच्छुक्लादिविशेषणं यद्वदिति। तत्र स्यादित्येतत्प्रकृत्यर्थविशेषणायोपात्तं परतन्त्रमयोग्यं शक्यार्थइत्यनेन विशेषणेन संबन्धानुभवे। ननु विशेषणसंबन्धमनुभूय प्रकृत्यर्थं विशेषयिष्यति। नैतदस्ति। विशेषणसंबन्धानुभवे प्रधानत्वं तस्य स्यात्। नतूपाधित्वं प्रतीतिकालएवञ्च तस्य पारार्थ्यमवगतमिति कुतो विशेषणसंबन्धः। अथोपाधिद्वयेन प्रकृत्यर्थः संबध्यत। तदिहापि प्रसज्यते। शक्यः प्रासादो देवदत्तस्य स्यादिति। तत्र ज्ञातुमुपभोक्तुं वा शक्य इति प्रकृत्यर्थस्य शक्यार्थत्वविशेषणसंबन्धसंभवः। मृदूनिति। अपभ्रंशानित्यर्थः। तस्मात् प्रयोक्तृविवक्षा नाश्रीयते। प्रयोक्तुः स्वातन्त्र्यान्नियमाभावात्। प्रायस्येति। समग्रकल्पस्येत्यर्थः। तस्माद्यत्रार्थे लोकाः शब्दान् प्रयुञ्जते तदर्थाभिधायिनः त एव शास्त्रेणानुविधीयन्ते। प्रयोगमूलत्वाद् व्याकरणस्मृतेः। अयमेव न्यायः क्वचिदिति करणेनोपसंगृह्यते। तत्रेतिशब्दो हे-

Indira Gandhi National Centre for the Arts

हि प्रासादो देवदत्तस्य प्राकारो नगरस्येत्यत्रोत्पद्यमानेन प्रत्ययेन प्रायस्य संप्रत्ययः स्यात् ॥

आर्हादगोपुच्छसंख्यापारिमाणाट्ठक् ॥ १९ ॥ किमर्थं संख्यायाः पृथग्ग्रहणं क्रियते । न संख्यापि परिमाणमेव तत्र परिमाणपर्युदासो भविष्यति। एवं तर्हि सिद्धे सति यत्संख्यायाः पृथग्ग्रहणं करोति तज्ज्ञापयत्याचार्य्यः, अन्या संख्या अन्यत्परिमाणमिति । किमेतस्य ज्ञापने प्रयोजनम् । अपरिमाणविस्ताचितकम्बलेभ्यो न तद्धितलुकीति। द्वाभ्यां शताभ्यां क्रीता द्विशता। त्रिशता। परिमाणपर्युदासो न भवतीति । तद्येतज्ज्ञाप्यते । तदस्य परिमाणं संख्यायाः संज्ञासङ्घसूत्राध्ययनेष्विति विशेषणं न प्रकल्पते परिमाणं या संख्येति । इह च क्रीतवत्परिमाणादिति संख्याविहितस्य प्रत्ययस्यातिदेशो न प्रकल्पते । शतस्य विकारः शत्यः । शतिकः । साहस्र इति । यत्तावदुच्यते एतज्ज्ञापयत्याचार्य्योऽन्या संख्या ऽन्यत्परिमाणमिति । नैतज्ज्ञापकसाध्यमन्या संख्यान्यत्परिमाणमिति । न्यायसिद्धमेवैतत् । भेदमात्रं संख्याह । यच्चेषीकान्तं यच्चापरिमाणं तस्य सर्वस्य

त्वर्थः सन् विवक्षामनुसारयति । योऽयमर्थस्तदस्य तदस्मिन् स्यादिति तदर्थप्रत्यायनाय यदा विवक्षा भवति अतो हेतोरयमर्थः। प्रत्ययोत्पत्तिनिमित्तत्वेनाश्रीयत इति। अथवा एवमर्थवृत्तिरितिशब्दो विवक्षामनुसारयति। एवं यदि लोकस्य विवक्षा भवति तत्र प्रत्यय इत्यर्थः । न च लोकस्य प्रासादो देवदत्तस्य स्यादित्यर्थस्य प्रतिपादनाय प्रासादीयो देवदत्त इति शब्दप्रयोगेच्छा भवति भवाद्यर्थप्रतिपादनायैवैतच्छब्दप्रयोगात्।१८।

आर्हा ॥ किमर्थमिति । परिमीयतेऽनेनेति परिमाणमिति क्रियाशब्दत्वात्परिमाणशब्दस्य संख्याया अपि परिच्छेदहेतुत्वात् पृथग्ग्रहणं न कर्तव्यमिति मत्वा प्रश्नः। एवं तर्हीति । आचार्य्यदेशीयः परिहरति । यथा प्राच्यत्वाद्भरतानां ग्रहणे सिद्धे बह्वच इत्यत्र भेदेनोपादानमन्यत्र प्राच्यग्रहणे भरतग्रहणनिवारणार्थम् । तेनेञः प्राचामिति भरतेभ्यो युवप्रत्ययस्य लुङ् भवति औद्दालकिः पिता औद्दालकायनः पुत्र इति। एवमिहापि संख्याग्रहणमन्यपरिमाणग्रहणे संख्याया अग्रहणार्थम् । तेन द्वाभ्यां शताभ्यां क्रीता द्विशतेत्यत्र द्विगुलक्षणस्य ङीपोपरिमाणान्तत्वात् प्रतिषेधः सिध्यति । यथा पञ्चाश्वेति । पणपादेति नित्ये यति प्राप्ते शाणाद्वेत्यत्र शतशाणाभ्यां वेति वचनाद्यत्प्रत्ययाभावात् पक्षे शताच्च ठन्यतावशत इत्यत्रासमासग्रहणानुवृत्त्या संख्यालक्षणस्य कनोऽध्यर्द्धपूर्वेति लुकि कृते द्विशतेति भवति । यद्येतदिति । शिष्य आचार्यदेशीयेनोक्ते दूषणमुद्भावयति । इदानीमाचार्य आह यत्तावदिति । परिमाणशब्दः क्रियाशब्दत्वेपि विशिष्टपरिच्छेदहेतौ द्रोणादौ रूढो न संख्यामभिधेयत्वेन गृह्णाति यथा पङ्कजशब्दः पद्ममेवाभिदधाति न तु कुमुदादिकमपीत्यर्थः। भेदमात्रमिति । भेदः पदार्थानां वैलक्षण्यं तन्मात्रं संख्याशब्दः प्रतिपादयति । मूर्तामूर्तगणनात्मकत्वात् संख्यायाः, एको घट इत्यत्रापि द्व्यादिनिरासाद्भेदावगतिरस्त्येव । यच्चेषीका-

Indira Gandhi National Centre for the Arts

संख्याभेदमात्रं ब्रवीति । परिमाणं तु सर्वतः । सर्वतो मानमिति चातः परिमाणमिति । प्रस्थस्य च समानाकृतेर्न कुतश्चिद्विशेषो गम्यते । न चोन्मानतो न परिमाणतो न प्रमाणतः । किं पुनरुन्मानं किं परिमाणं किं प्रमाणम् । ऊर्ध्वमानं किलोन्मानम् ॥ ऊर्ध्वं यन्मीयते तदुन्मानम् । परिमाणं तु सर्वतः ॥ सर्वतो मानमिति चातः परिमाणम् । कुत एतत् । परिः सर्वतो भावे वर्त्तते । आयामस्तु प्रमाणं स्यात् ॥ आयामविवक्षायां प्रमाणमित्येतद्भाति । संख्या बाह्या तु सर्वतः ॥ आतश्च सर्वतः संख्या बाह्या । भेदमात्रं ब्रवीत्येषा नैषा मानं कुतश्च न ॥ एवं च कृत्वा संख्यायाः पृथग्ग्रहणं क्रियते । यदप्युच्यते तदस्य परिमाणं संख्यायाः संज्ञासङ्घसूत्राध्ययनेष्विति विशेषणं न प्रकल्पतइति । आहायं परिमाणं या संख्येति न चास्ति संख्या परिमाणं तत्र वचनादियती विवक्षा भविष्यति । यदप्युच्यते । क्रीतवत्परिमाणादिति च संख्याविहितस्य प्रत्ययस्यातिदेशो न प्रकल्पते इति । संख्याया इति च तत्र वक्तव्यम् । किं पुनरिमे ठगादयः प्रागर्हाद्भवन्ति ।

न्तामिति । अपचितपरिमाणोपलक्षणमिषीकान्तग्रहणम् । तेनायमर्थः । हिमवदादि महापरिमाणमपि संख्यया गण्यते सप्त कुलाचला इति । अपचितपरिमाणमपि त्रयः परमाणव इति । यच्चापरिमाणमिति । अमूर्तमप्यात्मादि गण्यते इत्यर्थ । उन्मानप्रमाणपरिमाणानि तु मूर्तद्रव्यविषयाण्येव । क्वचित्पाठः यच्च परिमाणमिति । तत्रायमर्थः । द्रोणादिपरिमाणमपि संख्यया परिच्छिद्यते द्रोणाविति । परिमाणग्रहणं चापलक्षणं सर्वस्य संख्यापरिच्छेद्यत्वात् । तदुक्तम् । दिष्टिप्रस्थसुवर्णादि मूर्तिभेदाय कल्पते । क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिकेति ॥ सर्वत इति । आरोहपरिणाहाभ्यां स्वगताभ्यां धान्यादि येन मीयते काष्ठादिमयेन तत्परिमाणं प्रस्थादिकमुच्यते । प्रस्थस्य चेति । संख्ययैव विशेषो गण्यते द्वौ प्रस्थौ त्रयः प्रस्था इति न त्वन्यत इत्यर्थः । भिन्नसन्निवेशस्य हस्तादिनापि परिच्छेदो भवतीति समानाकृतिग्रहणं समानसन्निवेशप्रतिपादनार्थम् । प्रसङ्गेन उन्मानप्रमाणयोरपि स्वरूपप्रतिपादनं प्रश्नपूर्वकं करोति । किं पुनरिति । ऊर्ध्वमिति । ऊर्ध्वदिगवस्थितं परिच्छेदकमुन्मानमुच्यते । यथा हास्तिनमुदकमित्यत्र हस्तीति केचिदाहुः । अन्ये तु हस्त्यादेः प्रमाणे चान्तर्भावात्तुलादण्डादावारोप्य येन द्रव्यान्तरपरिच्छिन्नगुरुत्वेन पलादिशब्दवाच्येन पाषाणादिना सुवर्णादेर्गुरुत्वं मीयते तदुन्मानं तच्चोर्ध्वारोपणादूर्ध्वमुच्यतइत्याहुः । आयाम इति । विस्तारो येन मीयते दारुवस्त्रादीनां तत्प्रमाणं हस्तादि तच्चायामपरिच्छेदित्वादुपचारादायामशब्देनोच्यते । नैषेति । न कुतश्चित् संनिवेशादेः संख्या मानं सन्निवेशादिनिरपेक्षं मानमित्यर्थः । तथाहि । द्वौ मेरुसर्षपावित्यपि भवति । इयती विवक्षेति । रूढिपरित्यागेन परिच्छेदकत्वमात्रमाश्रयिष्यते इत्यर्थः । नन्वेवमप्यव्यभिचारात् संख्याया विशेषणमनर्थकम् । नैष दोषः । प्रत्ययार्थस्य यदा परिच्छेदिका संख्या तदा प्रत्ययो यथा स्यात् पञ्चको गोसंघ इति। यदा तु प्रकृत्यर्थस्यैव परिच्छेदिका संख्या पञ्च गावोऽस्य संघस्येति तदा मा भूदित्येवमर्थं संख्या परिमाणग्रहणेन

आहो स्वित्सहार्हेण। कश्चात्र विशेषः। ठगादयः प्रागर्हाच्चेदर्हे तद्विधिः *। ठगादयः प्रागर्हाच्चेदर्हे तद्विधिः। अर्हे ठगादयो विधेयाः। शतमर्हति शत्यः। शतिकः। साहस्र इति। वस्ने वचनात्सिद्धम्। इह यः शतमर्हति शतं तस्य वस्नो भवति। तत्र सोऽस्यांशवस्नभृतय इत्येव सिद्धम्। वस्ने वचनात्सिद्धमिति चेन्मांसौदनिकादिष्वप्राप्तिः *। वस्ने वचनात्सिद्धमिति चेन्मांसौदनिकादिष्वप्राप्तिः। मांसौदनिकोऽतिथिः। श्वैतच्छत्रिकः। कालायसूपिकः। तथा गुणानां परिप्रश्ने भवति। किमयं ब्राह्मणोऽर्हति शत्यः। शतिकः। साहस्रः। नैष्किक इति न सिध्यति। सन्तु तर्हि सहार्हेण। अर्हाच्चेद्भोजनादिष्वतिप्रसङ्गः *। अर्हाच्चेद्भोजनादिष्वतिप्रसङ्गो भवति। भोजनमर्हतीति। किमुच्यते भोजनादिष्वतिप्रसङ्ग इति। यदा च्छेदादिभ्य इत्युच्यते। अवश्यं मांसौदनिकाद्यर्थं योगविभागः कर्त्तव्यः। तदर्हति। ततश्छेदादिभ्यो नित्यमिति। तस्मिन् क्रियमाणे भोजनादिष्वतिप्रसङ्गो भवति। उक्तं वा *। किमुक्तम्। अनभिधानादिति। अनभिधानाद्भोजनादिष्वतिप्रसङ्गो न भविष्यति। अथ वा योगविभागः करिष्यते। कथं मांसौदनिकोऽतिथिः। श्वेतच्छात्रिकः। कालायसूपिकः। अस्मिन् दीयेत अस्मा इति च। एवमेतत्सिद्धम्। अथ वा पुनः सन्तु प्रागर्हात्। ननु चोक्तं ठगादयः प्रागर्हाच्चेदर्हे तद्विधिरिति। परिहृतमेतद् वस्ने वचनात्सिद्धमिति। ननु चोक्तं वस्ने वचनात्सिद्धमिति चेन्मांसौदनिकादिष्वप्राप्तिरिति। तथा गुणानां परिप्रश्ने भवति। किमयं ब्राह्मणोऽर्हति शतमर्हति शत्यः। शतिकः। साहस्रः नैष्किक इति न सिध्यतीति। नैष दोषः। अस्मिन् दीयते अस्मा इति च एवमेतत् सिद्धं भवति॥

विशिष्यते। संख्याया इति च तन्त्रेति। लक्ष्यसिद्ध्यै संख्याग्रहणं तत्राधिकं कर्त्तव्यमित्यर्थः। किं पुनरिति। किं मर्यादायामाङ् अथाभिविधाविति प्रश्नः। अर्हतिशब्दैकदेशानुकरणश्चात्रार्हशब्दः। वस्ने वचनादिति। पटादेरर्थस्य शत्यादिशब्दैरभिधानादिति भावः। मांसौदनिक इति। नहि मांसौदनोऽतिथेर्मूल्यमिति भावः। अस्मिन् दीयत इति। अधिकरणत्वं वा विवक्षित्वा प्रत्ययो विधास्यत इति विकल्पप्रदर्शनार्थमुभयोरुपादानम्। तत्र तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयत इति योगविभागः क्रियते। तदस्मिन्नित्येको योगः। वृद्ध्यायलाभशुल्कोपदा इति द्वितीयः पूर्वयोगस्य सर्वविषयत्वज्ञापनार्थः दीयत इति तृतीयो योग उभयोर्योगयोः शेषः। ततो दीयते तदस्मिन्निति सप्तम्यर्थे ठगादयः प्रत्यया भवन्ति। तदस्मिन् दीयते तदस्मा इति चोपसंख्यानमिति वचनाद् । चतुर्थ्यपि भवन्तीति सर्वेष्टसिद्धि। यद्यप्यर्हतेपि न दीयते। तथापि योग्यतया संभावितदानाश्रयप्रत्ययोत्पादनेन विशिष्टस्वरूपनित्यशब्दव्युत्पत्तिरविरुद्धेति मन्यते॥ १९॥

असमासे निष्कादिभ्यः ॥ २० ॥ असमासइति किमर्थम्। परमनिष्केण क्रीतं परमनैष्किकम्। नैतदस्ति प्रयोजनम्। निष्कशब्दात्प्रत्ययो विधीयते। तत्र कः प्रसङ्गो यत्परमनिष्कशब्दात्स्यात्। नैव प्राप्नोति नार्थः प्रतिषेधेन। तदन्तविधिना प्राप्नोति। ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते। अतउत्तरं पठति। निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वत्र तदन्ताप्रतिषेधस्य *। निष्कादिष्वसमासग्रहणं क्रियते। ज्ञापकार्थम्। किं ज्ञाप्यम्। एतज्ज्ञापयत्याचार्य्यः पूर्वत्र तदन्तविधेः प्रतिषेधो न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। प्राग्वतेष्ठञित्यत्र तदन्तविधिः सिद्धो भवति। नैतदस्ति प्रयोजनम्। ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते। न च ठञ्विधौ का चित्प्रकृतिर्गृह्यते। इदं तर्हि प्रयोजनम्। आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्। परमगोपुच्छेन क्रीतं पारमगोपुच्छिकम्। एतदपि नास्ति प्रयोजनम्। विधौ प्रतिषेधः। प्रतिषेधश्चायम्। एवं तर्हि ज्ञापयत्याचार्यः इत उत्तरं तदन्तविधेः प्रतिषेधो न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। पारायणतुरायणचान्द्रायणं वर्तयति। द्वैपारायणिकः त्रैपारायणिकः। अत्र तदन्तविधिः सिद्धो भवति। एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत् प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति। पूर्वत्रैव तर्हि प्रयो-

---

अस ॥ असमास इति। वक्ष्यमाणः प्रष्टुरभिप्रायः। परमनैष्किकमिति। ठञेयात्र भवति। निष्कशब्दस्य परिमाणवाचित्वात् पूर्वेणाप्राप्तोनेन ठग्विधीयते। निष्कादिष्विति। पूर्वग्रहणं वार्तिककारः पठन् कृष्णतिल्यादि सिद्धं प्रयोजनं मेने। भाष्यकारस्तु न्यायव्युत्पादनाय पूर्वत्रग्रहणमविवक्षितार्थं मत्वा प्रयोजनानि प्रदर्श्य दूषयित्वा च कृष्णतिल्याद्यर्थत्वमेव ज्ञापकस्य स्थापयिष्यति। प्राग्वतेष्ठञित्यत्रेति। नेन परमनिष्कशब्दाट्ठञ् सिद्धो भवति। केवलात्प्रातिपदिकाट्ठञ् विधीयमानः समासान्न स्यादित्याभासमात्रेणेदमुक्तम्। न च ठञ्विधाविति। यत्र विशिष्टा प्रकृतिरुपादीयते तत्र तदन्तविधेः प्रतिषेधः। ठञ्विधौ तु ङ्याप्प्रातिपदिकाधिकारात्प्रातिपदिकमात्रं प्रकृतित्वेनाश्रीयते। तत्र हि समासस्यापि प्रातिपदिकत्वात्तदन्तविधेर्न प्रतिषेधइति ठञ् सिध्यतीति भावः। पारमगोपुच्छिकमिति। ठक्प्रतिषेधाट्ठञ् भवति। यद्येवं केवलस्य प्रतिषेधो न प्राप्नोति गौपुच्छिक इति। नैष दोषः। यस्यां परिभाषायां प्रातिपदकश्रुतिरस्ति सेह नोपतिष्ठत इति सामान्यापेक्ष ज्ञापकमिहाश्रीयते। तेन ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति व्यपदेशिवद्भावो प्रातिपदिकेनेति द्वयोरप्यत्रानुपस्थानात्तदन्तविधिना तदन्तस्य कार्यं केवलस्यापि व्यपदेशिवद्भावेन। विधौ प्रतिषेध इति। पूर्वादिनिः सपूर्वाच्चेति प्रत्ययविधौ ग्रहणवतेत्येतस्याः परिभाषाया ज्ञापितत्वाद् यत्रैव प्रत्ययो विधीयते तत्रैवानया तदन्तविधिः प्रतिषिध्यते। अगोपुच्छसंख्यापरिमाणादित्यनेन तु ठक् प्रतिषिध्यतइति न तदन्तविधिप्रतिषेधो नापि व्यपदेशिवद्भावप्रतिषेधः। अन्ये त्वाहुः। गोपुच्छात्परष्ठक् साधुर्न भवतीत्येवं प्रतिषेधे विज्ञायमाने गोपुच्छश्रुतः सर्वत्राविशेषात् केव-

जनम् । खलयवमाषतिलवृषब्रह्मणश्च । राजमाषेभ्यो हितं राजमाष्यम् । कृष्णतिलेभ्यो हितः कृष्णतिल्यः । प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि * । प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि कर्तव्यम् । पारायणतुरायणचान्द्रायणं वर्त्तयति । द्वैपारायणिकः । त्रैपारायणिकः । अलुकीति किमर्थम् । द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । त्रिशूर्पम् । द्विशूर्पेण क्रीतं द्विशौर्पिकम् । त्रिशौर्पिकम् ॥

शताच्च ठन्यतावशते ॥ २१ ॥ शतप्रतिषेधेऽन्यशतत्वेऽप्रतिषेधः* । शतप्रतिषेधेऽन्यशतत्वे प्रतिषेधो न भवतीति वक्तव्यम् । इह मा भूत् । शतेन

लात्तदन्ताच्च ठकोसाधुत्वं सिध्यतीति नात्र तदन्तविधिना प्रयोजनमिति तदभावे तत्प्रतिषेधस्याप्रसङ्ग इति ज्ञापनस्यापि न प्रयोजनम् । वक्ष्यत्येतदिति । तच्चावश्यं वक्तव्यमसत्यस्मिन् ज्ञापके विध्यर्थे सति तु नियमार्थे संख्यापूर्वपदानामेव यथा स्यादिह मा भूत् परमपरायणं वर्तयतीति । यथा लुगन्तायाः प्रकृतेर्मा भूद् द्विशूर्पेण क्रीतं द्विशौर्पिकमिति । राजमाष्यमिति । ननु राजमाषशब्दस्य जात्यन्तरवाचित्वान्माषशब्दस्यानर्थक्यादत्र प्रत्ययो न प्राप्नोति । नैष दोषः । यथैकविंशतिर्नरसिंहो गौरखरो लोहितशालिरित्यादीनां समुदायानामर्थान्तराभिधायित्वेपि नावयवानामानर्थक्यं तस्यापि शब्दसंस्काराय हि शास्त्रे सर्वत्र परिकल्पितार्थवत्ताश्रीयते । तात्त्विकी तु वाक्यस्यैवार्थस्य प्रत्यायनाय प्रयोगात् । द्वाभ्यामिति । तद्धितार्थेति समासे कृते शूर्पादञन्यतरस्यामित्यञ्ठयोरन्यतरस्याध्यर्द्धेति लुक् । ततो द्विशूर्पेण क्रीतमित्यञभावे सामान्यविहितष्ठञ् भवति । तस्य द्विगुनिमित्तत्वाभावाल्लुगभावः । परिमाणान्तस्येत्युत्तरपदवृद्धिः ॥ २० ॥

शताच्च ॥ संख्याया इति कनि प्राप्ते ठन्यतौ विधीयते । तत्राशत इति प्रत्ययार्थविशेषणं न प्रकृतेरसंभवात् । नहि शतशब्दस्याशते वृत्तिः संभवति । तत्र प्रत्ययार्थस्य द्विविधं शतत्वम् । प्रकृत्यर्थव्यतिरिक्तसंख्येयान्तरविषयं प्रकृत्यर्थविषयं च । तत्र पूर्वं यथा । शतेन क्रीतं शत्यं शाटकशतमिति । अपरन्तु शतमध्यायाः परिमाणमस्य ग्रन्थस्य शतक इति । अत्र हि केवलं प्रत्ययोत्पादनाय प्रकृतिप्रत्यार्थयोर्भेदविवक्षा तात्त्विकस्त्वभेद इति प्रत्ययार्थस्यैकत्वेपि शतत्वमस्त्येव । यथा शतमित्येकत्वे विभक्तिवाच्ये सत्यपि शतत्वं न निवर्तते । तत्राद्यस्य निषेधो मा भूदित्याह शतप्रतिषेध इति । तत्र केचिदाहुः न्यायसिद्धं एवार्थो वार्तिककारेण प्रतिपादितः । प्रकृत्यर्थस्य शतस्य यत्र प्रत्यायार्थत्वं तत्रान्तरङ्गमहेयं संख्यान्तरासाधारणं च शतत्वमन्यत्र तु शत्यं शाटकशतमित्यादौ शब्दान्तरप्रयोगसमधिगम्यत्वाद् बहिरङ्गमिति तत्र प्रतिषेधाप्रसङ्ग । अन्ये त्वाहुः । शतको ग्रन्थ इत्यत्र ग्रन्थस्यैकसंख्यत्वाच्छततत्वमनुमीयते । तत्र यथा वृक्ष इत्यत्र मूलाद्यवयवसमवेतबहुत्वसंख्याश्रयं बहुवचनं न भवति । एवमशत इति प्रतिषेधो ग्रन्थेन प्राप्नोत्यन्यशतत्वे च प्राप्नोतीति वार्तिकारम्भः । ततोन्यशतत्वे प्रतिषेधाभावात्सामर्थ्यादनुमीयमानशतत्वविषयः प्रतिषेधः

Indira Gandhi National Centre for the Arts

क्रीतं शत्यं शाटकशतमिति । अन्यशतस्य इति किम् । शतकं निदानमिति॥

संख्याया अतिशदन्तायाः कन् ॥२२॥डतेश्च डतेश्चेति वक्तव्यम् । इहापि यथा स्यात् । कतिभिः क्रीतं कतिकम् । किं पुनः कारणं न सिध्यति । सन्ताया नेति प्रतिषेधः प्राप्नोति । विप्रतिषेधाड्डतिग्रहणमिति चेदर्थवद्ग्रहणात्सिद्धम् * । अर्थवतस्तिशब्दस्य ग्रहणम् । न च डतेस्तिशब्दोर्थवान् । नैषा परिभाषा इह शक्या विज्ञातुम् । न हि केवलेन प्रत्ययेनार्थो गम्यते । किं तर्हि । सप्रकृतिकेन । क्व तर्ह्येषा परिभाषा कर्तव्या भवति । यान्येतानि शब्दसंघातग्रहणानि । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अर्थवद्ग्रहणात्सिद्धम् । ननु चोक्तं नैषा परिभाषेह शक्या विज्ञातुं न हि केवलेन प्रत्ययेनार्थो गम्यते केन तर्हि सप्रकृतिकेनेति । केवलेनापि प्रत्ययेनार्थो गम्यते । कथम् । उक्तमन्वयव्यतिरेकाभ्याम् ॥

वतोरिड्वा ॥ २३ ॥ कस्यायमिड्विधीयते । कन इत्याह । तत्कनो ग्रहणं कर्त्तव्यम् । अक्रियमाणे हि प्रत्ययाधिकारात् प्रत्ययोयं विज्ञायते । टित्करण-सामर्थ्यादादिर्भविष्यति । अस्त्यन्यट्टित्करणस्य प्रयोजनम् । टित इति ईकारो यथा स्यात् । अकारान्तप्रकरणे ईकारः । न चैषोऽकारान्तः । एवमपि कुत एतट्टित्करणसामर्थ्यादादिर्भविष्यति न पुनरकारान्तप्रकरणे अनकारान्तादपि

संपद्यते । एवं च सति शतं गावः परिमाणमस्य शतको गोसंघ इत्यत्रापि प्रतिषेधो भवति । आपिशलकाशकृत्स्नयोस्त्वग्रन्थ इति वचनादन्यत्र प्रतिषेधाभावो नियतका-लाश्च स्मृतयो व्यवस्थाहेतव इति मुनित्रयमतेनाद्यत्वे साध्वसाधुप्रविभागः ॥ २१ ॥

संख्यायाः ॥ डतेश्चेति । विंशतिशब्दात्तु विंशतिकात्ख इति ज्ञापकात्कन् भवति । न च डतेरिति समुदायस्यार्थवत्त्वात्तदवयवस्तिशब्दोनर्थकोऽत एव विंशतिशब्दे शति च प्रत्ययत्वात्तिशब्दस्यानर्थक्याज्ज्ञापकमन्तरेणापि कन् सिद्धः । नैषेति । लौकिकमर्थ-वत्ता प्रकृतीनां प्रत्ययानां च नास्ति केवलानां प्रयोगाभावादिति भावः । यान्येतानी ति । यद्यपि प्रत्यया अपि शब्दसंघातास्तथापि तेषामानर्थक्यादर्थवन्तः शब्दसंघाता-इह विवक्षिताः । यथोक्तं संग्रहणे पायसं करोतीति सुण्न भवति । उदग्रहणे गर्मुदग्र-हणं न भवति गर्मुत् स्थास्यतीति । हन्ग्रहणे प्लीहन्ग्रहणं न भवति प्लीहानाविति । केवलेनापीति । शास्त्रव्यवस्थाहेतुरन्वयव्यतिरेकगम्यार्थवत्ताश्रीयत इत्यर्थः । अत एव शेर्थवद्ग्रहणात्कारो कुशेत्यादौ शेशब्दस्य ग्रहणाभावः । उपसर्गाणामपि केवलानां प्रयो-गाभावाल्लौकिक्या अर्थवत्ताया अभावादन्वयव्यतिरेकव्यवस्थाप्यैवासावाश्रीयते ॥२२॥

वतोरि ॥ कस्यागममिति । टित्वादस्यागमत्वं निश्चितम् । आगमी न निर्दिष्ट इति तद्विषयः प्रश्नः । वतोरिति पञ्चमीनिर्देशाद्वत्वन्तस्यागमित्वमयुक्तम् । कन इति । वत्वन्तस्य संख्यात्वात पूर्वेण विहितस्येति भावः । आनन्तर्याच्च कनमागमिनं मन्यते । तदिति संख्यायास्तावदनेकस्य प्रत्ययस्य विधानादागमिविशेषो दुर्लभः । प्रत्ययाधिका-राच्च चरेष्ट इत्यादिवदिटः प्रत्ययत्वप्रसङ्गः । अनेकारान्तादिति । यथा डित्यभस्यापि टिलोपः । अथ प्रयोजनाभावाट्टकारस्येत्संज्ञा न भवतीति कस्मान्न कल्प्यते । नैत-

ईकारः स्यात् । तस्मात्कनो ग्रहणं कर्त्तव्यम् । न कर्त्तव्यम् । प्रकृतमनुवर्त्तते । क प्रकृतम् । संख्याया अतिशदन्तायाः कनिति । तद्वै प्रथमानिर्दिष्टम् । षष्ठीनिर्दिष्टेन चेहार्थः । वतोरित्येषा पञ्चमी कन्निति प्रथमायाः षष्ठीं कल्पयिष्यति तस्मादित्युत्तरस्येति । प्रत्ययविधिरयम् । न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति । नायं प्रत्ययविधिः । विहितः प्रत्ययः प्रकृतश्चानुवर्त्तते ॥

विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ॥ २४ ॥ असंज्ञायामिति किमर्थम् । त्रिंशत्को विंशतिकः । कथं चात्र कन् भवति । संख्यायाः कन् भवतीति । अतिशदन्ताया इति प्रतिषेधः प्राप्नोति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयाति भवत्यत्र कन्निति। यदयं विंशतिकात्ख इति प्रत्ययान्तनिपातनं करोति । विंशतेरेतज्ज्ञापकं स्यात् । नेत्याह । योगापेक्षं ज्ञापकम् । अथ वा योगविभागः करिष्यते । विंशतित्रिंशद्भ्यां कन्भवतीति । ततो ड्वुनसंज्ञायामिति ॥

कंसाट्टिठन् ॥ २५ ॥ टिठन्नर्द्धाच्च * । टिठन्नर्द्धाच्चेति वक्तव्यम् । अर्द्धिकः । आर्द्धिकी । कार्षापणाद्वा प्रतिश्च * । कार्षापणाद्वा टिठन्वक्तव्यः । वा च प्रतिरादेशो वक्तव्यः । कार्षापणिकः । कार्षापणिकी । प्रतिकः । प्रतिकी ।

दस्ति । हलन्त्यमिति श्रुतेर्बलीयस्त्वादृत इति प्रकरणस्य दुर्बलस्य बाधोपपत्तौ प्रयोजनलाभात् । न चेति । पञ्चमी हि प्रत्ययस्वरूपमुत्पादयति । यथा गुप्तिज्किद्भ्यः सन्निति न तु षष्ठीं प्रकल्पयति । अतः षष्ठीप्रकल्पनाभावादिति भावः । प्रकृतश्चेति । स्वरितत्वप्रतिज्ञानादिति भावः । ननु विधानार्थापि कनो वृत्तिः संभवति । इटा मा बाधीति तत्रेट्कनौ वा भवतः पक्षे ठञिति प्रत्ययत्रयं स्यात् । नैष दोषः । पूर्वसूत्रेण तावत् कन्विहितस्तस्येहानुवृत्तिर्विधानार्था न भवतीति प्रतीतिरुपजायते । तस्मादित्युत्तरस्यैषा परिभाषावतिष्ठते तत्र किमनिष्टप्रकल्पनयानेकबाधोस्तु अथेष्टप्रकल्पनया सर्वानुग्रह इति । तत्र सर्वानुग्रहो न्याय्यः लक्ष्यस्य तथावस्थाना च्च ॥ २३ ॥

विंशति ॥ प्रत्ययान्तनिपातनमिति । कन्प्रत्ययान्तोच्चारणमित्यर्थः । ननु विंशतिशब्दे शतिचः प्रत्ययत्वात्तिशब्दस्यानर्थक्यात् प्रतिषेधप्रसङ्गाभावात्किं ज्ञापकाश्रयणेन । उच्यते । द्विदशशब्दस्य विंशादेशस्तिप्रत्यय इत्येषा प्रक्रियाश्रीयते । एवं हि ज्ञापकाश्रयेण त्रिंशत्कशब्दोपि सिध्यति । अन्यथा त्रिंशच्छब्दे शतोर्थवत्त्वादशदन्ताया इति प्रतिषेधः स्यात् । ननु विंशतिशब्दादज्ञाताद्यर्थविवक्षायां कन्प्रत्यये विंशतिकशब्दः स्यादिति कथं ज्ञापकम् । नैतदस्ति । स्वार्थिके कन्प्रत्यये विंशतिकाया इति निर्देशः स्याद् असंज्ञायां ड्वुनो विधानात् संज्ञाविषयमेव ज्ञापकमाश्रयणीयम् । योगापेक्षमिति । यथा पुंवदिति योगापेक्षत्वाज्ज्ञापकस्य वत्यर्थे नञ्स्नञोरप्रवृत्तौ स्त्रीवदित्यपि भवति । एवमेतद्योगापेक्षं विंशतिकादिति ज्ञापकमिति त्रिंशत्कशब्दोपि संज्ञायां भवतीत्यर्थः ॥ २४ ॥

कंसात् । अर्धिकशब्दइति । अर्द्धशब्दः कार्षापणस्यार्द्धे रूढ इति भागवदपेक्षायामसामर्थ्यं नाशङ्कनीयमिति केचिदाहुः । अन्ये तु प्रकरणादिवशाद्यदा निर्ज्ञातो भागविशेषो भवति तदा नास्त्यसामर्थ्यमिति सर्वस्यैवार्द्धस्य ग्रहणेन भाव्यमित्याहुः ॥ २५ ॥

Indira Gandhi National Centre for the Arts

अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम् ॥ २८ ॥ द्विगोर्लुक्युक्तम्* । किमुक्तम्। तत्र तावदुक्तं द्विगोर्लुकि तन्निमित्तग्रहणम्। अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपीति । इहापि द्विगोर्लुकि तन्निमित्तग्रहणं कर्त्तव्यम्। द्विगोर्निमित्तं यस्तद्धितस्तस्य लुग्भवतीति वक्तव्यम् । इह मा भूत् [illegible]भ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्। द्विशूर्पेण क्रीतं द्विशौर्पिकम् । त्रिशौर्पिकम् । अर्थविशेषसंप्रत्यये तन्निमित्तादपि*। अर्थविशेषस्यासंप्रत्ययेऽतन्निमित्तादपीति वक्तव्यम्। किं प्रयोजनम्। द्वयोः शूर्पयोः समाहारः द्विशूर्पी। द्विशूर्प्या क्रीतमिति विगृह्य द्विशूर्पमित्येव यथा स्यात्। अथ क्रियमाणेपि तन्निमित्तग्रहणे कथमिदं विज्ञायते। तस्य निमित्तं तन्निमित्तं तन्निमित्तादिति।आहो स्वित्स निमित्तं यस्य सोयं तन्निमित्तः। तन्निमित्तादिति। किं चातः। यदि विज्ञायते तस्य निमित्तं तन्निमित्तं तन्निमित्तादिति। क्रियमाणेपि हि तन्निमित्तग्रहणेऽत्र प्राप्नोति। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्। द्विशूर्पेण क्रीतं द्विशौर्पिकम् । त्रिशौर्पिकम्। अथ विज्ञायते स निमित्तमस्य सोयं तन्निमित्तस्तन्निमित्तादिति। न दोषो भवति। यथा न दोषस्तथास्तु। स निमित्तमस्य सोयं तन्निमित्तस्तन्निमित्तादिति विज्ञायते । कुत एतत्। यदयमाह। अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपीति। तर्हि तन्निमित्तग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्। द्विगोरिति नैषा पञ्चमी। का तर्हि। संबन्धषष्ठी द्विगोस्तद्धितस्य लुग्भवति। द्विगोर्यस्तद्धितः । किं च द्विगोस्तद्धितः। निमित्तम्। यस्मिन् द्विगुरित्येतद्भवति। कस्मिंश्चैतद्भवति । प्रत्यये। इदं तर्हि वक्तव्यम्। अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपीति। एतच्च न वक्तव्यम्। इहास्माभिस्त्रैशब्दयं साध्यम्। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पमिति। द्विशूर्प्या क्रीतं द्विशूर्पमिति। तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः करिष्यते । अपरस्मादुत्पत्तिर्भविष्यति अव्यविकन्यायेन। तद्यथा अवेर्मांसमिति विगृह्य अविकशब्दादुत्पत्तिर्भवति आविकमिति। एवमिहापि द्वाभ्यां शूर्पाभ्यां क्रीतमिति विगृह्य द्विशूर्पमिति भविष्यति। द्विशूर्प्या क्रीतमिति विगृह्य वाक्यमेव भविष्यति । असंज्ञायामिति किमर्थम्। पाञ्चलोहितिकम्। पाञ्चकलापिकम्। संज्ञाप्रतिषेधानर्थक्यं च तन्निमित्तत्वाल्लोपस्य *। संज्ञाप्रतिषेधश्चानर्थकः । किं कारणम्। तन्निमित्तत्वाल्लोपस्य। नान्तरेण तद्धितं तद्धितस्य च लुकं द्विगुसंज्ञास्ति। यस्तस्मादुत्पद्यते नासौ तन्निमित्तः स्यात्।

अध्यर्द्ध ॥ द्विगोर्लुक्युक्तमिति । द्विगोर्लुगनपत्य इत्यत्र भाष्ये व्याख्यातमिति तत एव बोध्यम्। संज्ञाप्रतिषेधानर्थक्यमिति। इह वृत्तिकारा असंज्ञाग्रहणं प्रत्ययान्तविशेषणं व्याचक्षते न चेत् प्रत्ययान्तं संज्ञेति पाञ्चलौहितिकपाञ्चकालापिकशब्दौ च परिमाणविशेषस्य संज्ञे इति लुङ्न भवति। वार्त्तिककारस्तु द्विगुविशेषणमसंज्ञाग्रहणं सन्निधानादवगम्य प्रत्याचष्टे तन्निमित्तत्वादिति। तस्याः संज्ञाया लोप एव निमित्तमित्यर्थः। पञ्चलोहितपञ्चकलापशब्दौ द्विगुकृततद्धितलुकावेव संज्ञे ततो नार्थः प्रतिषे-

एवं तर्हि इदं स्यात्पञ्चानां लोहितानां समाहारः पञ्चलोहिती । पञ्चलोहित्या क्रीतमिति । अत्रापि पञ्चलोहितमित्येव भवितव्यम् । कथम् । उक्तं ह्येतत् । अर्थविशेषासंप्रत्यये ऽतन्निमित्तादपीति । उक्तं संख्यात्वे प्रयोजनं तस्मादिहाध्यर्द्धग्रहणानर्थक्यम् * । उक्तं संख्यात्वे ऽध्यर्द्धग्रहणस्य प्रयोजनम् । किमुक्तम् । अध्यर्द्धग्रहणं च समासकन्विध्यर्थं लुकि चाग्रहणमिति । तस्मादिहाध्यर्द्धग्रहणमनर्थकम् । द्विगोरित्येव लुक् सिद्धः ॥

विभाषा कार्षापणसहस्राभ्याम् ॥ २९ ॥ कार्षापणसहस्राभ्यां सुवर्णशतमानयोरुपसंख्यानम् * । कार्षापणसहस्राभ्यां सुवर्णशतमानयोरुपसंख्यानं कर्त्तव्यम् । अध्यर्द्धसुवर्णम् । अध्यर्धसौवर्णिकम् । अध्यर्द्धशतमानम् । अध्यर्द्धशातमानम् । द्विशतमानम् ॥ द्विशातमानम् ॥

द्वित्रिपूर्वान्निष्कात् ॥ ३० ॥ **बिस्ताच्च** ॥ ३१ ॥ द्वित्रिभ्यां द्वैयोग्यम् * । द्वित्रिभ्यामिति यदुच्यते तद् द्वैयोग्यामिति द्रष्टव्यम् । किमिदं द्वैयोग्यमिति । द्वयोर्योगयोर्भवं द्वियोगं द्वियोगस्य भावो द्वैयोग्यमिति । तद् द्वैष्यं विजानीयात् । अविशेषेणोत उत्तरं द्वित्रिभ्यामिति । तदाचार्यः सुहृद् भूत्वान्वाचष्टे द्वित्रिभ्यां द्वैयोग्यमिति । तत्र च बहुग्रहणम् * । तत्र च बहुग्रहणं कर्त्तव्यम् । बहुनिष्कम् । बहुनैष्किकम् । बहुबिस्तम् । बहुबैस्तिकम् ।

खार्या ईकन् ॥ ३३ ॥ खार्या ईकन् केवलायाश्च * । खार्या ईकन् केवलायाश्चेति वक्तव्यम् । खारीकम् । काकिण्याश्चोपसंख्यानम् * । काकिण्याश्चोपसंख्यानं कर्त्तव्यम् । अध्यर्द्धकाकिणीकं द्विकाकिणीकम् । केवलायाश्च * । केवलायाश्चेति वक्तव्यम् । काकिणीकम् ॥

नेत्यर्थः । पञ्चलोहितीति । समाहारद्विगुं संज्ञां मन्यते ततश्च नलोपनिमित्तैव संज्ञा । अत्रापीति । अव्यविकन्यायेन वाक्यविषय एव समाहारद्विगुरित्यर्थः । अध्यर्द्धग्रहणं चेति । बहुगणादिसूत्र इदमुक्तम् । न च संख्याकार्याभावज्ञापनमध्यर्द्धग्रहणस्येह प्रयोजनम् । कन्समासाभावप्रसङ्गात् । तस्मात्तत्रत्यवार्त्तिकमेव कर्त्तव्यम् । तस्मिंश्च सति इहाध्यर्द्धग्रहणमनर्थकं द्विगुत्वाल्लुकः सिद्धत्वात् ॥ २८ ॥

विभाषा कार्षापण ॥ अध्यर्द्धसुवर्णमिति । अध्यर्द्धेन सुवर्णेन क्रीतमिति द्विगौ कृते ठञो लुक् । अलुक्पक्षे परिमाणान्तस्येत्युत्तरपदवृद्धिः । उन्मानस्यापि वृद्धौ ग्रहणप्रतिषेधात्ग्रहणात् । द्विशातमानमिति । शतमानादिसूत्रेणाण् ॥ २९ ॥

द्वित्रि ॥ द्वयोर्योगयोरिति । तद्धितार्थे द्विगौ कृते बह्वचोन्तोदात्ताट्ठञ् । द्विगोर्लुगनपत्ये इति लुक् । अथ द्विगुर्न व्याख्यातव्यनाम तदा अण एव लुक् । द्वैयोग्यशब्देन चाधाराधेयभाव उच्यते । समासकृत्तद्धितेषु संबन्धाभिधानमिति वचनात् ॥३०।३१॥

खार्या ॥ केवलायाश्चेति । अध्यर्द्धपूर्वद्विगोरित्यधिकारात्केवलाया न प्राप्नोतीति वचनम् ॥ ३२ ॥

Indira Gandhi National Centre for the Arts

शाणाद्वा ॥ ३५॥ शतशाणाभ्यां वा * । शतशाणाभ्यां वेति वक्तव्यम् । अध्यर्धशतमध्यर्द्धशत्यम् । पञ्चशतम् । पञ्चशत्यम् । अध्यर्द्धशाणमध्यर्धशाण्यम् । पञ्चशाणं पञ्चशाण्यम् । द्वित्रिपूर्वादण्च * । द्वित्रिपूर्वादण्चेति वक्तव्यम् । द्विशाणम् । त्रिशाणम् । द्वैशाणम् । त्रैशाणम् । द्विशाण्यम् । त्रिशाण्यम् ॥

तेन क्रीतम्॥ ३७ ॥ तेन क्रीतमिति करणात् * । तेन क्रीतमित्यत्र करणादिति वक्तव्यम् । इह मा भूद् । देवदत्तेन क्रीतं यज्ञदत्तेन क्रीतमिति । अकर्त्रेकान्तात् * । अकर्त्रेकान्तादिति वक्तव्यम् । इह मा भूत् । देवदत्तेन पाणिना क्रीतमिति । संख्यैकवचनाद् द्विगोश्चोपसंख्यानम् * । संख्याया इति वक्तव्यम् । इहापि यथा स्यात् । पञ्चभिः क्रीतं पञ्चकम् । किं पुनः कारणं न सिध्यति । एकवचनान्तादिति वक्ष्यति । तस्यायं परस्तादपकर्षः । एकवचनात् । एकवचनान्तादिति वक्तव्यम् । इह मा भूत् । शूर्पाभ्यां क्रीतं शूर्पैः क्रीतमिति । द्विगोश्चेति वक्तव्यम् । इहापि यथा स्यात् । द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं त्रिशूर्पमिति । यद्येकवचनान्तादित्युच्यते । मुद्गैः क्रीतं मौद्गिकं माषैः क्रीतं माषिकमिति न सिध्यति । परिमाणस्य संख्याया यदेकवचनं तदन्तादिति वक्तव्यम् । तत्तर्ह्येकवचनान्तादिति वक्तव्यम् । तस्मिंश्च क्रियमाणे बहु वक्तव्यं भवति । न वक्तव्यम् । कस्मान्न भवति शूर्पाभ्यां क्रीतं शूर्पैः क्रीतमिति । उक्तं वा * । किमुक्तम् । अनभिधानादिति । यद्येवं करणादकर्त्रेकान्तादित्यपि न वक्तव्यम् । कर्तुः कर्त्रेकान्ताद्वा कस्मान्न भवति । अनभिधानात् ॥

तस्य निमित्तं संयोगोत्पातौ ॥ ३८ । संयोगोत्पातयोः को विशेषः । संयोगो नाम स भवति इदं कृत्वेदमवाप्यत इति । उत्पातो नाम स भवति

शाणा ॥ शतशाणाभ्यामिति । शतान्तात्पूर्वेण नित्ये यति प्राप्ते विकल्पार्थं वचनम् । यदभावपक्षे ठनो लुक् । द्वित्रिपूर्वादण्चेति सूत्रेत्वनार्षः पाठ इति वार्तिकारम्भः ॥ ३५ ॥

तेन क्रीतम् ॥ सङ्ख्यैकवचनादिति । समाहारद्वन्द्वः । परिमाणस्येति । परिमाणस्य या संख्या तस्या यद्वाचकं द्योतकं वैकवचनं तदन्तादिति वक्तव्यमिति वचनाद् मुद्गादीनां चाप्रतिषेधः । अनभिधानादिति । वृत्तौ संख्याविशेषानवगमात् परिमाणशब्देभ्यो द्विवचनबहुवचनान्तेभ्यः प्रत्ययाभावः । एकत्वसंख्यायुक्ते चार्थे तेषां स्वभावतो वृत्त्येकवचनान्तेभ्यएव प्रत्ययः । द्व्यादयस्तु शब्दा लुप्तायामपि विभक्तौ स्वप्रवृत्तिनिमित्तभूतां संख्यामवगमयन्तीति तेभ्यः प्रत्ययो भवत्येव एकया च मुद्गादिव्यक्त्या क्रयासंभवाद् बहुवचनान्तादेव प्रत्ययः । यदा तु जातिशब्दत्वं मुद्गादीनामभ्युपेयते तदैकवचनान्तेभ्योपि प्रत्ययः । ननु यन्निष्केण क्रीतं तस्य निष्को वस्नो भवतीति सोस्यांशवस्नभृतय इत्यनेन प्रत्ययः सिद्ध इति नार्थोनेन योगेन । अत्राहुः । यस्य यत् मूल्यं न भवति अथ च तेन क्रीतं कार्यवशात्तदर्थमिदम् ॥ ३७ ॥

तस्य ॥ संयोगोत्पातयोरिति । कोऽनयोः शब्दयोरर्थ इति प्रश्नः । नत्वेकार्थत्वं मन्य-

Indira Gandhi National Centre for the Arts

याहच्छिको भेदो वा छेदो वा पद्मं वा पर्ण वा । तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम् * । तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानं कर्तव्यम् । वातस्य शमनं कोपनं वा वातिकम् । पैत्तिकम्। श्लैष्मिकम् । संनिपाताच्च * । सन्निपाताच्चेति वक्तव्यम् । सान्निपातिकम् ॥

गोद्व्यचो ऽसंख्यापरिमाणाश्वादेर्यत् ।। ३९ ॥ यत्प्रकरणे ब्रह्मवर्चसाच्च * । यत्प्रकरणे ब्रह्मवर्चसाच्चोपसंख्यानं कर्तव्यम् । ब्रह्मवर्चसस्य निमित्तं संयोगः ब्रह्मवर्चस्यः । उत्पातो वा ॥

तदस्मिन् वृद्ध्यायलाभशुल्कोपदादीयते ॥४७॥ तदस्मिन् दीयतेऽस्मा इति च* । तदस्मिन् दीयतेऽस्माइति चेति वक्तव्यम्।पञ्च वृद्धिर्वा आयो वा लाभो वा शुल्को वा उपदा वा दीयते अस्मै पञ्चकः । सप्तकः । अष्टकः । नवकः । दशकः । तर्त्तार्हि उपसंख्यानं कर्तव्यम् । न कर्तव्यम् । यद्धि यस्मै दीयते तस्मिन्नपि तद्दीयते तत्र तदस्मिन् दीयते इत्येव सिद्धम् ॥

पूरणार्द्धाट्ठन् ॥ ४८ ॥ ठन्प्रकरणे ऽन्नन्तादुपसंख्यानम् * । ठन्प्रकरणे ऽन्नन्तादुपसंख्यानं कर्तव्यम् । द्वितीयिकः । तृतीयिकः । किं पुनः कारणं न सिध्यति । पूरणादित्युच्यते । न चैतत्पूरणान्तम् । अनैतत्पर्यवपन्नम् । पूरणं नामार्थः । तमर्थमाह तीयशब्दः । पूरणं सोऽसौ भवति । पूरणान्तात्स्वार्थे भागे अन्नसोपि पूरणं भवत्येव ॥

मानस्य प्रश्नः । कोऽसौ विशेषः, येन संयोगोत्पातौ प्रतिपद्यामहे । इदं कृत्वेति । यथा काम्यैर्यागैः पुत्रादयोऽवाप्यन्ते तत्र संयुज्यन्ते फलविशेषेण येन यागादिना करणेन स यागादिरर्थः संयोगः । याहच्छिक इति अतर्कितोपनतः । भेद इति । वस्त्रादेः । छेद इति । उपानदादेः । भाविनः शुभस्याशुभस्य वा सूचकोऽर्थ उत्पात इत्यर्थः। तस्य च निमित्तत्वं फलविशेषविषयबुद्ध्युत्पत्तिहेतुत्वात् न तु फलं प्रतिकरणत्वात् । वार्तिकमिति । शमनकोपने एवात्र प्रत्ययार्थः । न तु निमित्तम् । ठगत्र प्रत्ययः । प्रकारणादिवशाच्च काचिच्छमनं प्रतीयते कचित्कोपनम् ॥ ३८ ॥

गोद्व्यचो ॥ ब्रह्मवर्चस्य इति । ब्रह्मणो वर्चो ब्रह्मवर्चसं वृत्तस्वाध्यायसंपदुच्यते । ब्रह्महस्तिभ्यां वर्चस इत्यच्समासान्तः ॥ ३९ ॥

तदस्मिन् । यत्र नदीद्वारादौ शुल्कादि दीयते तत्र प्रत्ययो विधीयमानः सम्प्रदानेन प्राप्नोतीत्याह तदस्मिन्निति । तस्मिन्नपीति । सम्प्रदानमेव दानक्रियापेक्षयाधिकरणत्वेन विवक्ष्यते । यथा समममब्राह्मणे दानमिति ॥ ४७ ॥

पूरणा ॥ अन्नन्तादिति । यथा गोस्त्रियोरित्यत्र स्त्रीशब्देन स्त्र्यधिकारविहितानां टाबादीनां ग्रहणमेवमिहापि पूरणाधिकारविहिता एव डडादयो गृह्येरन्निति वचनम् । द्वितीयिकइति । द्वयोः पूरणो भाग इति द्वेस्तीयस्तदन्तात्पूरणाद्भागे तीयादन्निति स्वार्थे अन्प्रत्ययः । ततो द्वितीयो वृद्ध्यादिरस्मिन् दीयत इति ठन् प्रत्ययः । पर्यवपन्नमिति ।

Indira Gandhi National Centre for the Arts

सम्भवत्यवहरति पचति ॥ ५२ ॥ तत्पचतीति द्रोणादण् * । तत्पचतीति द्रोणादण् चेति वक्तव्यम् । द्रोणं पचति द्रौणी द्रौणिकी ॥

कुलिजाल्लुक्खौ च ॥ ५५ ॥ कुलिजाच्चेति सिद्धे लुक्खग्रहणानर्थक्यं पूर्वस्मिन् त्रिकभावात् * । कुलिजाच्चेत्येव सिद्धं नार्थो लुक्खग्रहणेन । किं कारणम् । पूर्वस्मिन् त्रिकभावात् । पूर्वस्मिन् योगे सर्व एष त्रिको निर्दिश्यते । द्व्याढकी । द्व्याढकिकी । द्व्याढकीना ॥

तदस्य परिमाणम् ॥५७॥ संख्यायाः संज्ञासंघसूत्राध्ययनेषु॥५८॥ संज्ञायां स्वार्थे * । संज्ञायां स्वार्थे कन् प्रत्यय उत्पाद्यः । पञ्चैव पञ्चकाः शकुनयः । त्रिकाः । शालङ्कायनाः । सप्तका ब्रह्मवृक्षाः । ततः परिमाणिनि * । ततः परः प्रत्ययः परिमाणिनीति वक्तव्यम् । पञ्चकः संघः । दशकः संघः । जीवितपरिमाणे चोपसंख्यानम् * । जीवितपरिमाणे चोपसंख्यानं कर्त्तव्यम् । षष्टिर्जीवितपरिमाणमस्य षाष्टिकः । साप्ततिकः । जीवितपरिमाणे चेत्यनर्थकं वचनं कालादिति सिद्धत्वात् * । जीवितपरिमाणे चेत्यनर्थकं वचनम् । किं कारणम् । कालादिति सिद्धत्वात् । कालादित्येव सिद्धम् । इह यस्य षष्टिर्जीवितपरिमाणं षष्टिर्जीवितमसौ भृतो भवति । तत्र तमधीष्टो भृतो भूतो भावीत्येव

व्यवहितमित्यर्थः । पूरणं नामेति । अर्थग्रहणमिह न तु पूरणाधिकारविहितप्रत्ययग्रहणमिति भावः । स्वार्थ इति । स्वस्याः प्रकृतेरर्थः स्वार्थः । सा हि प्रत्ययस्यात्मीया तदर्थे चाभिधीयमानः पूरणाभिधायित्वात्पूरणव्यपदेशमासादयतीत्यर्थः ॥ ४८ ॥

सम्भ ॥ द्रोणादिति । द्रोणपरिमिते व्रीह्यादौ वर्त्तमानाद् द्रोणशब्दात्प्रत्ययस्तस्यैव पाकसम्भवात् ॥ ५२ ॥

कुलि ॥ कुलिजाच्चेति सिद्ध इति । कुलिजाच्चेत्येव सूत्रमस्तु द्विगोष्ठंश्चेत्यनुवर्त्तते खोऽन्यतरस्यामिति च तत्र ष्ठन्खाभ्यां मुक्ते पक्षे ठञ् तस्याध्यर्द्धपूर्वेति लुक् । एवं रूपत्रयं सिद्धम् । न च ठञः पक्षे लुगभावेन चतुर्थं रूपमिष्यत इति लुक्खग्रहणं वार्त्तिककृता प्रत्याख्यातम् ॥ ५५ ॥

तदस्य ॥ संज्ञायां स्वार्थ इति । इहादशभ्यः संख्या संख्येये वर्त्तन्ते न तु संख्यानमात्रे ततः परा तु संख्या संख्याने संख्येये च । तत्र य एव शकुनयः पञ्चत्वसंख्यायुक्ताः पञ्चशब्दस्य वाच्यास्त एव पञ्चकशब्दस्यापि । ततश्च परिमाणपरिमाणिभावाभावात् स्वार्थ एव प्रत्ययो वक्तव्यः । यदा तु वृत्तिविषये संख्यामात्रवृत्तित्वं पञ्चादीनामाश्रीयते । तथा च द्व्येकयोरितिसूत्रकारेण द्वित्वैकत्वे द्व्येकशब्दवाच्ये आश्रित्य निर्देशः कृतः संख्येयार्थत्वे हि द्व्येकेष्विति स्यात् तदा परिमाणपरिमाणिभावाश्रयेणापि शक्यः प्रत्यय उत्पादयितुम् । जीवितपरिमाणे चेति । पूर्वापेक्षः समुच्चयः । संघा-

Indira Gandhi National Centre for the Arts

सिद्धम् । अवश्यं चैतदेवं विज्ञेयम् । इह वचने हि लुक्प्रसङ्गः * । इह हि क्रियमाणे लुक् प्रसज्येत । द्विषाष्टिकः । त्रिषाष्टिकः । अनेन सति लुग्भवति । तेन सति कस्मान्न भवति । आर्हादित्युच्यते । न सिध्यति । किं कारणम् । न हीमे कालशब्दाः । किं तर्हि । संख्याशब्दाः । इमेऽपि कालशब्दाः । कथम् । संख्या संख्येये वर्त्तते यदि तर्हि यो यः काले वर्त्तते स स कालशब्दः रमणीयादिष्वतिप्रसङ्गो भवति । रमणीयं कालं भूतः शोभनं कालं भूतः । अथ मतमेतत् काले दृष्टः शब्दः कालशब्दः काले यो न व्यभिचरतीति । न रमणीयादिष्वतिप्रसङ्गो भवति । जीवितपरिमाणे तूपसंख्यानं कर्त्तव्यम् । इह चोपसंख्यानं कर्त्तव्यम् । वार्षशतिको वार्षसहस्रिक इति । किं पुनः कारणं न सिध्यति । न हि वर्षशब्दः संख्या । किं तर्हि । संख्येये वर्त्तते वर्षशब्दः । एवं तर्ह्यन्येभ्योपि दृश्यते खारशताद्यर्थम् * । अन्येभ्योपि दृश्यत इति वक्तव्यम् । किं प्रयोजनम् । खारशताद्यर्थम् । खारशतिको राशिः । खारसहस्रिको राशिः । अयं तर्हि दोषः । इह वचने हि लुक्प्रसङ्ग इति । न ब्रूमो यत्र क्रियमाणे दोषस्तत्र कर्त्तव्यमिति । किं तर्हि । यत्र क्रियमाणे न दोषो भवति तत्र कर्त्तव्यम् । क्व च क्रियमाणे न दोषः । परमार्हात् । तत्तर्हि उपसंख्यानं कर्त्तव्यम् । न कर्त्तव्यम् । कालादित्येव सिद्धम् । ननु चोक्तं नेमे कालशब्दाः किं तर्हि संख्याशब्दा इति । ननु चोक्तमिमेपि कालशब्दाः । कथं संख्या संख्येये वर्त्तते । ननु चोक्तं यदि तर्हि यो यः शब्दः काले वर्त्तते स स कालशब्दः रमणीयादिष्वतिप्रसङ्गो भवतीति । उक्तं वा * । किमुक्तम् । अनभिधानादिति । अनभिधानाद्रमणीयादिषूत्पत्तिर्न भविष्यति । स्तोमे डविधिः पञ्चदशाद्यर्थः * । स्तोमे डो विधेयः । किं प्रयोजनम् । पञ्च-

---

दिषु प्रत्ययो विधीयमानोऽन्यत्र न प्राप्नोतीति वचनम् । द्विषाष्टिक इति । संख्याया सम्वत्सरसंख्यस्येत्युत्तरपदवृद्धिः । आर्हादिति । अध्यर्धपूर्वेत्यत्रार्हादित्यनुवर्त्तनादार्हीयस्य लुका भाव्यम् । तमधीष्टइत्यनेन प्रत्ययोऽर्हात्पर इति तस्य लुगभावः । न हीम इति । सामाद्य एव कालशब्दा न तु निमित्तान्तरेण काले प्रयोगमात्रेणेति भावः । संख्यासंख्येय इति । काले संख्येये वर्त्तमानस्य संख्यावाचिनः कालाभिधायित्वमुपपन्नमिति भावः । वार्षशतिक इति । संख्यायाः प्रत्ययो विधीयमानस्तदन्तान्न प्राप्नोति । संख्या पूर्वपदानामेव प्राग्वतेस्तदन्तविधिरिष्यते । खारशताद्यर्थमिति । खारशब्दोऽकारान्तो वार्त्तिककारवचनात् साधुः । तदस्य परिमाणमिति योगविभागः कर्त्तव्य इत्युक्तं भवति । अनभिधानादिति । नहि रमणीयादयो वृत्तिविषये काले वर्तन्ते षष्ठ्यादयस्तु वृत्तौ संख्येयेषु सम्वत्सरेषु स्वभावतो वर्त्तन्त इति युक्तं तेषां कालवाचित्वम् । लोके च सम्वत्सरसंख्यया जीवितं प्रायेण परिच्छिद्यतइति सम्वत्सरवृत्तित्वं षष्ठ्यादीनामुच्यते । स्तोमे डविधिरिति । डित्करण विंशः स्तोमस्त्रिंशः

Indira Gandhi National Centre for the Arts

दशाद्यर्थम् । पञ्चदशस्तोमः । सप्तदश स्तोमं इति । इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये पञ्चमाध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ॥ ५९ ॥ इमे विंशत्यादयः सप्रकृतिकाः सप्रत्ययकाश्च निपात्यन्ते। तत्र न ज्ञायते का प्रकृतिः कः प्रत्ययः कः प्रत्ययार्थ इति। तत्र वक्तव्यमियं प्रकृतिरयं प्रत्ययः अयं प्रत्ययार्थ इति। इमे ब्रूमः द्विशब्दादयं दशदर्थाभिधायिनः स्वार्थे शतिच् प्रत्ययो निपात्यते विन्भावश्च द्वौ दशतौ विंशतिः। विंशत्यादयो दशदर्थे चेत्समासवचनानुपपत्तिः *। विंशत्यादयो दशदर्थे चेत्समासो नोपपद्यते। विंशतिगवमिति। किं कारणम्। द्रव्यमनभिहितं तस्यानभिहित-

---

स्तोम इत्यादौ टिलोपार्थं पञ्चदश इत्यत्र तु नस्तद्धित इति टिलोपः सिध्यति। स्तोमो मन्त्रसमूहः ॥ ५७ ॥ ५८ ॥

इत्युपाध्यायजैयटपुत्रकैयटविरचिते भाष्यप्रदीपे पञ्चमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

पङ्क्ति ॥ इमे विंशत्यादय इति। सूत्रे पठितानां प्रत्यक्षत्वादिदमा परामर्शः। पङ्क्तिशब्दश्छन्दोविशेषे सन्निवेशविशेषे च रूढो नैवावयवार्थानुसारेण प्रवर्तत इति तत्परित्यागेन विंशत्यादय एव विचार्यन्ते। वक्ष्यमाणवार्त्तिकावतारणार्थं चायं भाष्यउपक्षेपः। सप्रकृतिका इति। प्रकृतिप्रत्ययप्रकरणे उच्चारणादिति भावः। सहशब्दोत्र विद्यमानार्थः। न तुल्ययोगार्थः। तेन विद्यमानप्रकृतिप्रत्यया इत्यर्थः। निपात्यन्त इति। प्रकृतित्वमेषां कस्मान्न विज्ञायते। पञ्चम्याः प्रत्ययस्य चानुपादानादनिष्पन्नस्य च प्रकृतित्वाभावात्। प्रत्ययत्वं तर्हि कस्मादेषां न भवति। लोके केवलानां प्रयोगदर्शनात्। शताच्च ठन्यतावशते विंशत्यादिभ्य इति शास्त्रे च केवलानामुच्चारणात्। विधिनिपातनयोश्चायं भेदो यत्रावयवा निर्दिश्यन्ते समुदायोऽनुमीयते स विधिः। यत्र तु समुदायः श्रूयते अवयवाश्चानुमीयन्ते तन्निपातनम्। का प्रकृतिरिति। प्रकृतिप्रत्ययाविशेषयोः प्रश्नः। प्रकृत्यर्थं तु न पृच्छति। प्रकृतौ विज्ञातायां तदर्थस्यापि विज्ञानात्। कः प्रत्ययार्थ इति। लोके विंशत्यादीनां संख्येये च प्रयोगो दृश्यते तत्र लौकिकार्थानुगुणं प्रत्ययार्थमाश्रित्य साधुत्वायैषामन्वाख्यानं क्रियत इत्यर्थः। इमे इति। वचनक्रियायामाभिमुख्यं प्रतिपादयितुं प्रत्यक्षार्थसर्वनामोपादानम्। वचनमात्रं चेह विवक्षितं न तु कर्त्रभिप्रायं क्रियाफलमित्यात्मनेपदं न कृतम्। द्विशब्दादिति। दशद्गलक्षणसंख्येयवाचिन इत्यर्थः। समुदाये च निपात्यमाने नान्तरीयकमवयवानां निपातनमित्यभिप्रायेण शतिच्प्रत्ययो निपात्यत इत्युच्यते। स्वार्थ इति। प्रत्ययस्य स्वात्मीया प्रकृतिस्तस्य अर्थ इत्यर्थः। अथ वा यः प्रकृतेरर्थः स एव प्रत्ययानां स्वार्थः पितृधनमिव पुत्रस्य तत्रैवार्थेऽभिमतः। न हि समासमात्रं वचनमात्रं वा न सिध्यति। विंशतिगवमिति। विंशतिशब्देन द्वयोर्दशतोरभिधानं न तु दशत्संबन्धिनां द्रव्याणाम्। ततश्च दशदपेक्षया गवां व्यतिरेकोपजननात् षष्ठ्या भाव्यम्। गवां विंशतिरिति। ततः समाना-

Indira Gandhi National Centre for the Arts

त्वात् षष्ठी प्राप्नोति। षष्ठ्यन्तं च समासे पूर्वं निपतति। तत्र गोविंशतिरिति प्राप्नोति। न चैवं भवितव्यम्। गोविंशतिरिति। भवितव्यं च। विंशतिगवं तु न सिध्यति। इह च त्रिंशत्पूली। पञ्चाशत्पूली। चत्वारिंशत्पूली। समानाधिकरणलक्षणः समासो न प्राप्नोति। वचनं च विधेयम्। विंशतिः। द्वित्वादशतोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। एवं तर्हि परिमाणिनि विंशत्यादयो भविष्यन्ति। परिमाणिनि चेत् पुनः स्वार्थे प्रत्ययविधानम् *। परिमाणिनि चेत् पुनः स्वार्थे प्रत्ययो विधेयः। विंशकः संघः। षष्ठीवचनविधिश्च *। षष्ठी च विधेया। गवां विंशतिः। द्रव्यमभिहितं तस्याभिहितत्वात् षष्ठी न प्राप्नोति। एकवचनं च विधेयम्। विंशतिर्गावः। गोभिः सामानाधिकरण्याद्बहुषु बहुवचनमिति बहुवचनं प्राप्नोति। अनारम्भो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिषु *। अनारम्भो वा पुनः विंशत्यादीनां न्याय्यः। कथं सिध्यति। प्रातिपदिकवि-

---

धिकरणपदनिबन्धनद्विगुसमासाप्रसङ्गः। षष्ठ्यन्तं चेति। उपसर्जनं पूर्वमिति लक्षणेन। गुणेन षष्ठी न समस्यत इति प्रतिषेधः संख्याया न भवति शतसहस्रान्ताच्च निष्कादिति प्रत्ययविधानाज् ज्ञापकात् क्रोशशतयोजनशतयोरिति वार्त्तिकवचनाच्च द्विवचनं प्राप्नोतीति। स्वार्थिकाः प्राकृतलिङ्गमेव केचिदतिवर्त्तन्ते न तु संख्यामपि संख्यान्तराविरोधात्। लिङ्गानां तु विरोधाभावः स्त्रीसूत्रे प्रतिपादितः। एवं तर्हीति। तदस्य परिमाणमित्यधिकारात्परिमाणोपाधेः संख्याया अस्येति परिमाणिनि प्रत्ययः। परिमाणी च द्विविधः। द्रव्यसंघातो भिन्नानि वा द्रव्याणि। तत्र संघस्यैकत्वाद् विंशतिरित्येकवचनं सिध्यति। द्रव्याणां तु परिमाणित्वे विंशतिगवं त्रिंशत्पूलीति समानाधिकरणसमाससिद्धिरिति भावः। परिमाणं यस्य स संघो विंशतिरित्यभिधीयते। तत्र विंशतिः परिमाणं यस्य संघस्येति संघान्तरस्य परिमाणिनोऽसंभवाद्विंशकः संघ इति सिद्धये विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायामिति ड्वुन्प्रत्ययः स्वार्थे वक्तव्यः। ननु यदा द्रव्याणि परिमाणीनि विंशतिशब्दाभिधेयानि तदा संघे परिमाणिनि प्रत्ययः सिध्यत्येव। विंशतिर्गावः परिमाणमस्य विंशकः संघ इति। एवं तर्हि विंशतिशब्देन संघस्याभिधानं प्राप्नोति न चेष्यते। विंशतिर्गोसंघ इति। तस्माद्यदा संघे परिमाणानि विंशत्यादयो निपात्यन्ते तदा तत्र तेषां केवलानां प्रयोगो मा भूदिति पुनः स्वार्थे नित्यं प्रत्ययो विधेयः। षष्ठीवचनविधिश्चेति। संघे परिमाणिनि विंशत्यादीनां केवलानां नित्यं प्रयोगो नेष्यते भिन्नेषु तु द्रव्येषु परिमाणिषु प्रत्ययोत्पत्तावाश्रीयमाणायां विंशतिशब्देन द्रव्याणामभिधानाद् व्यतिरेकाभावाद् गवां विंशतिरिति षष्ठी न प्राप्नोति द्रव्यसामानाधिकरण्याद् बहुवचनप्रसङ्गश्च। तदेवं व्युत्पत्तिपक्षे दूषणान्यभिधायाव्युत्पत्तिपक्षं निर्दोषमाश्रित्यारम्भं प्रत्याख्यातुमाह अनारम्भो वेति। वाशब्दस्तर्ह्यर्थे। सहस्रादिवदव्युत्पन्ना एव विंशत्यादयोऽर्थवदधातुरिति लब्धप्रातिपदिकसंज्ञा अर्थवत्सूत्रेणानुज्ञातसाभिमानः संख्यायां संख्येये च प्रयोगभेदेनाक्षादिपदवदनेकार्थतया स्वभावतो वर्तमाना रूढिशब्दत्वाच्च नियतलिङ्गसंख्याः यथा आपोदारा इति भावः। इदानीं भाष्यकार आरम्भं समर्थयमान आह

Indira Gandhi National Centre for the Arts

ज्ञानात्। कथं प्रातिपदिकविज्ञानम्। विंशत्यादयोऽव्युत्पन्नानि प्रातिपदिकानि। यथा सहस्रादिषु। तद्यथा। सहस्रमयुतमर्बुदमिति। नचानुगमः क्रियते। भवति चाभिधानम्। यथा सहस्रादिष्वित्युच्यते। अथ सहस्रादिष्वपि कथं भवितव्यम्। सहस्रं गवाम्। सहस्रं गावः। सहस्रगवम्। गोसहस्रमिति। यावताऽत्रापि संदेहः। नासूया कर्त्तव्या अत्रानुगमः क्रियते। ननु चोक्तं विंशत्यादयो दशदर्थे चेत्समासवचनानुपपत्तिः परिमाणिनि चेत्पुनः स्वार्थे प्रत्ययविधानं षष्ठीवचनविधिश्चेति। नैष दोषः। समुदाये विंशत्यादयो भविष्यन्ति। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। संघ इति वर्त्तते। संघः समूहः समुदाय इत्यनर्थान्तरम्। एते विंशत्यादयः समुदाये सन्तो भाववचना भवन्ति। भाववचनाः सन्तो गुणवचना भवन्ति। गुणवचनाः सन्तोऽविशिष्टा भवन्त्यन्यैर्गुणवचनैः। अन्येषु च गुणवचनेषु कदा चिद् गुणः गुणिविशेषको भवति। तद्यथा। शुक्लः पट इति। कदा चिद् गुणिना गुणो व्यपदि-

---

यथेति। अयमत्रार्थः। अक्षादयः परस्परानन्वितानेकार्थाभिधायिनो भिन्नासु जातिषु रूढशब्दा एव न तु यौगिकाः विंशत्यादयः सहस्रादयश्च। शुक्लादिवद् गुणिनि यौगिका एव। नहि संख्यानिरपेक्षाः संख्येयविशेषमेत प्रत्याययन्ति येनैषां रूढिशब्दमुच्येत। अत्रापि संदेह इति। क एषां मुख्यार्थः को वास्तोयमिति संबन्धादौपचारिक इति संदेहः। नासूयेति। अननुगमो हि दोषायाशक्योवानन्त्यात्सर्वशब्दानुगमो नत्वनुगम एव स्वप्रज्ञापराधादशक्यार्थविशेषनिश्चयत्वाद्दोषत्वेनोद्भावनीय इत्यर्थः। समुदाय इति। अस्येति प्रत्ययार्थस्यानुवर्तनात्समुदायः परिमाणी प्रत्ययार्थत्वेनाश्रीयते न तु भिन्नानि द्रव्याणीत्यर्थः। किं वक्तव्यमिति। अस्येत्यनुवर्तनात्परिमाणिमात्रे प्रत्ययो लभ्यते न तु तद्विशेष इति मत्वा प्रश्नः। संघ इति वर्तत इति। पूर्वसूत्रे द्वन्द्वनिर्दिष्टस्यापि संघशब्दस्यैव स्वरितत्वादिहानुवृत्तिः। ननु प्राणिसमूहः संघः ततश्च वृक्षाणां विंशतिरिति न प्राप्नोतीत्याह संघः समूह इति। सामान्येन प्राणिनामप्राणिनां समुदायः संघ इत्यर्थः। ननु चोक्तं परिमाणिनि चेत् पुनः स्वार्थे प्रत्ययविधानमिति। नैष दोषः। द्रव्यसंघयोर्दशतोः संघे प्रत्ययो निपात्यते न तु द्रव्यसंघे। इह द्रव्याणां द्रव्यसंघस्य दशतां दशत्संघस्य च पारमार्थिको भेदो नास्ति केवलं बुद्ध्या परिकल्प्यते। बुद्धिव्यवस्थापितार्थनिबन्धनाश्च शब्दा बुद्धिमेवार्थाकारामुपजनयन्तोऽसत्यपि वास्तवे भेदे भेदमवगमयन्ति। त एत इति। निपातनसामर्थ्याद्विशिष्टे दाशते संघे वर्तमाना भाववचना भवन्ति। भावशब्देनात्र धर्ममात्रमुच्यते। भाव इव भावः यथा पाकादिभावः पराश्रय एवमन्योपि धर्मः पराश्रयत्वाद् भावः। गुणवचना इति। गुणमुक्तवन्तो गुणवचना गुणमुक्त्वा द्रव्यमभिदधतीत्यर्थः। अन्यैरिति। शुक्लादिभिरुभयवचनैस्तुल्या इत्यर्थः। गुणविशेषक इति। भाष्यकारवचनात्कर्तरि चेति अनित्यः षष्ठीसमासनिषेधः। शेषषष्ठ्या वा समासः। अथ वा गुणिनं विशिनष्टीति कर्मण्यण्। ततः स्वार्थे कन्प्रत्ययः। पटः शुक्ल इति। गुणगुणिनोरव्यतिरेकाविवक्षया मतुब्लोपाद्वा सामानाधि-

Indira Gandhi National Centre for the Arts